सर्वसाधारणंधीराउक्तमेवपुरामया॥ कल्पानिदशविद्यावक्रमेणकथयामिते॥ ॥अथश्यामायाविशेषक्रममाह्
स्नानसंध्यादिकंसर्वंपूर्ववत्समुपाश्रयेत्॥ अन्तर्बहिर्मानसोयोगीयागभूमिंतथाविशेत्॥ ॥अथस्थानमाह॥ एकलिंग
श्मशानेवशून्यागारेचतुःपथे॥ तत्रस्थःसाधयेद्योगीविद्यांत्रिभवमोक्षिणीं॥ ॥एतेषांलक्षणमाह॥ पंचक्रोशान्तरेय
त्रनलिंगांतरमीक्ष्यते॥ तदेकलिंगमाख्यातंतत्रसिद्धिरनुत्तमा॥ दह्यंतेव्यसगोपत्रशवकीलकसंकुले॥ गृध्रगोमायुकाका
द्यैर्मांसलुब्धैर्यदावृतं॥ ततश्मशानमित्याख्यातंपिशाचगणसेवितं॥ काकादिगृध्रसंयुक्तंकृमिछत्रादिसंयुतं॥ नागरैर्दु
रनिर्मुक्तंसाध्वसोद्वेगकारणं॥ सौधसंरूढयामाख्यंशून्यागारंतदुच्यते॥ ॥चतुर्णांवपथांयत्रसंयोगोयुगपद्भवे
त्॥ तच्चतुष्पथमित्युक्तंरजन्यामिष्टदायकं॥ पूर्वपूर्वमिदंशस्तंजघन्यंचोत्तरोत्तरं॥ उन्नतेपर्वतेवापिनिर्जनेवाचतुःपथे॥
देवागारेयेवशून्येविल्वमूलेनदीतटे॥ स्वगृहेनिर्जनेरामेतथावाश्वत्थसन्निधौ॥ तदभावेदिव्यगेहेसिंदूरादिभिरंकिते॥ ख
ड्गशूलगदाकर्त्रीचामरव्यजनादिभिः॥ वितानधूपसंकीर्णेकस्तूर्यगुरुसुवासिते॥ युवतीनांसुरापीनांवेश्यानांलास्यशोभि
ते॥ शंखघंटारवाकीर्णेदीपावलिविराजिते॥ एवंभूतगृहेपूजाकालिकायाःसुशोभना॥ ॥अथकालमाह॥ सर्वएव
शुभःकालोनाशुभंविद्यतेक्वचित्॥ नविशेषोदिवारात्रौसंध्यायामथवानिशि॥ बलिपूजादिकंसर्वंरात्रौतुक्रियतेयदि॥ त

॥तंत्रवि॥
॥१५६॥

न्दक्षयतां याति कालिकायाः प्रसादतः ॥ गतेतु प्रथमे यामे तृतीयप्रहरावधिः ॥ कुलपूजा प्रकर्त्तव्या कुलशास्त्रविशारदैः ॥ ॥
जलशंखं करे कृत्वा गत्वा द्वारि महेश्वरि ॥ क्षालयेद्धस्तपादौ च वक्ष्यमानेन वर्त्मना ॥ ॥ ॐ वज्रोदके हूं फट् स्वाहा मंत्रेण मंत्रवि
त् ॥ जलमानीय सव्येन आसनं शोधयेत्ततः ॥ ॥ प्रणवं पूर्वमुद्धृत्य लज्जावीजं तथैव च ॥ ततो विशुद्धे ते सर्वपापानि श
मयंति च ॥ अशेषांते विकल्पं स्यादपनयति ततः परं ॥ कूर्चवीजं भवेन्मंत्रः पादप्रक्षालने प्रिये ॥ वेदाद्यश्च तथा माया स्वाहेत्या
चमने मतं ॥ ॥ ततः आचमनं कृत्वा सामान्यार्घं प्रकल्पयेत् ॥ त्रिकोणवृत्तभूविंवं त्रिकोणं रचयेत्ततः ॥ आधारं शक्ति
संपूज्य तत्राधारं विनिक्षिपेत् ॥ अस्त्रमंत्रेण संशोध्य हृन्मंत्रेण प्रपूरयेत् ॥ निःक्षिपेत्तीर्थमावाह्य गंधाद्यं प्रणवेन तु ॥ दर्श
येद्धेनुमुद्रां वै सामान्यार्घमिदं स्मृतं ॥ सामान्यार्घेन देवेशि पूजयेद्द्वारपार्श्वगान् ॥ गणमं क्षेत्रपालं च वटुकं योगिनीं तथा
गंगा च यमुना चैव लक्ष्मी वाणी ततो विशेत् ॥ गं वीजाद्यं गणेशानं वामाद्यं वटुकं तथा ॥ क्षामाद्यं क्षेत्रपालं च यामाद्यं यो
गिनीं ततः ॥ ऊर्द्धं वामे दक्षिणे च अग्रश्चैवं प्रकीर्तिताः ॥ ॥ प्रणवं पूर्वमुद्धृत्य सर्वविघ्नांस्ततः परं ॥ उत्सारय ततो हूं फ
ट् स्वाहा च तदनंतरं ॥ अनेनैव च मंत्रेण विघ्नानुत्सारयेत्सुधी ॥ प्रणवं पूर्वमुद्धृत्य रक्षरक्ष तदनंतरं ॥ हूं फट् स्वाहेति मंत्रेण
पूजाभूमिं च शोधयेत् ॥ ॥ ततः प्रज्वलनज्ञायै प्रणवं पूर्वमुद्धरेत् ॥ वर्मवीजं ततश्चैव फट् स्वाहा तदनंतरं ॥ अने

॥गुरुः॥
॥१५६॥

नैवच मंत्रेण कुर्यात्भूम्यभिमंत्रणं ॥ अधिष्ठानेपि पुष्पस्य प्रणवं पूर्वमुद्धरेत् ॥ शर्तमिषेकेति पदं ज्ञाताभीति ततः पदं ॥
षेकेति च पदं प्रोक्तं हूं फट् स्वाहा ततः परं ॥ अनेन मनुना देव्याः पुष्पाधिष्ठानमेव च ॥ प्रणवं पुष्पकेतुश्च तथा राजार्हते पिव
ज्ञाताय सम्यगित्युक्त्वा मंत्रज्ञस्ततः परं ॥ पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे पुष्पेचयावकीर्णे हूं फट् स्वाहा च तत
विष्णुश्च पुष्पमेतेन जलं पूर्ववदाहरेत् ॥ मृदुमसृडमासीनश्चान्येषु कोमलेषु वा ॥ विष्टरेषु समासीनः साधयन्निह मन्त्रमां
मृतासनं विना देवि योजयेत् कालिकां नरः ॥ तावत्कालं नारकी स्याद्यावदाभूतसंप्लवं ॥ ऋषिछंदं विधायाथ कुर्यात्तत्रैव
दापयेत् ॥ मायाबीजं समुच्चार्य आधारशक्तिपूर्वकं ॥ कमलासनमालिख्य ङेंतमोन्तः प्रपूजयेत् ॥ आः कारांतं सुरेखेव वज्र
रेखे ततः परं ॥ हूं फट् स्वाहेति कुर्याद्वै मण्डलं तु शवासने ॥ वीरासनेनोपविश्येत्तं पूज्यासनमेव च ॥ ॥ अथ वीरासनं य
था ॥ एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितः ॥ इतरस्मिंस्तथा चोरुं वीरासनमुदाहृतं ॥ ॥ अथ मंत्राचमनमाह
उपविश्यासने मंत्राचमनं सर्वसिद्धिदं ॥ कालिकाभिस्त्रिभिः पीत्वा कान्त्यादिभिरुपस्पृशेत् ॥ द्वाभ्यामोष्ठौ द्विरुन्मृज्य चैकेन क्षा
रयेत्करं ॥ आस्यघ्राणाक्षिश्रोत्रनाभ्युरस्कंधजो स्पृशेत् ॥ आचम्यैवं भवेद्यस्तु वत्सरान्तां प्रपश्यति ॥ ततः षोडशवर्षीयां ना
रीमानीय यत्नतः ॥ अवतीर्णा मदोन्मत्तां सुवेषां चारुहासिनीं ॥ सदारसेमाभितायां सिंदुरांकितभालिकां ॥ साधकप्रेमसी

लींतां वा मे संस्थापयेद्बुधः ॥ विनाहेतुकमास्त्रायक्षोभङ्कौ महेश्वरि ॥ न पूजां न जपं कुर्यान्न ध्यानं नापि चिंतनं ॥ तस्मा-
त्सुस्नाव पीताव पूजयेत्परमेश्वरीं ॥ ऊर्ध्वं वियद्विंदुयुतं शास्त्रस्त्राय फडित्यपि ॥ अनेन मन्त्रनाङ्गुष्ठौ दिग्वंधं छोटिकादिभिः
प्रणवं पूर्वमुद्धृत्य तदनंतरमेव च ॥ ऊं फट् स्वाहा मन्त्रः प्रोक्तः कायवाक्चित्तशोधने ॥ रक्ष रक्ष हूं फट् स्वाहा मंत्रः स्यादा-
त्मरक्षणे ॥ ततः कृतांजलिपुटो वामदक्षिणपार्श्वयोः ॥ गुरुं गणपतिं नत्वा पुरतः क्षेत्रदेवतां ॥ सुगंधपुष्पामादाय वं य-
नाङ्गानि मंत्रवित् ॥ स्त्रौं मंत्रेण करयो रस्त्रमंत्रेण मर्दयेत् ॥ तत्पुष्पं वामहस्तेन समादाय च मस्तके ॥ भ्रामयेत्परितस्तारं
जपन्वा प्रायतत्मनः ॥ हौं ॐ पूर्वं पठेन्श्लोकमिमं मत्वा निगद्यते ॥ ते सर्वे विलयं यान्तु ये मां हिंसंति हिंसकाः ॥ मृत्युरोगभयः
क्लेशाः पतंतु रिपुमस्तके ॥ अस्त्रमंत्रेण नाराचमुद्रया दिशि त्यजेत् ॥ भूतशुद्धिं ततः कुर्याद्दात्मानं कुण्डलीयुतं ॥ जीवं हं-
सेन संयोज्य शिवं च मध्यनाड्यया ॥ पापं कुक्षिस्थितं क्रूरं वायव्याग्निमनेनाक्षरैः ॥ शोषयेद्दाहयेदंतः प्रक्षाल्य रेचयेद्वहिः ॥
सोहं मंत्रेण तामेव यथास्थानं समानयेत् ॥ ततः शुद्धशरीरोसौ जीवंन्यासं समाचरेत् ॥ ॥ अथास्याः मंत्रभूतशु-
द्धिमाह ॥ भूतशुद्धिं ततः कुर्यात्स्वमंत्राक्षरयोगतः ॥ यथा काली तथा तारा यथा तारा तथोन्मुखी ॥ भूतशुद्ध्यादिकं सर्वं
तारिणीवत्समाचरेत् ॥ प्राणायामत्रयं कुर्याद्विधिवत्तदनंतरं ॥ अंगन्यासकरन्यासौ यथावदभिधीयते ॥ षड्दीर्घभा-

जा वीजेन प्रणावाद्येन कल्पयेत्॥ प्रणावं वाग्भवीजं वा प्रदीर्घस्वरभेदितं॥ कुर्यात्षडंगविन्यासं मूलखण्डत्रयेण वा॥ वर्णन्यासं
ततः कुर्याद्दिव्यभावफलप्रदं॥ हृद्वाक्पादयुग्मेषु सविंदून्मातृकाक्षरान्॥ क्रमशो विन्यसेत्पश्चाद्व्यापकं न्यासमाचरेत्॥
दोर्भ्यां विव्यापकं कुर्यान्मूलविद्यां समुच्चरेत्॥ पादादि च शिरोअंतं शिरआदिपदांतकं॥ सकृदेवं प्रविन्यस्य साधकस्तन्मयो
भवेत्॥ ॥अथ वर्णन्यासः॥ हृदये विन्यसेद्वापि अकारादि दशाक्षरं॥ एकारादि दशं चैव परं तु दक्षिणे भुजे॥ भुजे वामे च
विन्यस्य ङकारादि दशाक्षरं॥ परं तु दक्षिणोजंघे णकारादि दशं न्यसेत्॥ मकारादि क्षकारांतं वामजंघे प्रविन्यसेत्॥ इति वर्णन्या
सः॥ ॥अथ षोढान्यासः॥ वक्ष्ये षोढात्मकं न्यासं दुर्लभं भुवनत्रये॥ यं कृत्वा साधकश्रेष्ठो भवेद्भैरवसन्निभः॥ विन्यसेन्मा
तृकां पूर्वं न्यासोयं प्रथमः स्मृतः॥ श्रिया संपुटितं वर्णं वर्णसंपुटितां श्रियं॥ एवं क्रमेण विन्यस्य द्वितीयश्च समीरितः॥ का
मसंपुटितां लक्ष्मीं लक्ष्मीसंपुटितं च तं॥ विन्यसेन्मातृकास्थाने तृतीयोयं समीरितः॥ लज्जायासंपुटां लक्ष्मीं श्रिया संपुटितां
श्रियं॥ एवं विन्यसेन्मंत्री न्यासस्तुर्यउदाहृतः॥ मुखवृत्तसमारूढलज्जाद्वंद्वं नमो द्वयं॥ शशांकशकलारूढं कामं शक्रपदेस
स्थितं॥ मूलसंपुटितं कृत्वा तन्तुटंवमतेन वा॥ विन्यसेत्तुन्नमार्गेण न्यासोयं पंचमो भवेत्॥ अनुलोमविलोमेन लिपिस्थानेषु
केवलं॥ मूलं विन्यस्य मेधावी मूलमष्टोत्तरं शतं॥ संजप्य व्यापयेद्देहे न्यासः षष्ठोयमीरितः॥ कालिकामंत्रराजस्य षोढान्या

सोयमीरितः ॥ एवंन्यासंततः कुर्यात्समंत्री भैरवोपमः ॥ विषोपमृत्युहरणं ग्रहरोगविनाशनं ॥ दुष्टाः सर्वे विनश्यंति शत्र
वो यांति मित्रतां ॥ कविता लहरी तस्य द्राक्षारसपरंपरा ॥ अणिमाद्यष्टसिद्धिस्तु तस्य हस्ते व्यवस्थिता ॥ कायिकं वाचिकं वा
पि मानसं यच्च दुष्कृतं ॥ सर्वं तस्य विनाशं त्वं याति न्यासस्य चिंतनात् ॥ ब्रह्महत्याक्षयं याति यान्ति विदुपपातकं ॥ यद्रूपं हृत्प
ते येस्तु स तद्रूपं व गच्छति ॥ यन्नमंति महादेवी षोढापुटितविग्रहा ॥ अल्पायुः संभवेत्सो यो देवताकंपते भिया ॥ स हरः स
हरिः साक्षात्स देवी नात्र संशयः ॥ ताराप्राप्त्यै तथोन्मुख्याद्यं न्यासं समाचरेत् ॥ अणिमाद्यष्टसिद्धीनामीश्वरश्च भवेन्नरः ॥
अथ गुह्यषोढान्यासः ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि गुह्यषोढामिमां प्रिये ॥ न प्रकाश्यमिदं क्वापि यदीच्छेदात्मनो हि
तं ॥ कर्पूरं मातृकावर्णैः पुटितं मातृकास्थले ॥ तेनैव पुटितं वर्णं न्यसेदत्रैव पार्वति ॥ कूर्चबीजपुटं देवि विन्यसेत्तत्प्रयत्नतः
शक्तिबीजं तथा देवि विन्यसेन्मूलमादितः ॥ दक्षिणेकालिकेत्यादि पूर्वबीजत्रयं न्यसेत् ॥ कूर्चबीजद्वयं देवि लज्जाबीजद्वयं पु
नः ॥ विन्यस्तव्यं तथा देवि मिलितं वह्निजायया ॥ ततस्तत्सकलं न्यस्त्वा पकत्वेन देवते ॥ द्वाविंशत्यक्षरे मंत्रे षोढान्यासरहो
दितः ॥ अयं तु सिद्धिदो लोके तथा देवासुरे ध्रुव ॥ अवश्यं प्रत्यहं कार्यं न पूजा न जपस्तथा ॥ कृतेपि साधकश्रेष्ठो महादेवसमो
भवेत् ॥ इति ते कथितं किंचिद्रहस्यं घोरदक्षिणे ॥ नप्रकाश्यं कदाचित्तु देवेगुवदनानारि ॥ ॥ अथ तत्त्वन्यासः ॥ आत्मवि

यादिवैस्तैस्तैस्तत्वन्यासं समाचरेत्॥ ॥अथ बीजन्यासः॥ ब्रह्मरंध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके॥ गुह्ये वक्त्रे तु सर्वांगे सप्त बीजानि विन्यसेत्॥ ॥अथ मंत्रवर्णन्यासः॥ शिरसि नयने भाले श्रुगे कर्णगंडे॥ वदने रदने जिह्वास्कंधदेशे गले च॥ भुज हृदय सपार्श्वे पृष्ठनाभौ च हृड्डे कटि गुह्य करपादे सर्वतो मंत्रवर्णान्॥ ॥मूलेन व्यापकं न्यासं नवधा कारयेत्सुधीः॥ पंचधा नवधा वापि मूलेन सप्तधा तथा॥ ॥ततः स्त्रीवेषधारी स्यात्सिंदूरांकितभालकः॥ शृंगारोज्वलवेशाढ्यस्तांबूलपूरिताननः एवं वेशादिकं सर्वं वनितामपि कारयेत्॥ पीठन्यासं ततः पश्चादाधारशक्तिपूर्वकं॥ प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च सुधांबुधिं मणिद्वीपं चिंतामणिगृहं तथा॥ श्मशानं पारिजातं च तन्मूले रत्नवेदिका॥ तस्योपरि मणेः पीठं न्यसेत्साधकपुंगवः॥ चतुर्दिक्षु मुनीन्देवान् शिवांश्च शवमुंडकान्॥ धर्मादींश्चाप्यधर्मादीन् पादगात्रचतुष्टये॥ हृदि पद्मे तथा पद्मं सूर्यसोमो महेश्वरि॥ वैश्वानरं तथा सत्वं रजश्चैव तमस्तथा॥ आत्मानं चैव विन्यस्य शक्तीर्हृत्पद्मके न्यसेत्॥ इच्छा ज्ञाना क्रिया चैव कामिनी कामदायिनी॥ रती रतिप्रिया नंदा कर्णिकायां मनोन्मनी॥ वाग्भवं प्रथमं चोक्त्वा परायै तदनंतरं॥ अपरायै परापरायै हसौर्वाच्यमतः परं॥ सदाशिव महाप्रेतपद्मासनं ततः॥ नमः इत्येव मंत्रोऽयं पीठन्यास उदाहृतः॥ पीठपूजां ततः कुर्यात्प्रधाने नवशक्तिभिः॥ उग्रा प्रचंडा चामुण्डा प्रचंडा विकटोत्कटा॥ संकटा चैव चण्डोग्रा तथा मंगलचण्डिका॥ ॥अथांतर्यजनं॥ एवं देहमये पीठे वि

न्ये दिष्टदेवता॥ ॥अथ बहिर्यागः॥ एवं विन्यस्तदेहस्तु यंत्रराजं समुद्धरेत्॥ ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्मिते॥ शनिभौमदिने वापि शरीरे मृतसंभवे॥ स्वर्णरूप्ये तथा लोहे वक्ष्ये सर्वं विधानतः॥ अः सुरेखे वज्ररेखे हूंफट् व वह्निवल्लभा॥ मंत्रेणानेन विलिखेद् यंत्रराजं मनोहरं॥ स्वयंभुकुसुमं कुंडगोलोत्थं रोचनागुरुः॥ काश्मीरमृगनाभी च मयं च मलयोद्भवं॥ एषगंधः समाख्यातः सर्वदा चंडिकाप्रिया॥ एतेन गंधयोगेन योनिचक्रं समालिखेत्॥ मन्त्रभेदेन श्रीकाल्याः यंत्राणि संशृणु प्रिये॥ आदौ शक्तिं समुत्पाद्य शक्तीनां तु चतुष्टयं॥ वामावामाद्यक्रमेणैव मध्ये विंदुं लिखेच्छिवे॥ इदं चालिख्य देवेशि भूपुरे केनसंयुतं॥ क्वचिद्भूपुरशब्देन चतुरस्रं प्रकीर्तितं॥ अत्र भूपुरशब्देन चतुर्द्वारात्मकं भवेत्॥ ॥त्रिकोणत्रयमालिख्य षट्कोणं च ततोपरि॥ वृत्ताष्टदलवृत्तं च भूपुरेण समन्वितं॥ विंदुमध्ये तु श्रीमायाकाली यंत्रं सुसिद्धिदं॥ ॥मतमन्यत्पुराणज्ञाने योनिचक्रं लिखेत् सुधीः॥ योनिद्वयं ततो लिख्य षट्कोणं च ततो भवेत्॥ ततश्चाष्टदलं पद्मं भूगृहेण समन्वितं॥ यंत्रमेतन्महेशानि मम स प्राणप्रदायकं॥ आदौ योनिं समालिख्य योनिं च तद्बहिर्लिखेत्॥ योनित्रयं तद्बहिश्च ततो वृत्तं समालिखेत्॥ ततश्चाष्टदलं पद्मं वृत्तं चैव ततोपरि॥ धरणीगृहमालिख्य यंत्रमेतन्मयेरितं॥ ॥शक्तिमायां समुत्पाद्य ततः शक्तिद्वयं लिखेत्॥ वह्निशक्तिं समुत्पाद्य वाह्यशक्तिं विभेदयेत्॥ ग्रंथिभेदक्रमेणैव वह्निं प्रसारयेद्बुधः॥ अग्निभेदक्रमेणैव सकृदूर्ध्वं वापि भेदयेत्॥ ऊर्ध्ववह्निं विभेद

तस्याधोग्निंबविभेदयेत्॥ त्र्यं योनिद्वयं वह्नेः काली यंत्रं सुसिद्धिदं॥ षट्कोणान्त्वाष्टदलं षडस्रं वज्रलांछितं॥ तद्बहिर्भूपुरं यंत्रं मावृत्तित्रयसंयुतं॥ ॥शक्त्याग्निभ्यां वषट्कोणं तत्र योनित्रयं भवेत्॥ वृत्तमष्टदलं पद्मं भूपुरद्वारभूषितं॥ यंत्रं श्रीदक्षिणाकाल्याः मध्यमाया विभूषितम्॥ ॥मन्त्रभेदेन बीजानां निर्णयः कथ्यतेधुना॥ कं विराड्रूपमित्युक्तं तद्रूपकालिकामनुः॥ यंत्रं तु गृहमित्युक्तं बिंदुस्था परमेश्वरी॥ ब्रह्मरूपं भवेद्बिंदुस्तत्र बिंदुं विभावयेत्॥ विराड्रूपं वह्निरूपं ततः कामकला स्मृतं॥ नादबिंदुयुतं चेत्स्याच्चिच्छक्तिः परिकीर्तिता॥ विराड्बीजं क्रमेणैव बीजं यंत्रे विभावयेत्॥ ॥पीठपूजां ततः कुर्यादाधारशक्तिपूर्वकां ततो हृदयपद्मान्तस्फुरंतीं विद्युदाकृतिं॥ देवेशीत्यादिमंत्रेण विधानावाहयेत्सुधीः॥ ॥ततः कामकलाध्यानादावाद्यकालिकां शिवां॥ कूर्माख्यमुद्रया पुष्पेश्चक्रमध्ये नियापयेत्॥ ॥कामकलाध्यानं॥ मुखं बिंदुवदाकारं तदधः कुचयुग्मकं॥ सर्वविद्यामृता पूर्वं सर्वदेवनमस्कृतं॥ सर्वार्थसाधकं सर्वजनरंजनकारकं॥ तदधः सपरार्द्धं च सुपरिष्कृतमंडलं॥ सर्वदेवादिभूतं च सर्वदेवनमस्कृतं॥ सर्वाह्लादनसंपूर्णं सर्वरंजनकारकं॥ सर्वार्थसाधकं सर्वदेववश्यप्रवर्तकं॥ एतत्कामकलाध्यानं सुगोप्यं साधकोत्तमैः॥ ॥कूर्ममुद्रा यथा॥ वामहस्तस्य तर्जन्या दक्षिणस्य कनिष्ठया॥ तथा दक्षिणतर्जन्या वामांगुष्ठं नियोजयेत्॥ उन्नतं दक्षिणांगुष्ठं वामस्य मध्यमादिकाः॥ अंगुलीर्योजयेत्पृष्ठे दक्षिणस्य करस्य च॥ वामस्य पितृतीं

थैनमध्यमानामिकान्तथा॥ अधोमुखेवनेकुर्याद्दक्षिणस्यवहस्ततः॥ एवंविधः सर्वसिद्धिंददातिकरकच्छपः॥ कुर्यात्तुहृदया
सन्नंनिमील्यनयनद्वयं॥ समंकायशिरोग्रीवंकृत्वास्थिरतरोबुधः॥ ध्यानंसमारभेन्मंत्रीसर्वपापप्रनाशनं॥ ॥अथध्यानं
देव्याध्यानमथोवक्ष्येसर्वदेवोपशोभितं॥ अंजनाद्रिनिभांदेवींकरालवदनांशिवां॥ मुण्डमालावलीकीर्णांमुक्तकेशींस्मिता
ननां॥ महाकालहृदंभोजेस्थितांपीनपयोधरां॥ विपरीतरतासक्तांघोरदंष्ट्रांशिवेनवै॥ नागयज्ञोपवीतांचचंद्रार्द्धकृतशेख
रां॥ सर्वालंकारयुक्तांचमुक्तामणिविभूषितां॥ मृतहस्तसहस्रैस्तुबद्धकांचीदिगंबरां॥ शिवाकोटिसहस्रैस्तुयोगिनीभिर्विराजितां
रक्तपूर्णमुखांभोजांमद्यपानप्रमत्तिकां॥ वह्न्यर्कशशिनेत्रांचरक्तविस्फुरिताननां॥ विगतासुकिशोराभ्यांकृतकर्णावतंसिनी
करालवदनांघोरांमुक्तकेशींचतुर्भुजां॥ कालिकांदक्षिणांदिव्यांमुण्डमालाविभूषणां॥ सद्यश्छिन्नशिरःखड्गंवामोर्द्ध्वाधःकरां
बुजां॥ अभयंवरदंचैवदक्षिणाधोर्द्ध्वपाणिकां॥ महामेघप्रभांश्यामांतथैवचदिगंबरां॥ कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चितां॥ क
र्णावतंसतांमीनशवयुग्मभयानकां॥ घोरदंष्ट्रांकरालास्यांपीनोन्नतपयोधरां॥ शवानांकरसंघातैःकृतकांचीहसन्मुखीं॥ सृक्क
द्वयगलद्रक्तधाराविस्फुरिताननां॥ घोररूपांमहारौद्रींश्मशानालयवासिनीं॥ दंतुरांदक्षिणांदिव्यांमुक्तलंबकचोच्चयां॥ शवरूप
महादेवहृदयोपरिसंस्थितां॥ शिवाभिर्घोरनादाभिश्चतुर्दिक्षुसमन्वितां॥ महाकालेनचसममुपविष्टरतातुरां॥ सुखप्रसन्ननयः

नांस्मेराननसरोरुहां॥एवंसंचिंत्यकालींतुश्मशानालयवासिनीं॥ ॥ध्यात्वादेवींसमावाह्ययोनिमुद्रांप्रदर्शयेत्॥खड्ग
मुंडवराभीतिमुद्राणितुदर्शयेत्॥ ॥अथक्रमेणखड्गादिमुद्रामाह॥कनिष्ठानामिकेबध्वास्वांगुष्ठेनैवदक्षतः॥
शेषांगुलीतुप्रसृतेसंस्पृष्टेखड्गमुद्रिका॥अंतरांगुष्ठमुष्टिंचकृत्वावामकरस्यच॥मध्यमाभ्यांदक्षिणास्यतर्जन्यालंब्यप्रयत्नतः॥म
ध्यमेनाथतर्ज्जन्यामंगुष्ठाग्राग्रिमोषतु॥दक्षिणांयोजयेत्पाणिंवाममुष्टौतुसाधकः॥दर्शयेद्दक्षिणेभागेमुंडमुद्रेयमुत्तमे॥ ॥
अधःस्थितोदक्षहस्तःप्रसृतोवरमुद्रिका॥ऊर्ध्वकृतोवामहस्तःप्रसृतोऽभयमुद्रिका॥ ॥तर्जन्यनामिकेमध्येकनिष्ठेवक्रमा
दपि॥करयोर्योजनेचैवकनिष्ठामूलभेदतः॥अंगुष्ठाग्रेतुनिक्षिप्यमहायोनिःप्रकीर्तिता॥ ॥अथविश्वस्योभयात्म
कत्वात्शक्तिंविनाशिवस्यशिवंविनाशक्तेश्चोपासनायांफलाभावादुभयोरेकदैवयजनमाह॥ ॥तथाच॥प्रकृत्यातुविना
देविनसंसारःकुविकवत्॥पुरुषंचविनादेविनविद्यासिद्धिदायिनी॥कालिकायांमहाकालःसुंदर्यांललितेश्वरः॥तारायांवतपाक्षो
भ्यःछिन्नायांविकरालकः॥भुवनायांमहादेवोधूम्रायांकालभैरवः॥नारायणोमहालक्ष्मीभैरव्यांवटुकःस्मृतः॥मातंग्यांतु
मतंगस्यादथवास्यात्सदाशिवः॥मृत्युंजयस्तुबगलाविद्यायांपरिकीर्तितः॥तस्मात्कारणतोदेविद्वितयंपूजयेच्छिवे॥
महाकालंयजेत्पूर्वंपश्चाद्देवींप्रपूजयेत्॥महाकालंयजेद्देव्यादक्षिणेधूम्रवर्णकं॥विभ्रतंदंडखट्वांगंदंष्ट्राभीममुखंशि

॥ तंत्रवि० ॥ शुं ॥ व्याघ्रचर्मावृतकटिं तुंदिलं रक्तवाससं ॥ त्रिनेत्रमूर्द्ध्वकेशं च मुंडमालाविभूषितं ॥ जटाभारलसच्चंद्रखंडमुग्रं ज्वलन्निव
॥१६१॥ इति ध्यात्वा महाकालमंत्रेणैव प्रपूजयेत् ॥ कच्चं स्फ्रौं समुद्धृत्य यां रां लां वां च क्रौं ततः ॥ महाकालभैरवेति सर्वविघ्नाशयेति च
नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समुच्चरेत् ॥ फट्स्वाहान्तासमायुक्तो मंत्रः सर्वार्थसाधकः ॥ ततो देवीं पुनर्ध्यात्वा सर्वो
पचारतः सुधीः ॥ पूजयेन्मूलमुख्यार्थं दक्षिणां कालिकां तु यः ॥ तां कृत्वा ते त्रिसंतर्प्येन त्वा योनिं प्रदर्शयेत् ॥ देवीवामोर्द्ध्वा
धोहस्ते खड्गं मुण्डं च पूजयेत् ॥ देव्या दक्षहस्तोर्द्ध्वाधः पूजयेदभयं वरं ॥ विज्ञाप्य च ततो देव्याः परिवारांस्तथार्चयेत्
ततः षडंगपूजां ते गुरुपंक्तिं प्रपूजयेत् ॥ पाद्यादिना तथा पश्चात्पूजयेदंगदेवताः ॥ सर्वमंत्रेषु पुरतः सर्वत्र सिद्धि
दायकाः ॥ दिव्यौघा गुरवो देवि सिद्धौघा गुरवस्तथा ॥ मानवौघाः समासेन कथयामि तवाग्रतः ॥ तत्रासौ कालिका देवी तस्याः शृ
णु गुरुक्रमं ॥ महादेवी महादेवः त्रिपुरा चैव भैरवः ॥ दिव्यौघा गुरवः प्रोक्ता सिद्धौघान् कथयामि ते ॥ ब्रह्मानंदश्च पूर्णश्च चलः
चित्तश्च लोचनः ॥ कुमारः क्रोधनश्चैव वरदः स्मरदीपनः ॥ मायामायावती चैव मानवौघान् शृणु प्रिये ॥ विमलः कुशलश्चैव ॥ गुरुः ॥
भीमसेनः सुधाकरः ॥ मीनो गोरक्षनाथश्च भोजदेवः प्रजापतिः ॥ मूलदेवो रंतिदेवो विघ्नेशो वै हुताशनः ॥ समयानंदसंत ॥१६१॥
यो कालिकागुरवः स्मृताः ॥ दिव्यादेवान्तिके नित्यं सिद्धाभूमाविहापि च ॥ मानवौघा मानवेषु समरूपधराः सदा ॥ ज्ञानंदनाथ

शाक्तांनानगुरवःसर्वसिद्धिदाः॥स्त्रियोपिगुरुरूपाश्चेदष्टांताःपरिकीर्त्तिताः॥मानवौघांतिकेदेविस्वगुरुंचप्रपूजयेत्॥नि
जंगुरुंप्राध्यात्वानततोगुरुचतुष्टयं॥पूजयित्वायजेद्देवंनवसंकोचमाचरेत्॥गुरुंपरमगुरुंचैवपरापरगुरुंतथा॥परमेष्ठि
गुरुंचैवकथितागुरवस्तव॥ ॥अथगुरूणांस्थानमाह॥विद्यापृष्ठेमहेशानिगुरवःसंतिसर्वदा॥कल्पात्रिपंक्तिमार्गेण
देवीपृष्ठक्रमेणच॥दिव्यादिक्रमयोगेनतदधःस्वगुरुत्रयं॥दक्षोदीच्यप्रतीच्यांचरेखात्रितयकंचरेत्॥दिव्यौघोदेवतापृष्ठे
तदग्रेतुस्थलद्वये॥विद्यायाःभेदभागेतुस्वगुरुंपूजयेच्छिवे॥सर्वत्रयिमहेशानिगुरुस्थानंप्रकीर्त्तितं॥ ॥अथएतः
स्यावश्यकतामाह॥गुरुपूजांविनावत्सयदिपूजांसमारभेत्॥तद्दोषशमनेवत्सशक्तिपूजांसमारभेत्॥विघ्नाणांयत्रयद्दोषा
स्मगुणांकुलपूजनात्॥कुलावलोकनेनैवस्यात्मवशोक्षमार्जनं॥क्षस्नानंक्षववाकपुष्टिःक्षवमासविशोधनं॥दीक्षाग्रहंकुली
नश्चेकुलंवावटुकेश्वरः॥तद्देहेगुरुमानीयकुलरूपंगुरुंस्मरेत्॥कुलंयथागुरुस्तद्वत्तथाकुलसाधकः॥गुरुक्रमंचकथितंगोप
नीयंप्रयत्नतः॥पशोरग्रेणवैवैषांनामग्राह्यंकथंचन॥ ॥अथावरणदेवताःपंचदशकोणेषु॥तथाच॥ततश्चसर्वको
णेषुदेवीमावाह्यपूजयेत्॥ ॥ततःपूर्वादिकोणेषुवामावर्त्तेनपूजयेत्॥कालीकपालिनींकुल्लांप्रथमेतुत्रिकोणके॥नी
लांघनांबलाकांचद्वितीयेतुत्रिकोणके॥कुरुकुल्लांविरोधिन्यौविप्रचित्तांतृतीयके॥उग्रामुग्रप्रभांदीप्तांचतुर्थेतुत्रिकोणके॥

मात्रांमुद्रांमितांचैवत्रिकोणेपंचमेयजेत्॥ ॥सर्वाःश्यामाअसिकरामुण्डमालाविभूषणाः॥तर्जनींवामहस्तेनधारयंत्यःसुशुस्मिताः॥त्रिःत्रिःपूजाप्रकर्तव्यासर्वासामपिसाधकैः॥ ॥अथाष्टदले॥ब्राह्म्याद्याःपूजयेत्तत्रपत्राग्रेभैरवान्यजेत्॥लोकपालांस्ततोवाह्येतदस्त्राणिचतद्वहिः॥ ॥वहिर्मण्डलतश्चापिब्राह्मीनारायणीतथा॥माहेश्वरीचचामुण्डाकौमारीचापराजिता॥वाराहीचतथापूज्यानारसिंहीतथैवच॥ ॥तारंपाशांतदाश्रीचब्राह्मीश्रीपादुकांततः॥पूजयामिततश्चैवध्यायेत्तांब्रह्मणःप्रियां॥ब्रह्माणींहंसमारूढांस्वर्णवर्णांचतुर्भुजां॥चतुर्वक्त्रांत्रिनेत्रांच्चस्रुक्स्रुवंचपंकजंतथा॥दण्डंपद्माःक्षसूत्रंचदधतींचारुहासिनीं॥जटाजूटधरांदेवींभावयेत्साधकोत्तमः॥एवंध्यात्वाब्रह्मपत्नीयथाशक्त्यायजेत्प्रिये॥ ॥ॐ ईंस्मृत्वानारायणीश्रीपादुकांततःपरं॥पूजयामीतिचोद्धृत्यध्यायेत्तांवैष्णवींप्रिये॥नारायणींमहादीप्तांश्यामांगरुडवाहिनीं॥नानालंकारसंयुक्तांचारुकेशींचतुर्भुजां॥घण्टांशंखंकपालंचचक्रंसंदधतींपरां॥मधुमत्तमदोद्घोलदृष्टिसर्वांगसुंदरीम्॥इतिध्यात्वामहेशानियत्नतोभावयेत्ततः॥पूजयित्वामहादेवींमाहेश्वरींयजेत्पुनः॥ ॥सविंदुंउंसमुच्चार्यमाहेश्वरीततःप्रिये॥श्रीपादुकांततश्चोक्त्वापूजयामिततःशिरः॥ध्यानमस्यावरारोहेब्रुवीमितन्निशामयः माहेश्वरींवृषारूढांभुजाढ्यांत्रिनयनान्वितां॥कपालंडमरुंचैववरदाभयशूलकं॥टंकञ्चदधतींदेवींनानाभरणभूषिता

पूजयेच्च यथाशक्त्या ध्यानं कृत्वा महेश्वरीः॥ क्रां बीजं चामुंडाम्बाश्रीपादुकां पूजयामि॥ पूजयित्वा महादेवीं ततो ध्यानं समाचरेत्॥ ॥चामुण्डां चंट्टहासां प्रकटितवदनां भीमवक्त्रां त्रिनेत्रां नीलांभोजप्रभाभां प्रमुदितवपुषं नारमुण्डालिमालां॥ खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयन्ती प्रेतारूढां प्रसन्नां मधुमदमुदितां भावयेच्चण्डरूपां॥ एवं ध्यात्वा यजेद्देवीः चामुंडां जगदीश्वरी॥ त्रांकारेण च कौमारीं संपूज्य ध्यानमाचरेत्॥ कौमारीं कुंकुमाभाभां त्रिनेत्रां शिखिसंस्थितां॥ चतुर्भुजां शक्तिपाशमंकुशाभयदायिनीं॥ नानालंकारसंयुक्तां प्रसन्नां परिचिंतयेत्॥ ध्यानं कृत्वा कौमारीं च यथाशक्त्या प्रपूजयेत्॥ वाग्भवेन महादेवीं पूजयेदपराजितां॥ सर्वपूर्वेण विधिना ततो ध्यानं समाचरेत्॥ अपराजिताञ्च पीताभामक्षसूत्रावरप्रदां॥ कमलं मातुलिंगञ्च दधतीं परिचिंतयेत्॥ एवं संपूज्य विधिवत्साधको भक्तितो यजेत्॥ ॥श्रींकारेण सुरेशानि वाराहीं पूजयेत्सदा॥ ध्यानमस्या निबोध त्वं वाराह्याः परमेश्वरि॥ वाराहीं धूम्रवर्णाभां वराहवदनां शुभां॥ फलकं खड्गमुशलं हलं चै दभुजैर्धृतां॥ विधिना पूजयेद्देवीं वाराहीं परमेश्वरीं॥ ॥विसर्गेण नारसिंहीमर्चयेत्साधकाग्रणीः॥ नारसिंहि नृसिंहस्य बिभ्रतीं सदृशं वपुः॥ ध्यानं तस्याः प्रवक्ष्यामि देवि तेतन्निशामय॥ कोपादालोलजिह्वा विकृतनिजमुखां सोमसूर्याग्निनेत्रां॥ पादादानाभिरक्तामुपरिहृदि सितां भिन्नदैत्येन्द्रगात्रीं॥ चक्रं शंखं च पाशांकुशकुलिशगदावारणानुद्वहन्तीः

भीमांतीक्ष्णाग्रदंष्ट्रांमणिमयमुकुटांनित्यमीडेनृसिंहीं॥एवंध्यात्वापूजयेत्तुयथाशक्त्यामहेश्वरि॥ ॥अथाष्टदलाग्रेभै
रवानभैरव्यश्च॥असितांगोरुरुश्चंडःक्रोधउन्मत्तभैरवः॥कपालीभीषणश्चैवसंहारश्चाष्टमःस्मृतः॥ ॥अथैषांध्यान
दधतांजनपुंजनीलवर्णान्वरवेतालकपालशूलदंडान्॥लघुडुंडुभिसंयुतांस्त्रिनेत्रान्करदण्डैःकरिहस्तदंडवर्णैः॥ग
जकृत्तिनिवर्तितोत्तरीयान्भृकुटीसंघटितैर्ललाटपट्टैः॥ललितालिकुलाभकुंतलाग्रान्मुदितांतःकरणान्स्वयोवनाढ्या
न्॥ ॥एतेषांमंत्रोयथा॥ह्रस्वार्णविंदुसंयुक्तावाद्यायापूर्वभूषिता॥ ॥अथभैरवानांस्थानेभैरव्यश्चपूज्याः॥
भैरवीवमहासिंहधूम्रभीमादिकांवनां॥उन्मत्तभैरवीपश्चाद्वशीकरणभैरवी॥पत्राग्रेषुयजेन्मंत्रीमोहनाख्यांचभैरवीं॥
त्रिधात्रिधायजेदेतारक्तमाल्यानुलेपनैः॥ ॥अथध्यानमासां॥उद्यद्भानुसहस्रकांतिमरुणक्षौमांशिरोमालिकां॥
रक्तालिप्तपयोधरांजपवटीविद्यामभीतिंवरं॥हस्ताब्जैर्दधतींत्रिनेत्रविलसद्वक्त्रारविंदश्रियंदेवींवद्धहिमांशुरत्नमकुटां
वंदेसमंदस्मितां॥ ॥अथभूपुरस्योर्द्धेलोकपालान्पूजयेत्॥पूर्वादीशानांतंदिक्पालान्पूजयेत्सुधीः॥इंद्रबी
जंसमुच्चार्यइंद्रायतदनंतरं॥सुराधिपतयेवोक्त्वासांगायतदनंतरं॥सपरिवारायवंततःसायुधायततोप्यनु॥सवाह
नायवततोनमस्तेनप्रपूजयेत्॥लंरंयंक्षंवंयंशंहंअंकं एवंस्वस्वबीजादीनादिक्पालान्पूजयेत्॥ ॥ध्यानंतु॥इंद्रंसुरा

धिपं पीतमैरावतगतं विभुं ॥ सहस्रनेत्रं द्विभुजं पीतवज्रधरं भजे ॥ ॥ अग्निं तेजोधिपं रक्तं छागेन शक्तिकरं प्रभुं ॥ धूम्रवर्णं मेषवाहं वंदे रक्ताननलोचनं ॥ ॥ यमं प्रेताधिपं कृष्णं महिषोपरि संस्थितं ॥ कालदंडधरं क्रूरं वृत्तं दूतैर्भयानकैः ॥ रक्षोधिपं च निर्ऋतं शवासनसमास्थितं ॥ धूमाभं खड्गहस्तं च पिंगश्मश्रुसुकूर्चकं ॥ ॥ मकरे संस्थितं विद्युन्निभं पाशकरांबुजं ॥ शुभ्रांगं तुंडिलं वंदे वरुणं यादसां पतिं ॥ वायुं प्राणाधिपं धूम्रं स्त्रांकुशकरं परं ॥ वातप्रमीसमारूढं धावंतं वेगतो भजे ॥ यक्षःपतिं कुबेरं वस्तुलं शूलगदाधरं ॥ नरसिंहासनारूढं मेदलं चित्रिणीयुतं ॥ विद्याधिपं नीलशूलधरं वृषभवाहनं ॥ त्रिनेत्रं भालचंद्रं च जटाजूटधरं सितं ॥ ॥ गौरं नागाधिपं मूर्ध्नि फणामंडलभूषितं ॥ पीतांगं चक्रधरमनंतं विसगं भजे ॥ ॥ लोकाधिपं विधातारं रक्तं पद्मकरं शुभं ॥ हंसारूढं वेदपाठं कुर्वंतं तमहं भजे ॥ तथा ॥ इंद्रोक्तविधिना सर्वं पूजयेत्परमेश्वरि ॥ रक्षोवरुणयोर्मध्ये शेषनागं प्रपूजयेत् ॥ ईशानशक्रयोर्मध्ये ब्रह्माणं पूजयेत्ततः ॥ ॥ अथ लोकपालानां मुद्रा यथा ॥ पाणिमूले तु संलग्ने शाखास्सर्वाः प्रसारिताः ॥ लोकेशानामियं मुद्रा तेषां सर्वां प्रदर्शयेत् ॥ ॥ अथ भूपुरस्य बहिः दिक्पालास्त्राणि ॥ तद्बहिर्ध्यायेद्देवि वज्रं शक्तिश्च दंडकं ॥ खड्गं पाशमंकुशं च गदां त्रिशूलमेव च ॥ रक्षोवरुणयोर्मध्ये चक्रं पूज्यं तथैव च ॥ ईशानशक्रयोर्मध्ये पद्मं संपूजयेत्ततः ॥ ॥ अथ विशेषाभावे साधारणमंत्रमाह परिवाराण

नामा अवर्णबीजाश्च ङेतास्तास्तु नमोन्तिकाः॥ श्रीपदं पूर्वमुच्चार्य पादुकापदमुच्चरेत्॥ पूजयामि नमः पश्चात् पूजयेदंगदेवताः॥ ॥ततः पूर्वोक्तरूपीं तु ध्यायेच्चैव हि दक्षिणां॥ योगिनीचक्रसहितां महाकालसमन्वितां॥ देव्यास्तु दक्षिणे भागे महाकालं पुनर्यजेत्॥ पद्यादिभिर्मूलदेवीं संपूज्य तर्पयेत्ततः॥ ततो देव्यै धूपदीपौ दद्यान्नैवेद्यकं तथा॥ पुष्पांजलित्रयं भक्त्या विशेषार्घ्योदकाक्षतैः॥ देवीवामोर्ध्वाधो हस्ते खड्गमुंडं च पूजयेत्॥ देव्या दक्षहस्तोर्ध्वाधः पूजयेदभयं वरं॥ पुनर्मूलं समुच्चार्य सांगायै सपरेतिवे॥ वारायै नाम देव्याश्च चतुर्थ्यंतमुदीरयेत्॥ ॥अथ बलिदानं॥ पूजांते भोजनादौ च बलिं दद्यात्स्वहेश्वरि॥ ॥तत्रादौ महाकालबलिदानं तस्य मंत्रो यथा॥ हूमेतेव महाकालान्श्मशानाधिपस्त्वपि॥ इमं मंत्रे सामिषान्नं बलिं गृह्णतु गं ततः॥ गृह्णापय पदद्वंद्वं विघ्ननिवारणा ततः॥ कुरु सिद्धिं च मे चैव प्रयच्छ स्वाहया पुनः॥ महाकालाय देवाय प्रणवाद्येन दापयेत्॥ ॥अथ देव्या बलिदानमंत्रोपि॥ एह्येहि जगतां मातर्जगतां जननि तथा॥ गृह्ण गृह्ण इमं नित्यं बलिदानमतः परं॥ सिद्धिं देहि पदद्वंद्वं ततः शत्रुक्षयं कुरु॥ युगशब्दं समुच्चार्य ततः कूर्चयुगं पुनः॥ हृल्लेखाद्वितयं पूर्वमंते च ठद्वयं पुनः॥ तस्य मंत्रं समुच्चार्य फडंते वाक्सुंदरी॥ बलिदानमिदं दिव्यं सर्वतंत्रेषु गोपितं॥ सर्वास्तु कालीविद्यास्तु यथा नाम्ना क्षिपेद्बलिं॥ बलिभिः साध्यते मुक्तिर्बलिभिः साध्यते दिवं॥ बलिदानेन सततं जयेच्छत्रून्नृपान्नृपः

एवं पूजां पुरा कृत्वा मूलेनैव यथाविधिः ॥ नैवेद्यादि यथाशक्त्या दद्याद्देव्यै पुनः पुनः ॥ ततो नीराजनं कुर्याद्दशवारं प्रदीपकैः
ततः समाहितमन्त्री गुरुं नत्वा शिरःस्थितं ॥ महाकालमहामंत्रं जपेदष्टोत्तरं शतं ॥ ॥ ईश्वर उवाच ॥ कुल्लुकां मूर्द्धि संचिन्त्य
हृदि सेतुं विचिंतयेत् ॥ महासेतुं विशुद्धौ च सहस्रारे समुच्चरेत् ॥ मणिपूरे तु निर्वाणां महाकुण्डलिनीं मनः ॥ स्वाधिष्ठाने काम
राजं काकिनीं मूर्द्धि संस्थितां ॥ विविंस्य विधिव देवि मूलाधारांतिकाच्छिरे ॥ विसृज्यांतं स्मरे देवि सततं तु तनीयसी ॥ वेदस्थानाद्धि
जिह्वांतं मूलमंत्रात्मतां विभुः ॥ ॥ अथ दीपनीविद्याः ॥ कांतांतजीवनीवीजं त्रिपदोपरिभूषितं ॥ कलामनुस्वरोपेतं वी
जत्रयमुदाहृतं ॥ तुरुरञ्च ततो दद्यात्संहारं च ततः परं ॥ विद्यादौ योजयेद्देवि विंदुत्रयकलान्वितं ॥ एषा तु दीपनी विद्या सर्व
मंत्रा येन मस्कृता ॥ तस्मा भापटले जिह्वाग्रदेशाग्रे विभावयेत् ॥ अनया त्वादीपनीविद्यां योजयेत्कालिकां परां ॥ सोऽविरान्मृत्युमा
प्नोति मृते न नरकं व्रजेत् ॥ ॥ अथ मंत्रध्यानं ॥ मंत्रध्यानं प्रवक्षामि जपात्सार्वज्ञदायकं ॥ मंत्रध्यानान्महेशानि सिध्यते ब्र
ह्महा यतः ॥ मूलादि ब्रह्मरंध्रांतं सर्वां विद्यां विभावयेत् ॥ सूर्यकोटिप्रतीकाशां योगिभिर्दृष्टपूर्विकां ॥ देवतागुरुमंत्राणामैक्यं सं
भावयन् धिया ॥ सदा मनो जपेन्मंत्रं संतुष्टः स्थिरमानसः ॥ दंताक्षमालया चैव राजदंतेन मेरुणा ॥ मूलमंत्रेणाथ पूर्वं न्यासान्स
र्वान्समाचरेत् ॥ अष्टोत्तरसहस्रं तु तदर्द्धं त्रिशतं तु वा ॥ अष्टोत्तरशतं वापि जपेन्नित्यमनन्यधीः ॥ तेजोमयं जपफलं देव्या हृ

ते समर्पयेत्॥ ॐ वाग्देवी देवि मुण्डस्रगतिशयलसत्कण्ठपीनस्तनाढ्ये। गतासूनां बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बां दि
ग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां॥ श्मशानस्थे तल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कवि
शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः परं संकीर्णायां प्रकटितचितायां हरवधूं॥ प्रविष्टां संतुष्टामुपरिसुरतेना
तियुवतीं सदा त्वां ध्यायंति क्वचिदपि न तेषां परिभवः॥ वदामः किं वा त्वां जननि वयमुच्चैर्जडधियो॥ विधाता नापीशो न ह
रिरपि ते वेत्ति परमं॥ तथापि त्वद्भक्तिर्मुखरयति चास्माकममिते॥ तदेतत्क्षन्तव्यं न खलु पशुरोषः समुचितः॥ समन्तादापी
नस्तनजघनधृग्यौवनवती रतासक्तो नक्तं यदि जपति भक्तस्तव मनुं॥ विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगा
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः॥ समाः सुस्थीभूतां जपति विपरीतां यदि सदा विचिन्त्य त्वां ध्यायन्नतिशय
महाकालसुरतां॥ तदा तस्य क्षोणीतलविहरमाणस्य विदुषः कराम्भोजे वश्या हरवधु महासिद्धिनिवहाः॥ प्रसूते संसा
रं जननि भवती पालयति च समस्तं क्षित्यादि प्रलयसमये संहरति च॥ अतस्त्वां धातापि त्रिभुवनपतिः श्रीपतिरहो
महेशोपि प्रायः सकलमपि किं स्तौमि भवतीं॥ अनेके सेवन्ते भवदधिकगीर्वाणनिवहान् विमूढास्ते मातः किमपि न हि
जानन्ति परमं॥ समाराध्यामाद्यां हरिहरविरिञ्च्यादिविबुधैः प्रपन्नोस्मि स्वैरं रतिरसमहानन्दनिरतां॥ धरित्री कीलालं शुचि

रविसमीरेपिगगनंत्वमेकाकल्याणीगिरिशरमणीकालिसकलं॥ स्तुतिःकांतेमातस्तच्चरणयोर्मामगतिकंप्रसन्नात्वंभूयात्भव
मनुरभूयान्ममजनुः॥ श्मशानस्थःसुस्थोगलितचिकुरोदिक्पटधरःसहस्रंत्वर्काणांनिजगलितवीर्येणकुसुमं॥ जपन्त्वत्प्रत्ये
कंमनुमपितवध्याननिरतोस्वेच्छाचारीस्वैरंसभवतिधरित्रीपरिवृढः॥ गृहेसंमार्जन्यापरिगलितवीर्यंहिकुसुमंसमूलंमध्याह्ने
वितरतिचितायांकुजदिने॥ समुच्चार्यप्रेम्णामनुमपिसकृत्कालिसततं॥ गजारूढोयातिक्षितिपरिवृढःसत्कविवरः॥ स्वपुष्पैरा
कीर्णंकुसुमधनुषोमन्दिरमहोपुरोध्यायन्ध्यायन्यदिजपतिभक्तस्तवमनुं॥ सगंधर्वश्रेणीपतिरिवकवित्वामृतनदीनदीनःप
र्यंतेपरमपदलीनःप्रभवति॥ त्रिपंचारेपीठेशवशिवहृदिस्मेरवदनांमहाकालेनोच्चैर्मदनरसलावण्यनिरतां॥ समासक्तोन
क्तंस्वयमपिरतानंदनिरतोजनोयोध्यायेत्त्वांजननिकिलसस्यात्स्मरहरः॥ सलोमास्थिस्वैरंपललमपिमार्जारमपिवापरंचौष्ट्रं
मेषंनरमहिषयोश्छागमपिवा॥ बलिंतेपूजायामपिविरलवक्त्रेवितरतां॥ नकिंसिद्धिःसर्वाप्रतिपदमपूर्वाप्रभवति॥ वशीलक्षं
मंत्रंप्रजपतिहविष्याशनरतो॥ दिवामातर्युष्मच्चरणकमलध्याननिरतः॥ परंनक्तंनग्नोनिधुवनविनोदेनचमनुंजनोलक्षंसस्या
त्स्मरहरसमानःक्षितितले॥ इदंस्तोत्रंमातस्तवमनुसमुद्धारणजपस्वरूपाख्यंपादांबुजयुगलपूजाविधियुतं॥ निशार्धंवापूजा
समयमधिवायस्तुपठतिप्रलापस्तस्यापिप्रसरतिकवित्वामृतरसः॥ कुरंगाक्षीवृंदंतमनुसरतिप्रेमतरलं॥ वशस्तस्यक्षोणीप

तिरपि कुबेरप्रतिनिधिः ॥ रिपुः कारागारं कलयति वनकेलिकलया चिरंजीवन्मुक्तः प्रभवति सुभक्तः प्रतिजनिः ॥ इति महाकाल
कृतं कर्पूरस्तोत्रं समाप्तम् ॥ ॥ अथास्य पुरश्चरणं ॥ कर्पूराख्यमिदं स्तोत्रं यदुक्तं भवता पुरा ॥ षट्कर्मसाधने तस्य प्रयोगं
वद शंकर ॥ श्रीशिव उवाच ॥ शृणु देवि प्रवक्ष्यामि कर्पूरस्तवसाधनं ॥ सकृत्कृतेपि देवेशि कालीतुष्टा भवेत्सदा ॥ शनिभौमदि
ने देवि स्नात्वा प्रयतमानसः ॥ संपूज्य कालिकां देवीं संकल्पं सम्यगाचरेत् ॥ कृत्वा षोडशादिकं देवि पठेत्स्तोत्रमनुत्तमं ॥ अयुतेनैकप्रमा
णेन तद्दशांशं हुनेत्सुधीः ॥ तर्पणं चाभिषेकं च ब्राह्मणान्भोजयेत्ततः ॥ पश्चात्स्वकार्यसिद्ध्यर्थं प्रयोगानाचरेत्सदा ॥ प्रयोगमात्रे देवे
शि अष्टोत्तरसहस्रकं ॥ योजपेत्सर्वकार्यार्थं कामनाभेदभाविनः ॥ आकर्षणे वशीकारे मारणोच्चाटने तथा ॥ राज्ञो भये समुत्पन्ने
दुर्भिक्षे शत्रुसंकटे ॥ ग्रामोत्पन्ने महेशानि रोगशोकभये तथा ॥ पठेत्स्तोत्रं महाकाल्याः सर्वशान्तिं प्रयच्छति ॥ कुमारीपूजनं चांते क
र्तव्यं सुसमाहितः ॥ एवं कृते महेशानि सम्यक्सिद्धिर्भवेद्ध्रुवं ॥ ॥ अथ जगन्मंगलकवचं ॥ भैरव्युवाच ॥ कालीपूजा श्रुता ना
थ विद्याश्च विविधाः प्रभो ॥ इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं ॥ त्वमेव शरणं नाथ त्राहि मां दुःखसंकटात् ॥ श्रीभैरव उवा
च ॥ रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे ॥ श्रीजगन्मंगलं नाम कवचं मन्त्रविग्रहं ॥ पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत्
क्षणात् ॥ नारायणोपि यद्धृत्वा नारी भूत्वा महेश्वरं ॥ योगेशं क्षोभमनयद्यद्धृत्वा वघूद्वहः ॥ वरदृप्तान्जघानैव रावणादीन्
र

निशाचरान्॥ यस्य प्रसादादीशोपि त्रैलोक्यविजयी विभुः॥ धनाधिपः कुवेरोपि सुरेशोभूच्छचीपतिः॥ एवं हि सकला देवाः सर्वसिद्धीश्वराः श्रिये॥ श्रीजगन्मंगलस्यास्य कवचस्य ऋषिः शिवः॥ छंदोनुष्टुप् देवता च कालिका दक्षिणेरिता॥ जगतां मोहने दुष्टविजये भुक्तिमुक्तिषु॥ योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः॥ शिरो मे कालिका पातु क्रींकारैकाक्षरी परा॥ क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधारिणी॥ हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम॥ दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरी॥ क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकं॥ वदनं सकलं पातु ह्रीं ह्रीं स्वाहास्वरूपिणी॥ द्वाविंशत्यक्षरी स्कंधौ महाविद्या शुभप्रदा॥ खड्गमुंडधरा कारी वरदा भयकारिणी॥ विद्याभिः सकलाभिश्च सर्वांगमभितोवतु॥ क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुंडा हृदयं मम॥ ऐं हूं ॐ ऐं स्तनद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थलं॥ अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी मम॥ क्रीं नाभिमध्यदेशं च दक्षिणे कालिकेवतु॥ क्रीं स्वाहा पातु पृष्ठं तु कालिका सा दशाक्षरी॥ हूं ह्रीं दक्षिणे कालिके क्रीं हूं पातु कटिद्वयं॥ कालिका सा दशाक्षरी स्वाहा ममोरुयुग्मकं॥ ॐ ह्रीं क्रीं मे स्वाहा पातु कालिका जानुनी सदा॥ कालीहृन्नामविद्येयं चतुर्वर्गफलप्रदा॥ क्रीं हूं ह्रीं पातु मे गुल्फे दक्षिणे कालिकेपिव॥ क्रीं हूं ह्रीं स्वाहा पातु चतुर्दशाक्षरी मम॥ खड्गमुंडधरी काली वरदा भयधारिणी॥ विद्याभिः सकलाभिः सा सर्वांगमभितोऽवतु॥ काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी॥ विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः॥ नीला घना बलाका च मात्रा मुद्रा मिता

तथा

चमां॥ एताः सर्वाः खड्गकरामुण्डमालाविभूषिताः॥ रक्षन्तु मां दिग्विदिक्षु ब्राह्मी नारायणी तथा॥ माहेश्वरी च चामुण्डा कौ
मारी चापराजिता॥ वाराही नारसिंही च सर्वाश्चामितभूषणाः॥ रक्षन्तु मायुधैर्दिक्षु विदिक्षु मां यथा तथा॥ इति ते कथितं
दिव्यं कवचं परमाद्भुतं॥ श्रीजगन्मंगलं नाम कवचं मंत्रविग्रहं॥ त्रैलोक्याकर्षणं ब्रह्मन् कवचं मन्मुखोदितं॥ गुरुपूजां विधा
याथ विधिवत्प्रपठेत्ततः॥ कवचं त्रिः सकृद्वापि यावज्जीवं च वा पुनः॥ एतच्छतार्द्धमावर्त्य त्रैलोक्यविजयी भवेत्॥ त्रैलो
क्यं क्षोभयत्येव कवचस्य प्रसादतः॥ महाकविर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत्॥ पुष्पाञ्जलीन् कालिकायै मूलेनैव पठेत्सकृ
त्॥ सतवर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ भूर्जे विलिखितं चैतत्स्वर्णस्थं धारयद्यदि॥ शिखायां दक्षिणे बाहौ कंठे वा
धारयद्बुधः॥ त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात्॥ पुत्रवान् धनवान् श्रीमान् नानाविद्यानिधिर्भवेत्॥ ब्रह्मास्त्रा
दीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः॥ नाशमायान्ति देवेशि नात्र कार्या विचारणा॥ काकवंध्या च या नारी वंध्या वा मृतपुत्रिणी॥
कण्ठे वा वामहस्ते वा कवचस्य च धारणात्॥ बहुपत्या जीववत्सा भवत्येव न संशयः॥ न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेष
तः॥ शिष्येभ्यो भक्तियुक्तेभ्यश्चान्यथा मृत्युमाप्नुयात्॥ स्पर्द्धामुद्धूय कमला वाग्देवी मंदिरे मुखे॥ पौत्रान्तं स्थैर्यमास्थाय निव
सत्येव निश्चितं॥ इदं कवचमज्ञात्वा यो भजेत्कालि दक्षिणां॥ शतलक्षं प्रजप्तोपि तस्य विद्या न सिध्यति॥ स शस्त्रघातमाप्नो

तिमोविरान्मृत्युमाप्नुयात्॥ ॥इति श्रीभैरवतंत्रे भैरवभैरवीसंवादे श्यामाकवचं समाप्तम्॥ ॥अथ शतनाम:
भैरव उवाच॥ महाकालप्रवक्ष्यामि देव्या अष्टोत्तरं शुभं॥ यद्गुह्यं परमं पुण्यं सर्वत्रभयनाशनं॥ महत्तीचेतनामाया महा
देवीमहेश्वरी॥ महाबुद्धिर्म्महाचण्डामहाकालीमहाकला॥ महामुद्रामहाभद्रामहानिद्रामहोज्वला॥ महाशुभ्रामहाल
क्ष्मीर्म्महाभागामहोदया॥ महामोहामोहतुष्टिर्महापुष्टिर्महाजया॥ महाधृतिर्महाघोरामहादंष्ट्रामहाद्युतिः॥ महा
कान्तिर्महाप्रभामहासिद्धामहातपा॥ महास्वधामहोस्वाहामहाबोधामहाक्षुधा॥ महाबंधनसंहर्त्री महाभयविनाशि
नी:॥ महानेत्रामहावक्त्रामहाजिह्वामहाभुजा॥ महामहीरुहापाणिर्महाज्योत्स्नामहानला॥ महाकान्तिर्महाक्षान्तिर्महा
शान्तिर्महामतिः॥ महाश्वासामहाशुक्लामहापर्वतवासिनी॥ महाब्रह्ममयीमानामहाकायामहारवा॥ महास्वराश्रीर्मह
ति पार्वतीचण्डिकाशिवा॥ महाकुलामहालोलामहामानामहाधना॥ महानीलामहाशैलामहाबाहामहाबला॥ महाविं
तामहाविज्ञामहादैतुर्यशस्विनी॥ महाविद्यामहासाध्यामहामेधामहामती॥ महाशूलीमहादर्प्पामहादुःस्वप्ननाशिनी
महामोक्षप्रदामोक्षामहादक्षामहापनी॥ महाशुभ्रामहावाणीमहाशोकविनाशिनी॥ महाकालामहाधारामहामाया
वखेचरी॥ महाक्षेमंकरीक्षम्यामहैश्वर्य्यप्रदायिनी॥ महाविषघ्नीविषहामहादुर्गप्रणाशिनी॥ महादुर्गामहानन्तामहाकै

लाशवासिनी ॥ महास्तनी सुभगा महेज्या च महामती ॥ महाप्रत्यगिरा नित्या महाप्रेतकरालिनी ॥ महाशांतिर्महाशक्तिर्म
हामंगलकारिणी ॥ यः इदं कीर्तयेद्भक्त्या विषमस्थो भवेद्युति ॥ लोहपंजरमध्यस्थस्तस्य नश्यंति बंधनं ॥ राजानो दासतां
यांति भवेत्सर्वजनप्रियः ॥ अचलाश्रियमाप्नोति तस्य नश्यंत्युपद्रवाः ॥ संग्रामे विजयेच्छत्रून्वृक्षवत्सन्नगानिव ॥ न
विषं क्रमते देहे न मृत्युः पावके जले ॥ नाकाले मरणं तस्य कदाचित्संभविष्यति ॥ यं यं कामयते कामं तं तं प्राप्नोति नित्यशः
बहुना किमिहोक्तेन सर्वसिद्धिप्रदं नृणां ॥ ॥ इति श्रीरुद्रयामले भैरवसंवादे श्यामास्तोत्ररत्नं नाम स्तोत्रं संपूर्णम् ॥
अथ ककारादि सहस्रनाम ॥ कैलासशिखरे रम्ये नानादेवगणावृते ॥ नानावृक्षलताकीर्णे नानापक्षिरवैर्युते ॥ चतुर्मण्डल
संयुक्ते शृंगालमण्डपस्थिते ॥ समाधौ संस्थितं शांतं क्रीडंतं योगिनीप्रियं ॥ तत्र मौनधरं दृष्ट्वा देवी पृच्छति शंकरं ॥ देव्युवाच ॥
किं त्वया जप्यते नाथ किं त्वया स्मर्यते सदा ॥ सृष्टिः कुत्र विलीनास्ति पुनः कुत्र प्रजायते ॥ ब्रह्माण्डकारणं किं तत्किमाद्यं कार
णं महत् ॥ मनोरथमयी सिद्धिर्वांछासिद्धिस्तथा शिव ॥ तृतीया कल्पनासिद्धिः कोटिसिद्धीश्वरत्वकं ॥ शक्तिपाताष्टदशकं वरा
वरपुरीगतिः ॥ महेन्द्रजालमिन्द्रादिजालानां रचना तथा ॥ अणिमा खेचरत्वं च परकायप्रवेशनं ॥ नवीनसृष्टिकरणं समुद्रशो
षणं तथा ॥ अमायां चंद्रसंदर्शो दिवा चंद्रप्रकाशनं ॥ चंद्राष्टकं चाष्टदिक्षु तथा सूर्याष्टकं शिव ॥ जले स्थलमयत्वं च वह्नौ च हिम

यत्नकं ॥ व्रह्मलोदिनिर्माणमिन्द्राणीकरणं परं ॥ पादुकागुटिकायक्षिवेतालपंचकं तथा ॥ रसायणं तथा गुप्तिस्तथैव च विलाजनं ॥ महामधुमतीसिद्धिस्तथा पद्मावती शिव ॥ तथा भोगवतीसिद्धिर्यावंत्यः संति सिद्धयः ॥ केन मंत्रेण तपसा कलौ पापसमाकुले ॥ आयुष्यपुण्यरहिते कथं भवति तद्वद ॥ ॥शिव उवाच ॥ विना मंत्रं विना स्तोत्रं विनैव तपसा प्रिये ॥ विना वलिं विना न्यासं भूतशुद्धिं विना प्रिये ॥ सिद्धिराशु भवेद्येन तद्देव कथ्यते मह: ॥ अन्यब्रह्माण्डगोले तु पंचाशत्कोन्यमध्यगे ॥ पंचभूते स्थिता नारा सर्वान्ते कालिका स्थिता ॥ अनंतकोटिव्रह्माण्डराजदंताग्रके शिवे ॥ स्थाप्य भूम्यालयं कृत्वा कृष्णवर्णं विधाय वै ॥ महानिर्गुणरूपा तु वाचातीता परा कला ॥ क्रीडयाभूत्स्वरूपं तु भर्तारं तु प्रकल्पयेत् ॥ सृष्टेरारंभकार्यार्थं इच्छाया इष्टा तदा तया ॥ इच्छाशक्तिस्तु सा जाता तया कालो विनिर्मितः ॥ प्रतिविंवं तत्र इष्टे जाता ज्ञानाभिधा तु सा ॥ इदमेतत्तु किंविशिष्टं ज्ञानं विज्ञानकं परा ॥ तदा क्रियाभिधा जाता तदिच्छातो महेश्वरि ॥ व्रह्माण्डगोलं देवेशि राजदंतस्थितं तु यत् ॥ सा क्रिया स्थापयामास स्वस्वस्थानक्रमेण च ॥ तत्रैव सेव्या देवी समरस्यपरायणा ॥ यदिच्छा कथ्यते देवि यथावदवधारय ॥ युगादिसमये देवि शिवं परगुणोत्तरं ॥ तदिच्छानिर्गुणं शांतं सच्चिदानंदविग्रहं ॥ साश्वतं सुंदरं शुभ्रं सर्वदेवयुतं परं ॥ आदिनाथं गुणातीतं कालसंयुतमीश्वरं ॥ विपरीतरतं देवं सामरस्यपरायणं ॥ पूजार्थमागतान् देवगंधर्वाप्सरसोगणान् ॥ यक्षि

णी किन्नरी मर्त्यास्त्वर्वैश्याद्यातिलोत्तमा ॥ वीक्ष्य तन्मायया प्राह सुंदरी प्राणवल्लभे ॥ त्रैलोक्यसुंदरी प्राणस्वामिनि प्रा
णरंजनि ॥ किमागतं भवत्याद्य मम भाग्यार्णवो महान् ॥ उक्त्वा मौनधरं शंभुं पूजयंत्यप्सरोगणाः ॥ ॥ गंधर्वा ऊचुः ॥
संहाराद्यारितं देव त्वया विश्वजनप्रिय ॥ सृष्टेरारंभकार्यार्थं सृष्टोसि महाप्रभो ॥ वेश्याकृत्यमिदं देव मंगलार्थप्रगा
यणं ॥ प्रयाणोत्सवकाले तु समारंभे प्रगायणं ॥ प्रगाद्यारंभकालो हि वर्तते मृडशंकरः ॥ इंद्राणीकोटयः संति तस्याप्र
स्रवविंदुतः ॥ ब्रह्माणी वैष्णवीनां च माहेशी कोटिकोटयः ॥ नवसामरसानंद दर्शनार्थं समुद्भवाः ॥ संजाताश्चागता देव
वास्माकं सौख्यसागर ॥ रतिं हित्वा कामिनीनां नान्यं सौख्यं महेश्वर ॥ सा रति ईष्यतेस्माभिर्महत्सौख्यार्थकारिका ॥ एवमेव
तु वास्माभिः कर्तव्यं भर्तृणा सह ॥ एवं श्रुत्वा महादेवो ध्यानावस्थितमानसः ॥ ध्याने हित्वा मायया तु प्रोवाच कालिकां प्रति
कालि कालि हरुण्डमाले प्रियभैरवनादिनि ॥ शिवारूपवरे क्रूरे घोरदंष्ट्राभयानके ॥ त्रैलोक्यभक्षणकारिसुंदर्याः संति तेय
तः ॥ सुंदरी वीक्षणां कर्म्म कार्यं कारप्रिये शिवे ॥ ध्यानं सुंव महादेवि नागच्छंति गृहं प्रति ॥ तव रूपं महाकालि मम कालप्रियं
करं ॥ एतासां सुंदरं रूपं त्रैलोक्यप्रियकारकं ॥ एवं मायाभ्रमाविष्टो महाकालो वदंन्निति ॥ ईदृक्कालवचः श्रुत्वा कालं प्रा
ह च कालिका ॥ मायया छायवास्मानं निजस्त्रीरूपधारिणी ॥ इतः प्रभृति स्त्रीमात्रं भविष्यति युगे युगे ॥ कल्याणो घध्वयोदे

यिद्दिवा च स्त्री स्वरूपता॥ रात्रौ स्त्रीरूपमासाद्य क्रीडन्ती च परस्परं॥ अज्ञानं वै च सर्वेषां भविष्यति युगे युगे॥ एवं शापं प्रदत्वा तु छ
नः प्रोवाच कालिका॥ विपरीतरतं कृत्वा चिन्तयन्ति भजन्ति ये॥ तेषां वरं प्रदास्यामि तत्र नित्यं वसाम्यहं॥ इत्युक्त्वा कालिका विद्या तत्रैवा
न्तरधीयत॥ त्रिंशत्त्रिखर्ववर्षेषु हृदे नवम्बुदकोटयः॥ दर्शनार्थं तपस्तेपे सा वैकुण्ठगता प्रिये॥ मम प्राणप्रिया देवि महाप्राणप्रिया
मम॥ किं करोमि क्व गच्छामि इत्येवं भ्रमसंकुलः॥ तदा काल्याः कृपा जाता मम चिन्तापरः शिवः॥ यन्त्रप्रस्तारकं छिन्नं काली ददाति म
त्वरं॥ यन्त्रं जातं तदारभ्य पूर्वं विकृतगोचराः॥ श्रीचक्रराजप्रस्तारं रचनाप्यामतत्परः॥ इतस्ततो भ्राम्यमानस्त्रैलोक्यं चक्रमध्य
गं॥ चक्ररूपाद् दर्शनार्थं कोट्यर्बुदयुगं गतं॥ मम प्राणप्रिया देवि महाश्रीचक्रनायिका॥ तत्र बिन्दोपरं रूपं सुन्दरं सुमनोहरम्॥
रूपं जातं महेशानि त्रयात्रिपुरसुन्दरी॥ रूपं दृष्ट्वा महादेवो राजराजेश्वरो ह्यभूत्॥ तस्याः कटाक्षमात्रेण तस्या रूपधरः शिवः॥ वि
ना शृंगाररसं युक्ता तदा जाता महेश्वरी॥ विना काल्यं गता देवि जगत्स्थावरजंगमं॥ तच्छृंगारोत्तरशक्तित्वं क्वापि नास्ति महेश्वरि॥ सुन्द
र्या प्रार्थिता काली तुष्टा प्रोवाच कालिका॥ सर्वेषां नेत्रके सेतुं समां शोत्र भविष्यति॥ पूर्वावस्थासु देवेशि मां शक्तिष्ठति प्रिये॥
सावस्थातस्तारुण्यात् तु तदं तेनैव तिष्ठति॥ मद्भक्तानां महेशानि सदा तिष्ठति निश्चितं॥ शक्तिस्तु कुंठिता जाता तथा रूपं न सुन्द
रं॥ चिन्ताविष्टा तिनलिना जाता तत्र तु सुन्दरी॥ क्षणं स्थित्वा ध्यानपरा काली चिन्तनतत्परा॥ तदा काली प्रसन्नाभूत् क्षणाद्देव

॥तंत्रवि॰॥
॥१७०॥

निश्चितं ॥ वरं ब्रूहि वरं ब्रूहि वरं ब्रूहीति मादरं ॥ ॥सुंदर्युवाच॥ मम शक्तिं परां देहि वरोयं प्रार्थितो मया ॥ तादृगुपायकथय
येनाशक्तिर्भविष्यति ॥ ॥कालुवाच॥ मम नाम सहस्रं त्वं मया पूर्वं विनिर्मितं ॥ मत्स्वरूपं ककाराख्यं महासाम्राज्यनामकम्
वरदानाभिधं नाम क्षणाद्वांछितदायकं ॥ मत्पाठस्त्व महामाये नवशक्तिर्भविष्यति ॥ ततः प्रभृति श्रीविद्या त्वन्नाम पाठतत्परा ॥ त
देव नाम साहस्रं सुंदरीशक्तिदायकं ॥ कथ्यते परया भक्त्या साधयस्व महेश्वरि ॥ मद्यैर्मांसैस्तथा मुद्रैः सर्वैरन्यैस्तथा प्रिये ॥ तर्प्प
येत्पूजयेत्काली विपरीतरतिं चरेत् ॥ विपरीतरते देवि काली तिष्ठति नित्यशः ॥ माध्वीकपुकपुष्पात्तु मैथुनात्तु विरागिनी ॥ वे
स्मवीक्षापका विद्या श्मशानवासिनी परा ॥ वीरसाधनसंतुष्टा वीरास्फालननादिनी ॥ शिवावलिप्रहृष्टात्मा शिवारूपादिव
रिडका ॥ कामानंदपरा स्तोत्रप्रिया मन्मथमानसा ॥ ब्रह्मानंदपरा सांद्रमैथुनानंदनोदिनी ॥ योगींद्रहृदयागारा दिवानिशिध
विपर्य्यया ॥ विपरीता दिवानिशि विपरीतरतातुरा ॥ क्षणात्तुष्टा वरप्रत्यक्षादत्तमानातनपश्चिमा ॥ रक्तहस्तो मुक्तकेशो दिग
वरविभूषितः ॥ शय्यास्थोहं वनानंदी केस्यामंगपरायणाः ॥ पठेत्सहस्रनामाख्यं मेधासाम्राज्यनामकं ॥ यथा दिव्यामृतैर्दि
व्या प्रसन्ना क्षणमात्रतः ॥ तथानेन समा काली प्रसन्ना पाठमात्रतः ॥ कथ्यते नाम साहस्रं सावधानमनाःश्रृणु ॥ सर्वसाम्रा
ज्यमेधाख्यनामसाहस्रकस्य च ॥ महाकालो ऋषिः प्रोक्त उष्णिक्छंदः प्रकीर्तितः ॥ देवता दक्षिणा काली मायाबीजं प्रकीर्त्ति

॥गुरुः॥
॥१७०॥

नं हूँ शक्तिः कालिका बीजं कीलकं परिकीर्तितं ॥ कालिकावरदानादिस्वेष्टार्थे विनियोगता ॥ कर्पूरेण षडंगानि सदीर्घेन का
रयेत् ॥ ध्यानं च पूर्ववत्कृत्वा साधयेत्स्वेष्टसाधनं ॥ ॥ ॐ क्रीं काली क्रूँ कलारी च कल्याणी कमला कला ॥ कलावती कलाढ्या च
कलापूज्या कलात्मिका ॥ कलाहृष्टा कलापुष्टा कलामस्ता कलाकरा ॥ कलाकोटिसमाभासा कलाकेलिप्रपूजिता ॥ कलामयी कलाधा
रा कलापारा कलागमा ॥ कलाधारा कमलिनी ककारा करुणाकरी ॥ ककारवर्णसर्वांगी कलाकोटिविभूषिता ॥ ककारकोटिगुणि
ता ककारकोटिभूषणा ॥ ककारवर्णहृदया ककारमनुमंडिता ॥ ककारवर्णमुकुटा ककारवर्णभूषिता ॥ ककककवर्णरूपा कक
शब्दपरायणा ॥ ककवीरास्फालरता कमलाकरपूजिता ॥ कमलाकरनाथा च कमलाकररूपधृक् ॥ कमलाकरसिद्धिस्था कमला
करपारदा ॥ कमलाकरमध्यस्था कमलाकरतोषिता ॥ कथंकारपरालापा कथंकारपरायणा ॥ कथंकारपदांतस्था कथंकारपदा
र्थभूः ॥ कमलाक्षी कमलजा कमलाक्षप्रपूजिता ॥ कमलाक्षवरोद्युक्ता ककारा कर्बुराक्षरा ॥ करतारा करच्छिन्ना करश्यामा करार्ण
वा ॥ करपूज्या कररता करदा करपूजिता ॥ करतोया करामर्षा कर्मनाशा करप्रिया ॥ करप्राणा करकजा करका करकांतरा ॥ करकाच
लरूपा च करकाचलशोभिनी ॥ करकाचलपुत्री च करकाचलतोषिणी ॥ करकाचलगेहस्था करकाचलरक्षणी ॥ करकाचलसम्मान्या
करकाचलकारिणी ॥ करकाचलवर्षाढ्या करकाचलरंजिता ॥ करकाचलकांतारा करकाचलमालिनी ॥ करकाचलसोभाढ्या करक

मलरूपिणी॥ करामलकसंस्था च करामलकसिद्धिदा॥ करामलकसंपूज्या करामलकतारिणी॥ करामलककारी च कराम
लकलोचनी॥ करामलकमाता च करामलकसेविनी॥ करामलकवध्येया करामलकदायिनी॥ कंजनेत्रा कंजगतिः कंजस्था कं
जधारिणी॥ कंजमालाप्रियकरी कंजरूपा च कंजभा॥ कंजजातिः कंजगतिः कंजहोमपरायणा॥ कंजमण्डलमध्यस्था कंजा
भरणभूषिता॥ कंजसम्माननिरता कंजोत्पत्तिकरायणा॥ कंजराशिसमाकारा कंजारण्यनिवासिनी॥ करंजवृक्षमध्यस्था
करंजवृक्षवासिनी॥ करंजफलभूषाढ्या करंजारण्यवासिनी॥ करंजमालाभरणा करवालपरायणा॥ करवालप्रहृष्टात्मा
करवालप्रियागतिः॥ करवालप्रियाकंठा करवालप्रहारिणी॥ करवालमयी कर्मा करवालप्रियाकरा॥ कवंधमालाभरणा क
वंधराशिमध्यगा॥ कवंधकूटसंस्थाना कवंधानन्तभूषणा॥ कवंधनादसंतुष्टा कवंधासनधारिणी॥ कवंधगृहमध्यस्था क
वंधवरवासिनी॥ कवंधकांचिकरणी कवंधराशिभूषणा॥ कवंधमालाजयदा कवंधदेहवासिनी॥ कवंधासनमान्या च क
पालमालधारिणी॥ कपालमालामध्यस्था कपालव्रततोषिता॥ कपालदीपसंतुष्टा कपालदीपरूपिणी॥ कपालदीप
वरदा कपालकज्जलस्थिमा॥ कपालमालाजयदा कपालजपतोषिणी॥ कपालसिद्धिसंतुष्टा कपालभोजनोद्यता॥ क
पालव्रतसंस्थाना कपालकमलालया॥ कवित्वामृतसारा च कवित्वामृतसागरा॥ कवित्वसिद्धिसंहृष्टा कवित्वादानकारि

णी॥ कविपूज्या कविगतिः कविरूपा कविप्रिया॥ कविब्रह्मानंदरूपा कवित्वव्रततोषिता॥ कविमानससंस्थाना कविवांछा
प्रपूरणी॥ कविकंठस्थिता कं ह्रीं कं कं कं कविपूर्तिदा॥ कज्जला कज्जलादानमानसा कज्जलप्रिया॥ कपालकज्जलसमा कज्ज
लेसप्रपूजिता॥ कज्जलार्णवमध्यस्था कज्जलानंदरूपिणी॥ कज्जलप्रियसंतुष्टा कज्जलप्रियतोषिणी॥ कपालमालाभरणा
कपालकरभूषणा॥ कपालकरभूषाढ्या कपालचक्रमण्डिता॥ कपालकोटिनिलया कपालदुर्गकारिणी॥ कपालगिरिसंस्था
ना कपालाचलवासिनी॥ कपालपात्रसंतुष्टा कपालार्घ्यपरायणा॥ कपालार्घ्यप्रियप्राणा कपालार्घ्यवलोद्यता॥ कपालच
क्ररूपा च कपालरूपमात्रगा॥ कदली कदलीरूपा कदलीवनवासिनी॥ कदलीपुष्पसंप्रीता कदलीफलमानसा॥ कदलीहो
मसंतुष्टा कदलीदलतोद्यता॥ कदलीगर्भमध्यस्था कदलीवनसुंदरी॥ कदंबपुष्पनिलया कदंबवनमध्यगा॥ कदंबकुसुमा:
मोदा कदंबवनतोषिणी॥ कदंबपुष्पसंपूज्या कदंबपुष्पहोमदा॥ कदंबपुष्पमध्यस्था कदंबफलभोजिनी॥ कदंबकाननांत
स्था कदंबाचलवासिनी॥ कच्छपा कच्छपाराध्या कच्छपासनसंस्थिता॥ कर्णपूरा कर्णनासा कार्णाती कारभैरवी॥ कलप्रीता क
लहदा कलहा कलहातुरा॥ कर्णपक्षी कर्णवार्त्ता कथनी कर्णसुंदरी॥ कर्णपिशाचिनी कर्णमंजरी कपिकच्छुदा॥ कपिक
च्छुपरूपाढ्या कपिकच्छुस्वरूपिणी॥ कस्तूरीमृगसंस्थाना कस्तूरीमृगरूपिणी॥ कस्तूरीमृगसंतोषा कस्तूरीमृगमध्यगा

कस्तूरीरसनीलांगी कस्तूरीगंधतोषिता ॥ कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रिया ॥ कस्तूरीप्रेमसंतुष्टा कस्तूरीप्रेमधारिणी ॥ कस्तूरीपूजकानंदा कस्तूरीगंधरूपिणी ॥ कस्तूरीमालिकारूपा कस्तूरीपूजनप्रिया ॥ कस्तूरीतिलकानंदा कस्तूरीतिलकप्रिया ॥ कस्तूरीहोमसंतुष्टा कस्तूरीतर्पणोद्यता ॥ कस्तूरीमार्जनोद्युक्ता कस्तूरीचक्रपूजिता ॥ कस्तूरीपुष्पसंपूज्या कस्तूरीचर्वणोद्यता ॥ कस्तूरीगर्भमध्यस्था कस्तूरीवस्त्रधारिणी ॥ कस्तूरिकामोदरता कस्तूरीप्रेमधारिणी ॥ कस्तूरीशक्तिनिलया कस्तूरीकुंडमध्यगा ॥ कस्तूरीकुण्डसंस्नाता कस्तूरीकुंडमंजना ॥ कस्तूर्यर्घ्येनसंतुष्टा कस्तूरीजीवधारिणी ॥ कस्तूरीपरमामोदा कस्तूरीजीवनमा ॥ कस्तूरीजातिभावस्था कस्तूरीगंधचुंबना ॥ कस्तूरीगंधसंशोभी विराजितकपालभूः ॥ कस्तूरीमदनांतस्था कस्तूरीमदहर्षदा ॥ कस्तूरिकावितानस्था कस्तूरीगृहमध्यगा ॥ कस्तूरीस्पर्शकप्राणा कस्तूरीनिंदकांतका ॥ कस्तूर्यामोदरसिका कस्तूरीक्रीडनोद्यता ॥ कस्तूरीदाननिरता कस्तूरीवरदायिनी ॥ कस्तूरीस्थापनाशक्ता कस्तूरीस्थानरंजनी ॥ कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवंदिता ॥ कस्तूरीवंदकाधारा कस्तूरीस्थानवासिनी ॥ कहरूपा कहाढ्याच कहानंदा कहात्मभूः ॥ कहपूज्या कहात्याख्या कहहेया कहात्मिका ॥ कहमाला कण्ठभूषा कहमंत्रजपोद्यता ॥ कहनामस्मृतिपरा कहनामपरायणा ॥ कहपारायणरता कहदेवी कहेश्वरी ॥ कहहेतुः कहानंदा कहनादपरायणा ॥ कहमाता कहांतस्था कहमंत्रा कहेश्वरा ॥ कहगेया कहाराध्या

कह्रध्यानपरायणा॥ कह्रतंत्राकह्रकह्राकह्रचर्चापरायणा॥ कह्राचाराकह्रगतिः कह्रनांदवकारिणी॥ कह्ररत्याकह्रगति
कह्रशक्तिपरायणा॥ कह्राज्यरताकर्मसाक्षिणी कर्मसुंदरी॥ कर्मविद्याकर्मगतिः कर्मतंत्रपरायणा॥ कर्ममात्राकर्म्म
गात्राकर्मशर्मपरायणा॥ कर्मरेखानाशकर्त्री कर्मरेखाविनोदनी॥ कर्मरेखामोहकरी कर्मकीर्तिपरायणा॥ कर्मविद्याक
र्मसाराकर्माधाराच कर्मभूः॥ कर्मकारी कर्मकरी कर्मकौतुकसुंदरी॥ कर्मकाली कर्मतारा कर्मछिन्नाचकर्मदा॥ कर्मचांड
लिनी कर्मदेवमाताच कर्मभूः॥ कर्मकांडरतानंता कर्मकांडानुमानिता॥ कर्मकाण्डपरीणाहा कमठी कमठाकृतिः॥ कमठा
राध्यहृदयाकमठाकंठसुंदरी॥ कमठासनसंसेव्या कमठी कर्मतत्परा॥ करुणाकरकांताच करुणाकरवंदिता॥ कठोराकर
मालाच कठोरकुचधारिणी॥ कपर्दिनी कपटिनी कठिनी कंकभूषणा॥ करभोरुंकठिनदा कलभाकरमालया॥ कलभाषा
मयी कल्पा कल्पनाकल्पदायिनी॥ कमलस्था कलामाला कमलास्या कणप्रभा॥ ककुम्भिनी कष्टवती कच्छाकच्छार्चिता कजा
कत्वार्चिता करतनुः कवसुंदरधारिणी॥ कठोरकुचसंलग्ना कटिसूत्रविराजिता॥ कणभक्षप्रिया कंदा कथा कंदगतिः कलिः
कलिघ्नी कलिदूती च कविनायकपूजिता॥ कशाकक्षानियंत्रा च काश्विन्नाविवरार्चिता॥ कर्त्रीचकर्त्रिकाभूषा करणी कर्मशत्रु
पा॥ करणेशी करणदा कलनांगनभूषिता॥ करणेक्षी करणदा करणांबा कलानिधिः॥ कलदावलनाधारा करिका करकाक

॥तंत्रचिं॥
॥१७३॥

रा॥ कलगेया कर्कराशिः कर्कराशिप्रपूजिता॥ कन्याराशिः कन्यका च कन्यका प्रियभाषिणी॥ कन्यादानकृतानंदा कन्यादानगृ
हेलदा॥ कन्यकादानसंतुष्टा कन्यादानप्रतोषिणी॥ कर्पणाकक्षदह्ना कमिता कमितामना॥ करमालानंदकर्त्री करमालाप्रतोषि
ता॥ करमालाश्रयानंदा करमालासमागमा॥ करमालासिद्धिदात्री करमालाकरप्रिया॥ करप्रिया करलता करदानपरायणा॥ क
रनंदा कलिगतिः कलिपूज्या कलिप्रसूः॥ कलनादनिनादस्था कलनादवरप्रदा॥ करनादसमाजस्था कहोला च कहेलदा॥ क
होलगेहसंस्था च कहोलवरदायिनी॥ कहोलकविताधारा कहोलऋषिमानिता॥ कहोलमानसाराध्या कहोलवाक्यकारिणी
कहोलगेहमध्यस्था कहोलवरकारिणी॥ कर्तृरूपा कर्तृमयी कर्तृमाता च कर्तरी॥ कनीया करकाराध्या कनीनकमयी क
था॥ कनीयानंदनिलया कनकानंदतोषिता॥ कनीनककरा कष्टा कथार्णवकरी कीरः॥ करिगम्या करिगतिः करिध्वजप
रायणा॥ करिनाथप्रिया कंठा कथानकप्रतोषिता॥ कमनीया कमनका कमनीयविभूषणा॥ कमनीयसमाजस्था कम
नीयव्रतप्रिया॥ कमनीयगुणाराध्या कपिला कपिलेश्वरी॥ कपिलाराध्यहृदया कपिलावरदायिनी॥ कएईलह्रीं स्व
रूपा च कएईलह्रीं वरप्रदा॥ कएईलह्रीं सिद्धिदात्री कलहह्रीं स्वरूपिणी॥ कहह्रीं मंत्रवर्णा च कहलह्रीं प्रसूकला॥ क
वर्गा च कपाटस्था कपाटोद्घाटनक्षमा॥ कंकाली च कपाली च कंकालप्रियभाषिणी॥ कंकालभैरवाराध्या कंकालमा

॥गुरु:॥
॥१७३॥

नसंस्थिता॥ कंकालमोहनिरता कंकालमोहदायिनी॥ कलुषघ्नी कलुषहा कलुषार्त्तिविनाशिनी॥ कलिपुष्पा कलादाना क
शिपुः कश्यपार्चिता॥ कश्यपा कश्यपाराध्या कलिपूर्णकलेवरा॥ कलेवरा करिकवाकटवर्गा करालिका॥ करालभैरवाराध्या
करालभैरवेश्वरी॥ करालाकरणाधारा कपर्दीशवरप्रदा॥ कपर्दीशप्रेमरता कपर्दीमालिकायुता॥ कपर्दीजपमालाढ्या
करवीरप्रसूनदा॥ करवीरप्रियप्राणाः करवीरप्रपूजिता॥ कर्णिकारसमाकारा कर्णिकारप्रपूजिता॥ करीषाग्निस्थि
ता कर्षा कर्षमात्रसुवर्णदा॥ कलशा कलशाराध्या कषाया करिगानदा॥ कपिला कलकंठी च कलिकल्पलता मता॥ कल्पल
ता कल्पमाता कल्पकारी च कल्पभूः॥ कर्पूरामोदरुचिरा कर्पूरामोदधारिणी॥ कर्पूरमालाभरणा कर्पूरवासपूर्तिदा॥ क
र्पूरमालाजपपरा कर्पूरार्णवमध्यगा॥ कर्पूरतर्पणरता कर्पूरवरधारिणी॥ कपटेश्वरसंपूज्या कपटेश्वररूपिणी॥ कटुः क
पिध्वजाराध्या कलापपुष्परूपिणी॥ कलापपुष्परुचिरा कलापपुष्पपूजिता॥ कर्कषा च कराराध्या कथं ब्रूमा करालः
ता॥ कथंकाल विनिर्मुक्ता काली कालप्रिया क्रतुः॥ कामिनी कामिनीपूज्या कामिनीपुष्पधारिणी॥ कामिनीपुष्पनिलया
कामिनीपुष्पपूर्णिमा॥ कामिनीपुष्पपूजार्हा कामिनीपुष्पभूषणा॥ कामिनीपुष्पतिलका कामिनीकुंडचुम्बना॥ कामि
नीयोगसंतुष्टा कामिनीयोगदायिनी॥ कामिनीकुण्डसंमग्ना कामिनीकुण्डमध्यगा॥ कामिनीमानसाराध्या कामिनीमानते

षिता॥ कामिनीमानसंचारा कालिका कालकालिका॥ कामा च कामदेवी च कामेशी कामसंभवा॥ कामभावा कामरता का
मार्त्ता काममंजरी॥ काममंजीररणिता कामदेवप्रियान्तरा॥ कामकाली कामकला काली कामकलाभिधा॥ कालीः
कामकला काली कालानलसमप्रभा॥ कल्पांतदहना कांता कांतारप्रियभाषिणी॥ कालपूज्या कालरता कालमाला
च कालिनी॥ कालवीरा कालघोरा कालसिद्धा च कालदा॥ कालांजनसमाकारा कालंजरनिवासिनी॥ कालऋद्धिः का
लवृद्धिः कारागृहविमोचनी॥ कादिविद्या कादिमाता कादिस्था कादिसुंदरी॥ काशी कांची च कांचीस्था काशीश्वरवर
दायिनी॥ क्रांबीजा चैव काबीजा क्रांहृदयायनमस्मृता॥ काम्या काम्यगतिः काम्यसिद्धिदात्री कसिद्धिभूः॥ कामाख्या
कामरूपा च कामशापविमोचिनी॥ कामदेवकलारामा कामदेवकलालया॥ कालरात्री कामदात्री कांताराचलवा
सिनी॥ कालरूपा कालगतिः कामयोगपरायणा॥ कामसंमर्द्दनरता कामगेहविकाशिनी॥ कामभैरवभार्या च काल
भैरवकामिनी॥ कालभैरवयोगस्था कालभैरवभोगदा॥ कामधेनुः कामदोग्ध्री काममाता च कांतदा॥ कामुका कामु
कराध्या कामुकानंदवर्द्धिनी॥ कार्तवीजा कार्तवेया कार्तिकेयप्रपूजिता॥ कार्या कारणदा कार्यकारिणी कारणांतरा
कांतिगम्या कांतिमयी कांत्या कात्यायनी च का॥ कामसारा च काश्मीरा काश्मीराचारतत्परा॥ कामरूपाचाररता कामरू

दप्रियंवदा॥ कामरूपा कामसिद्धा कामरूपमनोमयी॥ कार्तिकी कार्तिकाराध्या कांचनारप्रसूप्रभूः॥ कांचनालप्रसूनाभा कांचनालप्रपूजिता॥ कांचरूपा कांचभूमिः कांस्यपात्रप्रभोजिनी॥ कांस्यध्वनीमयी कामसुंदरी कामचुंबना॥ काशपुष्पप्रतीकाशा कामद्रुमसमागमा॥ कामपुष्पा कामभूमिः कामपूज्या च कामदा॥ कामदेहा कामगेहा कामराजपरायणा कामध्वजसमारूढा कामध्वजसमास्थिता॥ कास्यपी काश्यपाराध्या काश्यपानंददायिनी॥ कालिंदीजलसंकाशा कालिंदीजलपूजिता॥ कादेवपूजानिरता कादेवपरमार्थदा॥ कर्मणा कार्मणाकारा कामकार्मणकारिणी॥ कार्मणत्रोटनकरी काकिनी कारणाह्वया॥ काव्यामृता च कालिंगा कालिंगमर्दनोद्यता॥ कालागुरुविभूषाढ्या कालागुरुविभूतिदा॥ कालागुरुसुगंधा च कालागुरुप्रतर्पणा॥ कावेरीनीलसंप्रीता कावेरीतीरवासिनी॥ कालचक्रभ्रमाकारा कालचक्रनिवासिनी कानना काननाधारा कारुः कारुणिकामयी॥ कांपिल्यवासिनी कास्था कामपत्नी च कामभूः॥ कादंबरीपानरता तथा कादंबरीकला॥ कामवंद्या च कामेशी कामराजप्रपूजिता॥ कामराजेश्वरीविद्या कामकौतुककौमुदी॥ कांबोजजा कांशितदा कांस्यकांचनकारिणी॥ कांचनाद्रिसमाकारा कांचनाद्रिप्रदानदा॥ कामकीर्तिः कामकेशी कालिकांकांतरश्रया॥ कामभेदी च कामार्तिनाशिनी कामभूमिका॥ कालनिर्णाशिनी काव्यवनिता कामरूपिणी॥ कामस्था काष्ठसंदीप्तिः काव्यदा काव्यसुंदरी

काष्टेशीकारणावराकामारिपूजनोद्यता॥ कांचीनूपुरभूषाढ्या कुंकुमाभरणान्विता॥/कालचक्राकालगतिः कालचक्र
मनोभवा॥ कुंजमध्या कुंजपुष्पा कुंजपुष्पप्रिया कुजा॥ कुंजमाता कुजाराध्या कुठारवरधारिणी॥ कुंजरस्था कुशरता कुशे
शयविलोचना॥ कुनटी कुरनी कुचा कुरंगी कुटजाश्रया॥ कुंभीरहारिभूषा च कुंभीनशादधोद्यता॥ कुंभकर्णमनोल्लासा
कुलचूडामणिः कुला॥ कुलालगृहकन्या च कुलचूडामणिः प्रिया॥ कुलपूज्या कुलाराध्या कुलपूजापरायणा॥ कुलभूषा
नथा कुक्षिः कुरवीगणासेविनी॥ कुलपुष्पा कुलरता कुलपुष्पपरायणा॥ कुलवस्त्रा कुलाराध्या कुलकुंडसमप्रभा॥
कुलकुंडसमुल्लासा कुंडपुष्पपरायणा॥ कुंडपुष्पप्रहसना कुंडगोलोद्भवात्मिका॥ कुंडगोलोद्भवाधारा कुंडगोलमयी कु
हूः॥ कुंडलोलप्रियप्राणा कुंडगोलप्रपूजिता॥ कुंडगोलमनोल्लासा कुंडगोलवरप्रदा॥ कुलदेवरताज्ञा च कुलसिद्धिकरीप
रं॥ कुलकुंडसमाकारा कुलकुंडसमानभूः॥ कुंडसिद्धिः कुंडऋद्धिः कुमारीपूजनोद्यता॥ कुमारीपूजकप्राणा कुमारीपूज
कातया॥ कुमारीकामसंतुष्टा कुमारीपूजकात्मिका॥/कुमारीव्रतसंतुष्टा कुमारीरूपधारिणी॥ कुमारीभोजनप्रीता कुली
रीवकुमारदा॥ कुमारमाता कुलदा कुलयोनिः कुलेश्वरी॥ कुललिंगा कुलानंदा कुलरम्या कुतर्कधृक्॥ कुंतीवकुलकां
ता च कुलमार्गपरायणा॥ कुल्ला च कुरुकुल्ला च कुल्लुका कुलकामदा॥ कुलिशांगी कुब्जिका च कुब्जिकानंदवर्द्धिनी॥ कुलीन

कुंजरगतिः कुंजरेश्वरगामिनी ॥ कुलपाली कुलवती तथैव कुलदीपिका ॥ कुलयोगीश्वरी कुण्डा कुंकुमारुणविग्रहा ॥
कुंकुमानंदसंतोषा कुंकुमार्णववासिनी ॥ कुंकुमाकुसुमप्रीता कुलभूः कुलसुंदरी ॥ कुंददंती कुमुदिनी कुशला कुल-
टालया ॥ कुलटालयमध्यस्था कुलटासंगतोषिता ॥ कुलटाकुंवनोद्युक्ता कुशावर्त्तकिलार्णवा ॥ कुलार्णवाचाररता कु-
ण्डली कुंडलाकृतिः ॥ कुमतिश्च कुलश्रेष्ठा कुलचक्रपरायणा ॥ कूटस्था कूटदृष्टिश्च कुंतला कुंतलाकृतिः ॥ कुशलाकृ-
तिरूपा च कूर्चबीजधरा च कुः ॥ कुकुकुकुशब्दरता क्रूँ क्रूँ क्रूँ क्रूँ परायणा ॥ कुँ कुँ कुंशब्दनिलया कुक्कुरालयवासिनी ॥ कुकु-
रासंगसंयुक्ता कुकुरानंतविग्रहा ॥ कूर्चारंभा कूर्चबीजा कूर्चजापपरायणा ॥ कुलिनी कुलसंस्थाना कूर्चकंठपरायगतिः ॥
कूर्चबीजा भालदेशा कूर्चमस्तकभूषिता ॥ कुलवृक्षगता कूर्मी कूर्मी कूलनिवासिनी ॥ कुलविंदुः कुलशिवा कुलशाक्तपराय-
णा ॥ कौलिनी कुलसंस्थाना कूर्चकंठपरागतिः ॥ कूर्चबीजा भालदेशा कूर्चमस्तकभूषिता ॥ कुलवृक्षगता कूर्मा कूर्माचलनिवा-
सिनी ॥ कुलविंदुः कुलशिवा कुलशाक्तपरायणा ॥ कुलविंदुमणिप्रख्या कुंकुमद्रुमवासिनी ॥ कुचमर्दनसंतुष्टा कुचजापप-
रायणा ॥ कुचस्पर्शनसंतुष्टा कुचालिंगनतत्परा ॥ कुगतिघ्नी कुवेलार्च्या कुचभूः कुलनायिका ॥ कुगायना कुचधरा कुमाता कुं-
ददंतिका ॥ कुगेया कुहराभासा कुगोपा कुप्रतारिका ॥ कीर्तिः किरातिनी क्लिन्ना किरणा किन्नरीप्रिया ॥ क्रींकारी क्रींजपासक्ता

क्रीं हूं ह्रीं मंत्ररूपिणी ॥ किर्मीरितदृशापांगी किशोरार्धकिरीटिनी ॥ कीटभाषा कीटयोनिः कीटमाता च कीशदा ॥ किंशुकाकी-
टभाषा च क्रियामारा क्रियावती ॥ कींकींशब्दपरा क्रां क्रीं क्रूं क्रैं कों मंत्ररूपिणी ॥ कांकींकूंकैंस्वरूपा च कः फट् मंत्रस्वरूपि-
णी ॥ केतकीभूषणानंदा केतकीभरणान्विता ॥ केकरा केशिनी केशी केशीसूदनतत्परा ॥ केशरूपा केशमुक्ता कैकेयी
कौशिकी तथा ॥ कैरवा कैरवाह्लादा केशरा केतुरूपिणी ॥ केशवाराध्यहृदया केशवासक्तमानसा ॥ क्लैब्यविनाशिनी क्लैं च
क्लैं बीजजपतोषिता ॥ कोशला कोशदी च कोशा च कोमला तथा ॥ कोलापुरनिवासी च कोलासुरविनाशिनी ॥ कोटरूपा
कोटरता क्रोधिनी काकरूपिणी ॥ केका च कोकिला कोटिः कोटिमंत्रपरायणा ॥ कोट्यनंतमंत्रयुता केरूपा केरलाश्रया
केरलाचारनिपुणा केरलेंद्रगृहस्थिता ॥ केदाराश्रमसंस्था च केदारेश्वरपूजिता ॥ क्रोधरूपा क्रोधपदा क्रोधमाता क्वौ-
भ्राकी ॥ कोदंडधारिणी क्रौंचा कौशल्या कोमलांगता ॥ कौलिनी कौलिकाचारा कौलिकानंदवासिनी ॥ कौतुकी कौमुदी
कौला कौमारी कौरवार्चिता ॥ कौंडिन्या कौशली क्रोधज्वालाभास्वररूपिणी ॥ कोटिकालानलज्वाला कोटिमार्तंडविग्रहा
कृत्तिका कृष्णवर्णा च कृष्णा कृत्या क्रियातुरा ॥ कृशांगी कृतकृत्या च कः फट्स्वाहास्वरूपिणी ॥ क्रौं क्रों हूं फट् मंत्रवर्णा क्रीं ह्रीं
हूं फट् नमः स्वधा ॥ क्रीं क्रीं ह्रीं ह्रीं तथा हूं हूं फट् स्वाहा मंत्ररूपिणी ॥ ॥ इति श्रीसर्वसाम्राज्यमेधानामसहस्रकम् ॥

सुन्दरीशक्तिदानाख्यं स्वरूपाभिधमेव च ॥ कथितं दक्षिणाकाल्याः सुंदर्यै प्रीतियोगतः ॥ वरदानप्रसंगेन रहस्यमपि दर्शितं ॥ गोपनी
यं सदा भक्त्या पठनीयं परात्परं ॥ प्रातर्मध्याह्नकाले च संध्यार्द्धरात्रयोरपि ॥ पूजाकाले जपांते च पठनीयं विशेषतः ॥ यः पठेत्साध
काधीशः कालीरूपो हि वर्षतः ॥ पठित्वा पाठयेद्वापि शृणोति श्रावयेदपि ॥ वाचकं तोषयेद्वापि स भवेत्कालिकातनुः ॥ सहेल
त्वा सलीलम्वा यः कश्चिन्मानवः पठेत् ॥ सर्वदुःखविनिर्मुक्तस्त्रैलोक्यविजयी कविः ॥ मृतवंध्या च काकवंध्या कन्यावंध्या च वंध्य
का ॥ पुष्पवंध्या मूलवंध्या शृणुयात्स्तोत्रमुत्तमं ॥ सर्वसिद्धिप्रदातारं सत्कंचिरजीविनं ॥ पण्डितं कीर्तियुतं लभतेः
नात्र संशयः ॥ यद्यत्काममुपस्कृत्य कालीध्यानाज्जपेत्तवं ॥ तं तं कामं करे कृत्वा मंत्री भवति नान्यथा ॥ योनिपुष्पैर्द्विग
पुष्पैः कुंडगोलोद्भवैरपि ॥ संयोगामृतपुष्पैश्च वज्रदेवैः प्रसूनकैः ॥ कालीपुष्पैः पीठतोयैर्योनिशालेन विंदुभिः ॥ क
कस्तूरीकुंकुमैर्देवीं नखकालागुरुचक्रमात् ॥ अष्टगंधैर्द्धूपदीपैर्जवायावकसंयुतैः ॥ रक्तचंदनसिंदूरैर्मत्स्यमांसादिमूष
कैः ॥ मधुभिः पायसैः क्षीरैः शोधितैः शोणितैरपि ॥ महोपचारै रक्तैश्च नैवेद्यैः षड्रसान्वितैः ॥ पूजयित्वा महाकालीं महा
कालेन लालितां ॥ विधाय राज्ञीकुलकां च जप्त्वा स्तोत्रं पठेद्धि वै ॥ कालीभक्तस्त्वेकचित्तः सिंदूरतिलकान्वितः ॥ तांबूलपूरि
तमुखो मुक्तकेशो दिगंबरः ॥ शवयोनिस्थितो वीरः श्मशानसुरतान्वितः ॥ शून्यालये विंदुपीठे पुष्पाकीर्णे शिवावने ॥ प्रा

सानोथप्रभुंजानः कालीदर्शनमाप्नुयात्॥ तत्रयद्यत्कृतंकर्मतदनंतफलंभवेत्॥ ऐश्वर्येकमलासाक्षात्सिद्धौश्रीकालिका
म्बिका॥ कवित्वेतारिणीतुल्यःसौंदर्येसुंदरीसमः॥ वसोद्वारासमः काव्येश्चतोश्चानिधरोयथा॥ ब्रह्मास्त्वःवक्तुर्दर्पेस्वेलोक
विजयास्त्ववत्॥ शत्रुहर्त्तातार्पकर्त्ताभवेच्छिवसमःकलौ॥ दिक्षिदिक्रुत्रकत्तीवदिवारात्रिविपर्यया॥ महादेवसमोयो
गीत्रैलोकंस्तंभकःक्षणात्॥ गानेवक्तुंगुरुःसाक्षाद्गानेकर्णसमोभवेत्॥ गजस्त्वरथपत्तीनामंत्राणामधिपकृती॥ आयुषे
तुभुशुंडीवजरापलितनाशकः॥ वर्षषोडशवान्भूयात्सर्वकालंमहेश्वरि॥ ब्रह्माण्डगोलेदेवेशितत्तस्यदुर्लभंक्वचित्॥
सर्वदेवगतंभूयान्नात्रकार्याविचारणा॥ कुलपुष्पयुतंदृष्ट्वातत्रकालीविविंत्सव॥ विद्याराज्ञीवसेपूज्यपठेन्नामसहस्र
कं॥ मनोरथमयीसिद्धिस्तस्यहस्तेसदाभवेत्॥ परदारांसमालिंग्यसंजप्यपरमेश्वरि॥ हस्ताहस्तिकयायोगंकृत्वाजप्त्वासव
पठेत्॥ योनिंवीक्ष्यजपेन्मंत्रंकुबेरादधिकोभवेत्॥ कुंडगोलोद्भवंद्रव्यपर्णाकंहोमयेन्निशि॥ चितभूमौमहेशानिविधि
रेखाविमार्जयेत्॥ तरुणींचंचलांरम्यांसुंदरींकामगर्वितां॥ समानीयप्रयत्नेनसंशोध्यन्यासयोगतः॥ प्रसूनमंत्रेस्थाप्य
पृथ्वीविकसितांचरेत्॥ मूलचक्रंतुसंभाव्यदेव्यावरणसंयुतं॥ संपूज्यपरमेशानिमंवल्यांतांमहेश्वरि॥ जप्त्वाशक्त्यामहेशाः
निद्राविणींसंस्मरेच्छिवे॥ अष्टोत्तरशतेर्योनिंसमंत्रंजप्यप्रयत्नतः॥ संयोगीभूयजप्त्वासर्वविद्याधिपोभवेत्॥ भूत्वा

यारे शिवारण्ये पीठे वा देवालये तथा ॥ भूम्यदेशे तडागे वा गंगागर्भे चतुःपथे ॥ श्मशाने पर्वतेप्रांते एकलिंगे शवेगुरवे ॥ शुण्डे यो
नौ क्ष्मतुलातागेहे वेश्यागृहे तथा ॥ कुट्टिनीगृहमध्ये वा कदलीमण्डपे सदा ॥ पठेत् सहस्रनामाख्यं स्तोत्रं सर्वार्थसिद्धये ॥ अर
ण्यभूम्यदुर्गेभुरणो शाक्तिसमागमे ॥ कालीसंविन्मयो जपेत् पठेन्नामसहस्रकं ॥ सर्वसिद्धीश्वरो भूत्वा त्वांछासिद्धिमाविंदति
मृडुवृद्धकयोर्योनित्वचा कोमलेपिवा ॥ विष्टरे वा वल्कले वा उष्णवल्लासनेपिवा ॥ कालीसंविन्मयो जपेत् तेनानामसहस्रकं ॥
पेवानंदमयो भूत्वा पठित्वा कालिकास्तवं ॥ मुक्तकेशो दिशावासः मैथुनीशयनस्थितः ॥ जप्त्वा कालीं पठेत् स्तोत्रं खेचरीसिद्धि
भाग्भवेत् ॥ विकीर्णयोगमासाद्य मुक्तोन्मारणमेवव ॥ जप्त्वा श्रीदक्षिणाकालीं शक्तिपातशतं लभेत् ॥ लतां स्पृष्टं जपित्वापि का
लिकां चिंतयेन्नपि ॥ आलोकयन् दिशावासां परशक्तिं विशेषतः ॥ स्मृत्वा श्रीदक्षिणाकालीं योनिस्वकरगां चरेत् ॥ पठेन्नामसहस्रं
यः कविराड्प्यधिको भवेत् ॥ लतारते पूजनं सर्वं मुक्त्वा कालीनिराकुलः ॥ दशावधानो भवति मासमात्रेण साधकः ॥ कालरात्रौ महा
रात्रौ वीररात्रौ विशेषतः ॥ चतुर्दश्यां मध्याष्टम्यां संक्रमेपि महेश्वरि ॥ कुहूपूर्णेंदुशुक्रेषु भौमश्चर्यां निशामुखे ॥ नवम्यां मंगलादि
ने तथा कुलतिथौ शिवे ॥ कुलऋक्षेषु यत्नेन पठेन्नामसहस्रकं ॥ सोदर्शनो भवेदाशु किन्नरीसिद्धिभाक् भवेत् ॥ पश्चिमाभिमुखं
लिंगं वृषभस्थं पुरातनं ॥ तत्र स्थित्वा जपेत् स्तोत्रं सर्वकामाप्तये शिवे ॥ भौमवारे निशीथे च अमावास्यादिने शुभे ॥ माषभक्तबलिं छागं

३ मोहरात्रौ

शान्नं च पायसं ॥ दग्धमीनं शोणितं च दधि दुग्धं गुडार्द्रकं ॥ बलिं दत्वा जपेन्मंत्रं नवशोत्तरसहस्रकं ॥ देवगंधर्वसिद्धौघैस्सेवितः स्मरसुंदरी ॥ लभेद्देवेशि मासेन तस्य वामनसंहतिः ॥ हस्तत्रयमवेदुर्ध्वा नात्र कार्या विचारणा ॥ हेलया लीलया भक्त्या कालिकेति नरस्तु यः ॥ ब्रह्मादीनस्तंभयेद्देवि मोहेशी मोहयेच्छगणान् ॥ क्रुवडघाटयेन्नूनं सृष्टिं चे नूतनां चरेत् ॥ मेषमाहिषमार्जारच्छागखरनरादिकैः ॥ खड्गशूकरकापोतैः श्विहिमैः शशकैः पलैः ॥ शोणितैः सास्थिमांसैश्च कारयेदुग्रपायसे ॥ कादंबरीसीधुमधैस्सुरारिष्टैश्च सासवैः ॥ योनिक्षालननीलैश्च योनिलिंगामृतेन च ॥ स्वजातकुसुमैः पूज्यन्नपानैस्तर्पयेच्छिवां ॥ सर्वसाम्राज्यनाम्नातुष्टुत्वा नत्वा स्वशक्तितः ॥ शक्त्यालये पठेत्स्तोत्रं कालीरूपो दिनत्रयात् ॥ दक्षिणाकालिका तस्य गेहे तिष्ठति नान्यथा ॥ वेश्यांगनागृहे गत्वा तस्याश्चुंबनतत्परा ॥ तस्या योनौ मुखं दत्वा तद्रसं विलिहन् जपन् ॥ तदंते नामसाहस्रं पठेद्भक्तिपरायणः ॥ कालिकादर्शनं तस्य भवत्येव त्रिमासतः ॥ नृत्यपात्रगृहे गत्वा मकारपंचमान्वितः ॥ प्रसूनमंचसंस्थाप्य शक्तिन्यासपरायणः ॥ पात्रांशांस्पंदनं कृत्वा दिव्यस्त्राणां समाचरेत् ॥ वक्त्रान्तन्मूलसंभाव्य तत्र सावरणां यजेत् ॥ शतं भाले शतं केशे शतं सिंदूलमंडले ॥ शतं हृद्यं जप कंठे शतं नाभौ महेश्वरि ॥ शतं योनौ महेशानि उत्थाय च शतत्रयं ॥ जपेन्मंत्रं महेशानि तदंते च पठेत्स्तुतिं ॥ ज्ञानावधानो भवति मासमात्रेण साधकः ॥ मातंगिनं समानीय किंवा मे कालिकां शिवे ॥ दंतमाला जपे कार्या गले धार्या नृमुंडजा ॥ ने

त्रपमेयोनिचक्रं शक्तिचक्रं स्वचक्रके । कृत्वा जपेन्महेशानि कुंडुयंत्रं प्रपूजयेत् । मुण्डासनस्थितो वीरा मकारपंचकान्वितः । अन्या
मालिग्य प्रजपेदन्यां स्तव्यैव पठेत् । अन्यांगं पूजयेत्तत्र त्वन्यासं मर्दयन्पठेत् । अन्ययोनौ शिवं दत्वा पुनः पूर्ववदाचरेत् । अथवान
सहस्वेष्ठशक्तिपानरतो भव । राजा भवति देवेशि मासपंचकयोगतः । यवनी शक्तिमानीय गानशक्तिपरायणा । कुलाचार
क्रमेणैव तस्या योनिं विकाशयेत् । तत्र जिह्वां प्रदत्वा च जपेन्मासं सहस्रकं । नृकपाले तत्र दीपं स्थाप्य यत्नेन वै पठेत् । महाकवि
वरो भूयान्नात्र कार्या विचारणा । कामार्ता शक्तिमानीय योनौ तु मूलचक्रकं । विलिख्य परमेशानि तत्र मंत्रं लिखेच्छिवे । त
स्मिन् प्रजपेद्देवि सर्वशास्त्रार्थतत्त्ववित् । अष्टमान्यपि शास्त्राणि वेदादीन्पाठयेत्क्रमं । विनाभ्यासैर्विनायासैर्विनापाठादि
भिः प्रिये । चतुर्वेदाधिपो भूत्वा त्रिकालज्ञस्त्रिवर्षतः । चतुर्विधं च पांडित्यं तस्य हस्तगतं क्षणात् । शिवाबलिः प्रदातव्यः सर्वदाश्म
शानमण्डले । कालीध्यानं मंत्रचिंतां नीलसाधनमेव च । सहस्रनामपाठश्च कालीनामप्रकीर्तिनं । भक्तस्य कृत्यमेतावदन्यदभ्यु
दयं विदुः । वीरसाधनकं कर्म शिवापूजा बलिस्तथा । सिंदूरतिलको देवि वेश्यालापो निरंतरं । वेश्यागेहे निशाचारी रात्रौ पर्य
टनं तथा । शक्तिपूजा योनिदृष्टिः खड्गहस्तो दिगंबरः । मुक्तकेशो वीरवेषी ताम्बूलपूरिताननः । कालीभक्तो भवेद्देवि नान्यथा
क्षोभमाप्नुयात् । दुग्धस्रावी योनिलेही संविदासवघूर्णितः । वेश्यालतासमासंगो गोत्रामासात्कल्पलतालयं । वेश्याचक्रसमा

योगात्काली वक्रसमः स्वयं॥ वेश्यादेहसमायोगात्कालीदेहसमः स्वयं॥ वेश्यामध्यगतं वीरं कदा पश्यामि साधकम्
एवं वदति सा काली तस्माद्वेश्या वरांगना॥ ॥वेश्याकन्या तथा पीठजातिभेदकुलक्रमात्॥ अकुलक्रमभेदेन ज्ञात्वा
चैव कुमारिकाम्॥ कुमारीं पूजयेद्भक्त्या जपान्ते देववर्णप्रिये॥ पठेन्नामसहस्रं यः कालीदर्शनभाग्भवेत्॥ भक्त्या पूज्या
कुमारी तु वेश्याकुलसमुद्भवा॥ वस्त्रहेमादिभिस्तोष्य जपान्ते स्तोत्रं पठेच्छिवे॥ त्रैलोक्यविजयी भूयाद्दसा चंडप्रदर्शकः॥
यद्यद्दत्तं कुमार्यै तु तदनंतफलं भवेत्॥ कुमारीपूजनफलं मया वक्तुं न शक्यते॥ चांचल्यादुदितं किंचित्क्षमस्व तामसयमंज
लिः॥ एका चेत्पूजिता बाला द्वितयं पूजितं भवेत्॥ कुमार्यश्च शक्तयश्च सर्वमेतच्चराचरं॥ शक्तिमानीय तद्गात्रे न्यासजालं प्र
विन्यसेत्॥ स्ववामभागे संस्थाप्य पठेन्नामसहस्रकं॥ सर्वसिद्धीश्वरो भूयान्नात्र कार्या विचारणा॥ श्मशानस्थो भवत्सु
स्थो गलितं चिकुरं चरेत्॥ दिगंबरः सहस्रं च सूर्यपुष्पं समानयेत्॥ स्ववीर्येण युतं कृत्वा प्रत्येकं प्रजपेन्कुनेत्॥ पूज्यं ध्या
त्वा महाभक्त्या क्षमापालो नरः पठन्॥ नखकेशं स्ववीर्यं च यत्नं मार्जनीगतं॥ मुक्तकेशो दिशावासो मूलमंत्रपुरःस
रं॥ कुजवारे मध्यरात्रौ होमं कृत्वा श्मशानके॥ पठेन्नामसहस्रं यः पृथ्वीशाकर्षणं चरेत्॥ पुष्पयुक्ते भगे देवि संयोगात्तं
दतत्परः॥ पुनश्चिकुरमासाद्य मूलमंत्रं जपेच्छिवे॥ चितावह्नौ मध्यरात्रे वीर्यमुत्सार्य यत्नतः॥ कालिकां पूजयेत्तत्र पठे

न्त्रामसहस्रकम्॥ पृथ्वीसाकर्षणंकुर्य्यान्नात्रकार्य्याविचारणा॥ कदलीवनमासाद्यलक्षमात्रंजपेन्नरः॥ मधुमत्याःस्वयंदे
व्यासेव्यमानःस्मरोपमः॥ श्रीमधुवतीमुक्तान्तथास्थावरजंगमा॥ कर्षिणीतिसमुच्चार्य्यठठस्वाहांसमुच्चरेत्॥ त्रैलोक्याकर्षणी
विद्यातस्यहस्तेसदाभवेत्॥ नदीपुरीवरस्त्रानिहेमस्त्रीशैलभूरुहान्॥ आकर्षयत्यंवुनिधेस्तुमेरोश्चदिगंततः॥ स्वल्पाभ्यानिव
वस्तूनिदूलाद्भूमितलादपि॥ पुत्रान्तेवपुरस्थानांरहस्यंविद्विषामपि॥ राज्ञांचकथयेत्येषासत्यंसत्वरमादिशेत्॥ द्वितीयवर्ष
पाठेनभवेत्पद्मावतीपतिः॥ ॐ ह्रींपद्मावतिपदंतत्रत्रैलोक्यनामच॥ वार्त्तांचकथयेद्वंद्वंस्वाहांतोमंत्रईरितः॥ ब्रह्मविष्ण्वादि
कानांचत्रैलोक्ययाद्वशीभवेत्॥ सर्व्वंवदतिदेवेशित्रिकालज्ञःकविःप्रभुः॥ त्रिवर्षपाठतोदेविलभेद्योगवतीकलां॥ महाकाले
नदृष्टोपिचिताधूमगतोपिच॥ तस्यदर्शनमात्रेणचिरंजीवीनरोभवेत्॥ वंमृतसंजीविनिमुक्तामृतमुथापयद्वयं॥ स्वाहांतोमनु
राख्यातःस्वप्नसिद्धाभवेन्नतः॥ ॐ ह्रींस्वप्नवाराहिकालीस्वप्नेकथयवोद्धरेत्॥ अमुकस्यामुकंदेहिक्लींस्वाहांतोमनुर्मतः॥ स्वप्नसि
द्धाचतुर्वर्षात्तस्यस्वप्नेसदास्थिता॥ चतुर्वर्षस्यपाठेनचतुर्वेदाधिपोनरः॥ तडकेजलसंयोगावृक्षाःकाव्यंकरोतिच॥ तस्यवाक्यप
रिचयान्मूर्त्तिर्वदतिभारती॥ प्रस्तरंतुकरंदत्वावदवानीमितिध्रुवम्॥ साधकोवांछयाकुर्वन्तत्तथैवभविष्यति॥ ब्रह्माण्डगोलके
याचयाकाचिज्जगतीतले॥ समस्तासिद्धयोदेविकलासलकवद्भवेत्॥ साधकःस्मृतिमात्रेणयावंत्यःसंतिसिद्धयः॥ स्वयमायां

त्रिपुरतेजपादीनांतुकाकथा॥निर्देशवर्त्तिनोभूत्वावर्त्तन्तेचेटकाइव॥अमायांवन्हदर्शश्चचंद्रग्रहणमेवच॥अष्टम्यांपूर्णि
चंद्रत्वंचंद्रसूर्याष्टकंतथा॥अष्टदिक्षुतपाचाष्टौकरोत्येवमहेश्वरि॥अनिमारेववरंत्वंचचराचरपुरीगतिः॥पादुकाखड्गवेता
लयक्षानीगुत्काकादयः॥तिलकोगुप्ततादृश्यावराचरकथानकं॥मृतसंजीविनीसिद्धिर्गुटिकाचरसायनं॥ 5 ज्ञानसिद्धिर्दे
वेशिषष्ठिसिद्धीश्वरंत्वकं॥तस्यहस्तेभवेद्देविनात्रकार्याविचारणा॥केनोवादुंदुभौवस्त्रेवितानेवेष्टनेगृहे॥भित्तौवफलके
पीठेलेख्यपूज्यंप्रयत्नतः॥नक्षत्रचक्रंदशांगोक्तंपरितोनामलेखनं॥तद्धारणान्महेशानित्रैलोक्यविजयीभवेत्॥एकोहिशतसा
हस्राणांनिर्जित्यवरणाजिरे॥पुनरायातिवसुखंस्वगृहंप्रतिपार्वति॥एकोहिशतसंदर्शीलोकानांभवतिध्रुवम्॥कलशंस्थाप्य
यत्नेननामसाहस्रकंपठन्॥शेषःकार्योमहेशानिसर्वापत्तिनिवारणः॥भूतप्रेतग्रहादीनांराक्षसांब्रह्मराक्षसां॥वेतालानांभैर
वानांत्वंदेवनायिकादिकान्॥नाशयेत्स्मरणमात्रेणनात्रकार्याविचारणा॥भस्माभिमंत्रितंकृत्वाग्रहग्रस्तंविलेपयेत्॥भस्मसं
लापनादेवसर्वग्रहनिवारणं॥नवनीतंचाभिमंत्र्यस्त्रीणांदद्यान्महेश्वरी॥वंध्यापुत्रवतीदेवीनात्रकार्याविचारणा॥कंठेवावाम
बाहौवायोनौवाधारणाच्छिवे॥बहुपुत्रवतीनारीसुभगाजायतेध्रुवम्॥पुरुषोदक्षिणांगेचधारयेत्सर्वसिद्धये॥कण्ठेवाहौचशिर
सिहृदयेनाभिगोचरे॥कटिस्थानेशिखायांचधारयेत्सर्वसिद्धये॥वलवान्कीर्त्तिमान्धन्योधार्मिकःसाधकःकृती॥बहुपुत्रीरथानांच

गज्ञानामधिपः सुखी ॥ कामिनीकर्षणोपक्तः क्रींचदक्षिणकालिके क्रींस्वाहाप्रजपेन्मंत्रमयुतेनामपाठकः ॥ आकर्षणंवरेदेविजलखेचलभूगताः ॥ वशीकरणकामोहि हूं हूं क्रीं क्रीं चदक्षिणे ॥ कालिके पूर्ववीजानिपूर्ववत्प्रजपेत्स्वरन् ॥ ऽवेशीमपिवक्ष्येत्वाकार्यविचारणा ॥ क्रींदक्षिणेकालिकेचेतिस्वाहायुतंजपेन्नरः ॥ पठेन्नामसहस्रंचत्रैलोक्यंमारयेध्रुवम् ॥ सत्पुत्रायप्रदातव्यंविद्याराज्ञीप्रवेदिने ॥ सुविनीतायशांतायदांतायातिगुणायच ॥ भक्तायज्येष्ठपुत्रायगुरुभक्तिपरायच ॥ भक्तभक्काययोग्यायशाक्तिभक्तिपरायच ॥ देयंसहस्रनामाख्यंस्वयंकाल्याप्रकाशितं ॥ वैष्णवायविशुद्धायशिवाबलिरतायच ॥ वेश्यापूजनयुक्तायकुमारीपूजकायच ॥ दुर्गाभक्तायशैवायमहाकालप्रजापिने ॥ अद्वैतभावयुक्तायकालीभक्तिपरायच ॥ गुरुदैवतमंत्राणांमहेशस्यापिपार्वती ॥ अभेदेनस्मरेन्मंत्रंसशिवोनात्रसंशयः ॥ योमंत्रंभावयेन्मंत्रीसशिवःसचगाणपः ॥ सशाक्तोवैष्णवःसौत्रःसएवपूर्णदीक्षितः ॥ अयोग्यायनदातव्यंसिद्धिरोधःप्रजायते ॥ वेश्यास्त्रीनिन्दकायाथसुरासेविनिन्दके ॥ सुरासुखीमनुंस्मृत्वासुरावावतरिष्यति ॥ वाग्भवाघोरेआःसःपरमघोरेचहूंवदेत् ॥ घोररूपेह्स्ख्रघोरमुखीभीमपदंवदेत् ॥ भीषणपमुकषष्ठ्यंतंहेतुंचमयुतंपिबा ॥ शिवंवह्नियुगास्त्रंचहूंहःफट्चमनुर्भवेत् ॥ एतस्याःस्मरणादेवदुष्टानांचसुखेसुराः ॥ अवतीर्णाभवेद्विनात्रकार्याविचारणा ॥ खलायपरतंत्रायपरनिंदापरायच ॥ भ्रष्टायशुद्धसत्वायपरिवादपरायच ॥ शिवाभक्तायदुष्टायपरदाररतायच ॥ नस्तोत्रंदर्शयेद्देविशिवहत्याकरोभवेत् ॥ कालिकानन्दहृदयःका

लिकासक्तमानसः ॥ कालीभक्तोभवेत्सोहिधन्यरूपः सएवतु । कलौकालीकलौकालीकलौकालीतुकेवला ॥ कलौकालीकलौका
लीकलौकालीवरप्रदा ॥ विल्वपत्रसहस्राणिकरवीराणिवैतथा ॥ प्रतिनाम्नापूजयेद्धितेनकालीवरप्रदा ॥ कमलानांसहस्रंचप्र
तिनाम्नासमर्पयेत् ॥ चक्रंसंपूज्यदेवेशिकालिकावरमाप्नुयात् ॥ मंत्रक्षोभमुमेदेविकलशस्यजलेनच ॥ नाम्नाप्रसेचयेद्देविसर्व
क्षोभविनाशकृत् ॥ तथामदनकंदेविसहस्रमाहरेद्व्रती ॥ सहस्रनाम्नासंपूज्यकालिकावरमाप्नुयात् ॥ चक्रंविलिख्यदेहस्थंधारये
त्कालिकान्तुः ॥ काल्यैनिवेदितंयद्यन्नद्रव्यंभक्षयेच्छिवे ॥ दिव्यदेहधरोभूत्वाकालीदेहस्थितोभवेत् ॥ नैवेद्यनिन्दकान्दृ
ष्ट्वानृत्यंतिभैरवाः ॥ योगिन्यश्चमहावीराः रक्तपानोद्यतासदा ॥ मांसास्थिचर्वणोद्युक्ताभक्षयन्तिनसंशयः ॥ तस्मान्ननिंदेन्मनसा
कर्मणावचसाकिंतु अन्यथाकुरुतेयस्तुतस्यपातोभविष्यति ॥ क्रमदीक्षाविहीनानांसिद्धिर्भवतिनान्यथा ॥ मंत्रक्षोभश्चवामय
क्षीणायुर्वाभवेद्ध्रुवम् ॥ पुत्रहारीचस्त्रीहारीराज्यहारीभवेद्ध्रुवम् ॥ क्रमदीक्षायुतोदेविक्रमाद्राज्यमवाप्नुयात् ॥ एकवारंपठेद्देविँष
डैश्वर्यमयोभवेत् ॥ सप्तवारंपठेद्देविकामनांचिंतितंलभेत् ॥ वसुवारंपठेद्देविदिगीशोभवतिध्रुवं ॥ नववारंपठेद्देविनवनाथसमो
भवेत् ॥ दशवारंकीर्तयेद्योदाशाहैरवचेश्वरः ॥ विंशद्वारंकीर्तयेद्यः सर्वैश्वर्यमयोभवेत् ॥ पंचविंशतिवारेस्तुसर्वचिंताविनाशकः
पंचाशद्वारमावृत्त्यपंचभूतेश्वरोभवेत् ॥ शतवारंकीर्तयेद्यःशतानन्दसमानधीः ॥ शतपंचकमावृत्त्यराजराजेश्वरःकलौ ॥ सहस्र

वर्त्तनाद्देविलक्ष्मीमावृणुतेस्वयं। त्रिसहस्रंसमावृत्यत्रिनेत्रसदृशप्रभुः॥ पंचसहस्रावर्त्तनात्तुकामकोटिविमोहनः॥ दशस
हस्रावर्त्तनात्तुभवेद्दशमुखेश्वरः॥ पंचविंशत्सहस्रेणचतुर्विंशतिसिद्धिभुक्॥ लक्षावर्त्तनमात्रेणलक्ष्मीपतिसमोभवेत्॥ ल
क्षत्रयावर्त्तनात्तुमहादेवंविजेष्यति। लक्षंपंचकमावृत्यकलापंचकसंयुतः। दशलक्षावर्त्तनात्तुदशविद्याप्रिउत्तमा॥ पंच
पंचविंशतिलक्षैस्तुदशविद्येश्वरोभवेत्॥ पंचाशल्लक्षमावृत्यमहाकालसमोभवेत्॥ कोटिमावर्त्तयेद्योहिकालीपशुपतिवक्ष
षा। वरदानोत्कृपरांमहाकालसमन्वितां। प्रत्यक्षंपशुपतिशिवेनस्वदेहेवसेद्ध्रुवं। श्रीविद्याकालिकातारात्रिशक्तिविषयेपठे
त्॥ त्रिशक्तिविषयेदेविक्रमदीक्षाप्रकीर्त्तिता॥ क्रमदीक्षायुतोदेविराजाभवतिनिश्चितं। विधेस्त्रिपिंतुसंमाज्यकिंकरत्वंविसृज्यवा॥
महाराज्यमवाप्नोतिनात्रकार्य्याविचारणा॥ क्रमविहीनस्य फलंपूर्णमयेरितं॥ क्रमदीक्षायुतादेविशिवएवनचापरः॥
क्रमदीक्षासमायुक्तःकल्योक्तसिद्धिभाग्भवेत्॥ दीक्षा॥ क्रमदीक्षाविहीनस्यसिद्धिहानिःपदेपदे। अहोधन्यवतांमध्येधन्यःक्रम
युतःकलौ। तत्रापिधन्यादेवेशिनामसाहस्रपाठकः। दशकालीविधौदेवीस्तोत्रमेनत्सदाभवेत्॥ सिद्धिंविंदंतिदेवेशिनात्रकार्या
विचारणा॥ कलौकालीमहाविद्याकलौकालीतुसिद्धिदा। कलौकालीतुसिद्धाचकलौकालीवरप्रदा॥ कलौकालीसाधकस्य
दर्शनार्थंसमुद्यता। कलौकालीकेवलास्यानात्रकार्याविचारणा॥ नान्यविद्यानान्यविद्यानान्यविद्याकलौभवेत्॥ कलौकालीः

सुसिद्धा च कलौ काली वरप्रदा॥ कलौकी साधकस्य दर्शनार्थं समृयता॥ कलौ काली केवलास्या नात्र कार्या विचारणा॥ नान्यविद्या नान्यविद्या नान्यविद्या कलौ भवेत्॥ कलौ कालीं विहायाथ यः कश्चित्सिद्धिकामुकः। शत्रुशक्तिं विना देवि रतिसंभोगमिच्छति॥ कलौ कालीं विना देवि यः कश्चित्कार्यमिच्छति॥ स नीलसाधनं त्यक्त्वा परिभ्रमति सर्वतः॥ कलौ कालीं विहायाथ यः कश्चिन्मोक्षमिच्छति। गुरुध्यानं परित्यज्य सिद्धिमिच्छति साधकः॥ कलौ कालीं विहायाथ यः कश्चिद्राज्यमिच्छति॥ स भोजनं परित्यज्य क्षुन्निवृत्तिमभीप्सति॥ स धन्यः स च विज्ञानी स सर्वत्र प्रपूजितः॥ स दीक्षितः सुखी साधुः सत्यवादी जितेन्द्रियः॥ स वेदवक्ता स्वाध्यायी सर्वातंदपरायणाः॥ तस्मिन्कालीं तु संभाव्य पूजयेज्जगदम्बिके॥ त्रैलोक्यविजयी भूयान्नात्र कार्या विचारणा॥ गुरुरूपं शिवं ध्यात्वा शिवरूपं गुरुं स्मरेत्॥ सदाशिवः स एव स्यान्नात्र कार्या विचारणा॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः॥ रहस्यातिरहस्यं च रहस्यातिरहस्यकं॥ श्लोकार्द्धं पादमात्रं वा पाठं चैतदर्धकं॥ नामार्द्धं वा पठेद्देवि न वंध्यं दिवसं चरेत्॥ पुस्तकं पूजयेद्भक्त्या त्वृद्धिफलसिद्धये न च मारीभयं तत्र न चाग्निवातसंभवं॥ न भूतादिभयं तत्र सर्वत्र सुखमेधते॥ कुंकुमारक्तकेनैव रोचनागुडयोगतः॥ भूर्जपत्रे लिखेत्स्तं सर्वकामार्थसिद्धये॥ इति गदितमशेषं कालिकावरीरूपं प्रपठति यदि भक्त्या सर्वसिद्धीश्वरः स्यात्॥ अभिनवसुखकामं सर्वविद्याभिरामं भवति सकलसिद्धिः सर्ववीरासमृद्धिः॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि॥ ० ॥ इति श्रीमदादिनाथविरचि

तस्यां महाकालसंहितायां कालीकालसंवादे खुंदशाक्षरनाम्नाख्यं ककारसहस्रनामस्तोत्रं संपूर्णम् ॥ ॥ इति श्रीतंत्रचिंतामणौ
श्रीदक्षिणाकालिकायां नित्यार्चनायां स्तवकवचादिनिर्णयनामा द्वाविंशतितमः प्रकाशः ॥ २२ ॥ अथ श्रीदक्षिणाकालिकांगत्वेन
महाकालादिनित्यानां प्रत्येकोपासनामाह ॥ ॥ श्रीदेव्युवाच महाकालादिनित्यानां निर्णयं हितयं वद ॥ ॥ श्रीशिव उवाच ॥
महाकाले समारभ्य नित्यानां निर्णयं शृणु ॥ महाकालो महाभीमः प्रलयानलसंनिभः ॥ कालीमायासमुद्भूतः कालीमानसिकः
शिवः ॥ महाकालः परंशंभुपरातीतगुणाकरः ॥ तस्य मंत्रं प्रवक्ष्यामि येन रक्षेज्जगत्त्रयं ॥ ॥ कूर्चयुग्मं महाकालं प्रसीदेति पदद्वयं
लज्जायुग्मं वह्निजायासंयुक्तः षडक्षरीकः ॥ षोडशार्णीय या मुख्या सर्वे श्रीचक्रमंडले ॥ तथा ये सर्वकालीषु महाकालः प्रकीर्तितः ॥ ॥
कालिकास्य ऋषिः प्रोक्तः विराट् छंदः प्रकीर्तितः ॥ देवता तु महाकालः सर्वरूपी निरंजनः ॥ कूर्चबीजं तथा मायाशक्तिरत्र प्रकीर्तिता ॥ स्वा
हाकीलकमुद्दिष्टं कालस्यैव विनियोगता ॥ ॥ मायया तु षडंगानि ध्यानं तस्य शृणु वरानने ॥ कोटिकालानलाभासं चतुर्भुजं त्रिलोचनं ॥ श्म
शानाष्टकमध्यस्थं मुंडाष्टकविभूषितं ॥ पंचप्रेतस्थितं देवं त्रिशूलं डमरुं तथा ॥ खड्गं च खर्परं चैव वामदक्षिणयोगतः ॥ विभ्रंतं सुं
दरं देहं श्मशानभस्मभूषितं ॥ नानाशवैः क्रीडमानं कालिहृदयस्थितं ॥ लालयंतं रतासक्तं घोरचुंबनतत्परं ॥ गृध्रगोमायुसंयुक्तं
फेरवीगणसंयुतं ॥ जटापटलशोभाढ्यं सर्वशून्यालये स्थितं ॥ सर्वभूतं मुंडभूषं प्रसन्नवदनं शिवं ॥ ॥ भावयेत्परमेशानि रीतियं

चतुर्थचक्रकं ॥ त्रिकोणसंज्ञायोनिः स्यान्नक्षत्रं कालचक्रकं ॥ योनौ वा हृदये भाले कामिन्याः स्तनमण्डले ॥ महाकालं यजेद्देवं पञ्चावरण
संयुतं ॥ त्रिकोणे पूजयेद्देवि त्रिकोणे कालिकादिकं ॥ षट्दले तु षडङ्गानि नाभौ दिक्शक्तयो मताः ॥ हृदये द्वादशादित्यं कण्ठे षोडशानि
त्यकाः ॥ द्विपत्रे परमेशानि कालकालीं प्रपूजयेत् ॥ विपरीतरतौ देवि रतौ देवीं प्रपूजयेत् ॥ शक्तिं स्वाभिमुखीं कृत्वा पूजयेत्कालिकांप
रां ॥ मूलाधारद्विपत्रान्तं तथा चक्राणि कारयेत् ॥ पूजयेत्परमेशानि गुरुपूजापुरःसरं ॥ पात्रासादनकं कृत्वा कालीवत्परिपूजयेत्
एवं पूजां विधायाथ लक्षसंख्यं यजेच्छिवे ॥ तद्दशांशेन हवनं करवीरप्रसूनकैः ॥ स्वयंभुवाक्तैर्बीजान्तैः कारणाक्तैश्च वा हुनेत् ॥ नित्यं
नित्यं नैमित्तिकं काम्यं कालीवत्सर्वमाचरेत् ॥ श्मशानान्तकरी काली विद्याया विधिरुच्यते ॥ मन्त्रैर्ध्यानोदितां ध्यात्वा सर्वावयवशोभितां
मूलाधारे गणपतिं लिङ्गे गणपतिवल्लभां ॥ कंठेड्यानपीठं च रु विप्रदीप्रमंगला ॥ ललाटे करवीरं च कमले क्षेत्रपालकं ॥ मूर्द्ध्नि वै
कालिकां चैव चतुर्थ्यन्तां प्रपूजयेत् ॥ मूर्द्ध्नि व्योमेश्वर्य्यं वा च ललाटे खचरीं तथा ॥ भ्रूमध्ये दिक्चरीं चैव हृदये गोचरीं तथा ॥ नाभौ च
भूचरीं चैव लिङ्गे च खगमूर्त्तिकां ॥ मूलपत्रेपि चित्रां च पूजयेत्साधकोत्तमः ॥ तथा ललाटे सूर्यं च दक्षनेत्रे कलाधिपं ॥ वैश्वानरं
वामनेत्रे कण्ठे च कालिकां तथा ॥ हृदये तमसयोनिं च नाभौ वदाससिद्धकं ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही चैन्द्री च चा
मुण्डा महालक्ष्मीपरा मता ॥ मंथानभैरवश्चैव षट्चक्रभैरवस्तथा ॥ षट्कारभैरवश्चैव शिवभक्षकभैरवः ॥ वीरशभैरवश्चैवक्र

मंत्रेश्वरभैरव ॥ हंसगर्भभैरवश्च वीरकेश्वरभैरवः ॥ मूर्द्ध्नि ललाटे कंठे च हृदये नाभिमंडले ॥ लिंगे च मूलाधारे च सर्वांगे पूजयेत्सुधीः ॥
यथाशक्ति जपेद्विद्वान्बलिं दद्याद्यथाविधिः ॥ ॐ क्षौं वक्षत्रपालाय इमं बलिपदं भवेत् ॥ गृह्ल गृह्लद्वयं पुनः क्षत्रपालबलिर्मतः ॥ इ
ति पूजाविधिर्देवि श्रीकालिकालयोर्मता ॥ अतर्ध्या न विख्याने न विपरीतरतिर्मता ॥ महाकालप्रसंगेन रहस्यमपि दर्शितं ॥ गोपनी
यं त्वया भद्रे रहस्यातिरहस्यकं ॥ गोपनीयं गोपनीयं स्वयोनिरपरे स्तथा ॥ ॥ कालीनित्या च तन्मंत्रः कथ्यते शृणु सांप्रतं ॥ विष
वीजं ततो मायां कालीतियुगलं वदेत् ॥ महाकालीपदं प्रोच्य कौमारीतिपदं वदेत् ॥ भगं देहि पदं देवि ठठ युक्तो मनुर्मतः ॥ ऊनविंशाक्ष
री विद्या कालीनित्या प्रकीर्तिता ॥ ॥ परशुरामो ऋषिप्रोक्तः छंदोऽनुष्टुप्प्रकीर्तितः ॥ देवता कालिका प्रोक्ता मायाबीजं प्रकीर्तितं ॥
कालिका च भवेच्छक्तिः ठयुग्मं कीलकं भवेत् ॥ कालिकाप्रीणनार्थे विनियोगः प्रकीर्तितः ॥ ॥ षडंगमाचरेद्देवि जातियुग्मेन
मायया ॥ ततो ध्यायेन्महेशानि चिताग्निवीणामंडपे ॥ श्यामवर्णा महाभीमा घोररावा करालिनी ॥ मुंडमालविभूषाढ्या दक्षे खड्गं
प्रविभ्रतं ॥ तर्जनीं धारयेद्वामे नृत्यंती प्रेतभूमिषु ॥ एवं ध्यात्वा महेशानि तद्यंत्रं शृणु पार्वति ॥ ॥ त्रिकोणयुग्मं देवेशि वृत्ताष्ट
दलभूपुरं ॥ विंदौ कालीं समाराध्य त्रिकोणयुग्मके पुनः ॥ गुणत्रयं तत्पुरस्थास्त शक्तयः क्रमान्मताः ॥ ब्राह्म्यादि मातरश्चाष्टौ लो
कपालाः सशस्त्रकाः ॥ भूपुरे पूजयेद्देवि धूपदीपोपचारकैः ॥ नैवेद्यं विविधं दद्यात्पंचबलिं विशेषतः ॥ निवेदयेत्कालिकायै

॥मंत्रचिं॥
॥१८४॥

ततस्तुष्टा भविष्यति॥ नीराजनांते कृत्वा पुनर्जपेल्लक्षमात्रकं॥ दशांशं पायसेनैव होमं कुर्याद्विधानतः॥ अथवा करवीरेण हो-
मयेत्सर्वसिद्धये॥ सर्वसिद्धीश्वरो देवि भवत्येव न संशयः॥ ॥मंत्रभेदान्प्रवक्ष्यामि यथावदवधारय॥ नामत्रयं महेशानि प्रत्ये-
कं शृणु वक्रमात्॥ मंत्रत्रयं महेशानि वीजत्रयनियोजनात्॥ विद्यात्रयं पुनर्देवि कूर्चमायानियोजनात्॥ विद्यात्रयं महेशानि प्र-
त्येकं नवधा मनुः॥ दुर्भगानां वरीनानां क्रूराणां पापकर्मिणां॥ मंत्रमेनं प्रकथयेत्सर्वैश्वर्यमयो भवेत्॥ लक्ष्मीवान्कीर्तिमान्ध-
न्यो भवत्येव न संशयः॥ सुंदरीकामिनी दृष्ट्वा तस्याश्चैव भगं वदेत्॥ भगशब्दे तद्गां वसा दासी मंत्रजायतः॥ व्याकुला संभवत्येव स्वे-
च्छया भोगमिच्छति॥ ललाटे हृदये विद्यां योनिमध्ये यथाक्रमं॥ यस्याः संचिंतयेद्विद्यां तेनामसस्मृतिपूर्वकां॥ तामाकर्षयति प्राज्ञ-
किमन्यैर्वहुजनस्थितैः॥ साक्षात्स कालीपुत्रः स्यान्नात्र कार्या विचारणा॥ देवेशि कथ्यते गोप्यं यत्तकुत्रापि कीर्त्तितं॥ कपालिनी
महाविद्या द्वितीया तन्मनुं शृणु॥ ॥आदौ सम्यक्कल्लं प्रोच्यं कामं वह्निपदे स्थितं॥ इंदिराविंदुभूषाढ्यं वीजं कालीस्वरूपकं॥
कपालिनि महाकपालप्रियमानसे वदेत्॥ कपालसिद्धिमे देहि हुं फट्स्वाहांतको मनुः॥ त्रिंशवर्णाधेयणीओ मंत्रराजो महे-
त्तमः॥ ॥भैरवोस्य ऋषिः प्रोक्तो त्रिष्टुप्छंद उदाहृतं॥ कपालिनी देवतात्र कालिकावीजमीरितं॥ स्वाहा शक्तिः समाख्याता हूंफ-
ट्कीलिकमीरितं॥ कपालिनीसिद्धयेत्र विनियोगः प्रकीर्त्तितः॥ ॥षड्दीर्घभाजा वीजेन कुर्यादंगानि षट्क्रमात्॥ ध्यायेदं

॥गुरुः॥
॥१८४॥

जनपुंजाभासापीनस्तनयुग्मकां ।। चंडमुक्कांचार्विंबोष्ठीमुक्तकेशीदिगंबरीं ।। चतुर्भुजोपरिगतांशंखकंकणभूषितां ।। खड्गत्रिशूल
वरदाभयान्हस्तचतुष्टये ।। क्रमात्संबिभ्रतीदेवीगीतहास्यपरायणां ।। एवंसंचिंतयेद्देविमहाकापालिनींपरां ।। ।।त्रिकोणंतत्त
यंवृत्तंदलाष्टकविभूषितं ।। भूपुरेणसमाकीर्णंचतुर्द्वारोपशोभितं ।। यंत्रंकापालिनीदेव्यासर्वसाम्राज्यदायकं ।। ।।महाकालीम
हालक्ष्मीमहासरस्वतीतथा ।। रतिंप्रीतिंतथाकोणेद्वितीयस्यांतृतीयके ।। इच्छाज्ञानांक्रियांचैवत्रिकोणेतुतृतीयके ।। मध्येकपालि
नींपूज्यदलेष्टौमातृकार्चनं ।। ततोष्टौभैरवांश्चैवदिगीशान्शास्त्रकान्यजेत् ।। पंचोपचारैःसंपूज्यकुलाचारपरायणां ।। साधकः
प्रजेपल्लक्षंहयारिकुसुमैर्हुनेत् ।। मांसेनमधुनावापिजुहुयादिष्टसिद्धये ।। तदाकपालिनीदेवीसिद्धिर्भवतिनिश्चितं ।। गुरुस्थ्यींधि
नादेविकथंसिद्धिःकपालिनी ।। सुरतासनेनरःस्थित्वासदातन्मतमानसः ।। महामालामहापात्रंमहायंत्रासनादिकं ।। ज्ञात्वानुधि
धिवदेवितदाभवतिसाधकः ।। ।।अथान्यदपिवक्ष्यामिकपालिन्याःपराक्रमं ।। स्नात्वीरक्तपात्रानिकुजवारेनिशामुखे ।। समाहृत्य
मेरुशानिपंचपंचसमन्वितः ।। दिग्वंधनंतथाकुर्याद्दिक्पालाद्युपहारकैः ।। साधकःसहितोभूत्वासिंदूरतिलकांकितः ।। खड्गह
स्तोदिग्वासोमुक्तकेशोमदान्वितः ।। ईदृशःसाधकःसोहंकृतिभावसमन्वितः ।। मुहूर्तेसाधकान्स्याप्यपुष्पवर्ज्याघृतान्नया ।। दीपंसं
लापयेद्देवियजेत्तत्रकपालिनीं ।। भाग्यात्कपालिनीसिद्धिःकदाचित्संभविष्यति ।। तथापिकालिकामंत्रेभविष्यतिभविष्यति ।। कपा

लेभाग्ययोगेनकदाचिद्यदिलभ्यते। तदाकपालिनीसिद्धिः कज्जलंतद्धिसंग्रहेत्। ततकज्जलंकपालेतुकज्जलंस्थाप्यवैजपेत्॥
सेमोहनांजनंनाममहदंजनमीरितं। तत्कपालेमहेशानिकिंतयन्त्रकेरस्थितं। एषाकपालिनीनित्याद्वितीयाकालिकावतत
इतिसंक्षेपतःप्रोक्तंकुल्लांभूपगणतृतीयकं। कालिकाकुल्लुकाकुल्लात्रिधानाम्नातुयामल। तस्मात्कुल्लेतिनाम्नाचकुलपूज्यः
त्वतांगता। विद्यानांकुलपूज्यत्वात्कुल्लुकापरिकीर्तिता। कुल्लुकाकुलपूज्यत्वात्कुलनाम्नाकुलेश्वरी। तस्यामंत्रंप्रवक्ष्यामियथा
वदवधारय॥ ॥प्रणवंपूर्वमुद्धृत्यकालिकाबीजमुद्धरेत्। कुल्लायैहन्मनुर्देविप्रोक्तःसर्वाक्षरोमनुः॥ भैरवोस्यऋषिप्रोक्तोगा
यत्रीछंदईरितं। कुल्लाशक्तिरितिख्यातानमःकीलकमीरितं॥ सर्वार्थसाधनंचैवविनियोगःप्रकीर्तितः॥ कालिकोक्तेयजेत्पीठे
कुमारीयंत्रमेवहि॥ कुमार्यांपूजयेद्देविकुल्लासिद्धाभवेद्ध्रुवं। लक्षद्वयंजपेन्मंत्रंहविष्याशीदिवाशुचिः॥ अष्टविंशतथारात्रौश्री
कुल्लादर्शनोत्सुकं॥ कदाचिद्भ्रुसदृशांकदाचित्स्फोतिसन्निभं॥ चतुर्भुजांत्रिनयनांमुकुटाटोपमंडितां॥ शवलासनगतांकुल्लांद
क्षमुंडोपरिस्थितां॥ वराभयकरेवामेउस्तस्वकदक्षिणेकरे॥ नानाविलासकुशलांकुल्लांचापरिचिंतयेत्॥ ॥एवंचिंतयतस्त
स्यदशविद्यामयीकला। भवत्येवमहेशानिकुल्लाम्नायाःप्रभावतः॥ करवीरेजपापुष्पेकुंदेनेत्रपदृशांशतः॥ तद्दशांशंगंततोयैस्त
र्पयेत्साजयेदपि॥ ब्राह्मणान्भोजयेद्देवितदंतेतुकुमारिकां॥ पूजयेत्परमेशानिकुल्लाविद्याप्रसिध्यति॥ कुल्लाविद्यामहेशानिसर्व

विद्याप्रकाशिनी ॥ यंत्रंतस्याःप्रिदेवेशिनैमित्तेकाम्यकर्मणि ॥ त्रिकोणद्वयमुद्धृत्यवृत्ताष्टदलभूषितं ॥ चतुर्द्वारसमायुक्तंभूपुरेकेनसंयुतं ॥ मध्येवीजंन्यसेत्काल्यावीजयुक्तंमनूत्तमं ॥ धृतिंपुष्टिंतथामेधांप्रज्ञांचैवतथाजयां ॥ त्रिकोणद्वितयेपूज्यादलेसेमातभैरवौ ॥ लोकपालान्शस्त्रयुक्ताञ्चक्रावरणेयजेत् ॥ अथवादेवदेवेशिकालिकावत्समस्तकं ॥ नवरात्रद्वयेचैवग्रहणस्यद्वयेतथा ॥ संक्रमेचोत्तमतिथौपूजयेयंत्रमद्भुतं ॥ यदेवकार्यमुत्पन्नंतदेवकुल्लुकार्चनं ॥ नविद्यासिद्धिमाप्नोतिकुल्लुकार्चनमंतरा ॥ आदिमांत्यसमायुक्तंसविद्यासिद्धिमाप्नुयात् ॥ आदिमांत्यंनजानातियोगुरुःसतुसिध्यहा ॥ आदिमांत्यक्रियायुक्तोनित्यामंत्रोहिसिध्यति ॥ आदिमांत्यविहीनस्यतस्यादेवस्यदर्शनं ॥ प्रीतिर्भयंद्वयमितिद्वाभ्यांसंव्यापितंजगत् ॥ अयंप्रयोगोगोप्तव्योनकुत्रापिमयेरितः ॥ कल्पादेव्यादिनित्यायुजयोहिद्वितयावधि ॥ द्वितयाभ्यांनसिद्धोसौसमंत्रोनजयक्षमः ॥ कल्पानित्यामयाप्रोक्तायस्यामेतत्प्रतिष्ठितं ॥ समस्तजगतीसारंकृत्वासंक्षेपपूजनं ॥ ॥ शृणुदेविप्रवक्ष्यामिरहस्यातिरहस्यकं ॥ विद्यानांकुलपूज्यत्वात्कुरुकुल्लामहोदया ॥ तस्यामंत्रोमहेशानिसर्वमंत्रोत्तमोत्तमः ॥ ॥ कालीकूर्चंसमुद्धृत्यकुरुकुल्लपदंवदेत् ॥ कालीमायाममपदंसर्वजनपदंततः ॥ वशमानयचोद्धार्यकालीवकुरुकुल्लके ॥ पदमुद्धृत्यदेवेशिमायास्वाहांततोमनुः ॥ सप्तविंशत्यर्णसंख्योमंत्रोस्याःसुरपादपः ॥ एतस्यहृन्मनुर्देविकुरुकुल्लानवाक्षरी ॥ श्रीविद्याविषयेभिन्नाकुरुकुल्लामहेश्वरि ॥ काल्यंगविद्यादेवेशि कुरुकु

श्री विद्याकुरुकुल्लुका ॥ इयं भिन्ना महाविद्या काली नित्या चतुर्थिका ॥ विनानुहन्मतुं देवि कुरुकुल्लां न सिध्यति ॥ हन्मतुं कुरुकु
ल्लाया ज्ञात्वा यत्नेन पार्वति ॥ ॥ प्रणवं पूर्वमुद्धृत्य कुरुकुल्ले पदं वदेत् ॥ क्रीं स्वाहांतो मनुर्देवि कुरुकुल्लाकुमारिका ॥ हन्मतु
त्वेन कथितः सर्वमंत्रोत्तमोत्तमः ॥ कालभैरवऋषिश्चास्य बृहती छंद ईरितं ॥ देवता कुरुकुल्ला च सर्वविद्यामयी परा ॥ क्रीं वीजं
क्रीं तथा शक्तिः स्वाहा कीलकमीरितं ॥ ॥ कुरुकुल्लाकुमार्यास्तु भैरवो ऋषिरीरितः ॥ विराट् छंदो निगदितं कूर्चवीजं प्रकीर्ति
तं ॥ स्वाहा शक्तिं समुद्दिष्टा विनियोगो यथेच्छया ॥ ॥ कुरुकुल्लां मित्रकुल्लां कुरुकुल्लां हृदंगमां ॥ काली कुव्जकुरुकुल्ले क्रीं ॐ
ॐ मम सर्वतः ॥ जनवसं क्रीं कुरुयुककुरुकुल्ले त्रिविष्टया ॥ स्वाहांतोयं मनुर्दिष्टो भैरवो हि विराट् ततः ॥ क्रीं वीजं च तथा स्वा
हा शक्तिः क्रीं कीलकं मतं ॥ सर्वार्थविनियोगस्यात्पूर्ववत्कापिकीर्त्तितं ॥ विनियोगः पूर्ववत्स्यात्कृत्वा षडंगादिकल्पनां ॥ षड्दी
र्घकालिवीजेन षडंगानि क्रमाच्चरेत् ॥ ततो ध्यायन्महाविद्यां कुरुकुल्लां कलेश्वरीं ॥ ॥ शवोपरि समासीनां मुण्डमालाविभूषि
तां कपालकर्त्तृकाहस्तां खड्गखेटकधारिणीं ॥ अंजनाद्रिनिभां दिव्यां मुक्तकेशीं चतुर्भुजां ॥ पीनोन्नतकुचद्वंद्वां पीनवक्षोनितंबि
नीं ॥ भक्तानंदकरीं युक्तां साधकाभीष्टदायिनीं ॥ आसवाघूर्णनयनां कामिनीजनमोहिनीं ॥ एवं संचिंतयेद्देवीं कुरुकुल्लां
महोदयां ॥ एवं ध्यात्वा जपेल्लक्षसंख्यं त्रिमधुरान्वितैः ॥ होमयेद्बिल्वपत्रैश्च विल्वपुष्पैरपि प्रिये ॥ दशांशं तर्पणं कुर्यात्

दशांशेनतु मार्जनं॥ दशांशं विप्रभोज्यं च तेन सिद्धो मनुर्भवेत्॥ पूजयेत् कालिकापीठे त्रिकोणत्रितये ज्वले॥ वृत्ताष्टदलभूपाखे
भूपुरद्वयशोभिते॥ विंदौ बीजं लिखेत् काल्यास्त्रिशक्तित्रयमर्चयेत्॥ कालीं तारां छिन्नमस्तां बालां वा बगलां रमां॥ उग्रप्रभामुग्र
वीर्यां तृतीयां तु तृतीयकां॥ त्रिकोणत्रितये पूजाक्रमेण परिकीर्तिता॥ ब्राह्म्याद्यष्टौ भैरवांश्च पूजयेद्दलाष्टके॥ लोकपालांस्तद
स्त्रांतः पूजयेत् परमेश्वरी॥ शवे श्मशाने विपिने अरण्ये भूतसंकुले॥ पूजयेत्तरुजल्लां वा सर्वसिद्धिं स विंदति॥ यघस्त्रार्थं यते
चित्रे तन्नदाशेति साधकः॥ समस्तान्पूजयेद्देवि ब्राह्मणांश्च सुवासिनी॥ विप्राराधनमात्रेण किं न यंत्र करे स्थितं॥ तंडुलेन जयावा
प्तिर्गोधूमेन धनागमः॥ माषैः शत्रुमृतिं याति मुद्गैर्मोक्षकलां लभेत्॥ तिलतंडुलहोमेन महाप्रीतिं स विंदति॥ राजीलवणहोमे
न कामिनीकर्षयेद्ध्रुवं॥ सर्षपैर्लवणैर्देवि कामिनीमनभंजनं॥ सर्पिर्लवणहोमेन कामिनीमनरंजनं॥ हरिद्रयादरिजालिन
क्ष्यंत्येव न संशयः॥ ॥रहस्यादतिगोप्याहि नित्याप्रोक्ता विरोधिनी॥ पंचमीसंज्ञिकां नित्यां यथावदवधारय॥ प्रणवं पूर्वमुद्धृत्य
कालीप्रणवमुद्धरेत्॥ मायाकामं ततः कूर्चं प्रोक्ता विरोधिनीपदं॥ शत्रुनुच्चाटयपदं विरोधयद्वयं वदेत्॥ शत्रुक्षयकरि प्रोच्य हूं
फट् स्वाहान्वितो मनुः॥ द्वात्रिंशद्वर्णसंयुक्तो मंत्रराजो महोत्तमः॥ महामंत्रो यमाख्यातो ऋषिर्भैरव ईरितः॥ गायत्री छंद आदिष्टं
देवता तु विरोधिनी॥ कालीबीजं बीजमस्याः मायाशक्तिः प्रकीर्तिता॥ कामबीजं कीलकं स्यात् विनियोगो यथेच्छया॥ कालीबद्

दीर्घबीजेनषडंगन्तुसमाचरेत् ॥ ध्यायेदंजनगिरिनिभांविरूपचर्मदेशिनीं ॥ पीनोन्नतकुचद्वंद्वांसर्पास्थिमालिकायुतां ॥ चतुर्भुजांत्रि
नयनांशवपद्मोपरिस्थिताम् ॥ त्रिशिखेनागपाशंचघंटांचडमरुंतथा ॥ बिभ्रतीमहादेवीकमाकुजचतुष्टये ॥ धूम्रांबरांपीनगात्री
मीषद्रहसिताननाम् ॥ माभैर्वीरवरंब्रूहिसर्वनत्वंददाम्यहम् ॥ उपस्थितंतेयत्कार्यंतत्तत्कार्यंकरोम्यहं ॥ एवंसंवदतीदेवीचा
रुहासांमनोहराम् ॥ विरोधकरणोद्युक्तंशत्रूणांनाशकारिणी ॥ कालिकोक्तेयजेत्पीठेत्रिकोणत्रयशोभिते ॥ वृत्ताष्टदलभूपाद्ये
भूपुरैकेनशोभिते ॥ चतुर्द्वारविभूषाढ्येश्रीबीजोज्वलकर्णिके ॥ विरोधिनीकर्णिकायांत्रिकोणान्वितयेक्रमात् ॥ धूम्रांचप्रमोज्वः
लिनीज्वालिनीविस्फुलिंगिनी ॥ उग्रोग्ररूपांकपिलांततोहव्यवहांयजेत् ॥ विरोधिनीमस्तकेतुततोहिरण्यासींयजेत् ॥ दलाष्टकेभैरवा
द्येभैरवेणसमन्वितां ॥ भूपुरेलोकपालांश्चनदस्त्राणिचतद्बहिः ॥ ततोनीराजनंकृत्वालक्षसंख्यंजपेन्मनुः ॥ दशांशंजुहुयाद्वै
निंववह्नौयथाविधि ॥ अरिष्टमालांकृत्वाचमहागुराणुसतोनरः ॥ जुहुयादरिनाशायअरिष्टफलमादरात् ॥ विभीतकेनजुहुया
त्सर्वशत्रुनिवर्हणं ॥ धत्तूरकुसुमैर्धीमान्शत्रून्विद्वेषयेन्नरः ॥ काकोलूकस्यमांसेनशत्रुंमारतिक्षणात् ॥ राजवृक्षप्रसूनेश्च
तत्काष्ठाग्नौऽजुहेत्सुधीः ॥ विरोधिनीभवेत्सिद्धाधूमावत्यादिसंयुता ॥ अर्ककाष्ठादिसंयुक्ताशत्रुविद्वेषकारिणी ॥ वायव्याभिमुखोभूत्वा
कटुजीरकजंजलं ॥ कोष्णंपिबेन्महेशानिशत्रुर्ज्वरयुतोभवेत् ॥ पराभिचारनाशार्थंस्वरक्षार्थंयथाविधि ॥ एकांतेमातृगेहेवा·

मृतहृद्दे शिवालये॥ विरोधिनीं जपेद्विद्यां स्वयुतं चोक्तमार्गतः॥ विभीतकस्य समिधा जुहेच्छत्रुनिवारणं॥ नाभिमात्रोदके गत्वा म
रीचजलयोगतः॥ तर्प्पयेद्देवतानीं त्रैलोक्यं वशं चरेत्॥ अथाकर्षणमन्विच्छन्वल्मीकमृत्समानयेत्॥ श्मशानमृत्समादाय
गोक्षमहिंगुजीरकैः॥ पुत्तलीं साध्यरूपां च कारयेत्परमेश्वरि॥ नाम्नाया ठोरकं दत्वा प्राणस्थापनपूर्वकं॥ विरोधिनीं जपेन्मन्त्रं करवीरैः समर्चये
त्॥ दुग्धेन पुत्तलीं कृत्वा तापयेत्खदिरानले॥ अनेन क्रमयोगेन दिनानि च चतुर्दश॥ यः करोति नरःश्रेष्ठः सर्वाकर्षणकारकं॥ व
वनितां मदगर्भाढ्यां समाकर्षति योगतः॥ विचार्याकर्षणं कार्य्यं भवेद्धान न भविष्यति॥ ध्यात्वा साध्यगले पाशं मस्तके त्वरितांकुशं
स्ववंसं चिन्तयेद्देवेशि त्रैलोक्याकर्षको भवेत्॥ रहस्यमपि ते देवि नवप्रीत्या निगद्यते॥ विप्रच्छिन्नादिदुष्टानां च धार्थ्यपूर्वमुहुता॥ वि
प्रच्छिन्नेति विख्याता वैप्रच्छिन्न विनाशिनी॥ षष्ठी नित्या महाविद्यातन्स्वंभ्रएप पार्वति॥ प्रणवं कमलाकामवाग्भुरणाशवसुश्वरेत्॥
विप्रच्छिन्ने पदं प्रोच्य दुष्टघातिनि चोच्चरेत्॥ शत्रून्नाशय चोच्चार्य्य एतद्विनावधिप्रिये॥ सिद्धिं मे देहि चोच्चार्य्य हूं फट् स्वाहांततो मनुः
चतुस्त्रिंशद्वर्णयुतो विप्रच्छिन्नामनुर्मतः॥ ईश्वरस्य ऋषिर्देवि जगती छंद ईरितः॥ विप्रच्छिन्ना देवता हि वाग्भवबीजमीरितम्॥
कमला शक्तिराख्याता कामबीजं तु कीलकं॥ षड्दीर्घयुतेन कामेन षडंगन्यासमाचरेत्॥ सिंहोपरि समारूढां भवपंजरमध्यगाम्॥
चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम्॥ दिगंबरां मुक्तकेशीं ललज्जिह्वां भयानकां॥ भीमदंष्ट्रां करालास्यां सृक्किणीरक्तवाहिनीं

खड्गमुण्डकपालत्रिशूलहस्तां महोदरीं ॥ नीलोत्पलनिभां श्यामां भक्तानुग्रहकारिणीं ॥ दैत्यसंहरणोद्युक्तां साधकानामभीति-
दां ॥ स्वेष्टं संचिंत्य देवेशी विप्रचित्तां शिवप्रियां ॥ लक्षमात्रं जपेन्मंत्रं दशांशं कुसुदैर्हुनेत् ॥ अथाष्टगंधनीरेण तद्दशांशप्रतर्पयेत् ॥
मार्जनं तद्दशांशेन दशांशेनाभिषेचनं ॥ तद्दशांशं विप्रभोज्यं विप्रचित्तासुसिद्धये ॥ त्रिकोणं वृत्तषट्कोणं वृत्ताष्टदलभूषितम् ॥
वृत्तभूपुरसंयुक्तं विंदुबीजविभूषितम् ॥ विंदौ यजेद्विप्रचित्तां त्रिकोणे त्रिगुणां यजेत् ॥ षट्कोणे तु षडंगानि तद्दले मातृभैरवौ ॥ भू-
पुरे लोकपालांश्च तदस्त्राणि च तद्बहिः ॥ ततो नीराजनं कृत्वा जपं देव्यै समर्चयेत् ॥ पुरश्चर्यासमायुक्तः प्रयोगार्हो न चान्यथा ॥
साकल्यैर्जुहुयाद्देवि शांतिकर्मणि साधकः ॥ मालत्या जुहुयाद्वश्ये केतक्या वाक्विभूतये ॥ करवीरैर्वशीकारः किंशुकैः स्तंभनं भवेत् ॥
मोहनं चोत्रपुष्पेणाधत्तूरैर्मारणं दिशेत् ॥ बृहत्या तु रिपूच्चाटो गिरिकर्ण्या घनागमः ॥ काञ्चपुष्पैरिपून्नाशो विद्वेषः कर्णिकारजैः ॥ नी-
वारैर्जुहुयाद्देवि धान्यसिद्ध्यर्थमेव हि ॥ कल्हापपुष्पैर्जुहुयात् लक्ष्मीः सर्वसंपदः ॥ कौसुंभकुसुमैर्देवि कामिनीं वांछितां लभेत् ॥
मधुपुष्पैश्च जुहुयादभीष्टसिद्धये ध्रुवं ॥ धातक्या जुहुयाद्देवि धनैर्धनपतिर्भवेत् ॥ यद्रोगे भेषजं यद्यत्तेन तद्रोगनाशनम् ॥
रहस्यातिरहस्यं च तथापि कथ्यते शृणु ॥ प्रणवं च वधूबीजं हूंबीजं भुवनां ततः ॥ पुनः पूर्वं ततो हूं फट् उग्रासप्ताक्षरो मनुः ॥
भैरवोस्य ऋषिप्रोक्तो बृहती छंद ईरितं ॥ उग्रा तु सप्तमी नित्या देवता परिकीर्तिता ॥ कूर्चबीजं च फट् शक्तिर्वधूकीलकमीरितं ॥

सर्वाभीष्टादिसिद्ध्यर्थे विनियोगः प्रकीर्त्तितः ॥ षड्दीर्घाद्येन बीजेन मायाद्येन षडंगकं ॥ ततो ध्यायेत्परां उग्रां प्रत्यालीढपदस्थितां चतुर्भुजां त्रिनयनां मुंडमालाविभूषिताम् ॥ दिगंबरां करालास्यां घोरदंष्ट्रां भयानकां ॥ शवोत्संगे क्रीडमानां श्मशानालयवासिनीं श्यामवर्णां मुक्तकेशीं खड्गेंदीवरधारिणीं ॥ कपालकर्त्रिकाहस्तां वरदानपरायणां ॥ उग्रां ध्यायेन्महाविद्यां लक्षमुग्रं जपं चरेत् तद्दशांशेन जुहुयात्कमलैर्घृतसंयुतैः ॥ तद्दशांशं तर्पणं च तद्दशांशेन मार्जनं ॥ विप्रभोज्यं दशांशेन ततो नाग्रा /छिद्रा कुवम पर्वतेग्रां नरे घोरे विपिने तटिनीतटे ॥ एकलिंगे श्मशाने वा पुरश्चरणवान्भवेत् ॥ अथास्याः पूजायंत्रं च यथावत्कथ्यते शृणु ॥ त्रिकोणं वृत्तमष्टदलं वृत्तं भूपुरभूषितं ॥ दलाष्टकविभूषाढ्यं किंवा वज्रविभूषितं ॥ त्रिकोणमध्ये विलिखेत्स्वबीजं महोत्तमं तारां नीलामेकजटां त्रिकोणे प्रपूजयेत् ॥ ततो दलाष्टके देवि उग्राघोराष्टकं यजेत् ॥ वैरोचनाष्टकं पूज्यं तथा पश्चात्कान्यसेत् लोकपालांस्तदस्त्राणि यथावद्विधिना यजेत् ॥ ततो नीराजनं कृत्वा जपं देव्यै समर्पयेत् ॥ शवासने वा स्फुरते स्थित्वा च सर्वदा जपेत् सिंदूरतिलको नित्यं संविदासवपूर्णितः ॥ मुक्तकेशो दिशावासो भक्तियुक्तो जितेन्द्रियः ॥ महाचीनक्रमरतः सपापपरमेश्वरि त्रिकोणं चैव संवीक्ष्य सदानन्दमानसः ॥ लक्षमात्रं जपेन्मंत्रं प्रयासि सिद्धिनिश्चितं ॥ अन्यत्सर्वं तु तावत्कीर्त्तितं जगदीश्वरि ॥ न्यासपूजादिकं ध्यानं पुरश्चर्याविधानकं ॥ महोग्रतारावत्तेयं किं भूयः श्रोतुमिच्छसि ॥ प्रणवं पूर्वमुद्धृत्य शिवबीजं समुद्धरेत् ॥

टि७

वह्नारूढं नादविंदुषष्ठस्वरविभूषितं ॥ वीजद्वयसमुद्भाष्य उग्रप्रभेस्वरूपकं ॥ दविकालीमहादेविस्वरूपं दर्शयेतिव ॥
हूं फट् स्वाहा समायुक्तं प्रोक्तमुग्रप्रभामनुः ॥ पंचविंशतितत्वाढ्यः प्रोक्तश्चोग्रप्रभा मनुः ॥ महाकालो ऋषिप्रोक्तस्त्रिष्टुप्छंदः प्रकीर्तितः
उग्रप्रभामहाकालीदेवतापरिकीर्तिता ॥ रं वीजं ॐ तथाशक्तिफट्कीलकमुदाहृतम् ॥ कालिकादर्शनार्थे विनियोगः प्रकीर्तितः
उग्रप्रभाख्यावीजेन षड्दीर्घेण षडंगकं ॥ ध्यायेदुग्रप्रभां दिव्यां दिव्यनीलोत्पलप्रभां ॥ चतुर्भुजां त्रिनयनां शवपद्मोपरिस्थितां ॥
दिगंबरां मुक्तकेशीं पीनोन्नतपयोधरां ॥ उग्रप्रसन्नमुखांभोजां शवमांसप्रभोजनीं ॥ शवानां करसंघातैः कृतकांचीं हसन्मुखीं ॥
खड्गमुंडधरां वामे दक्षे खर्परकर्तृके ॥ विभ्रतीं परमानंदजननीं कालवंचिनीं ॥ एवं ध्यात्वा महाविद्यां लक्षयुग्मं जपेच्छिवे ॥
कालिकोक्तयजेत्पीठे त्रिकोणद्वयकोज्वले ॥ वृत्ताष्टदलभूपाष्टे भूपुरद्वयभूषिते ॥ उग्रप्रभा विंदुमध्ये कालीतारांचरेचानी ॥
प्रथमे पूजयेद्देवि द्वितीये तारिणीगणाः ॥ तारामेकजटां नीलां तद्द्वितीये त्रिकोणके ॥ दलाष्टके मातृकाष्टौ दलाग्रे भैरवाष्टकं ॥
भूपुरे लोकपालांश्च तदस्त्राणि च तद्वहिः ॥ त्रिस्त्रिः पूजाप्रकर्तव्या सर्वेषामपि देशिके ॥ एवमुग्रप्रभामिष्ट्वा लक्षयुग्मं जपेद्वरे तत्
दशांशं वज्रपुष्पाणि मेरयाक्तानि होमयेत् ॥ तर्पयेत्तद्दशांशेन दुग्धेन मधुनाथवा ॥ दध्नान्वेक्षुरसेनापि पीठतोयेन वा पुनः ॥
तद्दशांशं मार्जनं च दशांशं विप्रभोजनं ॥ कुमारीपूजयेत्पश्चा छक्तिं वापि प्रपूजयेत् ॥ उग्रप्रभापताकायां मूर्ध्नि कृत्वा विधारयेत्

रणेदेवासुरांजित्वात्रैलोक्यविजयीभवेत्॥ ३३ भोफलंकेरवङ्केजग्रास्योग्रप्रभांशिवां॥ सर्वसिद्धिंसमासाद्यकालीरूपोनरोभवेत्॥
मालिनीमण्डलेध्यात्वाजपेदुग्रप्रभामनुम्॥ कालिकासिद्धिदाभूयान्नात्रकार्याविचारणा॥ योनिस्वरेतमालिख्याजपेदुग्रप्रभांपरां
तत्रसंविन्यदेवेशिसाधकःकिन्नसाधयेत्॥ उग्रप्रभाभ्यांकालीगुह्यकत्वामामंजपेच्छिवे॥ मासमात्रप्रयोगेनकालिकावरदोभवेत्
सर्वस्वंचैवसंग्राह्यानित्यामहोदया॥ नवमीसंख्यकानित्यानित्यासारामहोदया॥ तस्यामंत्रंप्रवक्ष्यामियथावदवधारय॥
प्रणवंकालिकाबीजंकौलिनीबीजमेवच॥ कूर्चबीजंसमुद्धृत्यप्राप्रायेतदनंतरं॥ सर्वमंत्रफलंप्राप्त्यदायैशब्दंमनुस्मरेत्॥
हूंफट्स्वाहान्तकोमंत्रस्तुनविंशाक्षरःपरः॥ ऊर्ध्वसंख्याविहीनेनवीतिसंख्यःप्रकीर्तितः॥ महादेवोऽस्यऋषिश्चास्याऽत्रिष्टुप्छंदःप्र
कीर्तितः॥ दीप्ताख्यानवमीनित्यादेवतापरिकीर्तिता॥ कालीबीजंबीजमस्याःकौलिनीशक्तिरेवहि॥ स्वाहाकीलकमित्युक्तंकाम्यार्थे
विनियोगतः॥ काल्यांषड्दीर्घयुक्तेनषडंगन्यासमाचरेत्॥ ध्यायेद्दीप्तांमहानीलमणिप्रख्यांमहोदरीं॥ चतुर्भुजांत्रिनयनांमुंडमा
विभूषितां॥ दिगंबरांमुक्तकेशींघोरदंष्ट्रांकरालिकां॥ शवपद्मेसमासीनांपीनोन्नतपयोधरां॥ शवास्थिकृतकेयूरशंखकंकण
भूषितां॥ लेलिहानांशवंक्वापिप्रहसंतींमदातुरां॥ भक्तानांवरदांनित्यांकालिकांध्यानकारिणीं॥ नरांत्रयोगपट्टेनभूषितांयोगमा
र्गगां॥ खड्गंमुंडधरांवामेसव्येभयवरप्रदां॥ सुदंतुरांमहारौद्रींश्मशानालयवासिनीं॥ एवंसंचिंत्यदीप्ताभांलक्षमेकंजपेच्छिवे॥ द

शांशंनारिकेलेनहवनंसमुपाचरेत्॥ कदल्याहवनंकार्यंसर्वदाशीघ्रसिद्धये॥ दशांशंपीठतोयेनहवनंसमुपाचरेत्॥ नदशांशंमार्जनंचगंधाष्टकजलेनवैः॥ तद्दशांशंविप्रभोज्यंभोजयेद्विकुमारिकां॥ ततःसिद्धमनुर्मंत्रीप्रयोगार्होनचान्यथा॥ ब्राह्मेमुहूर्तेचोत्थायगुरुस्मरणपूर्वकं॥ गुरुंध्यात्वाध्यासहस्रारेपूर्वोक्तध्यानयोगतः॥ मूलाधारात्स्वजिह्वांतोमूलविद्यांपरांस्मरेत् सरस्वतीदीपरूपांमूलबीजस्वरूपिणीं॥ संपूर्णांमातृकांप्रोच्यमूलविद्यांसमुच्चरेत्॥ पुनर्वैमातृकांप्रोच्यपुनर्विद्यांसमुच्चरेत् त्रिधाभिमंत्रितोयंतुक्रमेणानेनसुंदरि॥ मूलविद्यांततोध्यात्वाजिह्वायांदीपरूपिणीं। तेजोरूपांसापुधांवेतज्जलंतुपिबेच्छिवे योगेनानेनदेवेशित्रिकालज्ञोनरोभवेत्॥ विनायासैर्विनाध्यासैर्विनापाठादिनाप्रिये॥ चतुर्विधंतुपाण्डित्यंतस्यहस्तेव्यवस्थितं जातीपुष्पेनदेवेशिकवितावशवर्त्तिनी॥ कुंदपुष्पेणदेवेशिसर्वशास्त्रवशीकृतिः॥ दुर्वयाशांतिकेहोमःगुडूच्यामृत्युवारणे॥ खुरच्यामोहनंप्रोक्तंरंभास्तंभनमीरितं॥ आम्रेणवश्यसिद्धिःस्याद्धत्तूरेणमहोदयः॥ उच्चाटनंकरीरेणविद्वेषःकर्कटीफलैः॥ मारणंनीलपुष्पेणमरीचेनतुकर्षणं॥ एवमादिक्रियाःसर्वाःसिद्धमंत्रीसमाचरेत्॥ अंजनंगुटिकांखंगधातुवादंरसायनं॥ चरुकंतिलकंवासोडुडुभिश्चकपालकं॥ एवमादिक्रियासिद्धिर्दीप्रामंत्रेणैवभवेत्॥ मंत्रोद्धारंशृणुप्राज्ञेयेनसिद्धिंसविंदति कूर्चयुग्मंमहादेविकालीबीजद्वयंतथा॥ मायाद्वयंसमुद्धृत्यहसकलरीस्वरूपकम्॥ अप्नीलपताकेचक्रफडंतामहेश्वरि।

नीलानीलपताके च सर्वसिद्धिकरी परा ॥ उग्रचण्डाललज्जिह्वाया सा भिन्नकरालिका। पंचधा कथिता नीला मया नीलपताकिका ॥ भैरविस्य ऋषिः प्रोक्तो बृहती छंद ईरितं ॥ कूर्चबीजस्वरूपं हि शक्तिरित्यभिधीयते ॥ हूं फट् च कीलकं भद्रे काल्यर्थे विनियोगता ॥ काली षड्दीर्घबीजेन षडंगं न्यासमाचरेत् ॥ अथ ध्यायेन्महानीलां नीलांजनगिरिप्रभां ॥ चतुर्भुजां त्रिनयनां मुंडमालाविभूषितां ॥ शवोपरिसमासीनां मदिराघूर्णलोचनां ॥ मृगशावकनेत्रां च प्रसन्नवदनां शुभां ॥ करकांचीशोभमानां शवकर्णावतंसिनीं ॥ ललजिह्वां करालास्यां घोरदंष्ट्रां भयानकां ॥ पापिनां सर्वदा नीलां क्रूरां प्रलयवतां परां ॥ इष्टसंहरणोद्युक्तां साधकस्य वरप्रदां ॥ फेरुवर्गैर्गृध्रगणैश्चतुर्दिक्षु निनादितां ॥ ईदृशीमादिरूपां तां नीलांभोजवरप्रभां ॥ जपेल्लक्षत्रयं देवि हविष्याशी जितेंद्रियः कुलाचारक्रमेणैव यथोक्तक्रमयोगतः ॥ करवीरैर्जवाबिल्वैर्मल्लिकाद्यैर्घृताच्चितैः ॥ त्रिकोणकुंडे जुहुयात्सुपरिष्कृतभूतले दशांशं तर्पणं कार्यं दुग्धेन सुरयापि वा ॥ मार्जयेद्रक्तनीरैश्च ब्राह्मणान्भोजयेत्ततः ॥ सुवासिनी कुमारीं च शक्तिं चापि तथा शुभां पुरश्चरणसंपन्नो मंत्रः सर्वार्थदायकः ॥ यथा ह्यन्नृपादीनां पुरश्चर्यां तु मंत्रिणां ॥ पुरश्चरणसम्पन्नः प्रयोगार्हो न वान्यथा यंत्रमस्याः प्रवक्ष्यामि येन सिद्धिर्ध्रुवो भवेत् ॥ बिंदुमध्ये लिखेत्पूर्वं त्रिकोणं च ततोपरि ॥ वृत्तं षट्कोणवृत्ताष्टदलवृत्तं च भूपुरम् चतुर्द्वारोपशोभाढ्यं यंत्रं नीलामनोः शुभं ॥ वटुकाद्याश्चतुर्द्वारि परे भद्वारदेवताः ॥ नरस्त्राणि च तद्बाह्ये दलेष्टौ भैरवास्त्विये

केशरेमातृकाक्षौवृन्तेषुसिद्धयः क्रमात्॥षट्कोणेतुषडंगानि त्रिकोणेदेवतात्रयं।कालरात्रिमहारात्रिर्मोहरात्रिः क्रमात्त्रि
के।मध्येनीलांसमाराध्य ततोनैवेद्यमर्पयेत्॥नीराजनंततः कृत्वास्तुत्वानत्वाविसृज्य च।नीलांसंसाध्य यत्नेनषट्त्रिंशद्यक्षणी
गणं।कालीकूर्चंवधूमायाः श्रुकंयक्षणीमध्यतः॥अंतेइमानिबीजानि ॐ फट्स्वाहान्विता गणः॥षट्त्रिंशद्वैवयक्षिण्यः क्रमेणचो
क्ताः प्रिये।तथैवबलिनोयक्षस्त्रैं क्रौं ह्रूं फ्रौं युतेन च।सर्व्वयक्षाह्रूंफडंताचतुराशीतिकीर्त्तिता।यक्षिणीसिद्धिमासाद्यसाधकः
सुखमाप्नुयात्॥राजाभवतिलोकेस्मिन्विनाराज्येनपार्वति।अल्पज्ञमपिविद्वांसंमुर्खंचपंडितंतथा॥यःकरोत्येवमादीनि दीनाराणांशता
न्यपि॥योवैददातिसाध्याययक्षणीनात्रसंशयः॥देवयोनीर्मानवीचविविधायोनिः प्रकीर्त्तिता॥नतद्रूपंसमासाद्यतत्सिद्धिम
धिगच्छति॥फलंतुयक्षिणीसिद्धेर्यक्षसिद्धेश्चकिंफलं।तन्मेवददयापारपरापरनमोस्तुते।दीनारंगुटिकांखड्गंवेतालंपादुकां
जनं॥रसंरसायनंगुप्तिंभिल्लकोःइश्पतातथा॥ ॥कपालंचपरःशंखत्रिशूलंडमरुंतथा॥आकर्षणंवश्यतांचेमोह
नोच्चाटनंतथा॥कुर्व्वीतक्रमेणाकर्मादिखेचर्याद्याहिसिद्धयः॥गोपनीयंगोपनीयंकिमन्यच्छ्रोतुमिच्छसि॥ ॥देवाशंश्रोतु
मिच्छामिघनानित्याक्रमार्चनं॥डघत्घनघनाकाराघनानित्याघनोदया॥घनालयाघोषवतीघटिकोदयरूपिणी॥
तस्यामंत्रार्चनंनित्यंवदत्वंकरुणानिधे॥प्रणवंपूर्वमुद्धृत्यकालिकाद्यक्षरंतथा॥घनालयेघनघनेफ्रौं ह्रूं फट्ठ्चमनुर्मतः

भुवनाक्षरो घनायास्तु मंत्रोयं सुरपादपः॥ अघोरभैरव ऋषिर्विराट् छंदः प्रकीर्त्तितः॥ कालीवीजं तथा मायाशक्ति हूंफट्व कीलकं कालिकाप्रीतये देवि विनियोगः प्रकीर्त्तितः॥ षड्दीर्घभाजा वीजेन कूर्चेण षडंगकं॥ घनां नित्यां महाविद्यां नीलजीमूतसंनिभां॥ मत्तकोकिलनेत्राभां पङ्कजंबूफलप्रभां॥ सुदीर्घप्रपदालम्बिमुक्तलम्बकचोच्चयां॥ चतुर्भुजां त्रिनयनां दिगंबरविनोदिनीं॥ करालास्यां घोरदंष्ट्रां पीनोन्नतपयोधरां॥ श्रोष्ठप्रांतगलद्रक्तधाराविस्फुरिताननां॥ वीराशांकरकांच्यातु भूषितां भीमविग्रहाम्॥ खड्गखेटकपट्टीशमुद्गरान्बिभ्रतीं स्मरेत्॥ ध्यात्वा सन्ततं धीरे महावीरघनालयां॥ लक्षमात्रं जपेन्मंत्रं यथोक्तैः कर्मेऊं नेत॥ तद्दशांशं तर्पणं तु गंधद्रव्यादिभिः प्रिये॥ तद्दशांशं मार्जनं तु शीतलेन जलेन च॥ तद्दशांशं ब्राह्मणानां भोजनं समुपाचरेत्॥ एवं क्रियासमायुक्तो मंत्रसिद्धिं स्व[redacted] विंदति॥ घनायंत्रं प्रवक्ष्यामि पूजनं यादृशं भवेत्॥ षट्कोणं वज्राष्टदलं भूपुरेणोपशोभितं॥ षट्कोणे तु षडंगानि षड्धातुदेवतास्वपि॥ दलाष्टके मातृकाश्चैतां भैरवपूजनं॥ लोकपालान्भूपुरे तु तदस्त्राणि च तद्बहिः॥ यथाशक्तिं जपित्वा तु सर्वनित्यावशंकरी॥ यन्नज्ञानात्सकला विद्याः स्वस्थानपदं गताः॥ तस्या मंत्रो महेशानि कथ्यते भूरिसांप्रतं॥ प्रणवं कालिकावीजं कूर्चं मायेति समुद्धरेत्॥ वलाकाकालिशवांतेत्र्यद्भुतपराक्रमे॥ अभीष्टसिद्धिं मे देहि हूं फट् स्वाहा मनुर्मतः॥ कालिकास्यां भवेद्वीजं कूर्चं शक्तिः प्रकीर्त्तिता॥ मायाकीलकमुद्दिष्टं

कीलकेन षडंगकं ॥ षडंगन्यासमासाद्य ध्यानं कुर्यान्महेश्वरि ॥ अंजनानंतसदृशीं कोटिकालानलप्रभां ॥ चतुर्भुजां त्रिनय-
नां मुण्डखड्गनिवासिनी ॥ दिगंबरीं करालास्यां पीनोन्नतपयोधरीं ॥ शवानां करसंहत्या कृतकांचीशवासनां ॥ मुक्तकेशीं मदाघू-
र्णां प्रसन्नमुखपंकजां ॥ सूर्यकोटिसमाभासां मुंडमालाविभूषितां ॥ खड्गं मुंडधरां वामे सव्ये खर्परतर्ज्जनीम् ॥ संबिभ्रतीं महाका-
लीवलाकारूपधारिणीं ॥ श्मशाननिलयां भीमां भूतप्रेतसमन्वितां ॥ शिवाभिर्घोररूपाभिर्वेष्टितां घोरनादिनीं ॥ माभैर्वीरवरं प्रहि-
स्मितं ते करोम्यहं ॥ एवं ध्यात्वा जपेल्लक्षं मंत्रः सिद्धो भवेद्ध्रुवं ॥ दशांशं बिल्वपत्रैश्च घृताक्तैर्जुहुयात्सुधीः ॥ तर्पणं तद्दशांशेन तद्द-
शांशेन मार्जयेत् ॥ तद्दशांशं ब्राह्मणानां भोजनं परिकीर्तितं ॥ विप्राराधनमात्रेण सर्वांगपूर्णतामयात् ॥ यद्यगदं विहीनं च तत्सां-
गं द्विजभोजनं ॥ अन्यत्सर्वं महेशानि कालिकावत्समाचरेत् ॥ ॥ मात्रा नित्या तु या प्रोक्ता सर्वनित्योत्तमोत्तमाः ॥ तस्या मंत्रं महे-
शानि यथावदवधारय ॥ प्रणवं कालिकाबीजं मायाकूर्चं च मातृकां ॥ सबिंदु मातृकावर्णां चतुर्बीजानि वै पुनः ॥ पुनश्च मातृकाव-
र्णां चतुर्बीजं पुनश्च तत् ॥ एवं शांता महेशानि महामात्रा प्रकीर्तिता ॥ चतुर्बीजं तथा मात्रे सिद्धिं मे देहि सत्वरं ॥ हुं फट् स्वाहांति द्वे-
शि मात्रामंत्रो परो मतः ॥ ॥ प्रणवं कालिकाबीजं कूर्चं मायां ततः शिवे ॥ मध्यनित्या नाम दद्यात्संपुटता च केवला ॥ नित्यामंत्रा-
श्च जायंते भिन्नरूपाश्च पार्वति ॥ पुनर्बीजानि हुं फट् च स्वाहांताः परिकीर्तिताः ॥ आणायोगात्संपुटाद्वा हुं फडंत प्रयोगतः ॥ एवं त-

वतिनित्यानांमंत्रभेदाश्चतिदि॥ भैरवोस्यऋषिःप्रोक्तोउस्निक्छंदःप्रकीर्त्तितः॥ मात्रादेवीनिविख्यातादेवतापरिकीर्त्तिता॥ क्रीं
वीजंहूंतथाशक्तिःॐकीलकमुदाहृतं॥ विनियोगोमहेष्टार्थेकालिकार्थेप्रकीर्त्तितः॥ मायाषड्दीर्घयुक्तेनषडंगन्याससमाचरेत्॥
तथाध्यायेन्महाविद्यांनिलांजनगिरिप्रभां॥ चतुर्भुजांत्रिनयनांमुंडपद्मोपरिस्थितां॥ कपालकर्त्तृकाहस्तांखड्गमुंडधरांपरां॥ दंतुरां
चमहारौद्रीवराउनादातिभीषणां॥ शववक्षःसमारूढांलेलिहानांशवाननां॥ एवंविधांतांश्रीमात्रांमहाघोरनिनादिनीम्॥ इति
संचिंत्यदेवेशिलक्षमात्रंजपंचरेत्॥ दशांशंजुहुयाद्विल्वैरपवाकदलीफलैः॥ द्राक्षाभिःपायसैर्वापिदशांशंहवनंचरेत्॥ तर्प्पणंमा
र्जनंविप्रभोज्यंयत्नेनकारयेत्॥ यद्यदंगंविहीयेततत्संख्याद्विगुणोजपः॥ जपपूजाप्रयोगादिकालीवत्त्विपिमात्रवत्॥ रहस्यमपि
तेदेविकथ्यतेश्रृणुसांप्रतं॥ मुंडनित्याविधानंचसर्वसारोत्तमोत्तमं॥ मुंडिणीनामकानित्याश्रीविद्यायांतुमुंडिणी॥ मुंडिणीदंडि
नीनाम्नीदेवीमोदार्थविग्रहा॥ महाविद्यादिकादीनामनोमुंडणकारिणी॥ तेनेयंमुंडनित्याख्यासर्वसिद्धिपरांविका॥ प्रणवंकालि
कावीजंमायाकूर्चंक्रमेणच॥ प्रोक्तंवीजत्रयंप्रोच्यमुंडांवापममुद्धरेत्॥ मुंडनित्यांमेदेहिभोजनमुंडास्वरूपिणी॥ [illegible]
नित्याख्यासर्वसिद्धिपरांविका॥ प्रणवंकालिकावीजंमायाकूर्चंक्रमेणवै॥ हूंफट्स्वाहासमायुक्तोपीतवर्णोमनुःशुभः॥ महादेवो
ऋषिश्चास्यगायत्रीछंदईरितं॥ मुंडनित्यामहादेवीदेवतापरिकीर्त्तिता॥ कालीवीजंवीजमस्यामायाशक्तिःप्रकीर्त्तिताः॥ कूर्चंकील

कमित्युक्तं काल्याः षड्दीर्घयुक्तया ॥ षडंगन्यासमाचार्य्य मात्रा ध्यायेन्महेश्वरि ॥ अंजनाद्रिनिभां मुंडां मुंडमालाविभूषितां
दिगंबरां घोरदंष्ट्रां चंडनादातिभीषणां ॥ दक्षिणां मुक्तकेशालीं दिगंबरविनोदिनीं ॥ पिंगाक्षी प्रज्वलजिह्वां घोरदंष्ट्रां भयानकां ॥
शवानां करसंघातैः कृतकांचीहसन्मुखी ॥ सृक्कद्वयगलद्रक्तधाराविस्फुरिताननां ॥ कपालकर्तृकाहस्तां खङ्गखेटकधारिणीम् ॥
महाकालेन च समं रताशक्तां शुधातुरां ॥ वरं ब्रूहि वरं ब्रूहि क्षं ब्रूहीति वा वदेत् ॥ स्वं संचिंत्य देवेशि पूजयेद्यंत्रमादरात् ॥ त्रिकोणं च
त्तषट्कोणं पद्माष्टदलभूपुरं ॥ चतुर्द्वारोपशोभाढ्यं तद्बहिर्गणपस्तथा ॥ योगिनी क्षेत्रपालश्च वटुको हि चतुर्थकः ॥ लोकपाला
श्च लोकेशो भूपुरे क्रमशो यजेत् ॥ दलेष्ट मातृकं पूज्य केशरे भैरवाष्टकं ॥ दलाष्टाग्रे त्वष्टसिद्धिः षट्कोणेषु षडंगकं ॥ राज्यदां भोग
दां मोक्षजयदां भयदां तथा ॥ षष्ठीं तु सिद्धिदां प्रोक्ता षट्कोणे कुंकुमाद्यजेत् ॥ इच्छाज्ञानाक्रियाश्चैव त्रिकोणे परिपूजयेत् ॥ मध्य
शुंगं च संपूज्य सर्वपंचोपचारकैः ॥ इति पूजां समासाद्य ततो नीराजनं चरेत् ॥ नीराजनांते देवेशि प्राणायामपुरःसरां ॥ लक्षद्वयं ज
पेन्मंत्रं शुभ्वैतैः करवीरजैः ॥ दशांशं हवनं कृत्वा तद्दशांशं च तर्पणं ॥ मार्जनं ब्राह्मणानां च भोजनं समुपाचरेत् ॥ एवं सिद्धमनुर्मंत्री
प्रयोगार्हो न चान्यथा ॥ यद्यद्धृदि समाधत्ते तत्तत्कृत्यं करोति हि ॥ सर्वं तु कालीवत्प्रोक्तं विशेषः कथितो मया ॥ इति संक्षेपतः प्रोक्तं कि
मन्यच्छ्रोतुमिच्छसि ॥ ॥ श्रीदेव्युवाच ॥ देवेश श्रोतुमिच्छामि मितानित्याविधिक्रमं ॥ सर्वविद्यावरारोहा मितां मे ब्रूहि सादरं ॥ ॥

श्रीशिवउवाच॥शृणुवक्ष्यामिदेवेशिरहस्यातिरहस्यकं॥सर्वविद्यामहाराज्ञीमितानाम्नीमहोदया तस्यामंत्रंप्रवक्ष्यामिकालीस
र्वांगमद्भुतं॥प्रणवंपूर्वमुद्धृत्यकालिकाबीजमुद्धरेत्॥कूर्चबीजंतथामायांवाग्भवंबीजमुद्धरेत्॥मितेपदंसमुच्चार्य्यतथाप
रिमितेपदं॥पराक्रमायचपदंपुनर्बीजानिचोद्धरेत्॥सोहंहूंफट्ततःस्वाहासप्तविंशतिवर्णकान्॥मंत्रोयंकथितोदेवि
ऋषिछंदादिकंशृणु॥महाकालोऋषिश्चास्यत्रिष्टुप्छंदःप्रकीर्तितं॥मितानित्यादेवताचकालिकाबीजमीरितं॥कूर्चंश
क्तिर्महेशानिमायाकीलकमीरितं॥कीलकेनषडंगानिषड्दीर्घेणकारयेत्॥ध्यायेन्नीलाद्रिसंकाशांनीलजीमूतसंनि
भां॥रक्तवस्त्रांशवासीनांमुंडमालाविभूषितां॥पीनोन्नतकुचद्वंद्वांपीनवक्षनितंबिनीं॥दक्षिणांमुक्तकेशालींदिगंबर
विनोदिनीं॥महादेवहृदंभोजमध्यस्थांशंखकंकणां॥कोटिकालानलप्रख्यांश्मशानलयवासिनीं॥खड्गमुंडधरांवामेसव्ये
भयवरप्रदां॥साधकाकांक्षहृदयांसाधकस्यवरप्रदां॥मुखसांद्रस्मितामोदमोदिनींमदविह्वलां॥आरक्तमुखसांद्राभिर्नेत्रा
दिभिर्विराजितां॥दक्षिणांसंमितांदिव्यांदीननाथांविभावयेत्॥एवंध्यात्वामितांदेविलक्षत्रयंजपंचरेत्॥किंशुकैर्हवनंत
स्यज्योतिष्मत्याथवाप्रिये॥ज्योतिष्मतीप्रसूनेनफलंकिंशुकवन्मतं॥आरक्तकरवीरैर्वाजुहुयान्मंत्रसिद्धये॥त्रिकोणकुंडेजु
हुयात्संस्कृतेखादिरानले॥तांबूलपत्रहोमेनकालिकावशमानयेत्॥उच्चाकृतागवल्लीचनागिनीसिद्धिमाप्नुयात्॥वज्रप

ष्येणान्तु कुर्यादाक्षिन्यावामहेश्वरि। धत्तूरेणारिनिधनं कुंदेश्चकवितां लभेत्॥ जातिपुष्पैर्जयावाप्तिस्तिलपुष्पैर्वलोन्नतिः पुन्नागैः पुरुषार्थाय केतक्या कामिनीं लभेत्॥ आम्रपुर्यैरिपुनाशश्च चंदनेन जयी सदा॥ तथैवागुरुणा देवि राजराजपदं लभेत्॥ रक्तचंदनहोमेन सर्वमोहनमाचरेत्॥ गिरिकर्णीकन्यकाभिः संवत्साच्छिवरूपता॥ गुडूच्यारिपुनाशश्च मरीचेनाकृष्टिरुत्तमा॥ पूगीफलेन सौभाग्यं तथा जातीफले धनं॥ स्तंभनं चंपकेनैव जंवाजन्मार्त्तिनाशनं॥ एवं नानाविधानेन कामसुद्धिरुपसाधकः॥ ततो होमदशांशेन तर्प्पणं पीठनीरतः॥ अष्टगंधोदकेनापि तथाकेसरनीरतः॥ तर्प्पणान्दशांशेन मार्जनं समुपाचरेत्॥ तद्दशांशं विप्रभोज्यं शक्तयश्च कुमारिकाः॥ पूजयेद्योजयेदेवि सर्वसिद्धिं स विंदति॥ अथ पूजाविधानस्य यंत्रं संकथ्यते शृणु॥ त्रिकोणत्रितयं लिख्य वृत्तषट्कोणसंयुतं॥ रक्ताष्टदलमध्यस्थं भूपुरेणसमन्वितं॥ चतुर्द्वारोपशोभाढ्यं सश्रीविंदुविभूषितं॥ कालीकरालांश्रीघोरां प्रथमे तु त्रिकोणके॥ द्वितीये तु त्रिकोणे तु वामां ज्येष्ठां च रौद्रिकां॥ त्रितीये तु त्रिकोणे तु इच्छाज्ञानाक्रियां तथा॥ अथ वृत्ते यजेद्देवि वार्त्तालीं प्रथमं यजेत्॥ द्वितीयभागे देवेशि लघुवाराहिकां यजेत्॥ तृतीयभागे देवेशि स्वप्नवाराहिकां यजेत्॥ तिरस्कारिणिकां पूज्य चतुर्थभागके शिवे॥ षट्कोणवृत्ते देवेशि चतुर्द्वारं प्रपूजयेत्॥ षट्कोणे तु षडंगानि वृत्ते सिद्धेष्टकं तथा॥ दलेष्टौ मातृका पूज्या तदंतेष्टौ च भैरवाः॥ भूपुरे लोकपालांश्च तदस्त्राणि च तद्वहिः॥ ए

वमिच्छा मित्तां नित्या विप्रा मित्रां निरंजनी ॥ एवमाराधनायुक्तो मंत्रसिद्धिर्भवेन्नरः ॥ ॥अथवान्यप्रकारेण ध्यानं नित्याक्रमे
शृणु ॥ अंजनाडिनिभाः सर्वा मुण्डमाला विभूषणाः ॥ दक्षहस्ते देवि खड्गं वामहस्ते च तर्जनी ॥ धारयंत्यः शुभाः काल्यो वराभय
रस्तकराः ॥ एतत्सामान्यतो ध्यानं नाममंत्रविशेस्मृतं ॥ रहस्यमंत्रकथितं सिद्धयो विविधाः करे ॥ अंजनं गुटिकां खड्गं वेतालं यक्ष
णीगणं ॥ वल्कं तिरकं वासः कपालं पादुकां तथा ॥ लगुडः किन्नरीसिद्धिर्जोमियोंदिमहाकला ॥ वराचरगतिश्चैवभ्रमणं त्वंलघि
मादिकं ॥ परकायप्रवेशश्च सर्वरसरसायनं ॥ स्पर्शश्चिंताप्रहारश्च भूतसंवरणं तथा ॥ मृतकोत्थापनं दिव्यः सिद्धयस्तत्करे स्थिता
महापीठसमुद्भूतनित्यास्याप्यायथाक्रमं ॥ अथवा मूलमंत्रेण जपन्मं ऐस्त्वदेवताः ॥ यथोक्तमंत्रसिध्यर्थं ध्यायेद्वजलवस्तुनि ॥
यजेत्संतर्प्ययेच्छक्तीर्भोजनाच्छादनादिभिः ॥ धूपयेद्दशगंधेनेदवतावतरेत्तदा ॥ रक्ताक्षीत्तत्रनेत्रांगी प्रसन्नमुखपंकजा ॥ कावि
देकाभवेच्छक्तिरितरास्तत्सुखस्थिताः ॥ तस्मिंस्तरोतु प्रकृतिं कृत्वा माषमयीं शुभां ॥ घृतपक्वां मांसमयीमुपभोगान्प्रकल्पयेत् ॥
ग्रासे ग्रासे पुरो दद्यान्मन्त्रस्कृधाकनकानि च ॥ आद्यंवीजं समुद्धार्य नित्यक्रूरमुखेन तथा ॥ क्रूरडंष्ट्रे ललज्जिह्वे मुखेस्तेयं प्रकल्पि
तः ॥ ग्रासे भक्षय युग्मं स्वाहांतं ठद्वयं पुनः ॥ आद्यबीजं समुद्धार्य मतं ध्यायेद्विगुंतदा ॥ तत्कालमेव हरते मिताग्राणामहे
श्वरि ॥ अथ ते सोमृत इति तावत्संभोजयेन्मितां ॥ पश्चात्संचांगधूपेन धूपयेद्यक्षीवरप्रदां ॥ हासं कृत्वा वरं दत्वा ब्रजेत्सा शक्तिदे

हतः॥श्मशानेवायसंपूज्यावडवाग्निसमप्रभा॥ससैन्यगणोनाशायनृमांसैःकुलपूजिता॥उद्यानेतुवशीकर्तुंमुखादेतुन
दीतटे॥नातःपरतराविद्यासमःप्रत्ययकारिणी॥विख्यातान्ततनाम्नायेशतधापूजितामया॥गोप्यात्गोप्यतराप्येषामया
तुभ्यंप्रकाशिता॥ ॥इतिश्रीतंत्रचिंतामणौमहाकालादिनित्यान्तक्रमनिर्णयनामात्रयोविंशतितमःप्रकाशः॥२३
अथोग्रतारैकजटानीलसरस्वतीनामैकनमक्रममाह॥ ॥आदौजलमधिष्ठायपादयोःक्षालनंमतं॥शिरश्चस्पृशिखी
बध्वाब्रह्मग्रंथिंप्रकल्पयेत्॥अर्घ्यंद्वारिपरिस्कृत्यद्वारमभ्युक्ष्यतज्जलैः॥गणेशवटुकक्षेत्रपालंश्चयोगिनींतथा॥पूजयि
त्वागृहेगत्वाब्रह्माणंवास्त्वीशंयजेत्॥प्राणायामंतेननैऋत्यांसाधकोत्तमः॥विशोध्यवाचंविघ्नंचभूमिंसम्यग्विशोधयेत्
विघ्नानुत्सारयितुकुर्याद्भ्यभिमंत्रणं॥आसनेमंडलंकृत्वातत्समर्च्यारुहेत्सुधीः॥यंत्रंलिखित्वाधिष्ठाप्यपुष्पेशोधन
माचरेत्॥मत्वासनेसमासाद्यमायांपूर्वदलेलिखेत्॥ ॥अथैषांक्रमेणमंत्राणाह॥प्रणवोवह्निजायांतोमनुरंततः
परिग्रहे॥तारोवज्रोदकेहुंफट्स्वाहाजलमधिष्ठितं॥तारलज्जाविभुक्षांतेसर्वपापानिचैवहि॥समयांतेअशेषांतेविक
ल्पदस्तुवरेत्॥अपनयांतेवुस्मीफट्स्वाहापादभ्युक्षयेत्॥आमायावह्निजायाचस्मृतआचमनेमनुः॥प्रणवंमणिधरि
णीतिवज्रिणीसर्वशस्ततः॥वशंकरीतिहुंफट्स्वाहेतिबंधयेत्शिखां॥तारंमुनिपदंचैवधरणंतेचवज्रिणी॥महाप्रतिस

रक्षद्वन्द्वांतेमांततंचहूं॥ फट्स्वाहामनुनानेनरक्षाग्रंथिंचकारयेत्॥ फडन्तमुख्यहृदापूज्यनारेणदत्तामंत्रयेत्॥ फट्कारैःप्रोक्ष
येद्द्वारंगंधपुष्पैःप्रपूजयेत्॥ द्वारोर्ध्वेगांगणेशंचवामेलांवटुकंतथा॥ दक्षिणेशंक्षेत्रपालमधोयांयोगिनीयजेत्॥ अथैषां
मंत्रविशेषंच॥ सर्वेतेङवदीर्घाद्याशक्तिबीजंपुरःसराः॥ चतुर्थ्यंतानमोंताचनामाद्यबीजसंयुताः॥ भूमिशुद्धिंनवार्णेन
ततःकुर्वीतसाधकः॥ ॐरक्षरक्षहूंफट्स्वाहामंत्रोनवाक्षरः॥ त्रयोदशार्णकोमंत्रःविघ्नानुत्सारयेत्ततः॥ ॐदारयदार
यहुंफट्स्वाहाविघ्नवारणं॥ ॥ॐसर्वविघ्नानुत्सारयहूंफट्वह्निरोहिनी॥ त्रयोदशार्णकोमंत्रःपार्ष्णिघातेनविघ्नहा॥ प्रा
वंपूर्ववद्धृत्वाअःकारंतदनंतरं॥ हूंफट्स्वाहामनुःप्रोक्तःकायवाक्चित्तशोधने॥ ततस्तुदेव्यापूजार्थंमंत्रयेत्कांस्यपीध्रुवम्
पवित्रवज्रभूमेहूंस्वाहामंत्रोनवाक्षरः॥ भूमौत्रिकोणमालिख्याधारशक्तिप्रपूजनं॥ मायाबीजंसमुच्चार्यआधारशक्त्येनत
कमलासनमालिख्यङेनमोंतेचपूजयेत्॥ अःकारांतेखरेखंचवज्ररेखेततःपरं॥ हूंफट्स्वाहेतिकुर्यात्तुमण्डलंचसवासने
तत्रमत्रासनंदेविपीठमंत्रेणपूजयेत्॥ ~~यथाशताभिरेवेतिसमाग्निमेवपदंवदेत्~~॥ ॐऐंक्लींकामपीठायहृदयांतोयमीरितः॥
तत्रबध्वासनंवीरंआत्मानंशोधयेत्ततः॥ चतुर्दशार्णमनुनाकुसुमानिसुसाधयेत्॥ यथाशताभिरेवेतिसमाग्निमेवदंवदेत्॥
तारादिहूंफट्स्वाहांतोमनुक्तोमनुवर्णकः॥ इणमावदपदंज्ञेयंपुष्पशोधनकंबुधः॥ अथातःसंप्रवक्ष्यामिभूतशुद्धिंविशेषतः

ह्रींवीजंतुजवापुष्पनिभंनाभौविचिंतयेत्॥ तदुत्थेनाग्निनादेहंदहेत्सार्द्धंस्वपाप्मना॥ स्त्रींवीजंतुशुभ्रवर्णाभंचिंतयेद्धृदिमंत्रवित्॥ पवनेनतदुत्थेनपापभस्मक्षिपेद्भुवि॥ हूंवीजंइन्दुकुंदाभंभालेध्यायेद्विभास्वरं॥ तदुत्थसुधयादेहंरचयेत्देवतानिभं अनयाभूतशुद्ध्यातुदेवीसादृश्यमाप्नुयात्॥ ॥अथास्याध्यानं॥ भूतशुद्धिंविधायेत्थंशून्यंविश्वंविभावयेत्॥ निर्लेपंनिर्मलंसूक्ष्ममात्मानंदेवतामयं॥ अंतरीक्षेततोध्यायेदाःकाराद्रक्तपंकजं॥ भूयस्तस्योपरिध्यायेठांकारात्शुक्लपंकजं॥ तस्योपरिततोध्यायेत्हुंकारंनीलनिभं॥ तस्योपरिततोध्यायेत्कर्तृकांबीजभूषितां॥ तस्योपरिमहादेवींखर्वींनीलघनप्रभां॥ लंबोदरींव्याघ्रचर्मसमावृतनितंबिनीं॥ पीनोन्नतपयोभारांरक्तवर्त्तुललोचनां॥ पिंगोग्रैकजटांनीलनागयज्ञविभूषितां॥ नीलोत्पललसन्मौलिवद्धजूटांभयंकरीं॥ श्वेतास्थिपट्टिकायुक्तकपालपंचशोभितां॥ ललाटेरक्तनागेनकृतकर्णावतंसिनीं॥ अतिशुभ्रमहानागकृतहारमहोज्ज्वलां॥ दूर्वादलश्यामनागकृतयज्ञोपवीतिनीं॥ चतुर्भुजांरक्तमांसखंडमंडितमुष्टिना जटाजूटेनसत्वेणाशोभिनीतीक्ष्णधारया॥ खड्गेनदक्षिणस्योर्द्ध्वशोभिनीवीरनादिनीं॥ तदधस्तात्वीजरूपकर्त्तृकालंकृतीपरा॥ वामोर्द्ध्वेरक्तनालेनविकस्वरमनोहरं॥ दधतींनीलपद्मंवतदधस्तात्कपालकं॥ जगतांजाड्यसंयुक्तंदधतीकुंडसंनिभम्॥ धूम्राभनागसंदोहकृतकेयूरसद्भुजां॥ सुवर्णावर्णनागेनकंकणोज्ज्वलपाणिकां॥ शुभ्रवर्णमहादेवशवहृदिसमासनां॥ निर्वाण

भियानवत्ससंकोचप्रसरं चलां॥ शवपादहृद्यारूढवामपादहतन्मुखी॥ कंदाभनागसंशोभिकटिसूत्रं त्रिलोवलोचनी॥ र्यषट्केन भागेन कृतनूपुरपल्लवां॥ सद्यछिन्नगलद्रक्तनृमुंडैरात्तभूषणोः॥ अस्थ्यानेकशतग्रथितैः पादपद्मप्रलंवितैः॥ पंचाशद्भिर्महामालाशोभिनीपरमेश्वरीं॥ ज्वलच्चितामध्यगतां॥ द्वीपिचर्मांबरीं शुभां॥ लाक्षाभनागसंवद्धजटाजूटां वरप्रदां॥ सावेशस्मेरवदनां ललजिह्वां वरप्रदां॥ एवं ध्यात्वा पंडितोहं भावयेत्स महाकविः॥ अथ ध्यानरहस्यमाह॥ वश्यार्थं नीलवर्णाभा माहृष्टेपीनरूपिणी॥ मारणोच्चाटनेषु श्यां कृष्णानुतदपेक्षया॥ चिंतयेत्परमेशानीं ध्यात्वाएतत्कृतार्चनां॥ ॥अथ मंत्राचमनमंत्रमाह॥ भूतशुद्धिं पुराकृत्वादिवमाचमनंचरेत्॥ ताराभेदैस्त्रिभिः पीत्वा मायया क्षालयेत्करं॥ ह्रीं क्रूं श्रीं स्त्रीं हिरस्त्रज्यफट्कारैः क्षालयेत्करं॥ आस्यनासेक्षणश्रोत्रनाभिवक्षः शिरोभुजान्॥ वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते॥ आचम्य भैरवो भूत्वा वत्सरात्रां प्रपश्यति॥ ॥अथ भूतशुद्धेरनंतरं क्रममाह॥ भूतशुद्धिं विधायेत्थं मर्घ्यादस्थापनंचरेत्॥ प्राणायामं ततः कुर्यादृष्यादिन्यासमाचरेत्॥ न्यासौकरांगयोः कुर्यादात्मानं तारिणीं स्मरेत्॥ ॥अथ सामान्यार्घ्यस्थापनमाह॥ ततश्चाचमनं कृत्वा सामान्यार्घ्यं प्रकल्पयेत्॥ त्रिकोणवृत्तभूविंवमंडलं रचयेत्ततः॥ साधारशक्तिं संपूज्य तत्राधारं विनिक्षिपेत्॥ अस्त्रेण पात्रं संशोध्य हृन्मंत्रेण प्रपूरयेत्॥ निक्षिपेत्तीर्थमावाह्य गंधादीन्प्रणवेन च॥ दर्शयेद्धेनुमुद्रां वै सामान्यार्घ्यं क्रियामता॥ न्यासं प्रवर्त्तते देविषोढा

न्यासमउरःस्मरं॥ ॥अथान्यासमहाषोढमाह॥ तारषोढं प्रवक्ष्यामि सर्वतंत्रे सुगोपितं॥ सर्वविघ्नोपशमनी सर्वपापविनाशि
नी॥ महारिष्टशमनी सर्वसम्पत्प्रदायिनी॥ सर्वकामप्रदा नित्यं सर्वसाम्राज्यदायिनी॥ शिष्याय भक्तियुक्ताय विनीताय
महात्मने॥ वदान्याय कुलीनाय शुश्रूषाचाररताय च॥ एवंविधाय देवेशि साधकाय प्रकाशयेत्॥ अन्यथा सिद्धिहानिः स्यादी
त्याज्ञा शंभुना कृता॥ ॥तथा च॥ न्यासं षट्कं ततः कुर्यात्तारायाः सर्वसिद्धिदं॥ ॥तत्रादौ प्रथमो न्यासः श्रीकण्ठादिपुरोदि
तः॥ मातृकाक्षरमुच्चार्य ह्रीं स्त्रीं हूं पूर्वकं वदेत्॥ श्रीकण्ठादिसपत्नीकं नमोंतं मातृकास्थले॥ विन्यसेच्च चतुर्थ्यंतं न्यासोऽयं प्रथ
मः स्मृतः॥ अस्मिन्न्यासे क्रीयमाणो देवीमेवंविधां स्मरेत्॥ शवपीठसमासीनां नीलकांतिं त्रिलोचनां॥ अर्द्धेन्दुशेखरां नानाभूष
णाढ्यां चतुर्भुजां॥ द्वितीयं तु ग्रहन्यासं कुर्यात्तं समनुस्मरेत्॥ त्रिबीजपूर्वकं चाये ग्रहन्यासः समीरितः॥ स्वरादिकं रविं रक्तं हृदि
यवर्गपूर्वकम्॥ सोमं श्वेतं भ्रुवोर्न्यस्य कवर्गाद्यं च मंगलं॥ रक्तं नेत्रत्रये न्यस्य चवर्गाद्यं च वक्षसि॥ बुधं श्यामं न्यसेत्पीतं टवर्गाद्यं
गले गुरुं॥ तवर्गाद्यं श्वेतवर्णं धरिकायां तु भार्गवं॥ नीलवर्णं पवर्गाद्यं नाभिदेशे शनैश्चरं॥ शवर्गाद्यं धूम्रवर्णं ध्यात्वा राहुं न्यसे
न्मुखे॥ लक्षाद्यं धूम्रवर्णाभं केतुं नाभौ पुनर्न्यसेत्॥ न्यासं तृतीयं वक्ष्यामि बीजं त्रितयपूर्वकं॥ समानवर्णानुच्चार्य प्राग्दिगाद्यन
मोऽस्तु ते॥ नसिसंध्यक्षराद्युक्ताश्चाग्नेय्यामग्नये नमः॥ दक्षिणे यमाय नमः कवर्गाद्यं ललाटके॥ चवर्गाद्यं वनैऋत्यां नैऋताय न

मोमुखे॥ टवर्गाद्यं गले पश्चाद्वरुणाय नमोस्तु ते॥ न्यसेद्धृदि तवर्गाद्यं वायव्यां वायवे नमः॥ पवर्गाद्यं कुवेराय नमोन्तं दक्षिणे करे॥ वामहस्ते यवर्गादीशाने रुद्राय हृग्रवेत्॥ शवर्गाद्यं कामाय नमो नाभौ च विन्यसेत्॥ क्लूं रक्षाघपधिये हृत्पादयोः शिते विन्यसेत्॥ शिवशक्त्यभिधो न्यासश्चतुर्थः कथ्यतेऽधुना॥ क्लीं स्त्रीं क्लूं पूर्वकः कार्य्यः षडियाघहरः परः॥ ब्रह्माणं डाकिनीयुक्तं वादिसान्तार्णपूर्वकं॥ मूलाधारे प्रविन्यस्य चतुर्दलसमन्वितं॥ श्रीविष्णुं शाकिनीयुक्तं वादिलान्तार्णपूर्वकं॥ स्वाधिष्ठानाभिधे चक्रे लिंगस्थे षट्दले न्यसेत्॥ रुद्रं तु लाकिनीयुक्तं डादिफान्तार्णपूर्वकं॥ चक्रे दशदले न्यस्य नाभिस्थे मणिपूरके॥ ईश्वरं कादिवान्तार्णपूर्वकं काकिनीयुतं॥ विन्यसेद्द्वादशदले हृदयस्थे त्वनाहते॥ सदाशिवं शाकिनीं च षोडशस्वरपूर्वकं॥ कण्ठस्थे षोडशदले विशुद्धाख्ये प्रविन्यसेत्॥ आज्ञाचक्रे परशिवं हाकिनीसंयुतं न्यसेत्॥ हसार्णपूर्वं भ्रूमध्ये संस्थितेतिमनोहरे॥ वक्ष्येथ पंचसंन्यासं समस्तारिष्टनाशनं॥ अं आं कवर्गं क्लीं स्त्रीं क्लूं नारायेनमउच्चरेत्॥ विन्यसेत्तु स्मरं मूर्ध्नि इं ईं चापि चवर्गकं॥ क्लीं स्त्रीं क्लूं नमउयाये ललाटे चापि विन्यसेत्॥ एं ऐं पवर्गं क्लीं स्त्रीं क्लूं स्मरस्यैव नाभिगां॥ ओं औं यवर्गं क्लीं स्त्रीं क्लूं वासुश्चार्य्यं वलिंगके॥ अं अः लक्षौ च क्लीं स्त्रीं क्लूं चामुण्डायै नमो न्यसेत्॥ मूलाधारे न्यसेत्पश्चात्षोढान्यासं समाचरेत्॥ ॥ आधारे कामरूपाख्यं वीजं ह्रस्वार्णपूर्वकम् हृदि जालंधरं पीठं दीर्घपूर्वं प्रविन्यसेत्॥ ललाटे पूर्णगिर्य्याख्यं कवर्गाद्यं न्यसेत्सुधीः॥ उड्डीयानं चवर्गाद्यं केशसंधौ प्रविन्यसेत्

मुवोर्वाराणसीपीठं टवर्गाद्यं समाहितं ॥ टवर्गपूर्वकान्स्पदवनीनयनद्वये । यवर्गपूर्वकं मायापुरीपीठं मुखे न्यसेत् । कंठेतु
मथुरापीठं यवर्गाद्यं प्रविन्यसेत् । नाभावयोध्यापीठं तु शवर्गाद्यं प्रविन्यसेत् ॥ कंठे कांचीपुरीपीठं दशमं तु प्रविन्यसेत् । योऽ
न्यासस्तारायाः प्रोक्तोभीष्टप्रदायकं ॥ ॥ अथ मंत्रषोढा ॥ मंत्रेणांतरितां कृत्वा षड्वारं मातृकां न्यसेत् । क्रमोत्क्रमा
द्वारोहे तारा षोढा प्रकीर्तिता ॥ कृतेस्मिन्न्यासवर्ये तु सर्वपापं विनश्यति । योगिनीनां भवेन्मुख्यः स देवो नतु मानुषः ॥ ये
न मंति महेशानि षोढाप्रदितविग्रहाः ॥ अल्पायुः स भवेत्सद्यो देवताकंपते भयात् । न तस्य पूज्यो लोकेस्मिन् पितृमातृमुखोज्ज
नः ॥ अथ गुह्यषोढामाह ॥ न प्रकाश्यमिदं क्वापि मंत्रिणाः कायरक्षणं । प्रणवं मातृकावर्णपुटितं मातृकास्थले । तेनैव पुटितं
वर्णान्न्यसेत्तत्रैव पार्वति । मायाबीजं तथादेवि विन्यसेच्च प्रयत्नतः । वधूबीजं तथादेवि विन्यसेत्तु समाहितं ॥ कूर्चबीजं तथादेः
विन्यसनीयमशेषतः ॥ अस्त्रं चैव तथा न्यस्त्वा सकलं तदनंतरं । गुह्यषोढा ह्ययं देवि न प्रकाश्या कदाचन । अवश्यं प्रत्यहं कार्यं
न पूजा न जपस्तथा ॥ ॥ अथास्याः सामान्यषोढा तु रूपा मा प्रकरणे प्रोक्ता ॥ ॥ ताराविद्याविधौ देवि कार्या षोढा चतुष्टयी ।
अथ तारकान्यासः ॥ अकारादिक्रमतो न्यस्येद्रोहिण्यादिक्रमेण तु । एतत्क्रमेण चचत्वारिंशच्छोषणा योजयेत् । रोहिण्यादिम
हान्यासं कृत्वा नरवरः सुधीः ॥ रोहिणीसुतवत्पृथ्व्यामशोच्यो भवति ध्रुवम् ॥ अकृत्वा तारकान्यासं तारिणीं प्रयजेद्यदि । ज्ञानल

क्षपुजनेपिनमेतुसिद्धिदायकः॥ ॥अथऋष्यादिन्यासः॥ अक्षोभ्यऋषिरेतस्या बृहती छंद ईरितं॥ नीलसरस्वती देवी त्रिषु लोकेषु गोपिता॥ ह्रूंबीजमस्त्रशक्तिस्यान्मायास्त्रीकीलकंस्मृतं॥ विनियोज्योभवेद्देवि चतुर्वर्गफलाप्तये॥ ॥अथकरांगन्यासः तत्रादौ सार्द्धयंत्राक्षरीविद्यायाः॥ षड्दीर्घमायाबीजेन षडंगविधिरीरितः॥ ॥अथषडक्षरीत्र्यक्षरीविद्ययोः॥ अखिलवाग्रूपिणीप्रोच्य हृदयायनमोवदेत्॥ अस्त्वंतुवाग्रूपिणीच शिरसेवह्निवल्लभा॥ पुस्तवाग्रूपिणीमुक्ता शिखायैवषडित्यपि॥ विस्तुवाग्रूपिणीमुक्ता कवचाय हुमुच्चरेत्॥ रुद्रवाग्रूपिणीनेत्रत्रयाय वौषडित्यपि॥ सर्ववाग्रूपिणीमुक्ता अस्त्राय फडितिस्मरेत्॥ षड्दीर्घमायया बीजं बीजांतेतानियोजयेत्॥ ॥अथसार्द्धविद्याक्षरीविद्याः॥ बीजांते एकजटायै हृदयं परिकीर्त्तितं॥ तारिण्यै शिरसे ततत्ववज्रोदके शिखातथा॥ उग्रजटेचकवचं महापरिसरेतथा॥ पिंगोग्रैकजटे तद्वन्नेत्रास्त्रे परिकीर्त्तिते॥ ॥अथव्यापकन्यासः॥ मूलेन व्यापकन्यासं नवधा कारयेत्प्रिये॥ सप्तधा पंचधा वापि ततोन्यूनं न कारयेत्॥ अत्रोक्तमाचरेद्यत्र नान्यं संचारयेद्बुधः॥ अथयंत्रलिखनमाह॥ ततः कुंकुमसिंदूरैः कार्यं यंत्रंतु योगिना॥ सौवर्णे राजते ताम्रे स्फाटिके वैवैडुमे तथा॥ चक्रे यथोक्तविधिना पूज्या देवी नरोत्तमैः॥ ॥बिंदुत्रिकोणाष्टदलं भूपुरं वज्रचिह्नितं॥ यंत्रमेतन्महेशानि रहस्यातिरहस्यकं॥ ॥बिंदुषट्कोणवृत्तंच वसुपत्रं गृहभूषितं॥ यंत्रं प्रोक्तं महेशानि भूपुरद्वयपुण्यकं॥ ॥बिंदुत्रिकोणषट्कोणवृत्तत्रयमनंतरं॥ चतुरस्त्रंततोवृत्तंदलाष्ट

कं ततो परि । वृत्तत्रयं समालिख्य भूपुरत्रयकं ततः ॥ त्रिशूलटंकितं यंत्रं श्रीमहातारिणीमनोः ॥ विन्दुत्रिकोणषट्कोणं वृत्ता
ष्टदलभूषितं ॥ षोडशारं दंतपत्रं चतुःषष्टिदलं तथा ॥ भूपुरत्रयसंयुक्तं यंत्रं श्रीतारिणीनमः ॥ ॥ अथ सवीजयंत्रा
माह । ततः कुलरसेनैव पीठं निर्माय यत्नतः ॥ ॐ आः सुरेखे वज्ररेखे हूं फट् वह्निवल्लभा । मंत्रेणानेन विलिखेत्तारायंत्रं
मनोहरं ॥ षट्कोणांतर्गतं पद्मं भूविम्बद्वितयं पुनः ॥ तन्मध्ये विलिखेन्मंत्री ताराप्रणवमेव हि ॥ ॥ अथवा ॥ षट्को
णांतर्गतं पद्मं भूविम्बद्वितयं पुनः ॥ मायापूर्वदले वै द्वितीयं दक्षिणे लिखेत् ॥ अथोत्तरे पश्चिमे च हूं फट् तारं च मध्यतः ॥
सयोनिं गोमयेनाष्टपत्रमत्रं सुशोभनं ॥ भूपुरं वसुवज्राढ्यं यंत्रमेकजटात्मकं ॥ मायां पूर्वदले न्यस्य जाप्यवीजं द्वितीयकं
तथोत्तरे पश्चिमे च षट्कोणे विलिखेत्ततः ॥ मध्ये वीजं लिखित्वा तु भूतशुद्धिं समाचरेत् ॥ अत्रास्त्रवीजलिखने मतभेदास्ति
कुलेश्वरमते प्रोक्तं फोत्तरे पश्चिमे तु ट ॥ फ पश्चिमे टोत्तरे च विकरालमते स्मृतं ॥ व्योमवैरसनार्णकर्णिकमचांद्वेः स्फुरत्
केसरं वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितं ॥ ताराधीश्वरवारिवर्णविलसद्दिक्कोणसंशोभितं यंत्रं नीलतनोः परं नि
गदितं सर्वार्थसिद्धिप्रदं ॥ ॥ अस्नुस्यकुसुमैः कुर्याछुभ्ये विपूवि निर्दिशेत् ॥ अस्त्वः साक्षिभयंभ्येतो भगवान् मदनोदकः
ताभिषेकं तथा चोक्त्वा भगुः कालीमरुस्प्रिये ॥ कूर्चास्त्रं वह्निभार्यैति यंत्रे पुष्पांजलिं क्षिपेत् ॥ ॥ अथ पीठपूजामाह ॥ महाग्र

हचक्षुर्दिक्षु गणेशं वटुकं तथा ॥ क्षेत्रपालं योगिनीं च ध्यात्वा सम्यक् प्रपूजयेत् ॥ पाशांकुशौ त्रिशूलं च कपालं दधतं करैः ॥ स्थूलकायं च योपेतं गणेशं प्राक् समर्चयेत् ॥ ॥ कपालशूले हस्ताभ्यां दधतं सर्पभूषणं ॥ स्वपथवेष्टितं रम्यं वटुकं दक्षिणे र्चयेत् ॥ डमरुं वसि त्रिशूलांश्च कपालं दधतं करैः ॥ कृष्णं दिगंवरं क्रूरं क्षेत्रपं पश्चिमे यजेत् ॥ ॥ डमरुं पाशलिंगे च कपालं दधती करैः ॥ रक्तमाल्यां रक्तवस्त्रां योगिनीमुत्तरे यजेत् ॥ श्मशानं तत्र संचिंत्य तत्र कल्पद्रुमं स्मरेत् ॥ तन्मूले मणिपीठं च नानामणिविभूषितं ॥ नानालंकारभूषाढ्यमुनिदेवैश्च भूषितं ॥ शिवाभिर्दंड्रमांसास्थिमोदमानाभिरंततः ॥ चतुर्दिक्षु शवान् मुण्डान् चिताङ्गारास्थिभूषितान् ॥ ॥ पीठशक्तिरथाभ्यर्च्या केशरेषु समन्तत ॥ वरदाभयधारिण्यः पीठपीठं तु नायजेत् ॥ ॥ तद्यथा ॥ लक्ष्मी सरस्वती चैव रतिः प्रीतिस्तथैव च ॥ कीर्त्तिः शांतिश्च पुष्टिश्च तुष्टिरित्यष्टशक्तयः ॥ तन्मध्ये पूजयेद्देव्यावाहनं शवमेव च ॥ ॥ अथ पीठमंत्रमाह ॥ वियदंगं समुच्चार्य्य मनुबिंदुकलान्वितं ॥ महाप्रेतपदं पश्चाद्दद्यात्तमयं मनुः ॥ ॥ अथार्घ्यस्थापनं ॥ भूमिं पूर्वोक्तमंत्रेण मण्डलं स्य तु मण्डलं ॥ कुर्याद्वृत्तं त्रिकोणं च भूपुरं तस्य वाह्यत कुर्यात्तत्राधारशक्तिं कूर्मं शेषं च संयजेत् ॥ आधारं स्थापयेत्तत्र ॐ ह्रीं फडिति मंत्रतः ॥ आधारं पूजयेत्तत्र यं वह्निमंडलाय च ॥ नमोंतेन नवार्णेन ततो नरकपालकं ॥ हूं फट् मंत्रेण संक्षाल्य स्त्रीबीजेन निवेशयेत् ॥ ततोर्चयेन्नृकपालं जप

न्मनुचतुष्टयं ॥ ॥ कालीकपालायनमो क्रौं क्रौं क्रूं पूर्वकं वदेत् ॥ एकादशाक्षरो मंत्रोऽनेन पूजादिमा मता ॥ स्त्रौं स्त्रौं स्त्रूं
तारिणीस्तुम्लाकपालायनमोंतिकः ॥ द्वादशार्णोनेन भवेत्कपालार्चाद्वितीयका ॥ ॥ ह्रीं ह्रीं ह्रूं फ्रो ध्वनीलाकपालाय
नमइत्ययं ॥ एकादशार्णोनेनोक्ता कपार्चा तृतीयका ॥ ॥ मायो स्त्रीं ह्रूं स्वर्गकपालाय सर्वापदं वदेत् ॥ ततो धाराय स
र्वाय तथा सर्वोद्भवाय च ॥ सर्वशुद्धिमयायेति सर्वासुररुधीति च ॥ रारुणाय वषुभ्राय सुराभाजनायेति च ॥ देवीकपालाय नम
श्चतुर्थो मंत्र ईरितः ॥ षट्पंचाशत्कवर्णोयं कपालस्य तु पूजने ॥ ॥ ततस्तस्मिन् कपाले तु पूजयेदर्कमंडलं ॥ ॐ सूर्यस्य मंडल
येति नमोंतायेनवाक्षरः ॥ सूर्यमंडलपूजायां तु कपाले मनुरीरितः ॥ ॥ मूलमंत्रं पठंस्तस्मिन् सुधां तु प्रवरां क्षिपेत् ॥ गंध
पुष्पाक्षतां क्षिप्त्वा त्रिखंडाख्यां प्रदर्शयेत् ॥ ॥ अङ्गांस्तु करौ व्यस्ता वंगुष्ठौ कारयेत्समौ ॥ अनामीतर्गते कृत्वा तर्जन्यौ कुटिला
कृती ॥ कनिष्ठिके निजस्थाने त्रिखंडा कानकर्मणि ॥ ॥ ततस्तस्यां सुरायां तु पूजेदिंदुमंडलं ॥ एकादशार्णेन ततः शंखतोयं तु मं
त्रयेत् ॥ क्रीं श्रीं क्रौं ॐ स सुधार्घ्यं क्रौं स्त्रीं ह्रूं फट् समुच्चरेत् ॥ क्लौं ह्रः मितिवाग्बीजादि मंत्र एकादशाक्षरः ॥ ॥ क्रौं बीजेन ततो
मर्घं किंचिच्छंखां तु निक्षिपेत् ॥ शंखमुद्रां योनिमुद्रां शंखतोयाश्च दर्शयेत् ॥ तेत्र रक्ताष्टकोणां ध्यात्वा देवीं विचिंतयेत् ॥ पूर्वो
क्तां पूजयित्वैतां मूलेनाथ प्रतर्प्पयेत् ॥ तर्जनीमध्यमानामा कनिष्ठाभिर्महेश्वरि ॥ सांगुष्ठाभिश्चतुर्वारं महाशंखस्थिते जले ॥

पंचाक्षरात्मनापश्चात्तर्प्य आनंदभैरवं॥ तारो ऐं ह्सौ नम इति पंचार्णो भैरवो मनुः॥ ततस्तर्प्यतोयेन प्रोक्षेत्पूजनसाधनं॥ योनिमुद्रां प्रदर्श्याथ प्रणामेन्नवनारिणीं॥ ॥अथ पूजामाह॥ आवाहस्थापयित्वा तु ध्यात्वा मुद्रां प्रदर्शयेत्॥ मुद्राः प्रदर्श्य विविधउपचारैः प्रपूजयेत्॥ ॥अथ ध्यानं॥ प्रत्यालीढपदां घोरां मुण्डमालाविभूषितां॥ खर्वां लम्बोदरां भीमां व्याघ्रचर्मावृतांकटौ॥ नवयौवनसम्पन्नां पंचमुद्राविभूषितां॥ चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदां॥ खड्गकर्तृधरां सव्ये वामे मुंडोत्पलान्वितां पिंगाग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषितां॥ बालार्कमंडलाकारलोचनत्रयभूषितां॥ ज्वलत्पितृभूमध्यगतां दंष्ट्राकरालिनीं॥ सावेशस्मेरवदनां सर्वालंकारभूषितां॥ विश्वव्यापकतोयांतः श्वेतपद्मोपरिस्थितां॥ ॥अथ मुद्रामाह॥ तारायं चैवने विशेषेन दर्शयेत्पंचमुद्रिकां॥ योनिश्च भूतिनी चैव बीजाख्या दैत्यधूमिनी॥ लेलिहा चेति संशुक्ताः पंचमुद्राः प्रकीर्तिताः॥ योनिर्मेया धराधेनुर्वधुः कुर्वक्रमाद्विदुः॥ बीजान्यासां लक्षणं तु क्रमेणा कथयाम्यहं॥ ॥तर्जन्यनामके मध्ये कनिष्ठे च क्रमादपि करयोर्योजयेच्चैव कनिष्ठामूलभेदतः॥ अंगुष्ठाग्रे तु निःक्षिप्य महायोनिः प्रकीर्तिता॥ अधोमुखीमिमां [illegible] मुद्रां दर्शयेद्बीजमुद्रिकां॥१॥ पश्चात्तु योनिमुद्रां वै मध्यमे कुटिले कुरु॥ अंगुष्ठे ध्वजदग्रे तु मुंडेयं भूतिनी मता॥ २ ॥ परिवर्त्य करौ स्पृष्ट्वा वंशवत्तर्जनीयुगं॥ अर्द्धचंद्राकृतिन्यायं युगपत्कारयेत्समं॥ अधः कनिष्ठामाकृष्य मध्यमे विनियोजयेत्॥ मुंडेयाक

॥तंत्रवि॥
॥२०१॥

थितादेवी बीजाख्या ज्ञानरूपिणी २ ॥ परिवर्त्य करौ कृत्वा कनिष्ठाकृतमध्यमां ॥ अनामयोर्युगं चाधस्तर्ज्जनीयुगलं पृथक् ॥
अन्योन्यं विडंवयांगुष्ठाग्रेतु नामिके ॥ दत्वानांधमके त्वांगुष्ठा मुद्रेया कथिता प्रिये ॥ चक्रं विस्फारितं कृत्वाप्यधोनिकांच
चालयेत् ॥ पार्श्वस्थमुष्टियुगलं लेलिहानेति कीर्त्तिता ॥ ५ ॥ अथास्यापूजामंत्रमाह ॥ श्रीमदेकजटे मृक्का वज्रपुष्पं प्र
तीच्छ च ॥ तारादवह्निजायांतमुदीर्य्य जजनं चरेत् ॥ ॥ संतर्प्य पंचमुद्राभिर्नमस्कुर्याद्विलक्षितः ॥ पंचमुद्रा यथा ॥ संमु
खं चतुरस्रं च वृत्तं गोमुखमेव च ॥ योनिमुद्रेति कथिता मुद्रा पंचनमस्कृतौ ॥ ॥ अथासां लक्षणमाह ॥ अंजलिं भ्रूमौ संस्था
प्य तत्र दत्वा शिरः पुनः ॥ एषा मुद्रा महेशानि ख्याता संमुखसंज्ञका ॥ उत्तानं च वामकरं भूमौ कृत्वा महेश्वरि ॥ दक्षं करत
लं तत्र संयोज्य साधकोत्तमः ॥ करयोः रंगुलीभिश्च एकदेशं परस्परं ॥ स्पृष्ट्वा तत्र शिरोयोगान्मुद्रा स्याच्चतुरस्रका ॥
निधाय भूमावुत्तानांगुष्ठमुष्टिद्वयं शिवे ॥ तद्वियोगान्महेशानि ख्यातेयं वृत्तमुद्रिका ॥ भूमौ करयुगं देवि संपुटं विस्तृतांगु
लिं ॥ कृत्वा तत्र शिरोयोगान्मुद्रा गोमुखसंज्ञका ॥ पूर्वोक्ता योनिमुद्रा या सा भूमौ शिरसंयुता ॥ योनिमुद्रेति कथिता तारादेव्या
नमस्कृतौ ॥ ॥ अथास्या ऋद्धिभिरेवं यजेत् ॥ ॥ तथा च ॥ ततः संपूजयेद्देव्या मस्तके क्षोभ्यसंज्ञितं ॥ मुनिं तादृशवर्णीन्नमनुना
सनिगद्यते ॥ अक्षोभ्यवज्रपुष्पं च प्रतीच्छानलवल्लभा ॥ अथास्या पात्रमंत्रध्यानादिकमयेयाच्यं ॥ अथ संपूजयेत्कोणाषट्के देव्या

॥गुरुः॥
॥२०१॥

षडंगकं॥ अथदिव्योघाघागुरवः॥ अथतारागुरून्वक्ष्येदृष्टादृष्टफलप्रदा॥ ऊर्द्ध्वकेशोव्योमकेशोनीलकण्ठोवृषध्वजः॥ दिव्योघान्कथितान्वत्ससिद्धोघान्पूजयेत्ततः॥ वशिष्ठः कूर्मनाथश्चमीननाथोमहेश्वरः॥ हरिनाथश्चमानौघान्शृणुवक्ष्यामिसद्गुरून्॥ तारावतीभास्वमतीजयाविद्यामहोदरी॥ सुखानंदः परानंदः पारिजातः कुलेश्वरः॥ विरूपाक्षः फेरवीवक्रा।पिनंतारिणीकुलं॥ त्रिकोणमध्येदेव्यग्रेस्वगुरुंपूजयेद्बुधः॥ कामेश्वर्यादिकाः पूज्यास्त्रिकोणेवह्निमंडले॥ कामेश्वरीदिक्करवासिनीतथाववणनायिका॥ अथाधोमुखत्रिकोणे॥ ईडकोणलसद्दंडकुंडिकाक्षगुणाभयां॥ गायत्रींपूजयेन्मंत्रीब्रह्माणमपितादृशम्॥ रक्षःकोणेचक्रशंखगदापंकजधारिणी॥ सावित्रींपीतवसनांयजेद्विष्णुंचतादृशं॥ वायुकोणेचपर्शुक्षमालाभयवरान्वितां॥ यजेत्सरस्वतींमत्छांरुद्रंतादृशलक्षणं॥ इतिषट्कोणपक्षे॥ त्रिकोणपक्षेत्पनिषद्विशेषः॥ क्रमेणकोणत्रयेबीजत्रयेनब्राह्मीवैष्णवीमाहेश्वरीपूजयेदिति॥ अथास्थावरगार्चावामावर्त्तेणेव तथाच॥ वामावर्त्तक्रमेणैवपूजयेदंगदेवताः॥

अथपूर्वाद्यष्टदलमूलेमहाकाल्याद्याः पूज्याः॥ ततोष्टौयोगिनीर्वाऐसंपूज्यादलमूलतः॥ महाकाल्यथरुद्राणीउग्राभीमातथैवच॥ घोराचभ्रामरीचैवमहारात्रिश्चसप्तमी॥ भैरवीचाष्टमीप्रोक्तायोगिन्यस्ताःप्रपूजयेत्॥ ॥अथपूर्वादिदलवउष्टयेवैरोचनादिंतुपूजयेत्॥ वैरोचनंतथाशंखपाण्डुरंपद्मनाभकं॥ अमिताभंजयेन्मंत्रीऐंडीनश्चचतुर्दले॥ ॥अथा

ग्न्यादिदलचतुष्टयेनामकाद्याः इच्छाः ॥ विदिक्षु पूजयेत्पश्चादग्निकोणादितः क्रमात् ॥ नामकां मामकां चैव पाण्डुरां तारिकां
तथा ॥ ॥ अथ वैरोचनादीनां ध्यानमाह ॥ वैरोचनं द्विहस्तं च चयस्थितोमरधारिणं ॥ पीतं च षासनगतं त्रिनेत्रं रक्तवत्सलं
शंखं त्रिशिरसं देवमसितामं हि रत्नमयं ॥ पुस्तकाभीतिवरदं विमलं शशिवाहनं ॥ पद्मनाभं दंति वक्त्रं पुस्तकं वरदाभयं ।
पाशं च विध्रतं देवं त्रिनेत्रं वरदं शुभं ॥ ध्येतां त्रिनेत्रां वरदां पुस्तकाभयधारिणीं ॥ मामकां वज्रदेवेन संयुक्तेन विभाविनी
रूपमां करालवदनां नामकां नवयौवनां ॥ गोधिकायां समारूढां शिखिरूढां वगारकां ॥ पांडरां श्वेतवीजेन चतुर्वी क्र
समन्वितां ॥ रक्तलम्बोदरी ध्याये त्वं च प्रेतासनस्थितां ॥ ॥ अथ वैरोचनादिनरकान्तकानां पूजायां मंत्रविशेष
माह ॥ स्वादिप्रणवस्तु ख्याख्य नामाद्यबीजमुच्चरेत् ॥ संतुष्यंतं चनत्रामावज्ज्वव्यं प्रतीछ्व ॥ स्वाहान्तो मनुराख्यातो
वादशानामयं क्रमः ॥ ॥ अथ पूर्वाद्यष्टदलाग्रे शुभ्रालाद्यष्टमातरः पूजनीयाः ॥ दलाग्रे चमहेशानि ब्राह्म्या
दिपरिपूजयेत् ॥ ॥ अथ पूर्वादिद्वारचतुष्टये यमान्तकादीन्यजेत् ॥ द्वारे पूर्वादितः पश्चात्यमान्तकयमान्तकौ ॥
विघ्नान्तकं समभ्यर्च्य पूजयेन्नरकान्तकं ॥ ॥ अथ भूपुरस्य दशदिक्षु दिक्पालान् संपूज्य तद्बहिः पूनदस्त्राणि सम
भ्यर्च्य भूपुरपूर्वादिसिभूपुरपंकजयोरंतराले सूर्यं संपूज्य दक्षोत्तरभागे गुरुरूपं स्तुत्तरे वोडुयजेत् ॥ भूपुरं चैवत

कांश्चैवदशदिक्षुयथाक्रमं॥ शक्रादींश्चापिवज्रादीन्पूजयेच्चन्दनंमरं॥ भूविस्ताभ्येतरेस्यैगुरुपंक्तिंसुत्रेरततः॥ ऽग्रेपूजयेद्वै
ठंपुनर्देवींप्रपूजयेत्॥ पुष्पांजलित्रयंदद्याद्यथासंख्यंजपेद्बुधः॥ अथसर्वावरणसाधारणायजनमंत्रमाह॥ ॥ प्रणवंपूर्व
मुच्चार्यनामसंबोधनमोयुतं॥ ॥ वज्रपुष्पंप्रतीच्छेतिॐफट्स्वाहेतिमंत्रितः॥ एतन्मंत्रंनाममात्रंभिन्नमेवनसंशयः॥ अ
नेनमनुनासर्वान्परिवारान्समर्चयेत्॥ वैरोचनादिषुपुनर्नामाद्यक्षरपूर्वकः॥ ॥ अथबलिदानं॥ ततश्चनित्यपू
जान्तेस्वहृदयेबलिंहरेत्॥ वामभागेत्रिकोणंचवृत्तंभूपुरमेवच॥ विधायरक्तमाल्याद्यैरर्चयित्वायथाविधिः॥ श्रीमदेकज
टेनीलसरस्वतिमहोग्रेच॥ तारेवखिवखेसक्तासर्वभूतपिशाचरा॥ क्ष्मान्ग्रसग्रसममजाअंछेदयछेदय॥ श्रीं ह्रीं फट्
वह्निजायांतस्ताम्मायादिकोमनुः॥ भवेद्द्विपंचाशदर्णापूजैवंपूर्णतामियात्॥ ॥ अथजपमाह॥ तत्रादौभैरवस्यततःकु
ल्लुकायाततःस्वेष्टदेवतायाश्च॥ अक्षोभ्यस्यमनुंत्यक्त्वादेवींतारांजपेद्यदि॥ सिद्धिहानिर्भवेत्तस्यरौरवंनरकंव्रजेत्॥ अ
क्षोभ्यस्यमनुंविप्रकवचंसारमुत्तमं॥ अतिगुह्यंमहाध्यानंसर्वध्यानेषुचोत्तमं॥ अग्रेमनुंप्रवक्ष्यामिध्यानंचैवततःपरं॥
कवचंचततःपश्चात्कथयामिक्रमेणतु॥ ॥ अनुत्तरंसमुद्धृत्यपपंचमविभूषितं॥ अक्षोभ्यतिचस्वाहेतिरमाद्यंतंम
हामनुं॥ स्वयंऋषिश्चसंप्रोक्तोविराट्छंदउदीरितः॥ अक्षोभ्योदेवताप्रोक्तास्त्रिमूर्तिर्नागरूपधृक्॥ विनियोगस्तुनियतं

पुरुषार्थचतुष्टये॥ ॥अथध्यानंप्रवक्ष्यामि सर्वसौभाग्यदायकं। सहस्रादित्यसंकाशं नागरूपधरंप्रभुं॥ विद्युत्कोटि
समंवक्त्रं वह्निभास्वरलोचनं॥ सार्द्धत्रिवलयोपेतं जटाकोटाग्रसंस्थितं॥ महालावण्यसंयुक्तं सुरासुरनमस्कृतं॥ सूर्यवि
द्युत्समंभास्वन्महामणिंशिरोपरि॥ एतद्रूपंमहाकायंदेवैरपिप्रपूजितं॥ ॥शिवउवाच॥ अक्षोभ्यकवचस्यास्य ब्रह्मवि
ष्णुकरुद्रकाः॥ ऋषयश्चसमाख्याता विराट्छंद उदाहृतः॥ अक्षोभ्यदेवतावेवश्रीवीजंवीजमेवच॥ स्वाहाशक्तिर्विनियो
गःपुरुषार्थचतुष्टये॥ ॥श्रीवीजंशिरसेअव्यादादिवीजंचभालके॥ अकारःस्कंधमेअव्यात्क्षकारोहृदिरक्षतु॥ भका
रोनाभिमेअव्याघकारोगुह्यदेशके॥ मंत्रशक्तिश्चसर्वांगंवीजंनेत्रद्वयेवतु॥ सर्वधावेश्मअक्षोभ्योवाकुवैरक्षयेत्सदा॥
ब्रह्मारक्षतुपादौमे विष्णुरक्षतुजानुनी॥ मूलाधारंशिवोमेव्यात्स्वाधिष्ठानंचयोवतु॥ मणिपुरेसदाअव्यात्शिवस्यगृहिणी
वमे॥ अनाहतंवुजंमेयादिंद्रादिदशदेवताः॥ विशुद्धचक्रंसततंरक्षांकरोतुमेरविः॥ महेश्वरःसदाअव्येदाज्ञाचक्रंशुभोमनं
ब्रह्मस्थकंचमेरक्षेन्नाभिंरक्षतुभैरवि॥ दिग्यादोगुरुपंक्तौचसर्वत्राक्षोभ्यउच्यते॥ एवंक्रमविधानेनकवचंचजपेत्सुधिः॥ त्रिसं
ध्यंयःपठेन्नित्यंश्रद्धाभक्तिसमन्वितः॥ सिद्धहानिर्भवेन्नस्यनात्रकार्याविचारणा॥ ॥अथकुरुकुल्लायानित्यभावस्यक
तामाह॥ अजस्राकुरुकुल्लमंत्रमस्मृत्वाश्रीपतिंहरिं॥ योजपेत्तारिणींमंत्रंनरकेसनिलीयते॥ जपित्वाकुरुकुल्लमंत्रमष्टोत्तरश

तंसुधीः॥प्रजपेत्तारिणींपश्चात्तान्यथाशुद्धिमाप्नुयात्॥धृत्वातुकुस्तुकांहस्तेमहादेवींसमर्च्चयेत्॥अथवामूर्द्ध्निविन्यस्य·
पूजयेत्प्रजपेद्यदि॥ ॥अथनित्यजपसंख्यामाह॥अष्टोत्तरसहस्रंवाअष्टोत्तरशतंचवा॥रहस्यमालयामंत्रीजपेन्नि
त्यमनन्यधीः॥ ॥तथाच॥सहस्रंशतंविंशतिर्वाजपेद्रहस्यमालयेतिश्रुतौ॥रहस्यमालयाजप्तातारिणीसिद्धिदाभवेत्
अतस्तयाप्रजप्तव्या॥मालयासिद्धिमिच्छता॥महाशंखमयीमालापंचाशन्मणिनिर्मिता॥रहस्यमालासंप्रोक्तागोपनीया
प्रयत्नतः॥नललाटास्थिखंडेनरविनाजपमालिकां॥महाशंखमयीज्ञेयातदभावेस्फाटिकीमता॥ ॥अथमंत्रध्यानम्
मंत्रध्यानंप्रवक्ष्यामिजपात्सर्वार्थसाधकं॥मंत्रध्यानान्महेशानिसिध्यतेब्रह्मरूपतः॥मूलचक्रेचल्लेखासूर्यकोटिस
समप्रभां॥स्वाधिष्ठानेपीतवर्णंद्वितीयंचविभावयेत्॥नाभौजीमूतसंकाशंकूर्चबीजंमहाप्रभं॥अस्त्रमंत्रंहृदिध्यायेत्का
लाग्निसदृशप्रभं॥मूलादिब्रह्मरंध्रांतंसर्वविद्यांविभावयेत्॥सूर्यकोटिप्रतीकाशांयोगिभिर्दपर्विकां॥जिह्वायांस्वमनादे
वमूकोपिसुकविर्भवेत्॥इत्थंजपंसमर्प्याथघंटावादनपूर्विकां॥स्तुत्वातांस्तुतिभिःसम्यक्साधकोभक्तिसंयुतः॥
अथस्तोत्रंयथा॥स्वयंलीलयायापरंविस्मुमर्न्नैर्वभोचेत्रवेवंकथंवंडचउः॥तदंघ्रिप्रपातोसतांसुप्रवाहोजगत्त्रितयबीजं
भजेतांत्रिनेत्रां॥परायानचेत्स्तूतस्त्रासीत्स्वपंसत्ववक्त्रारविंदप्रुतेर्नेत्रभंग्या॥स्मरारेर्वरूश्रीहिनाकृच्छुनात्रिजगत्त्रितयबीजं

भजेत्तांत्रिनेत्रां॥ लमत्वादहस्तोननाम्नेधुयस्यामध्नीछुरीशोनपश्चास्यकोभूत्॥ अतस्तेनलम्ब्यामसत्तानत्वसेत्ताजगत्त्रिय
वीजंभजेत्तांत्रिनेत्रां॥ यदीयंरसंसंतिपीयेश्वरेणास्मरीयेगुरेवामृतेत्वंदत्तादे॥ घृणांकिंचिनन्याशितःकालकूटोजगत्त्रि
त्ववीजंभजेत्तांत्रिनेत्रां॥ विधात्तायदायानवास्तेस्वयंसःस्वयंभूःकथंस्यान्नदातोनितन्तां॥ नुताराभिधेयोनजातःकलोकेज
गत्त्रित्ववीजंभजेत्तांत्रिनेत्रां॥ जगत्त्वक्षुमस्मैचतुर्भिःस्वहस्तैर्ददौयावचवक्रैर्नुवेदाननोभूत्॥ अतःसन्तिवर्णायुगादीनिवेदाज्ज
गत्त्रित्ववीजंभजेत्तांत्रिनेत्रां॥ अतःपंचवीजैरभूत्पंचभूतैर्नदेवंजगद्वद्मायापरायाः॥ अतोनादिताषट्प्रकारैःप्रसिद्धाजग
त्त्रित्ववीजंभजेत्तांत्रिनेत्रां॥ तदेतंसमायंद्विवीजंततःस्यात्त्रिपादेतिवेदास्त्विनायांवदंति॥ विदेकाक्षरंब्रह्मवीजेतिकूर्चंजगत्त्रि
त्ववीजंभजेत्तांत्रिनेत्रां॥ ततास्त्र्यदासार्द्धपञ्चाक्षरीसाजगत्तारणादुग्रतारप्रसिद्धा॥ विनातारकंसापरेकाजटास्याज्जगत्त्रि
त्ववीजंभजेत्तांत्रिनेत्रां॥ विनास्त्रंचपञ्चाक्षरीउग्रकेयंस्वयंनीलवाणीपरंचित्स्वरूपा॥ स्मृताप्येकवारंसदामुक्तिहेतुर्जगत्त्रि
त्ववीजंभजेत्तांत्रिनेत्रां॥ इदंयेजनास्तोत्रराजंविदन्तिप्रमितोश्वतेगयपघ्रसंगे॥ जगद्रूपपाशाद्विमुक्तोहितत्तांशरीरान्तरं
यांतितारासमीपं॥ विपन्नोनिशार्द्धेजपान्तेप्रभातेपठेद्यस्तुभक्त्यानरस्थंविचिंत्य॥ भवेन्नीलवान्याद्विरेफांघ्रिपद्मेसजीवस्तु
हंसःसजीवोनजीवः॥ ॥ इतिश्रीअद्वैतनिरूपणेमंत्रार्थविवरणात्मकतारास्तोत्रराजनामस्तोत्रंसंपूर्णम्॥ ॥

अथकवचमाह॥ पुराकैलासशिखरेतारापप्रच्छशंकरः॥ गुप्तभावेनदेवेशिकथयस्वतुसादरं॥ केनोपायेनसहसाशरीरंसु
दृढंभवेत्॥ कथंवासिद्धिरतुलानवमंत्रविदांप्रिये॥ ॥श्रीतारोवाच॥ अस्तिगुह्यतरंयेनत्रिःस्मृतंमुखपंकजात्॥ इदंरहस्यपर
मंकथयामित्वयिप्रभो॥ श्रूयतांसावधानेनकवचंमनुसम्मतम्॥ मधुकैटभयोर्युद्धेकथितंपद्मयोनिना॥ तत्प्रभावात्तुदेवेश
नाशंविष्णुर्नगच्छति॥ भवत्सुथितंपूर्वंतत्त्वस्मरसिमायया॥ उद्धृतंसारभूतानांकवचंयोगिनीमते॥ नकस्मैचित्प्रवक्त
व्यंनप्रकाश्यंकथंचन॥ शपथंकुरुदेवेशयदिस्नेहोस्तिमांप्रति॥ श्रूयतांसावधानेनकवचंसारसंग्रहं॥ सत्यंसत्यंपुनः
सत्यंसत्यंसत्यंपुनःपुनः॥ कवचेनविनादेवयोसामर्थ्ययतिक्षणात्॥ तमभ्यामिमहोग्राहंयोगिनीभिःसुनिश्चितम्॥
ब्रह्मविष्णुमहेशानीवीजंरक्षतुमूलकं॥ तद्ईंशक्तिवीजंतुलिंगंरक्षतुयत्नतः॥ मणिपुरंसदापातुवधूवीजंविशेषतः॥ अ
नाहतावत्मीवीजंपातुमेशर्वसर्वतः॥ अस्त्रादिसर्वदापातुविशुद्धंकंठभूषितं॥ शेषस्तुपातुमेनित्यमाज्ञास्थानंद्विपत्रकं
शीर्षंपातुतथाताराजटापातुसदाननं॥ नीलसरस्वतीपातुहृदयंमेसदापुनः॥ अक्षोभ्यःपातुसर्वांगंबृहतीपातुभालकं
उग्रतारादेवतामेगह्वरंपातुसर्वदा॥ वरत्मामेसदापातुमायावीजमशेषतः॥ ऊरूमेपातुसततंवध्वीजंमदेवहि॥ स्त
नद्वयंसदापातुकूर्चंविघ्नविघातकं॥ रसनांमेसदापातुलक्ष्मीदेवीवसाम्वती॥ रसनाग्रंसदापातुसरस्वतीचप्रयत्नतः

रतिः पातु सदा बीजं प्रीतिर्मे वदने सदा ॥ कीर्त्तिः कीर्त्तिं सदा पातु शांतिः शांतिं सदावतु ॥ पुष्टिर्मे पातु पुष्टिं च तुष्टिः तुष्टिं सदावतु
विलोचनः पातु शंखं शंखपूर्वस्तथैव च ॥ पांडुरो मे सदा गंडं पांतु नित्यं च सर्वशः ॥ पद्मनाभः सदा पातु नाभिं मे दशपत्रकं
असिताभः पातु लिंगं नामकः पातु चक्षुषी ॥ मामको मे तथा हस्तौग्री वां मे पातु पांडुरः ॥ तारकः पातु हृदयं पृष्ठं पर्यंतको मम
पार्श्वद्वन्द्वं सदा पातु यमांतकनरांतकौ ॥ चरणौ मे पातु नित्यं विघ्नांतकसमाह्वयः ॥ तारा मे पातु सततं सर्वांगं परमेश्वरी ॥
इदं तु देव कवचं कथितं मन्मुखात्सुतं ॥ प्रमादाद्यदि देवेश यत्र कुत्र प्रकाश्यते ॥ योगिनीभिस्तदाहं तु स्वयं च वधकारिणी ॥
यदि भाग्यवशाल्लब्धं केनचित्साधकेन वै ॥ तदा तस्य महासिद्धिर्विपुषा जायते ध्रुवं ॥ निषिद्धेभ्यो न दातव्यं न प्रकाश्यं कथंचन ॥
यदि देयान्निषिद्धेभ्यस्तदाहं वधकारिणी ॥ दद्याच्छात्राय शिष्याय तत्तु मंत्रयुताय च ॥ गुरुभक्तियुतायैव तदा सिद्धिरनुत्तमाः
रहस्यं कथितं सर्वमनंतफलदायकं ॥ गोपितव्यं त्वया देव न प्रकाश्यं कदाचन ॥ ॥ इति श्रीयोगिनीतंत्रे एकजटाकवचं स
माप्तम् ॥ ॥ इति श्रीतंत्रचिंतामणौ ताराभेदत्रितयसाधारणनिस्तार्चनयंनिर्णयो नाम चतुर्विंशतितमः प्रकाशः ॥ २४ ॥
अथ श्रीवज्रवैरोचनीविद्यायाः क्रमो लिख्यते ॥ ॥ जलपात्रं करे कृत्वा पूजास्थानं ततो व्रजेत् ॥ प्रक्षाल्य हस्तौ पादौ च वास
सी परिधाय च ॥ आचम्य विधिवद्देवि देशिकेंद्रः सुखासने ॥ प्रागास्यमुदगास्यं वा दक्षिणास्यं विशेषतः ॥ स्वगेहे वा मनोरम्ये देवीवे

वेत्समसमाचरेत्॥ प्रणवंचैवलज्जांचसकारंचविसर्गवान्॥ अस्त्ररक्षयायरक्षमायेफट्इतिठांतिकः॥ अनेनांघ्रीन्प्रक्षाल्यजल
मीशानतस्त्यजेत्॥ ॥अथमंत्राचमनं॥ मंत्रेणाचमनंकुर्याद्देवीध्यायन्हृदंबुजे॥ लक्ष्मीमायाकूर्चबीजैस्त्रिभिःपीत्वांबुसाधक
वाग्भवेनोष्ठौसंमृज्यमायाभ्यांचद्विरुत्सृजेत्॥ कूर्चेनक्षालयेत्पाणिमेभिर्मंत्रैश्चविन्यसेत्॥ श्रीमायाकूर्चवाक्कामविष्णुगभ
गवर्णकैः॥ कामकलांकुशाभ्यांचवक्त्रनाशाक्षिकर्णयोः॥ नाभिहृन्मस्तकंबाहोस्पृशांभुर्भवेत्क्षणात्॥ अथवक्ष्येवंछित्रम
स्तांवत्सरांतंप्रपश्यति॥ ॥उण्याहंवाचयेद्धीमान्सामान्यार्घंततोदिशेत्॥ द्वारमभ्युक्षतेनैवद्वारदेवान्प्रपूजयेत्॥ ॥धा
तारंचविधातारंक्षेत्रपालंततःपरं॥ विघ्नराजंमहेशानिगंगांचयमुनांततः॥ वसुधारांशंखनिधिंपद्मनिधिंवसुमती॥ द्वारश्रि
यंनमस्कृत्यपूजयेत्क्रमतःसुधी॥ ॐकारादिनमोंतेनपूजयेद्देशिकोत्तमः॥ किंचित्संकुच्यमानांगंवामपादपुरःसरं॥ पू
जास्थानंविशेद्धीमान्अस्त्रायफट्समुच्चरन्॥ ॥अर्घपात्रंविधायाथक्षेत्रपालंनमेत्सुधीः॥ ऊर्ध्वंब्रह्माअधोनंतः आधारश
क्तिंततःपरं॥ कमलंसर्वतत्त्वैकंगुणाःसत्वरजस्तमः॥ सूर्यबिंबंचंद्रबिंबंवह्निबिंबंततःपरं॥ पञ्चाशद्बीजसंयुक्तांकर्णिकांपूजयेत्
सुधी॥ आत्मानंपरमात्मानमंतरात्मानमेवच॥ विकारंकेशरंधीमान्पूजयेद्दलेष्वपि॥ ॥दिव्यदृष्ट्यादिव्यविघ्नान्दूरयेत्ता
लपूर्वकं॥ अस्त्रायफट्चमंत्रेणहुंमंत्रेणापिसुंदरि॥ आत्मानंरक्षयेद्धीमान्वह्निप्राकारयोगतः॥ शंखंवागजचर्माणिनरचर्मम

हेश्वरि ॥ व्याघ्राजिनं कुचेलं वा मृत्तिकागारसंभवं । शवचेलं महेशानि आसने कल्पयेत्सुधीः ॥ आत्मानं नीलचोलेन भू
षयेद्यत्नपूर्वकं । विशेषेण महेशानी पूजयेत्साधकोत्तमः ॥ कूर्म्मचक्रे विशेद्धीमान् सुखे सर्वसमृद्धये ॥ पूजयित्वा वि
धानेन विशेद्धीमान् तदा शुचिः ॥ उपरिवासने धीमान् शोधयित्वा विशेषतः ॥ पूजयित्वासनं धीमान् नाधारशक्तियोग
तः ॥ श्वेतसर्षपमादाय विघ्नान्निःसारयेत्सुधीः ॥ स्वर्गे मर्त्ये व पाताले विघ्नाविघ्नविनायकाः ॥ नश्यंतु मम कर्म्मस्मिन् ते स
र्वे व शिवाज्ञया ॥ तालत्रयं ततो दद्यात् अस्त्राय फडिति स्मरन् ॥ विन्यस्त हस्तयुगलमूर्द्ध्वोर्द्ध्वक्रमयोगतः ॥ ध्यात्वा गुरुं स
हस्रारं प्रणम्य नतिमादिशेत् ॥ गुरुं वामे नमेद्धीमान् तत्रैव गुरुपादुकां ॥ गणेशं दक्षिणे ध्यात्वा प्रणमेद्विघ्नशान्तये ॥
सम्मुखे प्रणमेद्देवीं छिन्नमस्तां वसुंधरां ॥ रतिकामोपरिस्थां तां प्राणायामं तथा चरेत् ॥ भूतशुद्धिं ततः कुर्य्यात् हंसमंत्रेण
साधकः ॥ शिवं संयोज्य सकलं जीवं वै सुम्नवर्त्मना ॥ शोषदाहादिकं कर्म प्राणायामक्रमेण च ॥ वाय्वग्निसलिले देहप्रा
वयेद्यथाविधिः ॥ करकच्छपिकां बध्वा श्वासस्य धारणां ततः ॥ ॐकारेण पुरा जीवमूर्द्ध्वमुत्क्षिप्य यन्ततः ॥ निर्जीवं देहमं
कारैर्वह्निबीजेन दाहयेत् ॥ तेनैव वायुबीजेन तद्भस्मापगमं भवेत् ॥ तेनैव मेघरूपेण तत्र वृष्टिं विचिंतयेत् ॥ तेनैवामृतवृ
ष्टिं च ध्यात्वा देहं नवीकृतं ॥ पूर्वोक्तदेवतारूपं सर्वकल्मषवर्जितं ॥ करकच्छपिकां बध्वा हस्ते मूलेन धारयेत् ॥ इतीयं भूतशु

ङ्गिंस लोकानां हितकारिणी ॥ भूतशुद्धिं समासाद्य मातृकान्यासमाचरेत् ॥ षोडशार्णेन मध्येन प्राणायामसमाचरेत् ॥
वेदवेदाग्निसख्याभिर्मायया वा समाचरेत् । विकारविद्यादशैर्विधासु सकलास्वपि ॥ मंत्रन्यासं ततः कुर्याद्ध्यादी
न पूर्ववत्सुवितान् ॥ आसां ऋषिर्भैरवो हं नाम्नाउक्तोऽध भूपतिः ॥ सम्राट्छंदो देवता च छिन्नमस्ता प्रकीर्तिता ॥ मायाबीजं
स्वाहाशक्तिः प्रथिता पद्मयोनिना ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ ङग्येर प्रणवे पूर्वं आकारं विंदुसंयुतं
खङ्गाय हृदयायेति स्वाहायुक्तं कनीयसी ॥ ईकारं प्रणवादेवि चंद्रविंदुसमन्वितं । सुखंगाय ततो वाच्यं शिरसे तदनं-
तरं ॥ स्वाहायुक्तं ततो वाच्यं पवित्रांगलिसंयुतं । ऊकारं प्रणवादेवि विंदुलांछितमस्तकं ॥ श्रीवज्राय तथायुक्तं शिखायै
च ततः परं ॥ स्वाहान्तं विन्यसेद्देवि मध्यमायां ततः परं ॥ नेत्रत्रयाय संयुक्तं स्वाहा च तदनन्तरं । अंगुष्ठे विन्यसेद्देवि प्र-
णवाद्यं ततः परं ॥ अः कारे च विसर्गान्ते सुरक्षयाय संयुतं ॥ असुरक्षयाय संयुक्तं अस्त्रायेति ततः परं । फडक्षरसमा-
युक्तं विन्यसेत्करयोर्द्वयोः ॥ हृदि मूर्ध्नि शिखायां च कवचे नेत्रयोर्द्वयोः ॥ न्यसेदस्त्राख्यपर्यन्तं दिग्विदिक्षु यथाक्रमं
अथ षोढान्यासः ॥ मंत्रषोढा ततः कुर्यात्त्रैलोक्यवशकारिणीं ॥ श्रीबाला त्रिपुटा योनिः प्रासादः प्रणवस्तथा ॥ का-
लीवधूंकुशैः कामकलाहृल्लीस्वकैः क्रमात् ॥ षोडशी मंत्रवर्णाश्च पृथगष्टाक्षरी दशा ॥ एभिर्बीजैर्मातृकार्णान्स्वेषुस्था

नेत्रं विन्यसेत् ॥ एषा ब्रह्मस्वरूपा हि वीजषोडशप्रकीर्त्तिता ॥ अस्याश्चभ्यसनात् सर्व्वे वज्रदेहा भवंति हि ॥ सर्वैश्वर्ययुक्ता
स्ते हि जीवन्मुक्ता दशाक्षरः ॥ ॥ अथास्याः यंत्रमाह ॥ अथास्या मंडलं वक्षे यथावदवधारय ॥ दीक्षाकरं महादेवि
र्वकर्मप्रयोजकं ॥ सितं कुर्याद्दलं पूर्वमाग्नेयं रक्तवर्णकं ॥ याम्ये कृष्णं ततः पीतं शुक्लं चैव ततोसितं ॥ ततः पीतं प्रकुर्वी
त कर्णिका तस्य मध्यगाः ॥ तत्र मध्ये प्रकुर्वीत मंडलं चंडरोचिषं ॥ रजस्सत्वतमोरेखा रक्तशुक्लसिताः क्रमात् ॥ मा
यायुगं च तन्मध्ये षडक्षरसमन्वितं ॥ वांसां तारं च वक्रस्य कुर्यात्त्रिद्वारसंयुतं ॥ पूर्वं रक्तं ततः पीतं शुक्लं रक्तं ततः
परं ॥ भूगोलं च ततो दद्याच्चतुरस्रं सुशोभनं ॥ अष्टपत्रं ततो दद्यात् यथास्थानेन देशिकः ॥ चंडविंबं ततो दद्याद्वह्नि
विंबं ततः परं ॥ भूगोलं च ततो दद्यात्पुरत्रितयं ततः ॥ वज्रशूलसमायुक्तं कोणाष्टकं नियोजयेत् ॥ किंजल्कं केशरे द
द्यात् मंत्रवर्णान् त्रिकोणके ॥ रतिकामोपरिध्यायेद्देवीं वैरोचनीं शुभां ॥ ॥ भैरवोक्तमहं वक्षे यंत्रं सर्वसमृद्धिदम् ॥
त्रिकोणं प्रथमं लेख्यं षट्कोणैर्वेष्टयेद्युतं ॥ त्रिविंबं च ततो दद्यात् गुणानां परिणामकं ॥ भूपुरत्रितयं कुर्याद्वज्रशूलस
मन्वितं ॥ कोणदेशे ततो दद्यात् ठकारं सुमनोहरं ॥ यथास्थानेन लिखेद्धीमान् कर्त्तुरवश्यरकं शुभं ॥ रतिकामोपरिध्याये
देवीं वैरोचनीं शुभां ॥ ॥ अथास्याः यंत्रलिखनानंतरमर्घ्यादिस्थापनं कार्यं तथा च ॥ अर्घ्यपात्रादिकं कुर्यात् मंडलं

द्रुतःचरेत् ॥ ॥ अथपीठपूजामाह ॥ आधारशक्तिमारभ्यपरतत्वांतपूजिते ॥ पीठेजयाख्याविजयाजिताचापिपराजिता ॥ नित्याविलासिनीषष्ठीदोग्ध्रीघोरांचमंगला ॥ दिक्षुमध्येचसंपूज्यापीठस्यनवशक्तयः ॥ ॥ अथस्वनाभिमंडलेदेवींध्यात्वामानसैरुपचारैःसंपूज्ययथोक्तरीत्यायोनिमुद्रांतस्यपुष्पसक्षैतैःसमानीयपुनर्ध्यात्वायंत्रमध्येचावाह्ययजेत् ॥ ॥ अथध्यानं ॥ स्वनाभौनीरजंध्यायेन्शुद्धंविकसितंसितं ॥ तस्यकेशरमध्येतुमण्डलंचण्डरोचिषः ॥ जवाकुसुमसंकाशंरक्तबंधूकसंनिभं रजःसत्वतमोरेखायोनिमंडलमंडितं ॥ विपरीतरतिस्थौचध्यायेइतिमनोभवौ ॥ रतिकामोपरिस्थांचध्यायेद्देवींमनोहरामत मध्येमांचमहादेवींसूर्यकोटिसमप्रभां ॥ छिन्नमस्तांकरेवामेधारयंतीस्वमस्तकं ॥ प्रसारितमुखींभीमांलेलिहानोग्रजिह्विकां ॥ पिबंतींरक्तधारांचनिजकंठसमुद्भवां ॥ विकीर्णकेशपाशांतांनानापुःपसमन्वितां ॥ दक्षिणेचकरेकर्त्तृंमुंडमालाविभूषितां ॥ दिगंबरां [illegible] महाघोरांप्रत्यालीढपदस्थितां ॥ अस्थिमालाधरांदेवींनागयज्ञोपवीतिनीं ॥ सदाषोडशवर्षीयांपीनोन्नतपयोधरां ॥ डाकिनीवर्णिनीयुक्तांवामदक्षिणयोगतः ॥ दक्षिणेवर्णिनींध्यायेद्वामपार्श्वेतुडाकिनीं ॥ वर्णिनींलोहितांसोम्यांमुक्तकेशींदिगंबरां ॥ कपालकर्त्तृकाहस्तांवामदक्षिणयोगतः ॥ देवीगलोच्छलद्रक्तधारापानंप्रकुर्वती ॥ अस्थिमालाधरांदेवींनागयज्ञोपवीतिनीं ॥ डाकिनींवामपार्श्वेतुकल्पांतज्वलनोपमां ॥ विद्युच्छटाभनयनांदंतपंक्तिबलाकिनीं ॥ दंष्ट्राकराल

वृदनांपीनोन्नतपयोधरां ॥ महाघोरांमहादेवीमुक्तकेशीदिगवरा ॥ लवोदरीकालरात्रीनागयज्ञोपवीतिनी ॥ लेलिहानमहाजि
ह्वामुंडमालाविभूषितां ॥ कपालकर्तृकाहस्तांवामदक्षिणयोगतः ॥ देवीगलछलोड्रक्तधारापानंप्रकुर्वती ॥ करस्थितकप
लेनभीषणेनातिभीषणां ॥ आध्यांनिषेधमानांतुध्यायेदेवीविचक्षणः ॥ एवंध्यात्वायजेद्देवीमनसाभक्तियोगतः ॥ वाह्यार्च्च
नंततः कुर्यात्पुष्पनैवेद्यधूपकैः ॥ ॥ अथध्यानांतरमाह ॥ भैरवोक्तमहंवक्ष्येध्यानंसर्वसमृद्धिदम् ॥ स्वनाभौनीरजंध्या
येत्सम्यकविकसितंसितं ॥ पूर्ववत्सकलंध्यात्वारतिकंदर्पसंयुतं ॥ रतिकामोपरिस्थांतुध्यायेद्देवीमनोहरां ॥ तन्मध्यतां
महादेवीमकालजलदोपमां ॥ छिन्नमस्तांकरेवामेधारयंतीस्वमस्तकं ॥ प्रसारितमुखीदेवीलेलिहानोग्रजिह्विकां ॥ पिवंती
रक्तधारांवनिजकंठसमुद्भवां ॥ विकीरीकेशपाशांतांनानापुष्पविभूषितां ॥ दक्षिणेवकरेकर्त्रीमुंडमालाविभूषितां ॥ शता
र्द्धनन्नमुंडेनमालास्वकपरिकल्पितां ॥ अन्योन्यकेशपाशेनग्रथितांतुमनोहरां ॥ दिगंवरांमहारूपांप्रत्यालीढपदास्थितां ॥ अ
स्थिमालाधरांदेवीनागयज्ञोपवीतिनी ॥ सदाषोडशवर्षीयांपीनोन्नतपयोधरां ॥ नागांगदांनागकांचीनागनूपुरसंगतां ॥
नागकुंडलसंयुक्तांअष्टनागसमन्वितां ॥ अनंतोवासुकिश्चैवतक्षककर्कोटपद्मकौ ॥ महापद्मस्तदाशंखः कुलिकोष्टौप्रकी
र्तिताः ॥ अनंतः कुलिकौविप्रौकर्णमूलनियोजितौ ॥ वह्निवर्णौमहाशंखौसहस्रफणसंयुतौ ॥ वासुकिःशंखपालश्चक्ष

क्षत्रियौ पीतवर्णाकौ ॥ प्रत्येकं तु फणा सप्तशतसंख्याविराजितौ ॥ नागहारां नागकांचीं यथास्थाननियोजितां ॥ तक्षकश्च महापद्मो
वैश्यावेतावुदाहृतौ ॥ नीलवर्णौ फणापंचशतयुक्तौ तु सांगकौ ॥ अंगदं कथितं देव्यास्ताभ्यां युक्तं मनोहरां ॥ पद्मककर्कोटकौ शूद्रौ
रक्तवर्णाउदाहृतौ ॥ फणाविंशत्समायुक्तौ नूपुरौ सुमनोहरौ ॥ ताभ्यां युतां छिन्नमस्तां ध्यायेद्ध्यानसमाधिना ॥ डाकिनीवर्णि
नीयुक्तां वामदक्षिणपार्श्वतः ॥ दक्षिणे वर्णिनी ध्यायेत् वामपार्श्वे तु डाकिनी ॥ वर्णिनी श्यामलां ध्यायेत् मुक्तकेशी दिगंबरां ॥ क
पालकर्त्तृकाहस्तां वामदक्षिणयोगतः ॥ देव्या दक्षिणनास्यास्रधारापानं प्रकुर्वती ॥ मुंडमालाधरां देवीं नागयज्ञोपवीतिनीम्
देव्या सदृशरूपेण भूषणेन च भूषितां ॥ डाकिनी वामपार्श्वे तु कल्पान्तदहनोपमं ॥ विद्युदग्निसमद्युतां त्रिनेत्रां सुमनोहरां ॥ दा
डिमीबीजसदृशदंतपंक्तिविराजितां ॥ दंष्ट्राकरालवदनां पीनोन्नतपयोधरां ॥ महादेवीं मुक्तकेशीं महाघोरां दिगंबरां ॥ लेबो
दरीं कालरात्रीं नागयज्ञोपवीतिनीम् ॥ लेलिहानोग्ररसनां मुंडमालाविभूषणां ॥ कपालकर्तृकाहस्तां वामदक्षिणयोगतः ॥
वामनासागलद्रक्तधारापानं प्रकुर्वती ॥ करस्थितकपालेन भीषणेनातिभीषणां ॥ आभ्यां निषेव्यमाणां तु ध्यायेद्ध्यानसमा
धिना ॥ एवं ध्यात्वा यजेद्देवीं मनसा भक्तियोगतः ॥ पाणार्चनं ततः कुर्यान्नैवेद्यपुष्पधूपकैः ॥ भैरवोक्तमिदं ध्यानं कुर्याद्यत्ने
न देशिकः ॥ सर्वसिद्धिप्रदं साक्षान्महापातकनाशनं ॥ यस्मरेत्प्रातरुत्थाय देव्याः पूजनकेऽपि वा ॥ तस्य सिद्धिर्भवेद्देवी वांछितार्थ

प्रदायिनी॥ धनंधान्यंसुतंजायांहयंहस्तिनमेवच॥ वसुंधरांमहाविद्यामष्टसिद्धिलभेन्नरः॥ ॥अथवीजविशेषा
दिमंत्रपक्षेसावर्णविशेषेणाध्येया॥ ॥तथाच॥ येनवीजेनत्वाद्येनयद्यत्ध्यानंतदुच्यते॥ कामादेविराडंध्यायेल
ज्जादेलोहितांतथा॥ मायादौचभवेत्कृष्णावागादौवेष्फतप्रभा॥ ॥अथयोनिमुद्रांबध्वानन्मध्यरक्तवंदनाक्षत
जवापुष्पंनिधायतत्रपुनध्यायेत्॥ योनिमुद्रांगतंकृत्वासाक्षतंरक्तपुष्पकं॥ ध्यायेद्देवीमहामायांसर्वकल्याणकारि
णीं॥ सुधासागरद्वीपेवस्मरेदुद्यानमद्भुतं॥ तस्मिन्नवरस्तीरेशोभनंरक्तमंडपं॥ चतुर्द्वारसमोपेतंस्तंभराजिविरा
जितं॥ गवाक्षमार्गदर्शकपायुयुक्तसकेशरं॥ सुधासंस्थाविसततंकल्पवृक्षचतुष्टयं॥ निविष्टांरत्नखत्तेभेवसंस्मरेत्त्रि
जेदवतां॥ शवासनगतांध्यायेत्छिन्नमस्तांमहोदरीं॥ चतुर्भुजांसवारूढांरक्तवस्त्रांत्रिलोचनां॥ उत्कटाटोपसंपन्नांद
क्षिणेखड्गधारिणीम्॥ सोत्पलांवामहस्तेनदोर्भ्यांपुस्तकधारिणीम्॥ निकृत्यस्वशिरःछन्नेपिवंतीरुधिरंयजा॥ डपाधि
नकराभासंचंद्रार्द्धकृतशेखरां॥ योगिभिःसेव्यमानांशांनागयज्ञोपवीतिनीं॥ ॥अथावाहनमंत्रस्तु॥ तत्रचावा
हनंकुर्यान्मंत्रेणानेनसाधकः॥ सर्वसिद्धिप्रदेपूर्वंसुस्वरेत्साधकोत्तमः॥ वर्णानीयेनतेनावाच्यंसर्वसिद्धिप्रदेततः॥ डा
किनीयेनतेनावाच्यंदेवीनाममतःपरं॥ हस्वेहातिततोवाच्यंरेतितदंनंनरं॥ तिष्ठतिष्ठेतिवाच्यंचमायायुग्मंततःपरं

फडुक्षरसमायुक्तं स्वाहेति तदनंतरं ॥ इत्यावाहनमुद्दिष्टं स्थापनेन समन्वितं ॥ ॥ अथासनदाने मंत्रविशेषमाह ॥ अथावाप्या
सनं दद्यात् मंत्रेनानेन साधकः ॥ प्रणवं प्रथमं कृत्वा सर्वसिद्धिप्रदे ततः ॥ वर्णिनीये ततो वाच्यं प्रणवं च ततो वदेत् ॥ डाकिनीये त
तो वाच्यं प्रणवं च ततो वदेत् ॥ इह शाष्ठा तिष्ठ तिष्ठ मायेपकहस्वाहयायुतं ॥ ततो ध्यात्वा यजेद्देवी युवतीं चंडरूपिणीं ॥
अथ नित्यपूजामाह ॥ मूलमंत्रेण संयुज्य मंडलस्थां महेश्वरीम् ॥ उपचारैः प्रपूज्याथ प्रसन्ने रंजनं ततः ॥ तदनुज्ञां गृहीत्वा
गृहीत्वा चांगदेवान्प्रपूजयेत् ॥ ततो दक्षिणदेशस्थां वर्णिनीं पूजयेत्तथा ॥ प्रणवान्तरस्वतीबीजं प्रकृत्यैनां मनामतः ॥ तत
श्च वामपार्श्वस्थां डाकिनीं पूजयेन्नरः ॥ पूर्ववत्प्रणवादिस्तु डाकिन्यै नम इत्यपि ॥ त्रिकोणे पूजयेद्दादै फडुंतकवचेन तु ॥ का
लिकां भुवनेशीं च मातंगीमीशदेशतः ॥ उत्तरादि ततः पश्चात्पूर्वे तु च तथा क्रमं ॥ कामाक्षां चैव भेरुंडां तथा नीलसरस्वतीं ॥
मायाबीजेन प्रजयेत् महाविभवविस्तरैः ॥ भैरवं पूजयेद्देवं संमुखे विधिना युता ॥ संग्राइष्ठे दक्षिणे च मंत्रवर्णान्ततो नरे
बीजशक्तिरक्षो दिशि पूजयेत् क्रमशः सुधीः ॥ मातरः पद्ममध्ये तु ब्राह्म्याद्यास्सर्वसिद्धिदा ॥ इंद्रादिलोकपालांताः पूज्यास्स्वास्त्रस
मन्विताः ॥ भूपुरे पूजयेन्नाथ पूर्वादिक्रमयोगतः ॥ पीठोपरि यजेद्देवं परितः वमनोभवं ॥ पूर्वादिषु चतुर्द्वारे पूजयेत्साधकोत्तमः
द्वारोपरि महालक्ष्मीं भुल्लाणां चाग्रतो जयेत् ॥ क्षेत्रपालं करालं च विकरालं तथा पुनः ॥ प्रणवादिनमोंतेन चतुर्थ्यंतपदेन च ॥

पूर्वोक्तमस्त्वनुलोमेनोक्तः पुनरस्या विलोमेनक्रमांतरमाह ॥ ॥त्रैलावरणमारभ्य पूजयेत्प्रतिलोमतः ॥ भूपुराद्वास्यभागेषु वज्रा
दीनिप्रपूजयेत् ॥ तदंतः सुराराजादीन्द्वारेषुद्वारपान्यजेत् ॥ करालं विकरालं वातिकालं महाकालकं ॥ एकलिंगा योगिनी च डाकिनी
भैरवं तथा ॥ महाभैरवकं डाक्षी ह्यसितांगी संहारिणी ॥ षट्कोणेषु षडंगानि त्रिकोणे छिन्नमस्तकां ॥ डाकिनीवर्णिनीतां च वाभ्यां
तत्पार्श्वयोर्यजेत् ॥ एवं पूजाप्रकर्तव्या बलिदानं ततश्चरेत् ॥ ॥अथादौ भूपुरस्य वाह्ये वज्रादीनिऽर्द्वंशदीन्संपूज्य पूर्वादिक्रमेन
द्वारपालान्प्रपूजयेत् ॥ पूर्वद्वारे करालं च विकरालं च दक्षिणे ॥ पश्चिमे चातिकालं च महाकालं तथोत्तरे ॥ प्रणवादिनमोंतेन पूजामेवं
समाचरेत् ॥ ॥अथैषां ध्यानमाह ॥ करालं रक्तवर्णं च द्विभुजं द्वीपसंस्थितं ॥ पश्चिमे विकरालं च नीलनीरजसंनिभं ॥ अंकुशं द्विभु
जं वामे जवापुष्पछविं स्मरेत् ॥ गरुडस्थं महाकायं त्रिनेत्रं चंद्रशेखरं ॥ महाकालं तथा चैव द्विभुजं पीतवाससं ॥ ॥अथ पूर्वादि
क्रमेणाष्टदले चैकलिंगाद्या भैरव्यः पूज्याः ॥ ॥एकलिंगा महादेवी डाकिनी योगिनी तथा ॥ भैरवी च महापूर्वा भैरवीमथसुव्रते ॥
ऽडाक्षी मसितांगी च ततः संहारिणी क्रमात् ॥ पूर्वादिके दले पूज्याः शक्तयं क्रमयोगतः ॥ प्रणवादिनमोंते च लज्जाबीजपुटेन च ॥ ॥
अथासां क्रमेण ध्यानमाह ॥ रक्तां गौरीं तथा कृष्णां तथा रक्तां च पिंगलां ॥ पीतां शुक्लां च धूम्राभां कथयामि पुनः क्रमं ॥ ॥ त्रिशूलवर
दाभयां व्याघ्रचर्मसमन्वितां ॥ त्रिलोचनां च तन्वंगीं नागयज्ञोपवीतिनीं ॥ ॥ द्वितीयं सुंदरालोकां दंडखट्वांगधरां करे ॥ रक्तवस्त्रपरीधानं

रक्तनागोपवीतिनी ॥ अस्थिमालाधरां देवी वटपद्मासनस्थितां ॥ तृतीयां भीषणाकारां ललजिह्वां महोदरी ॥ कपालकर्तृकाहस्तां कृ
ष्णानागोपवीतिनी ॥ घोरदंष्ट्रां महाघोरा नतिमग्नां सुदारुणां ॥ चतुर्थी पावकाभासां मुंडमालाविभूषितां ॥ कपालकर्तृकाहस्तां
खड्गशूलसमन्वितां ॥ आपिंगकेशनिवयां प्रचंडाट्टहासिनी ॥ पंचमी बालसूर्याभां षड्भुजां द्विपदां तथा ॥ त्रिमुखी च महोग्रां च
रक्तपीतासिताननां ॥ कपालकर्तृकाहस्तां खड्गशूलसमन्वितां ॥ जटाजूटार्द्धचंद्रां च प्रतिवक्त्रत्रिलोचनां ॥ शवोपरिस्थितां देवी
मानीयस्थानमाश्रितां ॥ द्वीपिचर्मपरीधानां वीरघंटासमन्वितां ॥ षष्ठी सुवर्णवर्णाभां सहस्रनयनोज्वलां ॥ वज्रहस्तां प्रसन्नास्यां
सितपद्मासनस्थितां ॥ दिव्यांबरधरां देवी हारकेयूरभूषिताम् ॥ सप्तमी तु महादेवी हारकेयूरधारिणीम् ॥ नीलोत्पलदलश्या
मां किंचित्स्मितयौवनां ॥ शंखचक्रगदापद्मव्यग्रहस्तां मनोहरां ॥ दिव्यांबरधरां देवी हारकेयूरभूषिताम् ॥ पद्मोपरिसमासीनां
कृतपद्मासनस्थितां ॥ पीतवस्त्रपरीधानां स्निग्धनेत्रां सुदारुणां ॥ अष्टमी च प्रवक्ष्यामि कालजीमूतसन्निभां ॥ त्रिनेत्रां उक्तिनो दे
वी विश्वसंहारकारिणी ॥ स्वाभियुक्तां सदा ध्यायेद्देवीं त्रैलोक्यमातरं ॥ पूर्वदीक्षानपर्यंतं पूजयेद्विधिवत्क्रमात् ॥ अथ बलिदानम्
एवं पूजां विधायाथ बलिदानं प्रकल्पयेत् दध्याढलिपायसं च कृशरं मधुसंयुतं ॥ सकोषं मधुसंयुक्तं रंभापुष्पं तथैव च ॥ अनंतरंतरत्नो
देवि पशुदानं विधीयते ॥ समभ्यर्च्य बलिं पूर्वं गंधपुष्पादिचंदनैः ॥ धेनुमुद्रां प्रदर्श्याथ वामांगुष्ठेन संस्पृशेत् ॥ यंमंत्रेणाशोधनं कृत्वा

रं मंत्रेणादाहयेत्ततः ॥ ठं मंत्रेणामृतं भाव्यं वं मंत्रेणाप्लावयेद्घृतं ॥ अष्टधा प्रजपेन्मंत्रं मूलं ऽं तं निवेदयेत् ॥ प्रदर्श्य संमुखे तत्र पुन
राचमनं ततः ॥ अथ वलिदानमंत्रः * संबुध्यंतं पदं ब्रूयादेहि एहि पदं ततः ॥ गृह्ण गृह्ण इमं ब्रूया वलिशब्दं ततः परं ॥ मम शत्रू
समाभाष्य सिद्धिं देहि पदद्वयं ॥ कवचद्वितयं चोक्त्वा करालिके पदं ततः ॥ फट् स्वाहांतो महामंत्रो वलिदानविधौ स्मृतः ॥ ॥
अष्टोत्तरशतं वापि सहस्रं वा महेश्वरि ॥ जपं समाचरेन्मंत्री कुल्लुकाद्यं यथाविधिः ॥ जपांते च स्तुतिं कुर्यान्मालिकां शिरसि
क्षिपेत् ॥ जपपूजां समाप्येवं कृत्वा चक्रवचं पठेत् ॥ ॥ तत्रादौ क्रोधभैरवस्य मंत्रं जपेत् ॥ आदौ जप्त्वा भैरवस्य क्रोधस्या
स्य मनुं जपेत् ॥ अस्थिमालां समादाय वज्रवैरोचनीमंत्रं ॥ ॥ अथ क्रोधभैरवस्य मंत्रमाह ॥ अथ क्रोधस्य मनुं वक्ष्ये असा
ध्यं येन सिध्यति ॥ वीजं हालाहलं गृह्य क्रोधवीजमतः परं ॥ भयंकराणीमाभाष्य शितांगक्षगतस्थितं ॥ प्रलयाग्निमहाः
ज्वालामाभाष्य मनुमुद्धरेत् ॥ एवमुद्धारितः क्रोधः स्वयमेव प्रसिध्यति ॥ ॥ अथ षडंगन्यासः ॥ ततस्तु क्रोधमंत्रेण षडंगं
न्यासमाचरेत् ॥ विषं वज्रयुतं वोधि महाकालं न्यसेद्धृदि ॥ विषं हनुयुगं वज्रकूर्चाद्यं विन्यसेद्धृदि ॥ हालाहले देहयुतं वज्रका
लं न्यसेच्छिरः ॥ विषमंत्रयुतं वज्रमायुधं कवचं न्यसेत् ॥ तारवीजयुतं वज्र महाकालाय नेत्रयोः ॥ विषं हनयुतं गरलदहट
स्यपदान्वितं ॥ क्रोधं वज्रयुतं तद्वत्सर्वं उष्टानथापरं ॥ ततो मारयवर्मास्त्रं दिग्वंधोत षडंगकं ॥ ॥ अथ ध्यानमाह ॥ तत्रमः

ध्यन्यसेत्भीमंतत्रज्वालासमाकुलं ॥ साट्टहासंमहारौद्रंभिन्नांजनचयोपमं ॥ प्रत्यालीढचतुर्बाहुंदक्षिणेचक्रधारिणं ॥ तर्जनंवामहस्तेनतीक्ष्णादंष्ट्राकरालिनं ॥ कपालरत्नमुकुटंत्रैलोक्यस्यविनायकं ॥ आदित्यकोटिसंकाशंअष्टनागविभूषणं ॥ अपराजितपदाक्रांतंमुद्रावाचलवेष्टितं ॥ अनामिकाद्वयंवध्वाअंगुतर्जनीद्वयं ॥ कनिष्ठांमध्यमांचैवजेष्ठांगुष्ठेनवक्रमात् एषमुद्राधरःश्रीमानत्रैलोक्यासाध्यसाधकः ॥ ॥ अथस्तुतिः ॥ इतिपूजाविधिंकृत्वाजपित्वाचयथाबलं ॥ वांछितार्थप्रसिद्ध्यर्थमिमंस्तवमुदीरयेत् ॥ नाभौशुभ्रसरोजमध्यविलसद्वंधूकपुष्पारुणंभास्वद्भास्करमंडलंतदुदरंयद्योनिचक्रंमहत् ॥ तन्मध्येविपरीतमैथुनपरप्रद्युम्नतत्कामिनीपृष्ठस्थांतरुणार्ककोटिविलसत्तेजःस्वरूपांशिवां ॥ वामेछिन्नधरांशिरोतदितरेपाःणौवृहत्कर्त्तिकांप्रत्यालीढपदांदिगंतवसनामामुक्तकेशस्रजां ॥ छिन्नात्मीयशिरःसमुच्छलदसृग्धारांपिवंतींपरां ॥ बालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीं ॥ वामादन्यत्रनाडीवहुवहुलगलद्रक्तधाराभिरुच्चैःपायंतीमस्थिभूषांकरकमललसत्कर्त्तिकामुग्ररूपां ॥ रक्तामारक्तकेशीमपगतवसनांवर्णिनीमात्मशक्तीप्रत्यालीढोरुपादामरुणिततनयनायोगिनीं ॥ योगमुद्राम्दिग्वस्त्रांमुक्तकेशींप्रलयघनघटाघोररूपांप्रचंडांदंष्ट्रादुःप्रेक्षवक्त्रोदरविवरलसल्लोलजिह्वाग्रभासां ॥ विद्युल्लोलाक्षियुग्मांहृदयततलसद्भोगिभीमांसुमूर्त्तिंसद्यश्छिन्नात्मकंठप्रगलितरुधिरैर्डाकिनीर्वर्द्धयंती ॥ ब्रह्मेशानाच्युताद्यैःशिरसिविनिहितामंदपा

॥ तंत्रचिं ॥
॥२१२॥

दारविंदमात्मज्ञैर्योगिमुख्यैः प्रतिदिनमनिशं चिंतितां चित्स्वरूपां संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्तामिष्टां ता
मिष्टदात्रीं कलिकलुषहरां चेतसा चिंतयामि ॥ उत्पत्तिस्थितिसंहतिर्घटयतुं धत्ते त्रिरूपां तनुं त्रैगुण्याज्जगतो यदीयविकृतीर्ब्र
लाच्युतः शूलभृत् ॥ तामाद्यां प्रकृतिं स्मरामि सततं सर्वार्थसंसिद्धये यस्याः स्मेरपदारविंदयुगलं संतो भजंते सदा ॥ अलिपि
शितपुरंध्रीयोगपूजापरोहं बहुविधजलभारारंभशंभाविनोहम् ॥ पशुजनविरतोहं भैरवीसंस्थितोहं गुरुचरणपरोहं भैरवो
हं शिवोहं ॥ इमं स्तवं महापुण्यं ब्रह्मणा भाषितं पुरा ॥ यः पठेत्प्रातरुत्थाय देव्याः सन्निहितोपि वा ॥ तस्य सिद्धिर्भवेद्देवी वांछिता
र्थप्रदायिनी ॥ धनधान्यसुतं जायां हयं हस्तिनमेव वा ॥ वसुधां तं महाविद्यामष्टौ सिद्धिर्हिभेध्रुवं ॥ ॥ इति भैरवोक्तं देव्याः स्त
वराजः समाप्तः ॥ ० ॥ अथ कवचं ॥ कथिता छिन्नमस्ताया या या विद्या सुगोपिता ॥ त्वया नाथेन जीवेश श्रुता वा गदिता म
या ॥ इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं ॥ त्रैलोक्यविजयं नाम कृपया कथ्यतां विभो ॥ ॥ भैरव उवाच ॥ शृणु वक्ष्यामि
देवेश सर्वदेवनमस्कृते ॥ त्रैलोक्यविजयं नाम कवचं सर्वमोहनं ॥ सर्वविद्यामयं साक्षात्सुरासुरजयप्रदं ॥ धारणात्पठना
दीशस्त्रैलोक्यविजयी विभुः ॥ ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः ॥ कर्त्ता पाता च संहर्त्ता भुवनानां सुरेश्वरि ॥ न देया पर
शिष्येभ्योऽभक्तेभ्यो विशेषतः ॥ देयं शिष्याय भक्ताय प्राणेभ्योप्यधिकाय च ॥ देव्याश्छिन्नहस्तायाः कवचस्य च भैरवः ॥ ऋ

॥ गुरुः ॥
॥२१२॥

षिः संम्राड्विराट्छंदोदेवता छिन्नमस्तकाः॥ त्रैलोक्यविजयी मुक्तौ विनियोगः प्रकीर्त्तिताः॥ हूंकारो मे शिरः पातु छिन्न
मस्तानलप्रभा॥ ह्रीं हूं ऐं त्र्यक्षरी पातु भालं रक्ता दिगंबरा॥ श्रीं ह्रीं हूं ऐं द्वौ पातु मुंडकर्त्रीधरा पिसा॥ सा विद्या प्रणवाद्यंता श्रु
तियुग्मं सदावतु॥ वज्रवैरोचनीये हूं हूं फट् स्वाहा ध्रुवादिकः॥ घ्राणं पातु छिन्नमस्ता मुंडकर्त्रीधारिणी॥ श्रीमायाकू
र्चवाग्बीजे वज्रवैरोचनीये हूं॥ हूं फट् स्वाहा महाविद्या षोडशा ब्रह्मरूपिणी॥ सुपार्श्वे वर्णिकाभ्यां स्वासृग्धारां पिवंतीमुद
वदनं सर्वदा पातु छिन्नमस्ता सशक्तिका॥ मुंडकर्त्रीधारा रक्ता साधकाभीष्टदायिनी॥ वर्णिनी डाकिनीयुक्ता सापि मामभि
तोवतु॥ रमाख्या पातु जिह्वां च लज्जाख्या पातु कंठकं॥ कूर्चाख्या हृदयं पातु वागाख्या स्तनयुग्मकं॥ रमया युक्ता विद्या पार्श्वौ
पातु सुरेश्वरि॥ मायया युक्ता पातु नाभिदेशं दिगंबरी॥ कूर्चेन युक्ता देवी पृष्ठदेशं सदावतु॥ वाग्बीजयुक्ता चैषा मध्यं पा
तु सशक्तिका॥ ईश्वरी कूर्चवाग्बीजे वज्रवैरोचनीये हूं॥ फट् स्वाहेति महाविद्या कोटिसूर्यसमप्रभा॥ छिन्नमस्ता सदा पा
याद्रूरुयुग्मं सशक्तिकाः॥ ह्रीं हूं ह्रीं वर्णिनी जानु श्रीं हूं ह्रीं डाकिनी पदं॥ सर्वविद्यास्थिता नित्या सर्वांगं मे सदावतु॥ प्राच्यां पा
यादेकलिंगा योगिनी पावकेवतु॥ डाकिनी दक्षिणे पातु श्रीमहाभैरवी च मां॥ नैरृत्यां सततं पातु भैरवी पश्चिमेवतु॥ इंद्राक्षी पा
तु वायव्ये सितांगी पातु चोत्तरे॥ संहारिणी सदा पातु शिवकोणे शकर्त्तृका॥ इत्येवं शक्तयः पांतु दिग्विदिक्षु सकर्त्तृका॥ ह्रीं

क्रीं क्रीं मां पातु पूर्वे हूं हूं मां पातु पावके ॥ क्रीं क्रीं मां यांतु दक्षिणे दक्षिणे कालिके वतु ॥ क्रीं क्रीं क्रीं वै वने नैर्ऋत्ये हूं हूं मां पश्चिमे वतु
ह्रीं ह्रीं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे ॥ महाकाली खड्गहस्ता ईशकोणे सदावतु ॥ तारो माया वधूकूर्चं फट्कारोयं महामनुः ॥ खड्ग
कर्त्रधरा तारा चोर्द्ध्वदेशे सदावतु ॥ ह्रीं स्त्रीं हूं वैव पाताले पातु नील सरस्वती ॥ इति ते कथितं देव्याः कवचं मंत्रविग्रहं ॥ यद्धृत्वा पठ
नाद्भीमः क्रोधाख्यो भैरवप्रभुः ॥ सुरासुरमुनीन्द्राणां कर्त्ता हर्त्ता भवेत्स्वयं ॥ यस्याज्ञया मधुमती याति सा साधकांतिकं ॥ भूतिन्या
द्यास्त्व यक्षिण्यो डाकिन्याद्याश्च खेचराः ॥ आज्ञां कुर्वंति तास्तस्य छिन्नादेव्यप्रसादतः ॥ एतद्देवपरं ब्रह्म कवचं मन्मुखोदितं ॥ दे
वीमभ्यर्च्य गंधाद्यैः मूलेनैव पठेत्सकृत् ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ भूर्जे विलिखितं चैतद्गुटिकां कांचना
स्थितां ॥ धारयेद्दक्षिणे वाहौ कंठे वा यदि भाग्यतः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत् ॥ तस्य गेहे वसेल्लक्ष्मीवाणी
च वदनांबुजे ॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे याति भग्नतां ॥ इदं कवचमज्ञात्वा यो जयेच्छिन्नमस्तकां ॥ सोपि शस्त्रप्रहारेण
मृत्युमाप्नोति सत्वरं ॥ ॥ इति भैरवतंत्रे भैरवभैरवीसंवादे छिन्नमस्ताकल्पे त्रैलोक्यविजयं नाम छिन्नमस्ताकवचं समाप्तं
इति श्रीतंत्रचिंतामणौ वज्रवैरोचनीनित्यार्चननिर्णयनाम पंचविंशतितमः प्रकाशः ॥ २५ ॥ अथ श्रीविद्याक्रमो
लिख्यते ॥ ॥ अथ वक्ष्ये महेशानि श्रीविद्याक्रममुत्तमं ॥ स्नानं तु विधिवत्संध्यां तर्पणं सूर्यपूजनं ॥ कृत्वा पूजालये चाथ पंच

१९१०

पूजयाम्यहं॥ इति संकल्प्य पादौ हस्तौ प्रक्षाल्याचम्य मंत्राचमनं कुर्यात्॥ ॥ तद्यथा॥ वालावीजैस्त्रिभिः पीत्वा द्वाभ्यामो
ष्ठौ प्रमार्जयेत्॥ दुर्गायास्त्वादिहृल्लेखमायया क्षालयेत्करं॥ श्रीमायावाक्परा कामत्रिकूटा योनिवर्तुलं॥ कामकलां कृशा
यांश्च गुरवनाशाक्षिकर्णिकान्॥ नाम्नुरक्तं जुज्ञेस्त्वष्टाप्यधिकारी जपार्चने॥ आवस्येवं भवेद्दुर्गाजीवन्मुक्तादशाब्दतः॥
अथ सामान्यार्घोदकेन द्वारमभ्युक्ष्य द्वारपालान्पूजयेद्यथा॥ वालया द्वारमभ्युक्ष्य दक्षिणवामपार्श्वयोः॥ ऊर्ध्वाधस्त्रिनारांते स्व
नामाद्यर्णवीजतः॥ गणेशं क्षेत्रपालं च तथा द्वारश्रियं पुनः॥ देहलीं च समभ्यर्च्य कामदेवं रतीयुतं॥ वसंतं प्रीतिसहितं ततो दे
वीसरस्वती॥ श्रियं पश्चात्समभ्यर्च्य विकिरेत्कुसुमांजलिं॥ ॥ अथवा दशदिक्षु दशशक्तिं समभ्यर्च्य मध्ये वागीश्वरीं पुष्पांजलिना
दीपनाभ्यर्चयेत्॥ ॥ सरस्वती श्रियं मायां दुर्गां च तदनंतरं॥ भद्रकाली च स्वस्ती च स्वाहा श्रेयः शुभंकरी॥ गौरी च लोकधात्री च स्वा
हा चैव वागीश्वरीमपि॥ रक्ता द्वादशशक्तीभिः सहितं दीपनायकं॥ वितारयोगसर्वत्र विज्ञेयः साधकोत्तमे॥ सामान्यक्रमवत्
कार्यमपरं साधकोत्तमेः॥ ॥ भूतशुद्धिं विधायेत्थं मातृकान्यासमाचरेत्॥ प्राणायामं त्रयं कृत्वा न्यासानन्यान्समाचरेत्
अथ वक्ष्ये महेशानि श्रीविद्यान्यासमुत्तमं॥ ॥ अथादौ ऋष्यादिन्यासः॥ ऋषिरस्य महेशानि दक्षिणामूर्त्तिरव्ययः॥ पं
क्तिछंदः समाख्यातो देवी त्रिपुरसुंदरी॥ वाग्भवं वीजमित्युक्तं शक्तिस्तु शक्तिकूटकं॥ कामराजः कीलकं स्यादृष्यादिन्यास

ईरितः॥ ॥अथ करांगन्यासः॥ ऐं क्लीं सौं इति प्रोक्तबीजत्रितयमुत्तमं॥ एतद्बीजं द्विरावृत्य मध्यमाद्यंगुलीषु च॥ अंगुष्ठे
करस्य पृष्ठतलयोः पृष्ठयोरपि॥ चतुर्थ्यंतनतिसंयुक्तनाममंत्रैः पृथक् पृथक्॥ मध्यमानामिका चैव कनिष्ठांगुष्ठतर्जनी
क्रमेणानाम वाख्यात मंगुलीनां महेश्वरी॥ ॥अथात्मरक्षादिग्बंधनं च॥ बालाबीजत्रयं पूर्वं आसनाय ततो मनुः॥ पादयोर्वि
न्यसेत्पश्चाद्बालांते त्रिपुरेश्वरी॥ आत्मानं रक्ष रक्षेति कुर्याद्रक्षां हृदि स्पृशन्॥ तथैवास्त्रेण मुद्रैया कुर्याद्दिग्बंधनं ततः॥ ॥
अथासनन्यासः॥ अमृतार्णवाद्यं पूर्वं आसनाय ततो मनुः॥ पादयोर्विन्यसेत्पश्चाद्बालांते त्रिपुरेश्वरी॥ पोतांबुजासनायां
ते नमो जानुनि विन्यसेत्॥ ऐं क्लीं सौः त्रिपुरेत्युक्त्वा सुंदरीति पदं ततः॥ ङें तं देव्यासनं चांते नमः उरुद्वयं न्यसेत्॥ हैं ह्क्लीं ह्सौं श्चेत्रि
पुरवासिनीति च॥ चक्रासनाय इत्युक्त्वा स्फिग्द्वये प्रविन्यसेत्॥ ह्सैं ह्स्क्लीं ह्सौं श्चेति त्रिपुराश्रीपदं ततः॥ सर्वमंत्रासनायां
ते नमो गुह्ये प्रविन्यसेत्॥ ह्रीं क्लीं त्रिपुरमालिन्यंते ततः साध्यं पदं वदेत्॥ ततः सिद्धासनं ङें तं नाभिदेशे प्रविन्यसेत्॥ ह्स्रैं ह्स्क्लीं
ह्स्सौं मंत्रे त्रिपुरांबापदं ततः॥ पर्यंकशक्तिपीठासनाय नमो वक्षसि विन्यसेत्॥ त्रिकूटविद्याबीजांते महात्रिपुरभैरवी॥ स
दाशिवमहाप्रेतपद्मासनाय च॥ नम इत्युक्त्वा ब्रह्मरंध्रस्थाने प्रविन्यसेत्॥ ॥अथ षडंगन्यासः॥ सर्वज्ञता नित्य
स्वतृप्तिर्नाचअनादिबोधश्च स्वतंत्रता च॥ अलुप्तता शक्तिमनंतता च षडाहुरंगानि शिवयोः श्रियाद्याबीजांते नामसंयोज्य जा

जातियुक्तं षडंगकं ॥ संपूर्णां चिंतयेद्विद्यां त्र्यक्षरं ध्रुरुणप्रभां ॥ स्ववक्त्रे षोडशार्णां महासौभादां स्मरेत् ॥ वामांगदेशे सौभाग्य
दंडिनीं भ्रामयेत्ततः ॥ विश्वजित्त्वाग्रहां मुद्रां पादमूले न्यसेत्प्रिये ॥ त्रैलोक्यस्य त्वहं कर्त्ता ध्यात्वैवं कीलकं न्यसेत् ॥ सर्वर्णामेव व
दनेवेष्टनत्वेन विन्यसेत् ॥ पुनः संपूर्णां वदने गलांडे विन्यसेत्प्रिया ॥ पुनः संपूर्णां यादेहे व्यापकत्वेन विन्यसेत् ॥ व्यापकां तेयो
निमुद्रां मुखे क्षिप्त्वाभिनं पव ॥ श्रीविद्यापूर्णरूपोऽयं न्यासः सौभाग्यवर्द्धनः ॥ त्रैलोक्यक्षोभयेत्याशुन्यासस्तस्त्रद्विग्रहः ॥ ॥
अथ दंडिनीमुद्रा ॥ मुष्टिं कृत्वा करेन्मध्ये तर्जनीं दंडवत्तदा ॥ सौभाग्यदंडिनी नाम रिपून् दंडयते क्षणात् ॥ ॥ अथ रिपुजिह्वा
ग्रहाः ॥ अंगुष्ठं मुष्टिगं कुर्याद्रिपूजिकाग्रहा भवेत् ॥ ॥ अथ योगिनीमुद्रा ॥ संयोज्य हस्तौ देवेशि तर्जन्यानामिकां यजेत् ॥ त
द्वामेन संसज्ज्य योन्याकारेण योजयेत् ॥ परिभ्राम्यानामिकान्तु मूर्द्धानं परितः प्रिये ॥ ॥ अथ संमोहनं न्यासः ॥ त्र्यक्षरं ध्रु
यजेद्देवी मणिबंधद्वयं न्यसेत् ॥ ललाटे मातृकां कुर्यात्षोडशार्णां स्मरेद्बुधः ॥ त्रैलोक्यमहलां ध्यायन् श्रीविद्यां मनसि स्मरेत् ॥
संमोहनाख्यो देवेशि न्यासोऽयं क्षोभकारकः ॥ ॥ अथ संहारन्यासः ॥ पादयोर्जंघयोर्जान्वोः कट्यां रंध्रनिपृष्ठको ॥ नाभौ पार्श्वद्व
योश्चैव स्तनयो रंशयोस्तथा ॥ कर्णयोर्त्र्यक्षरं ध्रुववदने न्धुनि पार्वती ॥ ततः कर्णप्रदेशे तु करवेष्टनतः क्रमात् ॥ संहारोऽयं महान्या
सो बीजैः षोडशभिः क्रमात् ॥ श्रीविद्यायाः षोडशार्णैर्न्यासे विश्वेश्वरो भवेत् ॥ ॥ सृष्ट्यर्णं विन्यसेद्देवि मातृकां पूर्ववत्प्रिये ॥

अथवशिन्यादिन्यासः॥ मातृकार्णास्वरूपांचवर्गाष्टकसमन्वितां॥ वशिनीमातृकान्यस्यबीजाष्टकसमन्वितां॥ अवर्गान्तेलि
रेवबीजंवह्निकांतेसमन्वितं॥ वामकर्णेविशोभाढ्यंविंदुनादांकितंप्रिये॥ वशिनीपूजयेत्तांचांदेवतांदेविसुव्रते॥ कवर्गान्ते
महेशानिकामेशीबीजमुत्तमे॥ मेरुभ्रंतसमुद्धार्यवागे्वाग्देवीपूजयेत्ततः॥ चवर्गान्तेधांतलांतंक्षमात्रर्यस्वरान्विते
मार्दिनीपूजयेत्तांचांदेवतांतदनंतरं॥ टवर्गान्तेवायुबीजंभूमिसंस्थंमहेश्वरी॥ वामकर्णेन्दुबीजाढ्यंविमलांवागधीश्वरीं
तवर्गान्तेजमक्षोढ्यंवामनेत्रविभूषितं॥ विंदुनादांकितंबीजंवाग्देवीमंडणायजेत्॥ पवर्गान्तेव्योमचंडंक्ष्मांतोयान्तिरसं
युतम्॥ उकारस्वरसंयुक्तंविंदुनादकलात्मकं॥ जयनीपूजयेत्तांचांदेवतांसुरवंदिते॥ जवर्गान्तेजांतकालरेफवायुसमं
न्वितं॥ वामकर्णेन्दुविन्दाढ्यंसर्वेशींपरिपूजयेत्॥ क्षमावह्निगतंतूर्यबीजेनपरिवेष्टयेत्॥ विंदुनादकलाक्रांतंकौलिः
नीवाचमर्चयेत्॥ शवर्गान्तेमहादेवीन्यसेत्सर्वार्थसिद्धये॥ शिरोललाटभ्रूमध्यकंठहृन्नाभिमंडले॥ आधारेदेहकंयावत्
न्यसेद्देविपराप्रिये॥ ॥अथषोढान्यासः॥ षोढान्यासंततःकुर्याद्येनब्रह्मांडरूपधृक्॥ विराट्स्वरूपवर्णात्माशिवःसा
क्षान्नसंशयः॥ गणेशःप्रथमोन्यासःसर्वविघ्नविनाशकः॥ तरुणादित्यसंकाशान्गजवक्त्रांत्रिलोचनां॥ पाशांकुशवराः
भीतीकारान्शक्तिसमन्वितम्॥ एतान्तुविन्यसेद्देविमातृकान्यासवत्प्रिये॥ विघ्नेश्वरःश्रियायुक्तोविघ्ननाथःह्रियान्वितः

विघ्नायकस्तथातुष्टिः शांतियुक्तः शिवोत्तमः॥ विघ्नहृत्पुष्टियुक्ताश्च विघ्नकर्त्तासरस्वती॥ विघ्नराड्रतियुक्ताश्च मेधाच गणनायकः॥ एकदंतश्च कांतिश्च द्विदंतः कामिनीपतिः॥ गजवक्त्रो मोहनीच निरंजनजटातथा॥ कपर्दभृत्तथातीव्रा दीर्घवक्त्रस्ततः प्रिये॥ ज्वालिनीसहितः पश्चान्नंदाशंकर्णस्तथा॥ वृषध्वजश्च सहसागणनाथेनसंयुता॥ कामरूपीणिकापश्चाद्गजेंद्रश्चरहायुतः॥ सूर्पकर्णस्तुजयिनी त्रिनेत्रः सत्ययायुतः॥ लंबोदरश्चविघ्नेशी महानादस्वरूपिणी॥ चतुर्मूर्त्तिः कामदाच सदाशिवयुताननः॥ मदह्वला महानादश्चामोदो विजयातथा॥ दुर्मुखश्चतथा पूर्णा सुमुखाभूमिदातथा॥ प्रमादश्चतथा भूमिरेकपादस्तथासती॥ द्विजिह्वश्चरमायुक्तः भूलम्बध्वजिनीयुतः॥ वीरश्चकर्णयुक्तश्चशैलाश्चमकरध्वजा॥ षण्मुखश्च विकर्णश्चवरदेभ्रकुटातथा॥ वामदेवस्तथालज्जावक्रतुंडस्ततःपरं॥ दीर्घघोणान्वितः पश्चाद्विरंडकधनुर्द्धरौ॥ सेनानीयामिनीयुक्तोग्रामिणीरात्रिसंयुतं॥ तमश्चचंद्रिकायुक्ताविमलश्चशशीयुतः॥ मत्तवाहनलोलाचजटीचचपलाक्षिणी॥ मुणीऋद्धियुतः पश्चात्खडंगीसुभगायुतः॥ वरणश्चैवगर्भाचवृषकेतुस्तथाशिवा॥ नक्रप्रियासत्वदाचमेघनादश्चकालिनी॥ गणेशः कालकज्ञाच गणेशोविघ्नहारिणी॥ मातृकार्णैः न्यसेद्देवि विग्रहन्यासस्ततोभवेत्॥ रक्तश्वेतस्तथारक्तं श्यामंपीतंतुपांडुरं॥ धूम्रंकृष्णंतथाधूम्रंरक्तधूम्रंविचिंतयेत्॥ रविमुख्यान्कामरूपान्सर्वाभरणभूषितान्॥ स्वैरक्तैंहृदिन्यस्य यवर्गेणाशशीततः

भ्रूमध्ये च कवर्गेण भौमं नेत्रत्रयं न्यसेत् ॥ चवर्गेण तु वंकुक्षि टवर्गेणाथ हृत्स्याने हृदयोपरि विन्यस्येत्तवर्गेण गलेमधुं ॥ पवर्गेण शनिं नाभौ राहुं वक्त्रे शवर्गतः ॥ लक्षाभ्यां तु गुदे केतुं न्यसेद्देवं वरानने ॥ ॥ अथ नक्षत्रवृन्दानां न्यासं कुर्यात्तु खप्रदं ॥ ज्वलत्कालाग्निसंकाशाः सर्वाभरणभूषिताः ॥ मतिपाणपाश्विनीमुख्या वरदाभयपाणयः ॥ युग्मयुग्मं तथा युग्मं युग्मं युग्मेन रोहिणी ॥ एकमेकं तथा द्वंद्वमेकयुग्मसमुच्चये ॥ ललाटे लोचने पश्चाद्वामदक्षिणकर्णयोः ॥ नासाद्वये च देवेशि तथा कंठे न्यसेत्क्रमात् ॥ पुष्यामं तु प्रविन्यस्य स्तनाभ्यां श्लेषनामकं ॥ दक्षस्कंधे च ऊभ्यां तु मघां स्कंधे द्वितीयके वा पूर्वफाल्गुनी दक्षे कूर्परे द्विजसंस्थिता ॥ उत्तराफल्गुनी वामे कूर्परे विन्यसेत्प्रिये ॥ हस्तवर्णस्थितो हस्तो मणिबंधे च दक्षिणे ॥ चित्रा ठठ परात्मा च मणिबंधे न्यसेत्प्रिये ॥ डवर्णान्ते तथा स्वाती विशाखारस्ता वर्णत ॥ विन्यसेत्क्रमतो देवि दक्षवामस्तनद्वये ॥ तथदस्यानुराधाश्च नाभौ न्यसेत्तु पार्वती ॥ धकारेण तु तां ज्येष्ठां न्यसेद्दक्षकटौ प्रिये ॥ नपफभ्यां तथा मूलां न्यसेद्वामकटौ प्रिये ॥ पूर्वाषाढां बकारेण दक्षोरौ विन्यसेत्ततः ॥ भकारेणोत्तराषाढां वामोरौ तदनंतरं ॥ मकारयुक्तो श्रवणां दक्षजानुनि विन्यसेत् ॥ परस्थितां धनिष्ठां तु वामजानुनि विन्यसेत् ॥ लकारेण महादे विन्यसेत्शतभिषां प्रिये दक्षजंघागतां पश्चात्पूर्वभाद्रपदां ततः ॥ वशर्णास्थितां न्यस्य वामजंघागतं क्रमात् ॥ षशहोत्तरभाद्रपदां तथा दक्षिण

पादके॥ लक्षाभ्यां विंडुसर्गाभ्यां रेवती च तथा प्रिये ख्सकारेण ततो विंडुविसर्गाभ्यां च रेवती॥ वामपादे प्रविन्यस्य योगिनीन्यासमाचरेत्॥ सितासितारुणां च धूम्रचित्रापीतांश्च चिंतयेत्॥ चतुर्भुजाः सर्वे चैवक्रैः सर्वाभरणभूषिता॥ डंडीवीजद्वयं चोक्राडमलवरये प्रिये॥ यामकर्णान्तनादाढ्यो डाकिन्येन महस्यपि॥ स्वरांते तु पृवक्रव्यं चांते रक्षपदद्वयं॥ त्वगात्मने कंठदेशविशुद्धौ विन्यसेत्प्रिये॥ ककाराद्ये डाकिनी तु रकाराद्येक्षरे क्रमात्॥ पूर्ववद्वीजसंयुक्तैरसृगात्मां च संन्यसेत्॥ अनाहते न्यसेत्पश्चात् डकारादि फकारगैः॥ लाकिनी च तथा देवी मांसाभ्यां मणिपूरके॥ वरवर्णा काकिनी तु स्वाधिष्ठाने तथा सिधांमेदस्वरूपां विन्यस्य षशवर्णाश्च किंकिनी॥ मूलाधारे स्थिररूपां तु विन्यसेद्वीरवंदिते॥ हक्षवर्णौ सितां चैव मज्जा हाकिनिकामयेत् ब्रह्मरंध्रे महेशानि न्यासोयं योगिनीक्रमात्॥ ॥ राशिन्यासं ततः कुर्यात्सर्वरक्षाकरं सदा॥ रक्ताश्वेत हरिद्वर्णपांडुचित्रासितान्न्यसेत्॥ पिशंगपिंगलौ वभ्रुकर्वराशितधूमतो॥ अकारादिचतुःकेन विन्यसेत्सुरवंदिते॥ मेषं दक्षिणगुल्फे तु ततो वृंदेन वैवृषं॥ न्यसेज्जानुनि देवेश मिथुनं वृषणे ततः॥ ताभ्यां कर्कटकं कुक्षौ ह्वाभ्यां स्कंधे तु सिंहकं॥ अनुस्वारविसर्गाभ्यां शवर्णेन च कन्यकां॥ दक्षिणे तु शिरोभागे विन्यसेद्वीरवंदिते॥ तथा वामशिरोभागे कवर्गेण तु लां न्यसेत्॥ चवर्गेण तथा स्कंधे वृश्चिकं विन्यसेत्प्रिये॥ टवर्गेण तथा संधौ धनिनं विन्यसेत्प्रिये॥ मकरं तु तवर्गेन हृषणे विन्यसेत्प्रिये॥ पव

गेणतथाकुंभेवामजानुनिविन्यसेत् ॥ यवर्गेणक्षकारेणमीनंगुल्फेतुलात्मके ॥ ॥ अथपीठानिविक्षिनाविन्यसेत्सुरवंदि
ते ॥ सितासितारुणाश्यामहरित्पीतान्यनुक्रमात् ॥ पुनःपुनःक्रमाद्देवीपंचाशत्पीठपंक्तयः ॥ पीठानिसंस्मरेद्विद्वान्सर्वका
मार्थसिद्धये ॥ कामरूपंमहापीठंपीठंवाराणसीततः ॥ नेपालंचतथापीठंतथावैपौंड्रवर्द्धनं ॥ पुरस्थितंतथापीठंचल
स्थितंततःपरं ॥ पूर्णशैलंमहापीठंसर्वदंचततःपरं ॥ आम्रातकेश्वरंपीठमेकाम्रंचततःपरं ॥ त्रिस्रोतंपीठमनघंकाम
कोटिमतःपरं ॥ कैलासंभृगुपीठंचकेदारंचंद्रपूरकं ॥ श्रीपीठंचतथोंकारंजालंधरमतःपरं ॥ मालवंचतथापीठंकुलान्तं
देवकोटकं ॥ गोकर्णंचमहापीठंमारुतेश्वरमेवच ॥ अट्टहासंचविरजंपीठंराजगृहंतथा ॥ महापथंकोल्लगिरंमेलापुरम
तःपरं ॥ कोलेश्वरमहापीठंमहापीठंजयंतिकां ॥ पीठमुज्जयिनीचैवविचित्रंक्षीरकाभिधं ॥ हस्तिनापुरपीठंचउड्डीशंचप्रयाग
कं ॥ षष्ठीशंचतथापीठंमायीपूरंजलेश्वरं ॥ मलयंचमहापीठंश्रीशैलंमेरुकंगिरिं ॥ महेंद्रंवामनंचैवहिरण्यपुरमेवच ॥ म
हालक्ष्मीमयंपीठंडोडीयानमतःपरं ॥ छायाछत्रपरंपीठंतथैवपरमेश्वरि ॥ पंचाशत्पीठविन्यासंमातृकांविन्यसेत्प्रिये ॥
गणेशैःप्रथमोन्यासद्वितीयस्तुग्रहैःस्मृतः ॥ नक्षत्रैस्तुतृतीयस्याद्योगिनीभिश्चतुर्थकं ॥ राशिभिःपंचमोज्ञेयःषष्ठःपीठैर्निगद्य
ते ॥ एवंत्रिपुरसुंदर्याषोढान्यासोविधीयते ॥ षोढान्यासंमहादेवीन्यासमात्रान्महेश्वर ॥ ॥ अथत्रिपुरान्यासः ॥ त्रिपुराख्यंत

तोन्यासंकुर्यात्कामार्थसिद्धये॥ त्रिबीजपूर्वमातृकायाङेन्तमेतांमहेश्वरी॥ त्रिपुराख्यांन्यसेद्देवी मातृकायाःस्थलेक्षमात्र॥ अस्यान्न
न्यासमात्रेणजीवन्मुक्तोनसंशयः। ॥अथकामरतिन्यासः॥ अथकामान्न्यसेद्देवी दाडिमीकुसुमप्रभान्॥ वामांगशक्ति
सहितान्पुष्पबाणेक्षुकार्मुकान्॥ शक्तिस्तुकुंकुमनिभाःसर्वाभरणभूषिता। नीलोत्पलकराध्येयास्त्रैलोक्याकर्षणक्षमाः
न्यसेत्कामंरतीपश्चात्कामप्रीतिपरेश्वरि। कांतेशःकामिनीपश्चात्कान्तोवैमोहिनीयुतः॥ कामुकःकमलायुक्तःकामचारोवि
लासिनी। कर्णीकल्पलतेतद्वत्कोमलश्यामलेततः॥ कामवर्द्धनसंयुक्तोविजयावसुविस्मिता॥ रामश्चविप्रयायुक्तोविशाला
क्षियुतोरमः॥ विमलोललितायुक्तोरात्रिनाथदिगंबरे। रतिप्रियश्चरामाचरतिनाथश्चकुब्जिका॥ स्मरश्चकांतयायुक्तोरम
णःसत्ययायुतः। निशाकरश्चकल्याणीमंडनोभोगिनीतथा॥ नंदीशःकामदायुक्तोमदनश्चसुलोचना॥ युक्तावल्लायुतोदेवीन
थानंदायितमभिधः॥ निशाचरश्चमेदिन्यासहितोगस्ततःपरं॥ कलहःप्रिययायुक्तोपुष्पधन्वाचकांक्षिणी॥ महाधनुश्चसुमुखी
ग्रामणीनलिनीयुतः॥ भीमश्चजटिनीयुक्तोभ्रामणोयामिनीयुतः॥ भ्रमणःशिखिणीयुक्तःश्यामसुगन्धेततःपरं॥ भ्रामणीरमया
युक्तोभृगुर्भूमिनततःपरं॥ भ्रांतभ्रामरलोलाचभ्रामावहसुचंचले॥ मोहनोदीर्घजिह्वाचसेवकश्चतथासती॥ तथाचमुग्धलोला
क्षीमोहवर्णनभंगिनी॥ मोहनश्चचपेटाचमन्मथोनाथयासह॥ मतंगोमालिनीयुक्तोमंगनायकहंसिनी॥ गायकेनसमायुक्तो

तथावैविश्वतोमुखी॥ गजनंदिकयायुक्तोगीतीवतदनंनर॥ ततकः सहरांसेन्यालेषः कांतिसमन्वितः॥ डन्मन्नः कलंकंठोव
मत्तश्चैवनृकोदरी॥ मेघःश्यामान्वितोदेवीविलंविनीक्रमात्प्रिये॥ अकाराद्यैर्मातृकाद्यास्थानेषुविन्यसेत्प्रिये॥ अनेनन्यास
योगेनत्रैलोक्यक्षोभकोभवेत्॥ ॥अथनवयोनिन्यासः॥ नवयोन्यात्मकंन्यासंवालावीजैस्त्रिभिःक्रमात्॥ त्रिषुत्रिषुचस्था
नेषुवक्ष्यमाणाक्रमेणच॥ कर्णयोःचिवुकेभ्रूयोगंडयोर्यरतेतथा॥ नेत्रयोर्नासिविन्यस्यदंशयोर्जठरेपुनः॥ ततःऊर्परयोः
ऊक्षौजानुनोर्लिंगमूर्द्धनि॥ पादयोर्गुह्यदेशेचपार्श्वयोर्हृदयांवुजे॥ स्तनद्वयेकंठदेशेवीजंप्रत्येककंन्यसेत्॥ नवयोन्यात्म
कोन्यासःप्रोक्तोयंपरमेश्वरि॥ ॥अथक्रमेणपीठतत्वश्रीचक्रन्यासः॥ पुनर्वालांसमुच्चार्यचतुरस्रेतुचिंतयेत्॥ पुनर्वालांस
मुच्चार्यचतुरस्रेतुचिंतयेत्॥ पुनर्वालांसमुच्चार्यगोलकेनाविचिंतयेत्॥ गोलकत्वेन्यासयोगेनश्रीचक्रंपरिचिंतयेत्॥ षट्चक्रे
षुललाटेषुसीमंतेचशिरोविले॥ नवस्थानेषुसंकल्प्यन्यसेद्विततःपरं॥ ॥अथश्रीविद्यागुरुन्यासश्च॥ शिरोललाटेभ्रूव
क्रजिकायत्संधिकोटिषु॥ षोडशार्णान्न्यसेद्वक्रेस्वरस्थानेषुवक्रमात्॥ ललाटगलहृन्नाभिमूलाधारेषुपंचके॥ ब्रह्मरंध्रे·
उवेस्थानेवीजत्रयमथोन्यसेत्॥ आधारेहृदयेब्रह्मरंध्रेवीजत्रयंततः॥ करेपादेषुहृदयेपंचवीजानिविन्यसेत्॥ व्यापकंपा
लकंकुर्यात्मनासोभाग्यहेतवे॥ श्रीविद्याहृदयेदेविसंपूर्णांविन्यसेत्सुधीः॥ श्रीविद्यांब्रह्मरंध्रेत्वपरपृष्ठतःगुरवःमात्॥ ॥

सर्वलोकवशंकरी ॥ पराबीजं समुद्धार्य्य नित्यक्लिन्ने मदद्रवे ॥ वह्निजायान्वितो मंत्रो नित्याक्लिन्नेयमीरिताः ॥ सर्वसौभाग्यदा
नित्यं सर्वैश्वर्य्यप्रदायिनी ॥ प्रणवं पूर्वमुद्धृत्य तथांकुशपुटं लिखेत् ॥ तन्मध्ये विलिखेद्देवि भवोयात्मकमक्षरं ॥ चवर्गम
त्यहीनं तु विलिखेद्वह्निसंस्थितं ॥ चतुर्दशस्वरोपेतं विंदुनादात्मकंपरं ॥ वह्निजायान्वितो मंत्रो भेरुंडायाः फलप्रदः
भुवनेशीं समुद्धार्य्य ईं ताचवह्निवासिनी ॥ हृदंतोयमनुर्देवि विधेयं वह्निवासिनी ॥ ॥ प्रणवं भुवनेशानिं फलं मात्मकम
क्षरं ॥ सविसर्गं शशी पश्चान्नित्यक्लिन्ने मदद्रवे ॥ वह्निजायान्वितो विद्या सर्वैश्वर्यफलप्रदा ॥ महावज्रेश्वरी विद्या प्रसंगा
घसमीरिता ॥ ॥ पराबीजं समुद्धार्य्य शिवदूतीचङेयुतं ॥ हृदंतेव मनुर्देवि द्वितीयं सर्वकामदं ॥ श्रींकारबीजमुद्धार्य्य परां ने
वरुमालिखेत् ॥ ~~[illegible] विधेयं द्वादशाक्षरी~~ खेचवक्षं समालिख्य स्त्रीबीजं च समालिखेत् ॥ ह्रूंकारं क्षेपरान्तास्त्व
विधेयं षोडशाक्षरी ॥ ॥ अथवा ॥ खेचस्त्रींचेछूं ह्रूं खेचवक्षं विसर्गं समालिखेत् ॥ ह्रूंकारं च परादेवी विधेयं द्वादशाक्षरी ॥
त्वरितानाम विधेयं त्रिषु लोकेषु दुर्लभा ॥ ॥ सर्वसिंहासनमयी बालेव कुलसुंदरी ॥ बालयाऽत्रितां कुर्यात्तथाचेतस्य भैर
वी ॥ पंचबाणांश्च देवेशि नित्याशक्राक्षरी भवेत् ॥ त्रैलोक्यविमला विद्या नित्यास्यात्परमेश्वरि ॥ पंचाक्षरं बाणबीजं नित्याये
मपराप्रिये ॥ प्रणवं भुवनेशानीफलेमात्मकमक्षरं ॥ स्वमातृकं द्वितीयश्च भुवनेशांकुशान्ततः ॥ नित्यशब्दं समुद्धृत्य संबुध्यान्तु

अथ तिथिन्यासः॥ तिथिनित्यास्ततो देवि मातृकास्वरसंयुताः॥ मातृकावन्यसेदङ्गे सर्वसौभाग्यदायिकाः॥ ॥अथ षोडशी नित्या
न्यासः॥ प्रथमा सुंदरी विद्या महात्रिपुरसुंदरी॥ कामेश्वरी समाख्याता तथैव भगमालिनी॥ नित्यक्लिन्ना च भेरुंडा तथैव वह्निवा
सिनी॥ वज्रेश्वरी च दूती च त्वरिता कुलसुंदरी॥ नित्या नीलपताका च विजया सर्वमंगला॥ ज्वालामालिनि चित्रांता पंचदश प्रकी
र्तिताः। ॥अथैतासां क्रमेण मंत्रमाह॥ शृणु देवि प्रवक्ष्यामि नित्यामंडलमुत्तमं॥ कामेश्वरी महाविद्या सर्वलोकवशंकरी।
बालावाग्भवहृद्वांते कामेश्वरिपदं लिखेत्॥ इच्छाकामफलप्रांते प्रदे सर्वपदं लिखेत् ततः सत्ववशं ब्रूयात्करी सर्वजगत्पदम्॥
क्षोभनांते करं ब्रूयात् हूंकारत्रितयं लिखेत्॥ पंचबाणांसमालिख्य क्लिन्ने मेनकुमारिकां॥ एषा कामेश्वरी विद्या प्रसंगात्कथिता प्रिये
वाग्भवं भगशब्दांते भगे भगिनि चालिखेत्॥ भगोदरि भगांते च भगमाले भयावहे॥ भगगुह्ये भगप्रांते योनिप्रांते भगांकिते॥ नि
पातिनी च सर्वांते ततो भगवशंकरि॥ भगरूपे ततो लिख्य नीरजायतलोचने॥ नित्यक्लिन्ने भगप्रांते स्वरूपे सर्वचालिखेत्॥ भगा
नि मे ह्यानयेति वरदेति समालिखेत्॥ रेते सुरेते सुभगे क्लिन्ने क्लिन्नद्रवे ततः॥ क्लेदय द्रावयद्वेव सर्वसत्वान् भगेश्वरि। अमोघे भग
विच्चे क्षुभ क्षोभय सर्वेच। सत्वान् भगेश्वरी ब्रूयाद्वाग्भवं ब्लूं जमादिकं॥ भें ब्लूं मों ब्लूं हें ब्लूं हें ब्लूं क्लिन्ने चैव ततः परं॥ सर्वाणि च भग
न्यंते मे वशमानयेति च॥ स्त्रीबीजं चाह प्रांते वलमात्मकमक्षरं॥ भुवनेशीसमालिख्य विद्येयं भगमालिनी॥ प्रसंगात्कथिता विद्या

षोडशाक्षरी ॥ पंचांगुलीषु करयोर्ब्रह्मरंध्रे मुखे हृदि ॥ एवं विन्यस्य नाभ्यादिपादांते चैवमङ्गजे ॥ गलादिनाभिपर्यंते मपरं हि ततः
रो ब्रह्मरंध्रादिकंठांतमेकं विन्यस्य पादयोः ॥ अंगुलीषु च विन्यस्य न्यासोयं स्थितिकारकः ॥ ॥ अथ सृष्टिन्यासः ॥ सृष्टिन्या
सं ततः कुर्यात्सर्वसिद्धिप्रदायकं ॥ ब्रह्मरंध्रांतिके भाले घ्राणे नेत्रे श्रुतोष्टके ॥ दंतांतोर्द्ध करे देवि जिह्वायां गलकूपके ॥ पृष्ठे सर्वां
गहृदये स्तनकुक्षिषु लिंगके ॥ श्रीविद्यार्णो न्यसेद्देवि मंत्री सर्वसमृद्धये ॥ ॥ अथ स्वदेहे देव्या अभेदत्वं ध्यायथोक्तकामक
लां ध्यात्वा आयुधन्यासः कार्यः तथा च ॥ एवं कामकलारूपं देवतामयमात्मनः ॥ वपुर्विचिंत्य शिवयो रायुधन्यासमाचरेत्
द्रां द्रीं क्लीं ब्लूं सः इत्येते कामबाणाः प्रकीर्तिताः ॥ यां रां लां वां सां इदं कामेश्वर्या बाणपंचकं ॥ द्रादि पंच यादि पंचकं संमोहनस
मं ततः ॥ ऐं तत्कामेश्वरधनुः ऐं नमोंतं समुद्धरेत् ॥ अनेन वशगा धानो हस्ते संधारयेद्धनुः ॥ वामे देव्यास्तथा मंत्री धारयेदैक्षवध
नुः ॥ द्रादियादीन्निजे जंभनेभ्यः कामेश्वरीपदांतिके ॥ बाणाय नमः इत्येतान् दक्षिणाधः करे निजे ॥ देव्याः प्रविन्यसेद्बाणान् पौः पा
न्तं पंचव साधकः ॥ द्रादि पादिनि भूयोपि मुखश्चांते सविंदुकं ॥ स्याद्वशीकरणायेति कामेश्वरपदं ततः ॥ पाशाय नमः इत्यंते वामो
र्द्धे विन्यसेत्करे ॥ पादि द्रादि निगगनं वह्नि वामाक्षिविंदुमत् ॥ स्याद्वशीकरणायेति ततः कामेश्वरीति च ॥ पाशाय नमः इत्येवं वा
मोर्द्धे विन्यसेत्करे ॥ द्रादि पादि निक्रों सर्वस्तंभनाय पदं ततः ॥ कामेश्वरिपदार्द्धं मंकुशाय नमो लिखेत् ॥ दक्षिणोर्द्धकरे देव्या

मदद्रवे।। कचवं चांकुशं देवि विद्यानीलपताकिनी।। ।। षांतं कामसमायुक्तं ततः शक्रस्वरान्वितं।। विजयायेन मोदेवि नित्येयं
विजयाप्रिये।। ।।अथवा।। वांते कालाग्निवायुश्च ततः शक्रस्वरान्वितं विजयायेन मोदेवि नित्येयं विजयाप्रिये।। ।।अथवा।।
वांते कालाग्निवायुश्च ततः शक्रविभूषितः।। नादबिंदुकलायुक्ता विद्येयं विजयाभवेत्।। ।।वंद्रवारुणसमायुक्तं ताराबीजं स
मालिखेत्।। तारं हृद्भगवत्यंते ज्वालामालिनि देवि वा।। हिरूपार्थ्यं वसवांते भूतसंहारकारिके।। जातवेदसि संलिख्य ज्वलंती
पदयुग्मकं।। ज्वलेति प्रज्वलद्वंद्वं हूंकारद्वितयं लिखेत्।। चतुर्थ्यंतं ततो देवि लिखेत्सर्वमंगलां।। हृदंतोयं मनुर्देवि नित्येयं स
र्वमंगला।। ।।अथवा।। वंद्रवारुणसंयुक्तं ताराबीजं समालिखेत्।। चतुर्थ्यंतां ततो देवि विलिखेत्सर्वमंगलां।। हृदंतोयं मनु
र्देवि नित्येयं सर्वमंगला।। वह्निबीजत्रयं हूं च अस्त्रस्वरान्वितो मनुः।। इयं नित्या महादेवी ज्वालामालिनिकापरा।। कवर्गांते स्व
रांतं च शक्रस्वरविभूषितं।। बिंदुनादकलाक्रांतं विचित्रा परमेश्वरि।। अकारादिषु सर्वासु स्वरेषु क्रमतो जयेत्।। अः स्वरे परमे
शानि श्रीनित्या विश्वमातृका।। स्वरवद्विन्यसेन्नित्यां नीरजायतलोचने।। अथ प्रगटयोगिनीन्यासः।। आधारादिषु न्यासेच्च ना:
दांते ब्रह्मरंध्रके।। प्रकटाख्यान्न्यसेत्पश्चान्न्यासः प्रगटयोगिनी।। ।।अथ रहस्ययोगिन्यासः।। शिरोललाटे भ्रूमध्ये कंठना
भिहृन्नोवरे।। आधारब्रह्मरं[illegible] यावद्रहस्ययोगिनीं न्यसेत्।। ।।अथ स्थितिन्यासः।। स्थितिन्यासं ततः पश्चात्कुर्विद्या

विन्यसेदंकुशांततः॥ मूलेनव्यापकंकृत्वा नवमुद्रांप्रदर्शयेत्॥ ॥अथव्यापकन्यासः॥ सर्वांगेविन्यसेद्देवि व्यापकत्वेनसुं
दरि॥ ॥अथन्याससमयमाह॥ प्रातःकालेथवापूजासमयेहोमकर्मणि॥ जपकालेपिवातेषांविनियोगः पृथक्पृथक्
पूजाकालेसमस्तंवाकुर्यात्साधकसत्तमः॥ ॥अथनवमुद्राप्रदर्शयेत्॥ तथाच॥ एवंविन्यस्तदेहःसन्मुद्रांसंधारयेत्
क्रमात्॥ ॥अनामाभ्यांकनिष्ठाभ्यांमध्यमाभ्यांकरेणतु॥ अंगुष्ठावनुजाग्रेचदंडवत्तर्जनीद्वयं॥ क्षोभनीयंमहामुद्रा
विरतीतुनिगद्यते॥ एतस्याएवविधायातर्ज्जनीमध्यमेयुते॥ सर्वविद्रावणीनामद्वितीयापरिकीर्तिताः॥ एतस्याएवविधायातर्जनी
मध्यमायुतं॥ अंकुशाकाररूपेणयोजयेत्परमेश्वरि॥ त्रैलोक्याकर्षणीविद्यात्तृतीयापरिकीर्त्तिता॥ पुटाकारौकरौकुर्यात्तर्जु
न्यावंकुशाकृति॥ परिस्रृत्यक्रमेणाथमध्यमेतदधोगते॥ क्रमेणानेनमन्त्रवित्कनिष्ठानामिकाद्वयं॥ संयोज्यघर्षये
त्सर्वामंगुष्ठाग्रदेशगौ॥ सर्वावशाकरीमुद्राचतुर्थीपरमेश्वरि॥ संपुटेतुकरेयोज्योमध्यमागर्भगेनुगे॥ तर्ज्जनीभ्यांव
हिर्युक्तेअनामेसरलेकृते॥ मध्यमानखदेशेतुततोंगुष्ठौचदंडवत्॥ उन्मादिनीनाममुद्रापंचमीपरिकीर्त्तिता॥ क्रमेणपंच
बाणानांमनवःपरिकीर्त्तिता॥ एतस्याएवविधायास्तर्ज्जन्योमध्यमानुजे॥ कुर्यान्महांकुशाकारैमुद्रेयंतुमहांकुशा॥ अं
कुशाख्यंमहावीजंमनुरस्याःप्रकीर्त्तिताः॥ वामदक्षिणवाहुंतुदक्षिणंसव्यहस्तगं॥ वाहूंकुर्यात्ततोदेवीहस्तौसंघर्ष

येतक्रमात्॥ कनिष्ठानामिकाद्वंद्वंमध्यमापृष्ठगंततः॥ तर्जनीमध्यमेकुर्यात्उभयत्रमहेश्वरि॥ अंगुष्ठौसकलौकृत्वा
पार्थिवोयोजयेदिमां॥ खेचरीयंमहामुद्रात्रैलोक्यक्षोभकारिणी॥ विजयायंमहावीजंमनुरस्याःप्रकीर्त्तिताः॥ एषाम
मयमुद्रेवसर्वेषांपरिकीर्त्तिता॥ परिस्पष्टौकरेदेवित्वर्द्धचंद्राकृतीततः॥ तर्ज्जन्यंगुष्ठयुगलंयुगपद्योजयेत्तथा॥ अ
धःकनिष्ठावष्टब्धेमध्यमेनतुयोजयेत्॥ अनामिकेचकुटिलेसर्वाधस्तान्नियोजयेत्॥ वीजन्तुडेयंविख्यातामनुरस्या
हसौमिति॥ पूर्वोक्तायोनिमुद्रातुनवमीपरिकीर्त्तिता॥ शक्तिर्यद्वंस्फुरतीयंतस्मात्साधारणीभवेत्॥ वाग्भवंमनुरेतस्या
यतोविश्वस्यमातृका॥ एवंविन्यस्तदेहःसन्मुद्रासन्नद्धविग्रहः॥ अन्तर्यागविधिंकुर्याद्येनसाक्षात्स्वयंविभुः॥ अंतर्याग
विधिंकुर्याद्बहिर्यजनमाचरेत्॥ अर्घ्यादिस्थापनंकृत्वाश्रीचक्रंचसमुद्धरेत्॥ ॥अथश्रीचक्रमाह॥ विंदुस्त्रिकोणव
सुकोणदशारयुग्ममन्वस्रनागदलसंयुतषोडशारं॥ वृत्तत्रयंचधरणीसदनत्रयंचश्रीचक्रराजमुदितंपरदेवतायाः॥
एतद्यंत्रंत्रिविद्यारहितमितिकेचित्तथाह॥ चतुर्वह्निसमुत्थापंचशक्तिततःशिवे॥ प्राक्प्रत्यक्क्रममार्गेणमर्म्मसंध्या
दिकंभवेत्॥ अष्टादशंतुमर्माणिचतुर्विंशतिसंधयः॥ चतुर्भिश्चैवश्रीकंठैःपंचकैःशिवशक्तिभिः॥ चक्रक्रमेणयुक्ता
भिःसेवकाभिःपरस्परं॥ नवचक्रस्वरूपेणशंभोस्तुभवशक्तिभिः॥ चत्वारिंशत्त्रयःकोणावृत्तंचाष्टदलंतथा॥ पुनर्वृत्तंक

लापद्मं त्रिवृत्तं भूपुरत्रयं ॥ चतुर्दशांतमारभ्य भूपुरांतं महेश्वरि । चत्वारि शिवचक्राणि शक्तिचक्राणि वै शृणु ॥ चतुर्दशारमारभ्य त्रिकोणांतं महेश्वरि । पंच वै शक्तिचक्राणि दक्षिणामूर्तिसंमते ॥ अथवा ॥ आनंदभैरवमते चक्राणि शृणु यत्नतः । चतुर्दशारमारभ्य भूपुरांतं महेश्वरि । चत्वारि शिवचक्राणि शाक्तानि शृणु यत्नतः ॥ वहिर्दशारमारभ्य विंद्वंतं परमेश्वरि । पंच वै शक्तिचक्राणि त्रिविवृत्तरहितं प्रिये ॥ अथ लिखनप्रकारमाह ॥ तत्रादौ मानं यथा ॥ रत्नेय स्थंडिले यंत्रं हस्तमात्रं तथा भुवि रत्नादिभुविनिर्माणे मानमिच्छावशाद्भवेत् ॥ भेदः सकथितो देवीर वर्णांश्शृणु यत्नतः ॥ तत्र प्राङ्मुखमासीन चक्रराजं समालिखेत् ॥ भूप्रदेशे समे रम्ये सिंदूररजसाथवा ॥ कुंकुमाद्यरजोभिश्च भूमौ चक्रं समालिखेत् ॥ अंजुरे त्वं नेत्ररम्यं संधिभेदसमं कुरु ॥ अथवा रोप्यहेमाभ्यां ताम्रेवा वज्रधातुभिः ॥ पट्टे विरव्यश्रीखंडे रक्तचंदननिर्मिते ॥ पट्टे संस्थाप्य विलिखेत्स्वेखन्या हेमया प्रिये ॥ रोचनाकुंकुमाभ्यां तु कस्तूरीचंदनादिभिः ॥ ईशानाद्यग्निपर्यंतं अंजुरेखां समालिखेत् ॥ ईशानादग्नेस्तदभ्यारेखां तां कुर्याद्देशिकः ॥ एकीकृत्य ववारुण्यां शक्तिरेखा परा प्रिये ॥ त्रिकोणाकाररूपां तु तस्याः परिसंलिखेत् त्रिकोणाकाररूपां तु शक्तिद्वयमुदाहृतं ॥ पूर्वशक्त्यग्रभागे तु मानयष्टिवदाचरेत् ॥ रेखां तु परमेशानि वायुराक्षसकोणगां ॥ संधिभेदक्रमेणैव स्तयोः शक्त्यांततः परं ॥ रेखावायव्यकोणाभ्यां तदग्रात्सर्वगे कुरु ॥ वह्निमंडलमेतं तु पूर्वगां वीर

वंदिते॥ वक्रद्वयमभूदंते ततःशृणु चंद्रवरानने॥ पूर्वशक्तिसवह्निभ्यां कोणाभ्यां सुरवंदिते॥ पूर्वरेखां तु विस्तार्य्य तथा पश्चिम
वह्नितः॥ वायुराक्षसकोणाभ्यां रेखां पश्चिमगां तथा॥ विस्तार्य्य जायते देवि संधिभेदक्रमेण तु॥ योगयुग्मां पूर्वदेशे दक्षि
णोत्तरतः क्रमात्॥ तथा रेखे योनिसंस्थे पश्चिमस्यां दिशि क्रमात्॥ कोणाभ्यां योजयित्वा तु दशकोणं तथा भवेत्॥ तथै
व देवदेवेशि द्वितीयपदकोणकं॥ ईशानवह्निगे रेखे पूर्वयोग्याग्रयोः क्रमात्॥ वायुराक्षसकोणाग्रे रेखे विस्तार्य्य सुंदरि॥
पश्चिमाग्रं ततो देवि योजयेदिंद्रदिग्गते॥ एकत्र पूर्वकोणाग्रे तुं विनीतु मनोहरं॥ योजयेद्देवदेवेशि यथा पंकस्थकं भवेत्॥
दशकोणस्य देवेशि त्यक्त्वा कोणचतुष्टयं॥ दशकोणांतरे देवि मध्ये रेखां प्रवासयेत्॥ तद्वद्दक्षिणभागे तु तथा चोत्तरभागके
षट्कोणस्य ततो देवि संधिभेदक्रमेण तु॥ योनिं वह्निं च संयोज्य शक्राकारं जायते तथा॥ कक्षामध्यगतां रेखां ऋजुरूपां तु यो
जयेत्॥ त्र्यस्राकृतिं यथा देवि जायते तिमनोहरं॥ सम्मुखे पंचशक्त्यग्रे प्राश्चुरेखां चतुरस्रिकं॥ विंदुत्रिकोणमध्यांश वक्रमेतन्नि
राननेः॥ मध्यचक्रं तु यानीहि दशारयुगलं तथा॥ शक्रकोणांकितं देवि वाह्यमध्यांतरं भवेत्॥ एतच्चक्रं महेशानि सर्वसौभाग्य
वर्द्धनं॥ सर्वसाम्राज्यदं देवि सर्वोपद्रवनाशनं॥ अनेकहयमाणिक्यस्वर्णपरिपूरकं॥ महामोक्षप्रदं देवि चाखिलाशकरं
महत्॥ एतद्वाह्ये महेशानि वृत्तं पूर्णेन्दुसन्निभं॥ तद्युतं ऋक्षमीनाक्षि वसुपत्रं मनोहरं॥ ततः षोडशपत्रं तु विलिख्य सुरवंदिते

चतुरस्रं चतुर्द्वारसहितं परमेश्वरि ॥ चतुःषष्टिर्यतः कोट्यो योगिनीनां महामते ॥ चक्रेस्मिन्स्तु विशेषास्तु साधकं सानयंति
हि ॥ ॥ अथास्यावयवभेदेन संज्ञावर्णफलान्याह ॥ चतुरस्रमातृकार्णैर्मण्डितं सिद्धिहेतवे ॥ मुक्तामालिकया दीप्तं समस्वर
विराजितं ॥ त्रैलोक्यमोहनं नाम कल्पद्रुमफलप्रदं ॥ षोडशारं च शिवरूपं तु सकलालयं ॥ सर्वाशापूरकं भद्रे स्तवेस्थीपष
वर्द्धितं ॥ अष्टपत्रं महेशानि जपाकुसुमसंनिभं ॥ सर्वसंक्षोभनं नाम सर्वकामप्रपूरकं ॥ एतद्द्वयवरारोहे सृष्टिचक्रं शुभ
प्रदं ॥ सर्वाम्नायादिदेव्यानुमोदितं सर्वसिद्धिदं ॥ चतुर्दशारं देवेशि दाडिमीकुसुमप्रभं ॥ अनंतफलदं भद्रे सर्वसौभाग्यदं स
दा ॥ दशारं तप्तहेमाभं सिंदूरसदृशप्रिये ॥ सर्वार्थसाधकं चक्रं चिंतितं मनसा सदा ॥ द्वितीयमपि पद्मार्गं जवाकुसुमसंनिभं
सर्वरक्षाकरं चक्रं महाज्ञानमयं शिवे ॥ एतद्द्वयं महेशानि स्थितिचक्रं सुखप्रदं ॥ दक्षिणाम्नायपूज्यं च यथेप्सितफलप्र
दं ॥ अष्टकोणं वरारोहे बालार्ककिरणारुणं ॥ पद्मरागसमप्रख्यं सर्वरोगहरं सदा ॥ उपरस्थं सहस्राभं वंधूककुसुमप्रभं
सर्वसिद्धिप्रदं चक्रं सकलालयमीश्वरी ॥ त्रिकोणं सर्वसंभूतं कारणं भ्रांतिदं सदा ॥ बिंदुचक्रं वरारोहे सर्वानंदमयं प्रिये
सदाशिवमयं चक्रं नायकं परमेश्वरि ॥ एतच्चक्रं तु संहाररूपं ब्रह्ममयं सदा ॥ पश्चिमाम्नायसंसेव्यं त्रयमत्र प्रपूजितं ॥
श्रीकेवल्यप्रदानाच्च चतुर्वर्गैककारणात् ॥ चतुर्वर्गप्रदानाच्च श्रीचक्रमपि कथ्यते ॥ ॥ अथास्य मेरुरूपमंत्रात्मकत्व

माह॥ श्रीचक्रमपि देवेशि मेरुरूपं न संशयः॥ लकारः पृथिवीबीजं तेन भूतं वसुच्यते॥ सकारः चंद्रमा भद्रे कला षोडशरूपकः
तस्मात्षोडशपत्रं तु हकारः शिव उच्यते॥ अष्टमूर्त्तिः सदा भद्रे तस्मादष्टदलं भवेत्॥ ईकारस्तु सदा माया भुवनानि चतुर्दश
पालयेति सदा तस्माच्चक्कोणं भवेत्प्रिये॥ शक्तिरेकादशस्थाने स्थित्वा सूते जगत्रयं॥ विश्वजोनिरिति ख्याता सा विसुर्द
शरूपिणी॥ रकारात्परमेशानि चक्रं व्याप्य विजृंभते॥ दशकोणाकरी तस्मात्स्वकारो हेतिरव्ययं॥ कलादशान्वितो वह्निर्दश
कोणप्रवर्त्तकः॥ ककारान्मादनं देवि शिवाष्टत्वरूपकं॥ योनिरभ्यं तदा चक्रं वसुयोन्यंकितं भवेत्॥ अर्द्धमात्रा गुणान्भूता
नादरूपा यतः स्थिता॥ त्रिकोणरूपा योनिस्तु विंदुनादैंदवं भवेत्॥ कामेश्वरस्वरूपं च विश्वाधारस्वरूपकं॥ ॥ अथ दर्श
नफलं॥ सम्यक्क्रतुशतं कृत्वा यत्फलं समवाप्नुयात्॥ तत्फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनं॥ महाषोडशदानानि कृ
त्वा जन्न लभते फलं॥ तत्फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनं॥ सार्द्धत्रिकोटितीर्थेषु स्नात्वा यत्फलमश्नुते॥ तत्फलं लभते
भक्त्या कृत्वा श्रीचक्रदर्शनं॥ ॥ अथ पूजाफलं॥ कोटिलिंगप्रतिष्ठायां यत्फलं समुदाहृतं॥ तत्फलं लभते नूनं श्रीचक्रस्य
वपूजनात्॥ ॥ अथ दानफलं॥ भूचक्रं तेन दत्तं हि सशैलवनकाननं॥ श्रीचक्रं कारयित्वा तु यो दद्यात्साधकाय व॥ ॥
अथ श्रीचक्रपादोदकफलं॥ गंगापुष्करनर्मदा च यमुना गोदावरी गोमती गंगद्वार गया प्रयाग बदरी वाराणसी सिंधुषु

रेवासेतुसरस्वतीप्रभृतिशुब्रुह्माउभांडोदरेतीर्थस्नानसहस्रकोटिफलदंश्रीवक्रपादोदकं॥ ॥अथसामान्यपीठपुनरस्याः
यो विशेषस्तमाह॥ महावक्रस्य संस्थानं भावयेस्थिरमानसः॥ उद्यद्ब्रह्मोद्याशुभ्रः रक्तपीयूषवारिधेः॥ मध्ये हेममयी भू
मिं स्मरेन्माणिक्यमंडितां॥ नवरत्नमयं द्वीपं स्वप्रभापटलैर्दिशां॥ मुखवान्तिशेणयंत्रवलेलिहानेनभस्थलं॥ इति साहस्रसंख्य
भिः योजनानां सुविस्तरं॥ तन्मध्ये नंदनोद्याने मूर्नोन्मादनं महत्॥ करुणतोद्यपरिधिंस्वर्णप्राकारवेष्टितं॥ नित्याभ्युदितपूर्णे
उज्योत्स्नामालाविराजितां॥ सदा सहवसंतेन कामदेवेन रक्षितं॥ प्रांतेवजुलपुन्नागनागकेशरचंपकैः॥ पारिजाताम्रनारंगना
गरंगादिभुक्तिकैः॥ एलालवंगकक्कोलमालतीवकुलादिभिः॥ जंबीरमधुजंबीरदाडिमीमातुलिंगकैः॥ सेफालिकानारिकेलैः
कदलीपूगपादपैः॥ नागवल्लीसुरलतावक्रवल्लीलतादिभिः॥ खर्जूरीतालश्रीतालीहिंतालीदेवदारुभिः॥ कालागुरुमहेंद्रलु
कपित्थपनसादिभिः॥ पाटलीयूथिकाजातीसल्लकीलतिकादिभिः॥ सतोमरवनिच्छंदीकदंबवनडुंबरैः॥ वृंतेमधुकमल्लीक
रामकुंडदलैरपि॥ अतिस्फुरन्महोदारदिव्यकल्पद्रुमालिभिः॥ सर्वदाफलसंपन्नैः सर्वर्तुकुसुमोज्वलैः॥ झंकारमुखरैर्भृंगैर्गी
यद्भिः कोकिलैर्वृतां॥ माद्यत्कोकिलसल्लापवाचालितदिगंतरं॥ उन्मत्तभृंगसंबाधं कलकूजितजृंभितं॥ सारिकामधुरालापसं
पूरितदिगंतरं॥ चक्रारवक्रकारंडसारसालीविराजितां॥ मकरंदरसोन्मत्तमरालमिथुनोज्वलं॥ जातीपुन्नागसंमिश्रपरागपट

लोत्करैः। मत्तद्विर्मदसंचारैरावेष्टितमत्रयं। नानापुष्पलताकल्पसेवितं वृक्षषंडकैः॥ पर्यंकदीर्घकोत्फुल्लकमलोत्पलसंभवैः
रजोभिर्धूसरैः समस्तकसेवितं मलयानिलैः॥ ध्यात्वैवं नंदनोद्यानं तदंतः पुरागवं स्मरेत्॥ शुद्धकांचनकर्पूरवालुकाभिरलंकृतम्
सेवार्थमुत्सुकानेकसुरसिद्धनिषेवितं। तन्मध्ये मंडलं ध्यायेद्याग्रश्रुलारुणमंडलं। तरुणादित्यसंकाशं चतुरस्रं सुशोभनम्। रत्नते-
जः प्रभापुंजपंजरीकृतदिङ्मुखं। मध्यस्तम्भविनिर्मुक्तं कोणस्तंभविराजितं। महामाणिक्यवैडुर्यरत्नकांचननिर्मितं। मुक्तादा-
मवितानाढ्यं रत्नसोपानमंडितं। मंदवायुसमाक्रांतं गंधधूपतरंगितं। जातीचंपकपुन्नागकेतकीमल्लिकादिभिः। गंधोत्पल-
मितांभोजमाधवीहिमवेदिभिः। रत्नकांचनवैडूर्यमुक्तानिर्मितपक्षकैः। रत्नचामरघंटादिविमानेरूपशोभितां। वस्त्राभिश्चि-
त्रमालाभिसंभृताभिरलंकृतं। रत्नपुत्तलिकाकोटिभूषिते परमाद्भुतं। नानारत्नादिभिर्दिव्यैर्विचित्रितं विश्वकर्मणा। तन्मध्ये
वेदिकां ध्यायेत् विपुलां शतयोजनां। सहस्रादित्यसंकाशामेकमाणिक्यनिर्मितां। चतुर्द्वारशतोपेतां माणिक्यद्वारतोरणां। प्र-
दीपैः पूर्णकलशैः सर्वतः समलंकृतां। ध्यात्वैवं वेदिकामध्ये पीठं चंद्रकलामयं। चंद्रकांतशिलाक्लिप्तचतुश्चरणशोभितं। ना-
नामाणिक्यरचनाविचित्रपत्रमनोहरं। जपारुणालवदलसमाकीर्णमहामृदु। तल्पं महोपधानेन मंडितं पाटलांवरं। एवंश्री-
चक्रसंस्थानं ध्यात्वा पूजां समाचरेत्। ॥ पश्चिमां दितु मध्यांतं विलोमेन महेश्वरि। नवरत्नमयद्वीपं नवखंडविराजितं। मा-

नृकायेन तन्त्रान्मानमेतेन समर्चयेत्॥ ॥अथ यथोक्तरीत्या पीठमभ्यर्च्य कामकलापूर्विका देवी ध्यात्वा श्रीयंत्रविंदा
वाह्येत्। अन्यासां चैपुरीविंदुत्रयं नास्येव शास्त्रतः। विंदुत्रयार्द्धमात्राभिः केवलं बिम्बमातृका। तत्रस्मात्कारणाद्देवि क्षित
राशक्तिरुच्यते। विंदुत्रयसमायोगात्रिविंदो त्रिपुरा स्थिता॥ विंदुसंकल्पयेदग्रे तदधस्तात्कुचद्वयं। तदधस्त्वपरार्द्धं च विंत
येत्तदधोमुखं॥ एवं कामकलारूपा साक्षादीश्वररूपिणी॥ तत्रस्थेवं देवपीठे तत्र नित्यकलायुजे॥ तत्र कामेश्वरीपीठे निवसंत
तत्सधर्मिणी॥ आज्ञालोकत्रये यानी पुम्यविश्वीशशासती॥ ॥ अकारादिक्षकारांता वर्णावयवसुंदरी। मूलादिब्रह्मरंध्रांतं
विशंतंतुस्वरूपिणी॥ ॥उद्यद्भास्वत्समाभासां जवाकुसुमसंनिभां॥ सपःसंतप्तहेमाभां दाडिमीकुसुमोज्वलां। सुगंधोद्दामकु
सुमपूर्ववधम्मिल्लराजितां॥ तनुकेतकसंराजन्नीलभ्रमरकुंतलां॥ भंगरेखास्फुरन्मुक्तामाणिक्यतिलकोज्वलां। स्फुरद्रत्नावलीर
म्यमुकुटोज्वलकिंकिणी॥ आरक्तकस्तूरखंडवदनाविद्रुमांवरां॥ राजच्चंद्रकलास्फूर्त्तितिलकांचसमुज्वलां। कर्णालुविस्फुरन्नील
लोलाक्षी क्षेपसुंदरी॥ हारमुक्तावलीराजत्स्वर्णताटंकराजितां॥ कर्णाभूषणतेजोभिःकपोलस्थलमंजिरां॥ मुखवंशोज्वलमुक्ताकर
कमौक्तिकनासिकां॥ स्मितमाधुर्यविजितपुष्पविपारसपुरां॥ राजद्विद्रुमवल्लीभवाऽवल्लीविराजितां॥ रक्तोत्पलदलाकारसुकु
मारकरांबुजां॥ करांबुजनखज्योत्स्नाविराजितनवस्थलां॥ सुवृत्तनिविडोत्तुंगकुचभारालशांशिवां॥ नवमुक्तामणाहारपतनोन्नत

॥ तंत्रविं ॥ वक्षसं॥ शातोदरी निम्ननाभिंक्षाममध्यमसुंदरी॥ अनर्घ्यरत्नघटितमेखलालसत्किंकिणी॥ नितंबविंबद्युमगारोमराजिवि-
॥ २२५ ॥ राजितां॥ रक्तांशुकस्फुरत्तेजोव्याप्तत्रैलोक्यमंडलीं॥ दिव्यकंचुकसंराजत्स्तनचित्रविभूषितां॥ कदलीललितस्तंभसुकुमा-
रोरुराजितां॥ नवरत्नस्फुरत्तेजोमंजीरव्याप्तदेवतां॥ ब्रह्मविष्णुमहेशानस्फुरन्मौलिपदांबुजां॥ कर्पूरसकलामिश्रतांबूल-
पूरिताननां॥ प्रवालवल्लीघटितपाशंक्षौ मगुणान्वितां॥ द्वितीयाचंद्ररेखांकसृणिमाकर्षणक्षमां॥ संदीप्ताभ्रामरीभृतगुणमि-
क्षुशरासनां॥ कमलाकारसंराजत्पंचवाणांश्चबिभ्रती॥ महत्मृगमदोदामकुंकुमारुणविग्रहां॥ सर्वाभरणशोभाढ्यसर्वालं-
कारराजितां॥ सर्वदेवमयीदेवीसर्वाचारस्वरूपिणी॥ सर्वसौभाग्यजननीसर्वसौभाग्यसुंदरी॥ एवंध्यायेन्महादेवीकदंब-
वनमध्यगां॥ ॥ अथवा पादादारभ्यशिरोंतंध्यायेत्॥ ॥ उद्यत्सूर्यसहस्राभांवंधूकःकुसुमप्रभां॥ जवाकुसुमसंकाशां
पद्मरागसमप्रभां॥ तडित्पुंजनिभांतप्तकांचनाभांपरेश्वरीं॥ रक्तोत्पलदलाकारपादपल्लवराजितां॥ अनर्घ्यरत्नघटितमंजीर-
चरणद्वयां॥ पादांगुलीयकक्षिप्तरत्नतेजोविराजितां॥ कदलीललितस्तंभसुकुमारोरुद्वयां॥ नितंबविंबविलसद्रक्तवस्त्र-
परिस्कृतां॥ मेखलाबद्धमाणिक्यकिंकिनीनादविभ्रमां॥ अलक्ष्यमध्यमानिम्ननाभीशातोदरीयुतां॥ रोमराजीलताभूतमहा- ॥ गुरुः ॥
फलद्वयान्वितां॥ सुवृत्तनिविडोत्तुंगकुचमंडलराजितां॥ अनर्घमौक्तिकस्फारहारभारविराजितां॥ नवरत्नमयोदीप्तग्रैवेयव ॥ २२५ ॥

रक्तवस्त्रां। स्मितमुखामनोहारिकपोलस्थलमंजरी। स्फुरच्चंद्रकलारत्नमुकुटालोचनत्रयां। उवलावलीविलसत्काऊवल्लीचतुष्टयां
इक्षुकोदंडपुष्पेषुपाशांकुशचतुष्टयां। सर्वदेवमयीमेतां सर्वसौभाग्यसुंदरीं। सर्वतीर्थमयीदेवीसर्वदेवस्वरूपिणी। सर्वशा-
स्त्रमयीनित्यांसर्वागमनमस्कृतां। सर्वाम्नायमयीदेवीसर्वायतनसेवितां॥ सर्वानंदमयीज्ञानमातृकांसिद्धिदांपरां॥ ॥
अथावाहनमंत्रत्रिखंडमुद्रेवाह॥ महापद्मवनांतस्थे कारणानंदविग्रहे। सर्वभूतहितेमातरेह्येहिपरमेश्वरी॥ पूर्वोक्तयो-
निमुद्रायाः पृथक्खंडत्रयंकुरु। अंगुष्ठाभ्यांकनिष्ठाभ्यांमध्यमाभ्यांकरेणतु। त्रिखंडानाममुद्रेयंत्रिपुराह्वानकर्मणि॥ ॥
वह्निनाडीपुटद्वारेणागतांचिंतयेत्ततः। कामेश्वरीशिवस्यांके स्थापयेत्कुलसुंदरीं। विद्याया ह्यात्मरूपिण्या मुद्रया च त्रिखंडया।
संस्थितांचिंतयेत्तत्र श्रीपीठांतनिवासिनी। मुद्रांसंदर्शयेद्देवितर्प्येणामु त्रिधाजपेत्। सांगंसंकल्पयेद्देहे देव्यास्तुपरमेश्वरि। गं-
धपुष्पाक्षतादीनिदेव्यैसम्यग्निवेदयेत्। उपचारैःषोडशभिःसंपूज्यपरदेवतां। तर्प्पणानिपुनर्दद्यात्त्रिवारंमूलविद्यया॥ ए-
तस्मिन्समयेदेवितिथिनित्यासमर्चयेत्॥ ॥ कामेश्वर्यादिकानित्याविचित्रांतामहेश्वरि। प्रतिपत्पौर्णमास्यांतंतिथिनित्याः
प्रपूजयेत्। विभाव्यचमहाश्रीचक्रंमध्यदेशाग्रंक्रमात्। रेखासुविपुलेष्वत्रपंचपंचक्रमेणतु। अकारादिङकारांतंदक्षिणस्यांविचिं-
तयेत्। ततः स्वपूर्वरेखायांदीर्घकणादिपंचकं। विलिख्योत्तररेखायांशकारादिविलिखेत्ततः। अनुस्वारांतमात्रास्तुविसर्गेषोडशी

यजेत्॥ वामावर्त्तेन देवेशि नित्याः षोडश कीर्त्तिताः॥ प्रतिपत्तिथिमारभ्य पौर्णमास्यंतमद्रिजे॥ एकैकां पूजयेन्नित्यां महासौ
भाग्यमाप्नुयात्॥ क्रमपक्षे महेशानि पूजयेत्तिथिमंडलं॥ विचित्राद्या वरारोहे यावत्कामेश्वरी भवेत्॥ पूजनीया विलोमे
न क्रमेणापि महेश्वरि॥ कलाः षोडश देवेशि यावच्चंडकलाः क्रमात्॥ सर्व्वसौभाग्यं महादेवि प्राप्नोति गुरुशासनात्॥ ॥ कामेश्व
र्यादिका नित्या पूजयित्वा ततः क्रमात्॥ तिथिनित्यास्त्रिधा देवि पूजयेद्भाग्यहेतवे॥ एतस्मिन्समये देवि गुरुं संपूजयेद्बुधः
पुष्पसंकोचयोगेन कथयामि तवानघे॥ रश्मिवृंददलमिदं गुरूणां वशताधिकं॥ ज्ञात्वा संकोचयेत्पुष्पमामहाः सिद्धिदा
निदाः॥ पुष्पसंकोचयेन्नो येन एवं द्वादशमंततिः॥ संतत्यानरूपाञ्च न भवेद्देवताप्रिये॥ अत एव महापुष्पसम्यक्तकुंचितं
प्रिये॥ कामराजाख्यविद्याया गुरुवस्तु समुद्धिता॥ मध्यप्राक्त्र्यस्रमध्येपि गुरुपंक्तित्रिधा जपेत्॥ परांख्यां पूजयेदादौ परा
परविमर्शिकान्॥ ततोपरान्देवखौ गुरुं संपूजयेत्प्रिये॥ दिव्यौघास्तु परा सिद्धिसप्तसंख्या वरानने॥ आनंदनाथशब्दांता वि
ज्ञेया वीरवंदिते॥ परप्रकाशो देवेशि ततः परशिवो मतः॥ पराशक्तिस्तथा देवी कौलेश्वर इति प्रिये॥ शुक्लादेवी कुलेशानका
मेश्वर्यादिकाः क्रमात्॥ मुनिसंख्यास्तु गुरवः पराख्यादिस्वरूपिणी॥ भोगाः किंनस्तु समयो वेराख्या सहजास्तथा॥ परापराख्या
सिद्धौघं मानवौघश्च शृणु प्रिये॥ गगनो विश्वविमलो मदनो भुवनस्तथा॥ लीलस्वात्मप्रियः पश्चान्नागसंख्यास्तु मानवाः॥ स्व

परापरमेशानि अक्षराणिजतारमे॥ एतत्त्रयं तु नियतं देशिकानां हिताय च॥ मयोक्तं तं महेशानि पुष्पसंकुचितं प्रिये॥ मानवौ
घांतिके पश्चात्स्वगुरुत्रितयं यजेत्॥ परमेष्ठी गुरुः पश्चाद्गुरुः परमसंज्ञकः॥ स्वगुरुश्च महेशानि पूजयेच्च गुरुत्रयं॥ अथवा
मानवौघांते एकं स्वगुरुमर्चयेत्॥ अयं प्रकारः कथितः प्रकारांतरमुच्यते॥ अंते सर्वप्रकाराणां मानवौघाष्टकं तथा॥ गुरवो
नवसंख्याता एव संख्या भवंति हि॥ नवचक्रेश्वरी यस्मात्तावत्त्वं प्रकाशयेत्॥ मानवौघेन दाश्वीदश सत्र भवंति हि॥ पश्चात्सं
कोचयेत्पुष्पं नवमं श्रीगुरुं यजेत्॥ ॥अज्ञातगुरुशिष्याणां कथयामि तवानघे॥ गुरुभ्यो नमस्त्वर्थ्यपादुकाभ्यां नमो लिखे
त्॥ गुरुं तु परमांते च परमेष्ठ्यांतके तथा॥ एतेषां पादुकां तद्वदाचार्येभ्यो नमो भवेत्॥ गुरुपंक्तिप्रपूज्याथ स्वयं श्रीत्रिपुरा भवे
त्॥ गुरुपङ्क्तिविहीनेन तु गुरवः पंक्तिवर्जितः॥ पुष्पसंकोचमार्गेण मायासिद्धिकृता भवेत्॥ कृपया परमेशानि साधकानां हिताय च
गुरुक्रमं प्रपूज्याथ जयेदाम्नायदेवताः॥ त्रैलोक्यमोहने चक्रे सर्वाशापरिपूरके॥ सर्वसंक्षोभके चक्रे पूर्वाम्नायं प्रपूजयेत्॥ स
र्वसौभाग्यदे चक्रे तथा सर्वार्थसाधके॥ सर्वरक्षाकरे चक्रे दक्षिणाम्नायमर्चयेत्॥ मध्यचक्रत्रये देवि पश्चिमाम्नायमर्चयेत्॥ न
वचक्रेषु देवेशि कुबेराम्नायमर्चयेत्॥ वैंदवे परमेशानि मध्यसिंहासनं भजेत्॥ अनेनैव प्रकारेण पूजयेच्च परांबिकां॥ ॥
श्रीविद्या च तथा लक्ष्मी महालक्ष्मीतथैव च॥ त्रिशक्तिर्वारिता वै कलक्ष्मी पंचप्रकीर्तिता॥ श्रीविद्या च परंज्योतिः परा निष्कलशांभ

वी॥ स्रजपामात्रकावेत्तिपंचकोणाः प्रकीर्तिताः॥ श्रीविद्यापारिजातेशीपंचवाणेश्वरीतथा। त्रिकूटापंचवाणेशीपंचकल्पल
ताः स्मृताः॥ ॥श्रीविद्यामूलपीठेशीसुधाश्रीरमतेश्वरी॥ सिद्धिलक्ष्मीतिविख्यातापंचकामदुघास्मृताः॥ ॥श्रीविद्यास्वतन्त्रपू
र्णान्वमातेशीभुवनेश्वरी॥ वाराहीचमहादेवीपंचरत्नाः प्रकीर्तिताः॥ ॥श्रीविद्यापूजनस्थानेचक्रराजेमहेश्वरि॥ महालक्ष्मी
श्वरीहृद्मंडितासनसंस्थितां॥ सर्वसौभाग्यजननीश्रीविद्यापूजयामिव॥ इत्यर्थपरंज्योतिःकोणाचपूजयेत्सुधीः॥ अनेनैवप्र
कारेणपूजयेत्पंचपंचिकां॥ ॥अथक्रमेणतासांमंत्रमाह॥ मूलविद्यामहेशानिश्रीविद्यापरिकीर्तिताः॥ वारुणांतंवह्निसंस्थं
विंदुनादसमन्वितं॥ लक्ष्मीदैवपदंप्रोक्तालक्ष्मीवीजमुदाहृतं॥ प्रणवंपूर्वमुच्चार्यह्रीमात्मकमनुच्चरेत॥ श्रीपुटंचाद्वकमले
कमलायेप्रसीदतु॥ लायमध्यगतांभूमिंहृद्स्थानेनियोजयेत्॥ प्रसीदयुगलंदद्यात्श्रीवीजंभुवनेश्वरीम्॥ श्रियावीजांततोद
द्यामहालक्ष्मीचहृन्मनुः॥ सप्तविंशतिवर्णात्मामहालक्ष्मीमनुर्मतः॥ ॥श्रीवीजंचपरावीजंकामवीजंसमालिखेत्॥ इयंत्रिश
क्तिर्देवेशित्रिषुलोकेसुदुर्लभा॥ चंडेणमारत्नंलक्ष्मीदेवीदीर्घाक्षिमंडिता॥ विस्तुकूलेश्वरीप्रोक्ताइत्येयंवैसवीमता॥ ॥प्रणवंभु
वनेशानीविद्येयंज्ञानिवाग्भवं॥ भुवनेशीक्रवश्चैवसरवस्येनमोलिखेत्॥ इयंचपारिजातेशीपारिजातलतोपमा॥ ॥माभुवने
श्वरीविद्यासुगुप्ताकथितामया॥ परावीजंतुश्रीवीजंवल्लेमात्मकमक्षरं॥ राज्यदेराज्यलक्ष्मीतिचंङसर्गविभूषितः॥ क्लीन्मना

ष्टवीजानि सुधाब्धीः संप्रकाशिता ॥ वाग्भवं भुवनेशानिं श्रीवीजं तदनंतरं ॥ वियन्नर्दादिषष्ठेरे नित्येवं तु समालिखेत् । वियल्ला
दाक्षिकांतं वक्रो विद्येव मनुर्मतः ॥ ॥ चवर्गात्तृतयं तूर्य्यं मायारेफेंदुसंयुतं ॥ महामयं समुद्धृत्य संकर्षिणिपदं लिखेत्
काली महादिरक्ता च विषदिंदुसमन्वितं ॥ मायावीजं च कथितं सिद्धलक्ष्म्या महामनुं ॥ अत्र पूर्णा त्वदेवेशि डन्नराल्ला
यकीर्तिता ॥ मातंगिन्ये ठिठं तां च वाग्मायाश्री पुटा लिखेत् ॥ इयं मातंगिनी विद्या द्वादशार्णा समीरिता ॥ ॥ वियद
ग्निसमायुक्तं धामनेत्रें भूषितां ॥ भुवनेशी महेशानि दुर्लभा भुवनत्रये ॥ ॥ वाग्माया पूर्वमुद्धृत्य सबुध्या भगवत्यपि ॥
वार्ताली द्विशवाराही युग्मवाराहमुख्यपि ॥ अंधे अंधिनि नम्यत रुधे रुंधिन्ये तत्परं ॥ जंभे जंभिन्येन म्यंत मोहे मोहिन्येन स्
तं ॥ स्तंभे स्तंभिन्येह युक्तं मनुकस्तंभयेद्द्वयं ॥ सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववकुठरेत् ॥ जिह्वास्तंभं कुरुद्वंद्वं शीघ्रवशं कु
रुद्वयं ॥ वाग्लुंठत्रयविंदुं च मंत्रं पावकवल्लभा ॥ महाविद्या महाख्याता सर्वतंत्रेषु गोपिता ॥ ॥ श्रीविद्यापूजनस्थाने चक्र
राजे महेश्वरी ॥ महाकामेश्वरी वृंदमंडितासनसंस्थितां ॥ सर्वसौभाग्यजननीं पादुकां पूजयामि वा ॥ इमुत्वार्घ्यपरज्योतिः को
षांतं पूजयेत्सुधीः ॥ अनेनैव प्रकारेण पूजयेत्पंचपंचिका ॥ ॥ शैवं तु दर्शनं देवि वेदवेद्य प्रपूजयेत् ॥ परितेदर्शनं शाक्तं चक्र
स्यपरमेश्वरी ॥ सोरं तु दर्शनं देवि भ्रावं वै प्रथमे प्रिये ॥ शिवस्य वामतो देवि वैष्णवं दर्शनं यजेत् ॥ सृष्टिचक्रे भवेत्तत्र्य दर्शणं क्रम

लेक्षणे॥ स्थितिचक्रे च संपूज्य वै हृदर्शनमुत्तमं॥ एवं सम्पूज्य सकलं श्रीविश्वं परितोनयेत्॥ तथैतानि पुनर्दद्यात्त्रिवारं तत्व
मुद्रया॥ सर्वोपचारेणाथ मुद्रां संदर्शयेत्क्रमात्॥ ॥ अथांगावरणं कुर्यात् श्रीविद्यामनुसंभवं॥ अग्नीशासुरवायव्यमध्य
दिक्षु गपूजनं॥ माया लक्ष्मीमयं बीजं पुम्मास्त्रैव क्रमेण तु॥ कथितं योजयेद्देवि त्वयं वा परमेश्वरि॥ संपुट क्रमयोगेन त्वाथ
वावीरवंदिते॥ संयोज्य पूजयेत्सर्वाः क्रमदेववराननेे॥ ॥ त्रैलोक्यमोहनं चक्रे प्रकटा योगिनीर्जयेत्॥ सद्यः सनद्धहेमा
भापाशांकुशधराप्रिये॥ महामांडीरत्नानि सर्ववर्णांकितानि धी॥ प्रयच्छंत्यः साधकेभ्यः पद्महस्ताः स्म पूजयेत्॥ ॥
सिद्धिनी ध्यानं॥ चित्रांबरां भयकरां चंद्रभासां त्रिलोचनां॥ अणिमादिमहासिद्धिमरूपां चिंतयेच्छिवे॥ चतुरस्त्र चतुर्द्वा
रे योगिन्य सिद्धिदायिकाः॥ अणिमा पश्चिमे द्वारि दक्षकोणे प्रपूजयेत्॥ लघिमामुत्तरे देवि पश्चिमे पूजयेत्ततः॥ पूर्वद्वारे
तु महिमामुत्तरे पूजयेच्छिवे॥ ईशित्वा सिद्धि देवेशि दक्षिणद्वारि पूजयेत्॥ वशित्व सिद्धिं वायव्ये तेनैव क्रमतो यजेत्॥ भुक्ति
सिद्धिं तथाग्नेये तेनैव क्रमभावतः॥ इच्छासिद्धिं पूर्वभागे नैऋत्ये च प्रपूजयेत्॥ प्राप्तिसिद्धिः सर्वकामासिद्धिदा परमेश्वरि॥
मध्योर्द्ध्व क्रमयोगेन त्वात त्वासुरवंदिते॥ ॥ ब्राह्मी माहेश्वरी चैव तथैंद्राणीत्ततीयके॥ कौमारी वैष्णवी चैव षष्ठी वाराहिका
भवेत्॥ चामुंडा च महालक्ष्मीरपरेणा च मागतम्॥ ब्रह्माण्याद्यास्तु तत्रैव मष्टव्याः क्रमशः प्रिये॥ ब्रह्माणीपीतवर्णा च चतुर्भि

शोभिता मुखैः॥ वरदाभयहस्ता च पुस्तकाक्षरमत्कराः॥ माहेशी श्वेतवर्णा च त्रिनेत्रास्त्रधारिणी॥ कपालमेनं परशुं दधा
ना पाशिभिः प्रिये॥ कौमारी रक्तवर्णा च शक्तितोमरवारिणी॥ वरदाभयहस्ता च ध्यातव्या परमेश्वरी॥ वैष्णवी श्यामवर्णा च
शङ्खोत्पललसत्करा॥ चामुंडा कृष्णवर्णा च शूलं डमरुकं तथा॥ खड्गं वेतालकं चैव दधाना दक्षिणैर्भुजैः॥ महालक्ष्मीस्तु पी
ताभा पद्मदर्पणमेव च॥ मातुलुंगफलं चैव दधाना परमेव च॥ ॥पश्चिमादिक्रमेणैव प्रकटभ्यनुरस्त्रकं॥ ॥क्षोभनद्राव
णाकर्षवश्योमादसमहांकुशाः॥ खेचरीबीजयोन्याख्यत्रिखंडाचक्रमापजेत्॥ वामावर्त्तेन संपूज्य वायव्यादिषु पूर्ववत्॥ एताः सं
पूज्य देवेशी त्रिपुरां पूजयेत्परां॥ ॥अणिमासिद्धिपुरतः सर्वकामार्थसाधकी॥ सर्वसंक्षोभणी मुद्रां दर्शयेत्कमलालये॥ सर्वा
शापूरकं चक्रं गुह्ययोनिमधिष्ठितं॥ षोडशारं ततो देवि पूजयेत्काम्यसिद्धये॥ कामाकर्षिणिकादेवि बुद्ध्याकर्षणरूपिणी॥ अहं
काराकर्षणी देवी शब्दाकर्षणरूपिणी॥ स्पर्शाकर्षणरूपा च रूपाकर्षणरूपिणी॥ रसाकर्षणरूपा च गंधाकर्षणरूपिणी॥
चित्ताकर्षणरूपा च धैर्याकर्षणरूपिणी॥ स्मृत्याकर्षणरूपा च नामाकर्षणरूपिणी॥ पश्चिमादिक्रमेणैव षोडशारे स्वरान्विता
एता नित्याः कलादेवी चंद्रमंडलमध्यगाः॥ स्वरलग्ताः स्मेरत्रिस्यां स्मेरपीयूषवर्षिणी॥ पाशांकुशसुधापूर्णा काश्मीरघटदानवाः
चक्रेश्वरीं यजेद्देवी त्रिपुरेशी समृद्धिदां॥ कामाकर्षणरूपायाः पुरतः पूरयेत्प्रिये॥ सर्वविद्रावणी मुद्रां दर्शयित्वा निवेदयेत्॥

सर्वसंक्षोभके चक्रे यजेत्तु गुप्ततरं बुधः॥ अनंगकुसुमाश्चाद्यां कवर्गेण प्रपूजयेत्॥ दक्षिणे च चवर्गेण तथा चानंगमेखलां
अनंगमदनां पश्चाट्टवर्गेण च पश्चिमे॥ तवर्गेणोत्तरे पश्चादनंगमदनातुरां॥ वह्निकोणेंगरेखां च पवर्गेण प्रपूजयेत्॥ दक्षि
णेश्च वर्गेण तथा चानंगमेखलां॥ अनंगमदनापश्चो॥ राक्षसेनंगयवर्गेण च पूजयेत्॥ वायव्येतु शवर्गेण तथानंगाङ्कु
शां यजेत्॥ ऐशान्यां लशवर्गेण सयुज्यानंगमालिनी॥ देवीगुप्ततरा रक्ता वंधूककुसुमप्रभा॥ पाशांकुशस्फुरंनालनीलोत्प
लकरां स्मरेत्॥ चक्रेश्वरी ततो देवी यजे त्रिपुरसुंदरी॥ अनंगकुसुमाद्यस्तु सर्वसाम्राज्यदायिनी॥ सर्वाकर्षणमुद्रां च दर्शयेत्तु
रवंदिते॥ ॥ चक्रपूजां प्रयुज्याथ चतुर्थं चक्रमर्चयेत्॥ महासौभाग्यदे चक्रे कटवर्णविराजिते॥ संप्रदायाख्ययोगिन्यः सर्वाभर
णभूषिताः॥ पाशांकुशौ दर्पणं च पानपात्रं सुधामयं॥ विभ्रत्यः सर्वसुभगाः पश्चिमादिविलोहिताः॥ सर्वसंक्षोभणी शक्तिः सर्ववि
विणी तथा॥ सर्वाकर्षणशक्तिश्च सर्वाह्लादनकारिणी॥ सर्वसंमोहनी शक्तिः सर्वस्तंभनरूपिणी॥ सर्वजंभनशक्ती च सर्वतोवशका
रिणी॥ सर्वरंजनशक्तिश्च सर्वात्मावशकारिणी॥ सर्वार्थसाधकं शक्तिः सर्वसंपत्तिरूपिणी॥ सर्वमंत्रमयी शक्तिः सर्वदुःखक्षयंकरी
चक्रेश्वरी सिद्धिदात्री परा त्रैपुरवासिनी॥ योगिनी पूजयेत्तत्र संप्रदायेभिदां परं॥ वश्यमुद्रां प्रदर्श्याथ निवेदयत्तदनंतरं॥ ॥ सर्वा
र्थसाधके चक्रे नभवर्णविशोभिते॥ ॥ जवाकुसुमसंकाशा स्फुरन्मणिविभूषिता॥ महासौभाग्यगंभीरापीनरत्नघनस्तनी॥ र

त्नयेरी चिनिस्सिप्रसाधके स्मितमानसः॥ नानारत्नमयादिव्यान् दधती हसितानना॥ पाशांकुशौ वदधती: स्मेरेशा नेत्रयोगिनी
पश्चिमादिविलोमेन पूजयेत्सर्वसिद्धिदा॥ सर्वसिद्धिप्रदा देवी सर्वसंपत्प्रदा तथा॥ सर्वप्रियकरी देवी सर्वमंगलकारिणी॥ सर्व
कामप्रदा चैव सर्वदुःखविमोचिनी॥ सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी॥ सर्वांगसुंदरी देवी सर्वसौभाग्यदायिनी॥ पश्चिमादि
विलोमेन दशारे पूजयेदिमाः॥ सर्वसिद्धिप्रदा देवि पुरतः क्रमनायिकां॥ सर्वसिद्धिप्रदा देवीं पूजयेत् त्रिपुरांबिकां॥ सर्वोन्मादिनि
मुद्रां च दर्शयित्वा निवेदयेत्॥ सर्वरक्षाकरे चक्रे मक्षवर्णविराजिते॥ पश्चिमादिविलोमेन निगर्भयोगिनीं जयेत्॥ उद्यद्भास्व
त्सहस्राभा मुक्तालंकारभूषिता॥ पाशांकुशधज्ञानमुद्रा वरदसत्कराः॥ देवी प्रपूजयेदत्तः यथेप्सितफलप्रदाः॥ सर्वज्ञा सर्वश
क्तिश्च सर्वैश्वर्यप्रदा तथा॥ सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी॥ सर्वाधारस्वरूपा च सर्वपापहरा तथा॥ सर्वानंदमयी देवी
सर्वरक्षास्वरूपिणी॥ सर्वेप्सितप्रदा देव्याः गुह्याः सर्वार्थसिद्धिदा॥ पश्चिमादिक्रमेणैव पूजयेत्त्वं क्रियानिके॥ सर्वज्ञपुरतो देवी चक्रे
शीमालिनीं जयेत्॥ महांकुशामहामुद्रां दर्शयित्वा निवेदयेत्॥ मध्यचक्रे महेशानि योगिनीं पूजयेत्प्रिये॥ सर्वरोगहरे च
क्रे वसुकोणे शुभेश्वरी॥ सर्वरोगहरे चक्रे वगोष्ठकविन्नंभने॥ पश्चिमादिविलोमेन रहस्ययोगिनीर्यजेत्॥ श्रीकंठपरितोध
स्ताद्दाडिमीकुसुमप्रभाः॥ रक्तवस्त्रपरीधाना रक्तगंधानुलेपना॥ रक्तपुष्पाक्षतैः सम्यक् पूजयेत्सर्वसिद्धिदा॥ नानाभरणगंभीराः

पंचवाणाधनुर्द्धरान् । पुस्तकंवरदानंचदधतीवर्गसंस्थिता । वर्गाष्टकमलवर्णाबिंदुनादांकितान्लिखेत् ॥ ॥ अवर्गान्तेरेफ
वक्ष्यावामकर्णेंदुबिंदुमान् । देवीवाग्देवतापूज्यायेशिनीनामसुंदरी ॥ ॥ कवर्गान्तेकलयुतांपरांकामेश्वरींलिखेत् । कवर्गा
तेनवक्ष्याथवामनेत्रशशीसमं ॥ अनेनमादिनीपूज्याटवर्गान्तेततःपरं ॥ वायुस्थावामकर्णेंदुबिंदुमत्क्लिकलांयजेत् । तव
र्गान्तेजकालक्ष्यावामाक्षीदुकलात्मकं ॥ अरुणांपूजयेद्देविपवर्गान्तेचकथ्यते ॥ व्योमबीजमहीनीरवायुवंडेशभूषितं ॥
अनेनतजपनीपूज्यायवर्गान्तेचलिख्यते ॥ सरेफकालपवनप्राणावांकेप्रपूजयेत् ॥ ॥ सर्वेश्वरीलवर्गान्तेक्षमवह्निशबिंदु
मत् ॥ अनेनकौलिनीदेविपूजयेदष्टमींबुधः ॥ अष्टकान्तेमहेशानिएतावाग्देवतायजेत् ॥ ॥ पंचवाणान्समुद्धार्यकामन
कामेश्वरीमयान् । भंजनाख्यामहेशानिपूजयेद्बाणदेवतां ॥ धर्मार्थकंकामबाणंद्वितीयंत्वथमात्मकं ॥ कामेश्वर्यामोहना
ख्यांपूजयेद्बाणदेवतां ॥ द्वितीयंभुवनेशानिपाशयुग्मंवशंकरं । कामेशस्यचकामेरूपांस्त्रैलोक्याकर्षणंप्रिये ॥ अंकुशंचसमु
द्धार्यस्तंभनायसमुद्धरेत् । कामेश्वरस्यकामरूपाश्वांकुशंपूजयेत्क्रमात् ॥ ॥ षडंगावरणंह्राहेश्रासुधाष्टकमर्चयेत् ॥
कोणत्रयेसुसंपूज्यातिस्रःकूटत्रयान्विता ॥ ॥ पश्चिमादिक्रमेणैवचतुर्दिक्षुसमन्वितं । कामेश्वरीतुङशक्रिमाद्यःकूटेन
वार्चयेत् ॥ द्वितीयेनचकूटेनवज्राख्यांशक्तिवेश्मवीं ॥ दक्षकोणेसमभ्यर्च्यततीयेनचपूजयेत् ॥ भगमालांचलसशक्तिंसुतत्रेविश्वम

तकां॥ चक्रेश्वरी मंविकाख्यां कामेशीपुरतो जयेत्॥ वीजमुद्रां प्रदर्श्याथ चक्रपूजां निवेदयेत्॥ ॥कामेश्वरी शुक्लवर्णा शुक्लमा
ल्यानुलेपना॥ मुक्ताफलस्फुरद्भूषा नानाभरणभूषिता॥ पुस्तकं चाक्षसूत्रं च वरदं चाभयं क्रमात्॥ दधती चाग्रतः पूज्या सृष्टिश
क्तिप्रकीर्तिता॥ ॥वज्रेश्वरी कुंजमा भास्फुरद्रत्नविभूषिता॥ वालार्कवसना नीलकर्णाकुंचितलोचना॥ ॥इक्षुकोदंडपु
ष्पेषु वरदाभयशोभिता॥ वज्रेश्वरी दक्षभागे विष्णुशक्तिमहेश्वरि ॥उत्तरे भगमालां वा सपः संतप्तहेमभा॥ अनर्घ्यरत्न
खचिताभूषणा भुवनेश्वरी॥ पाशांकुशज्ञानमुद्रावरदानकरांबुजा॥ ब्रह्मशक्तिर्महेशानितापत्रयनिकृंतनी॥ ॥सर्वानंद
मये चक्रे राजे वैंदवसंज्ञके॥ ब्रह्मरूपं विष्णुरूपं सांभवं भृगसुंदरि ॥परापररहस्यां त्वां योगिनी त्रिपुरां जयेत्॥ कूटत्रयं समुद्धा
र्य सर्वविद्यास्वरूपकं॥ समस्तदेवतारूपं वस्तुवस्तुमयं जयेत्॥ चक्रे समर्पिता मेवमहात्रिपुरसुंदरी॥ संपूज्य पूजयेत्तत्र परा
पररहस्यगां॥ उपचारैः समभ्यर्च्य गंधपुष्पाक्षतादिभिः॥ योगिनीसिद्धिदां नित्यां भोगकामार्थसिद्धये॥ श्रीविद्या षोडशार्णं तु भु
क्तिमुक्तिफलप्रदां॥ समस्तचक्रचक्रेशीं सर्वाम्नायनमस्कृतां॥ सर्वाम्नायेश्वरी क्षिपांलंकृता ब्रह्मरूपिणी॥ उपचारैः समभ्यर्च्य
गंधपुष्पाक्षतादिभिः॥ तर्पणानि पुनर्दद्यात्त्रिवारं मूलविद्यया॥ योनिमुद्रां प्रदर्श्याथ मुद्राः संदर्शयेत्क्रमात्॥ ॥त्रिपुरा स्फटिका
भासा मुक्तारत्नविभूषिता॥ पुस्तकं चाक्षमालां च कलशं पद्ममुत्तमं॥ दधती चिंतयेन्नित्यं महापातकनाशनी॥ ॥त्रिपुरेशी पूर्व

रूपासुंदरीऊंकमप्रिया ॥ सर्वालंकारसंपन्ना पुस्तकचाक्षमालिकां ॥ वरदाभयौ च दधंती सामर्थ्यं हस्मितानना ॥ ॥ अनयासह
शीदेवी ध्येया त्रिपुरवासिनी ॥ आरक्तनयनाप्रांते महामदविघूर्णिता ॥ ॥ त्रिपुराश्रीमहेशानी पीनस्तनघनस्तनी ॥ ऊध्वज्ञास्वस
हस्ताक्षां दिव्यालंकारमंडितां ॥ पुस्तकं जपमालां च वरदां चाभयं करैः ॥ दधंती सकलानंदमालिनी कथ्यते धुना ॥ इंद्रगोपप्रभा देवी
पाशांकुशकपालिनी ॥ महाभीतिहरा सम्यक्साधकानां स्मरणादियं ॥ सिद्धा वा परमेशानी ध्यायेद्वयविनाशिनी ॥ संपत्प्रदा भैरवी वत्तम
हासिद्धिप्रदायिनी ॥ चक्रेणासिद्धिसहिता पुत्निचक्राधिदेवता ॥ ॥ अतिगह्वरमेवेदं ज्ञात्वा चक्रं समर्चयेत् ॥ पादुकां पूजयामीति नम
स्कारोथवा भवेत् ॥ स्वाहा होमे तर्प्यसे तु तर्प्ययामीति संस्मरेत् ॥ ॥ अथवा रहस्ययः सर्वा देवीरूपेण चिंतयेत् ॥ श्रीचक्रपरमेशानि
स्वतंत्रे स्वस्वसंनिभाः ॥ गोपितव्यं त्वया भद्रे स्वयोनिशिव पार्वति ॥ ॥ नैवेद्यं षड्रसोपेतं कामधेनुपवित्रकं ॥ दत्वा कर्पूरसहितं तांबूलंप
रशक्तये ॥ नित्यहोमं प्रकुर्वति पूर्वोक्तविधिना प्रिये ॥ पूर्ववद्बलिदानं च दद्यात्सर्वसमृद्धये ॥ वटुकाय महेशानि योगिनीभ्यश्च वल्लभे ॥ ग
णेशक्षेत्रपालाभ्यां पूर्ववद्बलिमुत्सृजेत् ॥ वामभागे तु तस्याथ मंडलस्योपरि क्षिपेत् ॥ आधारं पूजयेत्तत्र बलिं वा नोदकान्वितं ॥ सकार
रां मंत्रयित्वा सर्वभूतबलिं हरेत् ॥ षोडशार्णेन मनुना त्रिवारं वीरवंदिते ॥ तारं च भुवनेशानी सर्वविघ्नपदं ततः ॥ कृत्यः सर्वं च भूते
भ्यो हूंकारं वह्निवल्लभां ॥ समुद्धार्य बलिं दद्यान्मुद्रया तत्वसंज्ञया ॥ बलिपंचकमाख्यातं सदा रक्षाकरं परं ॥ ॥ यथाशक्ति जपं कुर्यात्सु

तिं च परमेश्वरी ॥ ॥ अथमकरस्तोत्रम् ॥ श्रीबीजे नादबिंदुघटितयशशिकलाकालरूपस्वरूपे मातर्मे देहि बुद्धिं जडहि नहि जडतां त्रा
हि मां दीननाथे ॥ अज्ञानध्वांतनाशक्षमरविरुचिरप्रोज्वलत्पादपद्मे ब्रह्मेशाद्यैस्सुरेंद्रैः सुरगणविनुते शंभुकांते नमामि ॥ लज्जाबी
जस्वरूपा त्रिजगति त्ररदे क्रीडया संस्थिता यातो नित्यं शंभुशक्तिं त्रिभुवनजननीं पालयंतीं जगच्च ॥ संसाराणां निदानं सकलगुणम
यीं सच्चिदानंदरूपां तेजोरूपां त्रिनेत्रां त्रिभुवनतिमिरान्तानहंत्रीं नमामि ॥ क्लींबीजे कामराजे स्थितनुकुसुमधनुर्बाणपाशांकुशा
ढ्यां वंदे भास्वत्स्वरूपे रविनिभवपुषा मोहयंतीं त्रिलोकान् ॥ कांचीमंजीरहारांगदमुकुटलसत्स्वर्णमालिकाभूषैर्भास्वंतीमिंदु
वक्त्रां स्तनभरनमितां क्षीणमध्यां त्रिनेत्रां ॥ वाणीबीजस्वरूपे त्रिभुवनजडताध्वांतविध्वंसिनी त्वं त्वं शब्दब्रह्मरूपा श्रुतिभिरपि सदा
गीयमाना त्वमेव ॥ मातर्मे देहि बुद्धिं मममसदसि महावंहसंक्षोभकर्त्री राज्ञी वा वस्थितेरण्यनिविडविपदं त्वत्पदांभोजमीडे ॥ सौः शक्ति
कार्यजातो घटपटविकृतो दुष्टरैतो सदा या मायाके विश्वहत्वप्रकृतिपरिणतो मूलभूता त्वमेव ॥ किंचित्रणप्रपंचं भ्रमति मनिव
तो हेतुभूतासि विद्याविद्याविभ्रांतचंद्रक्षयगतिजगतां मेनिरेभुद्भावं ॥ श्रीं मातस्ते नमोस्तु श्रुतिमथितगुरुत्र्यक्षरब्रह्मरूपे मिथ्या
ज्ञानांधकूपे पतितमनुदिनं पाहि मामक्षहीनं ॥ मोहक्रोधप्रलोभप्रथमरतिवधैः शत्रुभिः पीड्यमानं पत्नीपुत्रादिभृत्यैर्न्नितविविध
जनैर्भृंथलाभिर्निबद्धं ॥ ह्रीं कालाख्यरूपे मम दह दुरितं व्याधिदारिद्यबीजं मातस्त्वत्पादपद्मे हृदयपरिमले प्रार्थये भक्तिरूपां ॥ त्वं

वाणित्वंचलक्ष्मीः त्वमसिगिरिसुताब्रह्मविष्ण्वादिरूपा वित्यानित्येशरूपाकृतमिह जननी त्वत्कटाक्षैकवंद्ये॥ श्रीकारेश्री
स्वरूपे वितरमपिकृपां ध्यानसुकसत्यरूपे॥ स्वर्णमाणिक्यरत्नादिकधनमखिलं त्वत्पदार्थाप्तयोग्यं॥ विद्यात्वंदेहिमेक्षंभ
मवभयदहनेदेविदंदह्यमानंयोगेंद्रैःसेव्यमानेरमतनुविवचयैर्मोक्षयैतंवदीनं॥ कामोयोनिश्चतुर्थस्वरदशपतितेभौव
नेशिंचबीजं॥ तावद्वर्णावलिंत्वंमतजनवरदेत्वत्पदेभक्तिमीडे॥ त्वत्पादांभोजयुग्मंहृदयसरसिजेसन्निधायेकविंताध्यायं
तःक्रमेवध्वस्तिगतकलिमलाभुक्तवंतोमुनींद्राः॥ ब्रह्मेंदुकामदेवोवियदमरगुरुर्भौवनेसाक्षबीजं॥ तावद्वर्णस्वरूपेयदितत
उलतात्वंप्रपन्नोस्मिमातः॥ विष्णुब्रह्मेशमन्द्रैर्मणिमकुटलसद्विप्रोल्लसत्पादपद्मे योगेंद्रैर्ध्येयमानप्रपदनववयोधौतविधे
तमाने॥ ईउंःकामःसुरेशोवियदनलयुतंवामनेत्रार्द्धचंद्रैर्युक्तंयद्बीजमेतन्नरपितनुवपुःसच्चिदानंदरूपं॥ बालात्वंभैरवित्वं
त्रिभुवनजननीतारिणीनीलवाणीत्वंगौरीत्वंचकालीसकलगुणमयीत्वंमहामोक्षदात्री॥ सौंकारेबीजराजेत्रिभुवनज
निनेशक्तिराद्यात्वमेवत्वंयुक्तःशंभुरेषःप्रभवितुंचलितुंत्वंविनाजाप्रवान्नः॥ ब्रह्माविष्णुःकपर्दीजननितवकृपालेशपात्रा
च्छ्रीरान्नग्रक्तंतःसृष्टिरक्षाप्रलयमविरतंचक्रिरेत्वत्परस्या॥ ऐंबीजंवाग्भवाख्यंत्वमिहजडमतिध्वांतचंडप्रकाशंप्रातःकारु
णपथारामृतकलितहृदारक्षमीनाथहीनं॥ मोक्षंतेमोहितास्तेतवजननिमहामाययाबद्धचित्ताःकारुण्यंप्रार्थयंतस्तवपदयुगल

ज्ञानवंतोमुनीन्द्राः॥ ह्रींकारंबीजरूपंत्ववसुदतिमनुश्रेष्ठमध्यप्रदेशेसाक्षाद्ब्रह्मस्वरूपीमदननतुरियंब्रह्मरगोमोक्षकर्त्री॥ ज्ञाज्ञातःस्मेरवक्त्रांबुजजहरलसत्साक्षपीयूषधारा॥ वेदसांगादियंतेतुहिनगिरिसुतेब्राह्ममाहेंद्ररूपे॥ क्लींकारेकालरूपेत्वमिहशशिमुखीषोडशरूपात्वमेवात्वंक्षांतिस्त्वंचकांतिः हरिहरकमलोद्भवरूपात्वमेव॥ त्वंसिद्धिस्त्वंचऋद्धिस्मररिपुमहिषित्वंचसंमोहयंतिविद्यात्वंमुक्तिहेतुर्भवजलधिगतांदुःखहंत्रीत्वमेव॥ श्रीबीजेश्रीकलाढ्येमधुरिपुमनसामध्यमध्यापमेयामातस्त्वदृष्टिलेशादमरपतिरसौप्राप्तवान्स्वःपतित्वं॥ इत्येवंषोडशार्णप्रथितमनुवरःस्वर्गमोक्षैकहेतुःसिद्धेरष्टौलभंतेयइहमनुवरंसर्वदात्वेभजंते॥ ॥पूजयित्वाविधानेनमहात्रिपुरसुंदरी॥ इदंस्तोत्रंपठित्वातुदेवीसाम्राज्यमाप्नुयात्॥ ॥इतिश्रीरुद्रयामलेमहातंत्रेउमामहेश्वरसंवादेशिववक्त्रांबुजविनिर्गतश्रीमहात्रिपुरसुंदरीमकरंदाख्यस्तवःसमाप्तः॥ ॥अथमहात्रिपुरसुंदरीकवचमाह॥ ॥देव्युवाच॥ भगवन्देवदेवेशलोकानुग्रहकारकः॥ त्वत्प्रसादान्महादेवश्रुतामंत्रास्त्वनेकधा॥ साधनंविविधंदेवकीलकोद्धारणंतथा॥ शापादिदूषणोद्धारश्चनत्वत्तोमयाप्रभो॥ राजराजेश्वरीदेव्याःकवचंसूचितंमयि॥ श्रोतुमिच्छामित्वत्तस्तत्कथयस्वमयिप्रभो॥ ॥ईश्वरउवाच॥ लक्षवारसहस्राणिवारितासिपुनःपुनः॥ स्त्रीस्वभावान्महादेविपृच्छसित्वंमयिप्रिये॥ अत्यंतगुप्तंकवचंसर्वकामवरप्रदं॥ प्रीतयेतवदेवेशिकथयामिशृणुष्वतत्॥ अस्यश्रीषोडशीविद्याकवचस्यऋषिस्मृतः॥ महादेवश्चप्रस्तारपंक्तिश्छंदउदाहृतः॥ राजराजेश्व

रीदेवि देवता परिकीर्त्तिता ॥ सर्वार्थसाधने देवि विनियोगः प्रकीर्त्तितः ॥ पूर्वे मां भैरवी पातु वाला मां पातु दक्षिणे ॥ मालिनी पातु प्र:
तीच्यां वासिनी तूत्तरेवतु ॥ ऊर्द्धं पातु महादेवी महात्रिपुरसुंदरी ॥ अधस्तात्तु देवेशि पातालतलवासिनी ॥ आधारे वाग्भवः
पातु कामराजस्तथा हृदि ॥ भ्रामरः पातु मां नित्यं मस्तके सर्वकामदं ॥ ब्रह्मरंध्रे सर्वगत्रे छिद्रस्थानेषु सर्वदा ॥ महाविद्याभ
गवती पातु मां परमेश्वरी ॥ ऐं क्लीं ललाटे मां पातु ह्रीं क्लीं ह्सौं सव्ये नेत्रयोः ॥ नाशायां कर्णयोश्चैव ऊं ईं ऊं चिबुके तथा ॥ सौः
पातु गले हृदये मम सः ह्रीं नाभिदेशके ॥ कल ह्रीं क्लीं स्त्रीं गुह्यदेशे स ह्रीं पातु पादयोः ॥ स ह्रीं मां पातु सर्वत्र स क्लीं पातु मे संधि
षु ॥ जलेस्थले तथाकाशे दिक्षु राजगृहे तथा ॥ ह्रूं खें मां त्वरिता पातु स ह्रीं स क्लीं मनोभवा ॥ हं सः पायान्महादेवि परं निष्क
लदेवता ॥ विजया मंगला दूती कल्याणी भगमालिनी ॥ ज्वाला च मालिनी विद्या सर्वदा पातु मां शिवा ॥ इत्येवं कवचं देवि देवा
नामपि दुर्लभं ॥ तव प्रीत्या मयाख्यातं गोपनीयं प्रयत्नतः ॥ इदं रहस्यं परमं गुह्याद्गुह्यतरं प्रिये ॥ धन्यं यशः समायुष्यं भोग
मोक्षप्रदं शुभं ॥ दुःस्वप्ननाशनं पुंसां नरनारीवशंकरं ॥ आकर्षणकरं देवि स्तंभोच्चाटकरं शिवे ॥ परत्र नरकं गत्वा पशुयोनि
मवाप्नुयात् ॥ तस्मादेतत्सदाभ्यासादधिकारी भवेन्नरः ॥ मठक्रनिर्गतमिदं कवचं सुपुण्यं पुत्राभिधेश्च पुरतो विधिना पठेद्य
सौभाग्यभोगललितानिशुभानि भुक्त्वा देव्याः पदं भजति तत्स नरांतकाले ॥ ॥ इति कुलांतसंहितायां श्रीमहात्रिपुरसुंदरी षोड

शीकवचं संपूर्णम्॥ ॥अथ त्रिपुरभैरवस्य मंत्रमाह॥ ॥मायालक्ष्मीं तथा हंसः प्रासादबीजमेव च॥ वह्निजायांतको
मंत्रो भवेत्त्रिपुरभैरवः॥ षडंगं मूलमंत्रेण वलिपूजादिकं तथा॥ ॥अथ ध्यानं॥ एकवक्त्रं त्रिनयनं चतुर्वाहुसमन्वितम्॥ द
क्षिणे वांकुशं खड्गं वामे खेटकपाशकौ॥ धारयंतं रक्तवर्णं वृषासनगतं विभुं॥ ऊर्ध्वकेशं [illegible]हारुहारं कपालमालयान्वितम्
एवंविधं सदा देवि ध्यायेत्त्रिपुरभैरवं॥ ॥इति श्रीतंत्रचिंतामणौ श्रीविद्यानित्यार्चननिर्णयनाम षड्विंशतितमः प्रकाश
२६॥ अथ त्रिपुरभैरव्याः क्रमो लिख्यते॥ ॥अथ पूजाविधिं वक्ष्ये सर्वतंत्रेषु गोपितं॥ देव्यास्त्रिपुरभैरव्या विशेषं यन्निरूपितं
पीठन्यासांतं विधाय ऋष्यादिन्यासं कुर्यात्॥ ऋषिरस्य महेशानि दक्षिणामूर्तिरव्ययः॥ न्यसेच्छिरसि पूज्यत्वात्पंक्तिछंदो मु
खे प्रिये॥ देवता हृदये वाला त्रिपुरा परमेश्वरी॥ वीजं वाग्भवमित्युक्तं शक्तिस्तार्तीयमूहयेत्॥ नाभेराचरणं न्यस्य गलादानाभि
वा परं॥ मूर्ध्नादिगलपर्यंतं त्र्यक्षरं विन्यसेत्क्रमात्॥ ॥अथ विद्यान्यासः॥ विद्यान्यासं ततः कुर्यात्त्रिभिर्वीजैः क्रमाच्छिवे
करयोर्विन्यसेदादौ मणिवंधेतलेऽग्रके॥ दक्षवामे च विन्यस्य कुक्षि कूर्परपाणिषु॥ पुनर्दक्षे तु वामे तु पादयोश्च तथा न्यसेत्
नादांते हृदये लिंगे न्यसेद्देवि ततः परं॥ एते षडंगेषु देवेशि संहारक्रमतो न्यसेत्॥ विद्यास्थितिक्रमेणैव जानीहि परमेश्वरी॥ ॥
नवयोन्यात्मकं न्यासं कुर्याद्वीजैस्त्रिभिस्ततः॥ श्रीविद्यायाः क्रमेणैव पूर्वमेव समीरितं॥ ॥अथ रत्यादिन्यासः॥ मूलेरः

॥ तंत्रवि ॥ रीदेवि देवतापरिकीर्त्तिता॥ सर्वार्थसाधने देवि विनियोगः प्रकीर्त्तितः॥ पूर्वे मां भैरवी पातु बाला मां पातु दक्षिणे॥ मालिनी पातु प्र:
॥२३३॥ तीच्यां वासिनी तूत्तरेवतु॥ ऊर्द्धं पातु महादेवी महात्रिपुरसुंदरी॥ अधस्तान्तु देवेशि पातालतलवासिनी॥ आधारे वाग्भवः
पातु कामराजस्तथा हृदि॥ भ्रामरः पातु मां नित्यं मस्तके सर्वकामदः॥ ब्रह्मरंध्रे सर्वगात्रे छिद्रस्थाने च सर्वदा॥ महाविद्याभ
गवती पातु मां परमेश्वरी॥ ऐं क्लीं ललाटे मां पातु ह्रीं क्लीं ह्सैं सश्चनेत्रयोः॥ नासायां कर्णयोश्चैव ऊं ईं ऊं चिबुके तथा॥ सौः
पातु गले हृदये मम सः ह्रीं नाभिदेशके॥ कल ह्रीं क्लीं स्त्रीं गुह्यदेशे स ह्रीं पातु पादयोः॥ स ह्रीं मां पातु सर्वत्र स क्लीं पातु मे संधि
षु॥ जले स्थले तथाकाशे दिक्षु राजगृहे तथा॥ ह्रूं खें मां त्वरिता पातु स ह्रीं स क्लीं मनोभवा॥ हंसश्च पायान्महादेवि परं निस्क
लदेवता॥ विजया मंगला दूती कल्याणी भगमालिनी॥ ज्वाला च मालिनी विद्या सर्वदा पातु मां शिवा॥ इत्येव कवचं देवि देवा
नामपि दुर्लभं॥ तव प्रीत्या मयाख्यातं गोपनीयं प्रयत्नतः॥ इदं रहस्यं परमं गुह्याद्गुह्यतरं प्रिये॥ धन्यं यशः समायुष्यं भोग
मोक्षप्रदं शुभं॥ दुःस्वप्ननाशनं पुंसां नरनारीवशंकरं॥ आकर्षणाकरं देवि स्तंभोच्चाटकरं शिवे॥ परत्र नरकं गत्वा पशुयोनि
मवाप्नुयात्॥ तस्मादेतत्सदाभ्यासादधिकारी भवेन्नरः॥ मठक्रनिर्गतमिदं कवचं सुपुण्यं पुत्राभिधेभ्यः पुरतो विधिना पठेद्य ॥ गुरुः ॥
सौभाग्यभोगललितानि शुभानि भुक्त्वा देव्याः पदं भजति तत्सुतरां तकाले॥ ॥ इति कुलांतसंहितायां श्रीमहात्रिपुरसुंदरीको ॥२३३॥

शीकवचं संपूर्णम्॥ ॥अथ त्रिपुरभैरवस्य मंत्रमाह॥ ॥मायालक्ष्मीं तथा हंसः प्रासादबीजमेव च॥ वह्निजायांतको
मंत्रो भवेत्त्रिपुरभैरवः॥ षडंगं मूलमंत्रेण बलिपूजादिकं तथा॥ ॥अथ ध्यानं॥ एकवक्त्रं त्रिनयनं चतुर्वाहुसमन्वितम्॥ द
क्षिणे वांकुशं खड्गं वामे खेटकपाशकौ॥ धारयंतं रक्तवर्णं वृषासनगतं विभुं॥ उर्द्धकेशं महाट्टहासं कपालमालयान्वितम्
एवंविधं सदा देवि ध्यायेत्त्रिपुरभैरवं॥ ॥इति श्रीतंत्रचिंतामणौ श्रीविद्यानित्यार्चननिर्णयनाम षड्विंशतितमः प्रकाश
२६॥ अथ त्रिपुरभैरव्याः क्रमो लिख्यते॥ ॥अथ पूजाविधिं वक्ष्ये सर्वतंत्रेषु गोपितं॥ देव्यास्त्रिपुरभैरव्या विशेषं यन्निरूपितं
पीठन्यासांतं विधाय ऋष्यादिन्यासं कुर्यात्॥ ऋषिरस्य महेशानि दक्षिणामूर्त्तिरव्ययः॥ न्यसेच्छिरसि पूज्यत्वात्पंक्तिश्छंदो मु
खे प्रिये॥ देवता हृदये बाला त्रिपुरा परमेश्वरी॥ बीजं वाग्भवमित्युक्तं शक्तिस्तार्तीयमूहयेत्॥ नाभेराचरणं न्यस्य गलादानाभि
वापरं॥ मूर्द्धादिगलपर्यंतं त्र्यक्षरं विन्यसेत्क्रमात्॥ ॥अथ विद्यान्यासः॥ विद्यान्यासं ततः कुर्यात्त्रिभिर्बीजैः क्रमाच्छिवे
करयोर्विन्यसेदादौ मणिबंधेन तलेग्रके॥ दक्षवामे च विन्यस्य कुक्षिरूर्प्परपाणिषु॥ पुनर्दक्षे तु वामे तु पादयोश्च तथा न्यसेत्
नादांते हृदये लिंगे न्यसेद्देवि ततः परं॥ एतेषंगेषु देवेशि संहारक्रमतो न्यसेत्॥ विद्यासृष्टिक्रमेणैव जानीहि परमेश्वरी॥ ॥
नवयोन्यात्मकं न्यासं कुर्याद्बीजैस्त्रिभिस्ततः॥ श्रीविद्यायाः क्रमेणैव पूर्वमेव समीरितं॥ ॥अथ रत्यादिन्यासः॥ मूलेन र

तिं हृदि श्रीतिं कवोर्मध्ये मनोभवां ॥ बालाबीजैस्त्रिभिर्न्यस्येत्स्थाने षट्सु विलोमतः ॥ अनंतेशी त्वयोगेशी विश्वयोनिक्रमादिमाः ॥ विलोमवीजैर्विन्यस्य मूर्त्तिन्यासमथाचरेत् ॥ ॥ प्रविन्यसेद्यथापूर्वं मगुवामामिसंपुतं ॥ सघादिपंचकस्यात्र वीजन्यासे प्रकीर्त्तितं ॥ ॥ अथ वाणन्यासः ॥ पंचवाणान्क्रमेणैव करांगुलिषु विन्यसेत् ॥ अंगुष्ठादिकनिष्ठांतं क्रमेण परमेश्वरि ॥ ततस्तेषु च स्थानेषु न्यसेत्कामान्यथाक्रमं ॥ ॥ अथ करांगन्यासः ॥ षड्दीर्घयुक्तेनाद्येन वीजेनांगक्रियामता ॥ मूर्द्ध्नि पादे तथा वक्त्रे गुह्ये हृदयपंकजे ॥ ॥ थांतद्वयं समालिख्य वह्निसंस्थं क्रमेण हि ॥ मुखवृत्तेन नेत्रेण धामेन परिमंड्रितं ॥ वाणद्वयमिदं प्रोक्तं मादनं भूमिसंस्थितं ॥ चतुर्थस्वरविन्द्वाढ्यं नादलपंचरानने ॥ कांतं शक्रसमारूढं वामकर्णविभूषितं ॥ विंदुनादसमायुक्तं सर्गवान्त्वं इमा प्रिये ॥ पंचवाण महेशानि नामानि शृणु पार्वति ॥ द्रावणः क्षोभणो देवि वशकर्षणासंज्ञको ॥ तथोन्मादः क्रमेणैव नामानि परमेश्वरि ॥ द्रामाद्यां द्राविणी मूर्द्ध्नि इमाद्या क्षोभिणी पदे ॥ क्लीं वशीकरणं वक्त्रे गुह्ये ब्लूं वीजपूर्विकां ॥ आकर्षणी हृदि पुनः सर्गांतभृगुसंस्थितं ॥ संमोहिनी क्रमादेवं वाणन्यासो यमीरितः ॥ परा वीजे मध्यवाणं वाग्भवं परमेश्वरि ॥ ब्लूंवीजं च तथा देवि वक्ष्येऽबीजं क्रमात्प्रिये ॥ पंचकामा इमे देवि नामानि शृणु वल्लभे ॥ काममन्मथकन्दर्पमकरध्वजसंज्ञकाः ॥ मीनकेतुर्महेशानि पंचमः परिकल्पितः ॥ ॥ अथ सुभगादिन्यासः ॥ भालभ्रूमध्यवदने लंवि

काकराठहृत्सु च॥ नाभ्यधिष्ठानयोः पंचताराद्याः शुभगादिकाः॥ वाक्कामबीजं ह्रूं स्त्रीं मस्तारः पंचोदितास्त्वमी॥ ॥अथ भूषणान्या
सः॥ न्यसेच्छिरसि भालभ्रूकर्णाक्षियुगले नसि॥ गण्डयोरोष्ठयोर्दन्तपंक्त्योरसे न्यसेत्स्वरान्॥ चिबुके च गले कंठे पार्श्वयोस्त
नयुग्मके॥ दोर्मूलयोः कूर्परयोः पाण्योस्तत्स्थदेशयोः॥ नाभौ गुह्ये उनभ्योर्वोजान्वोर्जंघयोस्ततः॥ स्फिचोः तन्नलयोप
श्चात्चरणांगुष्ठपृष्ठयोः॥ कादिरांतान्न्यसेद्वर्णान्स्यत्ते स्वेष्ठसमाहितः॥ कांच्यां ग्रैवेयके पश्चात्कटके हृदि गुच्छके कर्ण
योर्गण्डयोर्मौलौ लवशक्षलपान्हसौ॥ अष्टाविमान्प्रविन्यस्य देवं देसिकसत्तमः॥ ॥अथ ध्यानं॥ ॐ उद्यज्ञानुसहस्रकां
तिमरुणाक्षौमां शिरोमालिकां रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम्॥ हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविंदश्रि
यं देवीं बद्धहिमांशुरत्नमुकुटां वंदे समंदस्मितां॥ ॥योऽस्याख्या हृदि विख्याता त्रैलोक्यरक्षणा भवेत्॥ त्रैलोक्यज्ञवर्णं नाममु
खस्था परमेश्वरी॥ भ्रूमध्यस्था महेशानि त्रैलोक्याकर्षिणी भवेत्॥ ललाटस्था महेशानि त्रैलोक्यवशकारिणी॥ ब्रह्मरंध्रस्थिता
सैव सर्वाह्लादकरी परा॥ पंचमुद्रामयी देवि योनिमुद्रां प्रदर्शयेत्॥ ॥अथ पात्रादिसंस्थापनं विधाय यंत्रं विलिखेत्॥ ततं
तत्पूजनं कृत्वा वाह्यपूजां समाचरेत्॥ तत्र प्राङ्मुखमासीनो मंत्री द्वारं प्रकल्पयेत्॥ ईशानादग्निपर्यंतं ऋजुरेखां समालिखेत्॥ ई
शादग्नेस्तदग्राभ्यां रेखे आकृष्य देशिकः॥ एकीकृत्य च या रूपां शक्तिरेखा परा शिवे॥ त्रिकोणाकाररूपं तु शक्तिद्वयमिदं शिवे॥

पूर्वशक्त्याग्रभागे तु मणियष्टिवदालिखेत्॥ रेखां तु परमेशानि घाउराक्षसकोणगां॥ संधिभेदक्रमेणैव तयोः शक्त्योस्ततः प
रं रेखे स्राहव्यकोणाभ्यां डद्यास्त्वेगान्तकरू॥ वह्निमण्डलमेतत्स्यात्सर्वाग्रं सुरवंदिते॥ नवयोनिविशोभाढ्यं चक्रराजमिदं
भवेत्॥ एतद्वाह्ये तु संलेख्यं पत्रं पूर्णेन्दुसन्निभं॥ तस्वन्तमष्टपत्रं तु चतुरस्रं लिखेच्छिवे॥ चतुर्द्वारविशोभाढ्यं सर्वानंदकरं सदा
विलिख्य पूजयेद्यंत्रं हेमरूप्यादिपट्टके॥ भूमौ चंदनपीठे तु कुंकुमागुरुचंदनैः॥ सिंदूररजसा वापि कस्तूरीघुसृणादिभिः॥
सुवर्णे रत्नलेखन्या कल्पितं मृन्मयेथवा॥ विलिख्य यंत्रं देवेशि पूजाड्यात्तिसाधयेत्॥ ॥ अथ आधारशक्त्यादि॥ ह्रीं हा
नात्मने नमः इत्यंतं संपूज्य पूर्वादिकेशरे तु मध्ये च इच्छादिनवशक्तिं यजेत्॥ ॥इच्छा ज्ञाना क्रिया चैव कामिनी कामदायि
नी॥ रतिप्रिया तथानंता मदनोन्मादिनीति च॥ एतास्त्रिपुरभैरव्याः पीठशक्तिः प्रकीर्तिताः॥ ॥वाग्भवं लोहितं राये श्रीकंठं
लोहितो नलः॥ दीर्घरावहे परा पश्चादपराये ह्सौं पुनः॥ सदाशिवमहाप्रेतडिंतं पद्मासनं नमः॥ अनेन मनुना दद्यादासनं
श्रीगुरुक्रमं॥ पूर्वमध्यमयोनेश्चान्तराले पूजयेन्नतः॥ पंचभिः प्रणवैर्मूर्त्तिं तस्यामावाह्य देवतां॥ ततो वाक्शक्तिकमला हसख
फ्रें हसौं पुनः॥ अथ मूलमंत्रांते विंदुमध्ये देव्या मूर्त्तिं संकल्प्य त्रिखण्डामुद्रया पूर्ववद्देवीं ध्यात्वा वाग्भाद्यथोक्तरीत्या सर्वोप
चारैराराध्यावरणार्चनमाचरेत्॥ तथा च॥ अग्नीशासुरवायव्यमध्यदिक्ष्वंगपूजनं॥ उत्तरस्यां ठयं देवि दक्षिणस्यां ह्रयं तथा

अग्रे चैव क्रमेणोक्तं पंचबाणांन्नियोजयेत् ॥ पंचकामांस्तथा देवि बाणवत्पूजयेत् ॥ मध्ययोनित्रिकोणेषु नेत्रे वक्त्रमयो
गतः ॥ बालाबीजक्रमेणैव रतिप्रीतिमनोभवा ॥ ततोऽष्टयोनिषु पूर्वादिक्रमेण स्वमंत्रपूर्विकाः सुभगाद्यष्टशक्त
यः स्वमंत्रांते महेशानि पूजनीयाष्टयोनिषु ॥ सुभगा च भगा चैव तथा च भगसर्पिणी ॥ भगमालिन्यनंगा च अनं
गकुसुमा तथा ॥ अनंगरेखा चानंगमदनापरिकीर्तिता ॥ ततोऽष्टपत्रेषु पूर्वादिक्रमेण असितांगादिभिः सह ब्राह्म्याद्य
ष्टमातरः ॥ मातरो भैरवांकस्था मदविभ्रमविह्वला ॥ अष्टपत्रेषु संपूज्या यथावत्कुसुमादिभिः ॥ तद्बहिः चतुरस्रेषु इंद्रादीन्स
हहेतिः पुनः ॥ तेषां मंत्राणि संपूज्य यथाशक्त्या जपं चरेत् ॥ अथ भैरवीस्तोत्रं ॥ स्तुत्यानया श्री त्रिपुरे स्तोष्यंतीष्टफलप्रदे
यया व्रजंति तां लक्ष्मीं मनुजाः सुरपूजितां ॥ ब्रह्मादयस्तुतिशतैरपि सूक्ष्मरूपां जानंति नैव जगदादिमनादिमूर्तिं ॥ तस्माद्वयं कुच
नतां नवकुंकुमाभां स्थूलां स्तुमः सकलवाङ्मयमातृभूतां ॥ सद्यः समुद्यतसहस्रदिवाकराभां विद्याक्षसूत्रवरदाभयचिह्नहस्तां ॥
नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां त्वां तारहाररुचिरां त्रिपुरे भजामि ॥ सिंदूरपूररुचिरां कुचभारनम्रां जन्मांतरेषु कृतपुण्यफलैकग
म्यां ॥ अन्योन्यभेदकलहाकुलमानसास्ते जानंति किं जडधियस्तव रूपमम्ब ॥ स्थूलां वदंति मुनयः श्रुतयो गृणंति सूक्ष्मां वदंति व
चसामधिवासमन्ये ॥ त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपारकृपांबुराशिं ॥ चंद्रावतंसकलितां शरदिंदुशुभ्रां पंचा

॥ नंत्रिं ॥ दशाक्षरमयीं हृदि भावयामि। त्वां पुस्तकं जपवटीममृताढ्यकुंभं व्याख्यां च हस्तकमले दधतीं त्रिनेत्रां॥ शंभुस्त्वमद्रितनयाकलि
॥२३६॥ तार्द्धभागो विष्णुस्त्वमेव कमलापरिबद्धदेहः॥ पद्मोद्भवस्त्वमसि वागधिवासभूमिस्तेषां क्रिया च जगति त्रिपुरे त्वमेव॥ आश्रित्य वाग्भ
वभवाश्चतुरः पदार्थान् भारापदेषु विहितान् समुदीरयंती॥ कण्ठादिभिश्च करणैः परदेवतां त्वां संविन्मयीं हृदि कदापि न विस्मरा
मि॥ स्वाङ्केथवा प्रभवजित्स्ववैरिपद्ममालोक्य निश्चलधिया निजनाभिकाग्रे। ध्यायंति मूर्ध्नि कलितेन्दुकलावतंसां त्वद्रूपमम्ब कृ
तिनस्तरुणार्कमित्रं॥ त्वं प्राप्य मन्मथरिपोर्वपुरर्द्धभागं सृष्टिं करोषि जगतामिति वेदवादः॥ सत्यं तदद्रितनये जगदेकमातः
नो चेदशेषजगतां स्थितिरेव न स्यात्॥ पूजां विधाय कुसुमैः सुरपादपानां पीठे तवाम्ब कनकाचलगह्वरेषु॥ गायंति सिद्धवनि
ताः सह किन्नरीभिरास्वादितासवरसारुणनेत्रपद्माः॥ विद्युद्विलासवपुषः श्रियमुद्वहंतीं यांतीं स्ववासभवनाच्छिवराजधानीं
शंभोश्च वक्त्रकमलानि विकाशयंतीं देवीं भजे हृदि परामृतसिक्तगात्रीं॥ आनंदजन्मभवसंभवनं श्रुतीनां चैतन्यमात्रवपुषं तव
भयामि॥ ब्रह्मेंद्रविष्णुभिरुपासितपादपद्मां सौभाग्यजन्मवसतीं त्रिपुरे यथावत्॥ शब्दार्थभावितवनं तव जनीनुरूपा यान हिम
त्रिपुनरर्कतनुः स्वशक्त्या॥ चण्डात्मिका हरति तस्य कलं पुगां तेनां सारदां मनसि जातु न विस्मरामि॥ नारायणीति नरकार्णवता ॥पुरः॥
रिणीति गौरीति खेदशमनीति सरस्वतीति॥ ज्ञानप्रदेति नयनत्रयभूषितेति त्वामद्रिराजतनये विबुधा वदंति॥ ये स्तुवन्ति जगन् ॥२३६॥

मातः श्लोकैर्दशभिः क्रमात्॥ त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां गतिं॥ इति भैरवीस्तवराजः समाप्तः॥ ॥अथ त्रिपुरभैरवीकवचं॥ नमः त्रिपुरभैरव्यै॥ ॥श्रीपार्वत्युवाच॥ देवदेव महादेव सर्वशास्त्रविशारद॥ कृपां कुरु जगन्नाथ धर्मज्ञोसि महामते॥ सुंदरी या पुरा प्रोक्ता विद्या त्रिपुरपूर्विका॥ तस्यास्तु कवचं दिव्यं मह्यं कथय तत्वतः॥ तस्यास्तद्वचनं श्रुत्वा जगाद जगदीश्वरः॥ अद्भुतं कवचं देव्याः सुन्दर्यादिविरूपिणी॥ ॥श्रीईश्वरउवाच॥ कथयामि महाविद्याकवचं सर्वदुर्लभं॥ शृणुष्व त्वं च विधिना श्रुत्वा गोप्यं त्वयापि तत्॥ यस्य प्रसादात्सकलं बिभर्मि भुवनत्रयं॥ यस्याः सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति॥ माता पिता जगन्मान्या जगद्रक्षास्वरूपिणी॥ सिद्धिदात्री च सिद्धास्यादसिद्धा दुष्टजंतुषु॥ सर्वभूतहितकरी सर्वभूतस्वरूपिणी॥ ककारे पातु मां देवी कामिनी कामदायिनी॥ ऐंकारी पातु मां देवी मूलाधारस्वरूपिणी॥ ईकारी पातु मां देवी रविसर्वसुखप्रदा॥ लकारी पातु मां देवी इंद्राणी वरवल्लभा॥ ह्रींकारी पातु मां देवी सर्वत्र शंभुसुंदरी॥ एतैर्वर्णैर्महामाया शांभवी पातु मस्तकं॥ ककारे पातु मां देवी सर्वाणी हरगेहिनी॥ मकारे पातु मां देवी सर्वपापप्रणाशिनी॥ ककारे पातु मां देवी कामरूपधरा सदा॥ ककारे पातु मां देवी शंबरारिप्रिया सदा॥ लकारे पातु मां देवी धराधरशिरूपधृक्॥ ह्रींकारी पातु मां देवी शंकरार्द्धशरीरिणी॥ एतैर्वर्णैर्महामाया कामराजप्रियावतु॥ सकारी पातु मां देवी सावित्री सर्वदायिनी॥ ककारी पातु सर्वत्र कल्लास्वरस्वरूपिणी॥ लकारी पातु मां देवी लक्ष्मी सर्वसुलक्षणा॥ ह्रींकारी पातु सर्व

त्रदेवी त्रिभुवनेश्वरी ॥ एतैर्वर्णैर्महामाया पातु शक्तिस्वरूपिणी ॥ वाग्भवं मस्तकं पातु वदने कामराजिका ॥ शक्तिस्वरूपिणी पातु हृ
दयं मंत्रसिद्धिदा ॥ सुंदरी सर्वदा पातु सुंदरी परिरक्षतु ॥ रक्तवर्णा सदा पातु सुंदरी सर्वदायिनी ॥ नानालंकारसंयुक्ता सुंदरी पातु सर्वदा
सर्वाङ्ग सुंदरी पातु सर्वत्र शिवदायिनी ॥ जगदाह्लादजननी शंभुरूपा च मां सदा ॥ सर्वमंत्रमयी पातु सर्वसौभाग्यदायिनी ॥
सर्वलक्ष्मीमयी देवी परमानंददायिनी ॥ पातु मां सर्वदा देवी नानाशंखनिधिः शिवा ॥ ततः पद्मनिधिर्देवी सर्वाणी सर्वदा
यिनी ॥ दक्षिणामूर्त्तिर्मां पातु ऋषिः सर्वत्र मस्तके ॥ पंक्तिछंदः स्वरूपातु मुखे पातु सुरेश्वरी ॥ गंधाष्टकात्मिका पातु हृदयं
शंकरी सदा ॥ सर्वसम्मोहिनी पातु संक्षोभिणी सदावतु ॥ सर्वविद्राविणी पातु सर्वाकर्षणकारिणी ॥ सर्वाह्लादकरी पातु स
र्वसंक्षोभिणी सदा ॥ सर्वसिद्धिप्रदा पातु सर्वाकर्षणकारिणी ॥ क्षोभिणी सर्वदा पातु वशिनी मां सदावतु ॥ आकर्षणी स
दा पातु संमोहिनी सदावतु ॥ रतिर्देवी सदा पातु भगा मां सर्वदावतु ॥ माहेश्वरी सदा पातु कौमारी सर्वदावतु ॥ सर्वाह्लादन
कारी मां पातु सर्ववशंकरी ॥ क्षेमंकरी सदा पातु सर्वांगसुंदरी सदा ॥ सर्वांगयुवतिः पातु सर्वसौभाग्यदायिनी ॥ वाग्देवी सर्व
दा पातु वाणिनी सर्वदावतु ॥ वशिनी सर्वदा पातु महासिद्धिप्रदा सदा ॥ सर्वविद्राविणी पातु गणनाथः सदावतु ॥ दुर्गादेवी
सदा पातु वटुकः सर्वदावतु ॥ क्षेत्रपालः सदा पातु पातु चाधारशक्तिका ॥ अनंतः सर्वदा पातु वराहः सर्वदावतु ॥ पृथिवी सर्व

रक्षयंतस्यनतत्रव्याधिपीडनं ॥ नदुर्भिक्षभयंतत्रनचापिपीडनंसदा ॥ विघ्नप्रशमनंसर्वसर्वव्याधिविनाशनं ॥ सर्वरक्षा
करंजंतोश्चतुर्वर्गफलप्रदं ॥ यत्रतत्रनवक्तव्यंनदातव्यंकदाचन ॥ मंत्रंप्राप्यविधानेनपूजयेत्ततंसुधी ॥ तत्रापिदुर्लभंमं
न्येकवचंदेवरूपिणं ॥ गुरोः प्रसादमासाद्यविद्यांप्राप्यसुगोपितां ॥ तत्रापिकवचंदिव्यंदुर्लभंभुवनत्रये ॥ श्लोकंवास्तवमेनं
वायः पठेत्प्रयतः शुचिः ॥ तस्यसर्वार्थसिद्धिः स्याच्छंकरेणप्रभाषितं ॥ गुरुर्देवोहरः साक्षात्पत्नीतस्यचपार्वती ॥ अभेदेनयजे
द्यस्तुतस्यसिद्धिरदूरतः ॥ ॥ इतिविश्वसारतंत्रेत्रिपुरभैरवीकवचंसमाप्तम् ॥ ॥ अथवटुकस्य ॥ मायावटुकंडेन्तमा
पदुद्धारणायच ॥ कुरुद्वयंवटुकायह्रींप्रकृतिवर्णकः ॥ बृहदारण्यकमुनिश्छंदोनुष्टुप्चदेवता ॥ भैरवोह्रींवीजशक्तीस्वाः
कीलकमुदाहृतं ॥ ॥ अथषडंगन्यासः ॥ षड्दीर्घयुक्तपाशंत्याचकारेणाचतद्वयं ॥ अन्यानिजातियुक्तानिप्रणवाद्यानिकल्प
येत् ॥ एवंन्यस्ततनुर्ध्यायेत्शुद्धस्फटिकसंनिभं ॥ दीप्यमानंवराभीतंकिंकिणीजालनूपुरैः ॥ युतंरत्नमयैःसोरवचनेकुटिला
लकं ॥ दक्षेशूलंपरेदंडंदधंतंवटुरूपिणं ॥ द्विभुजंसंस्मरेद्देवंकाम्यार्थंसात्त्विकंद्विजेः ॥ वैलवरुद्धवतुर्वाद्धंजटामुकुटधारिणं ॥ त्रि
शूलपाशंदंडाश्चदधंतंचकमंडलुं ॥ वामीवामेकपालंचदक्षेदंडंविचिंतयेत् ॥ ॥ समाप्तश्चायंत्रिपुरभैरव्याःक्रमः ॥ ॥
अथमहालक्ष्मीक्रमोत्तिरव्यते ॥ तत्रपीठन्यासांतंकर्मविधायसम्यक्दिगासनमनोरेत् ॥ ॥ तद्यथा ॥ संशोध्यमनुनापाणिंप्रणवा

दापातु स्वर्णसिंहासनं तथा॥ रक्तामृतं च सततं पातु मां सर्वकालतः॥ कुधार्णवः सदा पातु कल्पवृक्षाः सदावतु॥ श्वेतछत्रं
सदा पातु रत्नदीपः सदावतु॥ नंदनोद्यानं सततं पातु मां सर्वसिद्धये॥ दिक्पालाः सर्वदा पांतु इंद्राद्याः सकलास्तथा॥ वा
हनानि सदा पांतु अस्त्राणि पांतु सर्वदा॥ शस्त्राणि सर्वदा पांतु योगिन्यः पांतु सर्वदा॥ सिद्धाः पांतु सदा देवी सर्वसिद्धिप्रदाव
तु॥ सर्वांगसुंदरी देवी सर्वत्र सर्वदावतु॥ आनंदरूपिणी देवी चित्स्वरूपा चिदात्मिका॥ सर्वांगसुंदरी पातु सुंदरी भवसुंदरी॥
रथ्ये देवालये घोरे संकटे दुर्गमे गिरौ॥ अरण्ये प्रांतरे वापि पातु मां सुंदरी शिवा॥ इदं कवचमित्युक्तं मंत्रोद्धारश्च पार्वति
यः पठेत्प्रयतो भूत्वा त्रिसंध्यं नियतः शुचि॥ तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्त्तते॥ गोरोचनाकुंकुमेन रक्तचंदन
केन वा॥ स्वयंभूकुसुमैः शुक्लैर्भूमिपुत्रे शनैश्चरे॥ श्मशाने प्रांतरे वापि शून्यागारे शिवालये॥ स्वशक्त्या गुरुणा यंत्रं पूज
यित्वा कुमारिकाः॥ तन्मनुं पूजयित्वा च गुरुपंक्तिं विशेषतः॥ पूजयित्वा यथाशक्त्या स्तुत्वा च विधिनामुना॥ धारयेद्गुरुणा
यंत्रे पूजयित्वा कुमारिकाः॥ तद्योनौ पूजयित्वा गुरुपंक्तिं तथैव च॥ देव्यै बलिं निवेद्याथ नरमार्जारसूकरैः॥ नकुलैर्महिषैः
मेषैः पूजयित्वा विधानतः॥ धृत्वा सुवर्णमध्यस्थं कंठे वा मस्तके भुजे॥ सुतिथौ शुभनक्षत्रे सूर्यस्योदयने तथा॥ धारयित्वा
च कवचं सर्वसिद्धिं लभेन्नरः॥ कवचस्य च माहात्म्यं नाहं वर्षशतैरपि॥ शक्नोमि तु महेशानि वक्तुं तस्य फलं च यत्॥ नास्ति वै

यं हृदंतकं॥ अंगुली भुजमास्ये श्री विन्यसेद्बीजपंचकं॥ मंत्रशेषं न्यसेन्मंत्री नलयोरुभयोरपि॥ मस्तादिचरणं यावन्मंत्रेण व्यापकं न्य
सेत्॥ शेषसप्तार्णकं मंत्री विन्यसेद्धृदि बाहुषु॥ पंचबीजैः पंचमंत्रीशेषैः षष्ठं तु कल्पयेत्॥ चतुर्थं ज्ञानमुख्यैश्च षडंगं वापि षडंगकं
ज्ञानैश्वर्यशक्तिबलवीर्यतेजश्च षट्क्रमात्॥ एवं न्यस्तमनुर्मंत्री चिंतयेदिष्टदेवताम्॥ आदौ स्मरेत्तमुद्यानं सर्वर्तुप्रतिशोभि
तं॥ मंजुलैर्भूर्जपत्रैश्च रसालैः श्रीद्रुमैरपि॥ तालैस्तमालैर्हिंतालैः शालैश्च वकुलैरपि॥ कर्कंधुबंधुजीवैश्च चंपकैरुपशोभितम्॥
मंदांदोलितकर्पूरकदलीदलमंडितं॥ अशोकशरलानागकोविदारमनोरमं॥ मल्लिकायूथिकाकुंदमदयंतीसुगंधिकाद्राक्षाव
ल्लीनागवल्लीमाधवीदेवदारुभिः॥ नमेरुभिर्लवंगैश्च वकुलैस्तिलकैस्तथा॥ शोभितं कर्णिकारैश्च चंदनैरक्तचंदनैः॥ वंजुलैर्मा
तुलुंगैश्च दाडिमीलकुचैः शुभं॥ नारिकेलैश्च खर्जूरैः पूगैः कुरवकैर्वृतं॥ मालतीकेतकीजातीपारंतीतुलसीवृतं॥ नंदावर्तैर्मरुवकैः
सर्वर्तुकुसुमोज्ज्वलं॥ प्रमदैः पिचुमर्दैश्च मंदारैरुपशोभितं॥ शिरीषैः पनसैर्हृद्यैः शाखोटैः कुटजैर्घनैः॥ अवेगगमनस्पृष्टं शुभमनो
गंधवंजुलं॥ महासनं तस्य मध्ये स्मरेन्मंत्री मनोरमं॥ भ्रमभ्रमरमालाभिरलंकृतचतुर्दिशं॥ केकिकेकारवाकीर्णं लक्ष्मणासारसावृ
तं॥ वरव्यूहंससंघातं चक्रकारंडकोज्ज्वलं॥ फुल्लैः सरसिजैरम्यैः कल्हारैः कैरवैरपि॥ नीलेंदीवरसंघैश्च सुगंधिकुसुमैर्वृतं॥ सर्वर्तुशोभि
कल्पद्रुवनमंडितमुज्ज्वलं॥ पुलिनं तत्र तन्मध्ये रत्नमंडपकृत्रिमं॥ सहस्रार्कसंमोहकिरणाप्रतिभास्वरं॥ हिमरश्मिकरव्रातसिक्तामृतसु

दा पातु स्वर्णसिंहासनं तथा ॥ रक्तामृतं च सततं पातु मां सर्वकालतः ॥ सुधार्णवः सदा पातु कल्पवृक्षः सदावतु ॥ श्वेतछत्रं सदा पातु रक्तदीपः सदावतु ॥ नंदनोद्यान सततं पातु मां सर्वसिद्धये ॥ दिक्पालाः सर्वदा पांतु इंद्राद्याः सकलास्तथा ॥ वाहनानि सदा पांतु अस्त्राणि पांतु सर्वदा ॥ शस्त्राणि सर्वदा पांतु योगिन्यः पांतु सर्वदा ॥ सिद्धाः पांतु सदा देवी सर्वसिद्धिप्रदावतु ॥ सर्वांगसुंदरी देवी सर्वत्र सर्वदावतु ॥ आनंदरूपिणी देवी चित्स्वरूपा चिदात्मिका ॥ सर्वांगसुंदरी पातु सुंदरी भवसुंदरी ॥ पथि देवालये घोरे संकटे दुर्गमे गिरौ ॥ अरण्ये प्रांतरे वापि पातु मां सुंदरी शिवा ॥ इदं कवचमित्युक्तं मंत्रोद्धारश्च पार्वति ॥ यः पठेत्प्रयतो भूत्वा त्रिसंध्यं नियतः शुचि ॥ तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्त्तते ॥ गोरोचनाकुंकुमेन रक्तचंदनकेन वा ॥ स्वयंभूकुसुमैः शुक्लैः भूमिपुत्रे शनैश्चरे ॥ श्मशाने प्रांतरे वापि शून्यागारे शिवालये ॥ सशक्त्या गुरुणा यंत्रं पूजयित्वा कुमारिकाः ॥ तन्मंत्रं पूजयित्वा च गुरुपंक्तिं विशेषतः ॥ पूजयित्वा यथाशक्त्या स्तुत्वा च विधिनामुना ॥ धारयेद्गुरुणा यंत्रे पूजयित्वा कुमारिकाः ॥ तद्योनौ पूजयित्वा गुरुपंक्तिं तथैव च ॥ देव्यै बलिं निवेद्याथ नरमार्जारसूकरैः ॥ नकुलैर्महिषैर्मेषैः पूजयित्वा विधानतः ॥ धृत्वा सुवर्णमध्यस्थं कंठे वा मस्तके भुजे ॥ शुभतिथौ शुभनक्षत्रे सूर्यस्योदयने तथा ॥ धारयित्वा च कवचं सर्वसिद्धिं लभेन्नरः ॥ कवचस्य च माहात्म्यं नाहं वर्षशतैरपि ॥ शक्नोमि तु महेशानि वक्तुं तस्य फलं च यत ॥ नास्ति वै

यंहृदंतकं॥ अंगुलीषुक्रमान्मंत्री विन्यसेद्बीजपंचकं॥ मंत्रशेषं न्यसेन्मंत्री तलयोरुभयोरपि॥ मंत्रादिवर्णं यावन्मंत्रेण व्यापकं न्यसेत्॥ शेषमष्टार्णकं मंत्री विन्यसेद्धृदिमातृषु॥ पंचबीजैः पंचमंत्रीशेषैः षष्ठं तु कल्पयेत्॥ चतुर्थ्यंतेन मुख्येनांगं वापि षडंगकं ज्ञानैश्वर्यशक्तिबलवीर्यतेजश्च षट्क्रमात्॥ एवं न्यस्तमनुर्मंत्री चिंतयेदिष्टदेवताम्॥ आदौ स्मरेत्तु मुद्यानं सर्वर्तुप्रतिशोभितं॥ मंजुलैर्भूर्जपत्रैश्च रसालैः श्रीद्रुमैरपि॥ तालैस्तमालैर्हिंतालैः शालैश्च बकुलैरपि॥ कदंबबंधुजीवैश्च चंपकैरुपशोभितम्॥ मंदारोल्लितकर्पूरकदलीदलमंडितं॥ अशोकशरलानागकोविदारमनोरमं॥ मल्लिकायूथिकाकुंदमदयंतीसुगंधिकाद्राक्षावल्लीनागवल्लीमाधवीदेवदारुभिः॥ नमेरुभिर्लवंगैश्च बकुलैस्तिलकैस्तथा॥ शोभितं कर्णिकारैश्च चंदनैरक्तचंदनैः॥ वंजुलैर्मीतुलुंगैश्च दाडिमीलकुचैस्तथा॥ नारिकेलैश्च खर्जूरैः पूगैः कुरवकैर्वृतं॥ मालतीकेतकीजातीपारंतीतुलसीवृतं॥ नंदावर्त्तैर्मदनकैः सर्वर्तुकुसुमोज्ज्वलं॥ प्रमदैः पिचुमर्दैश्च मंदारैरुपशोभितं॥ शिरीषैः पनसैरुच्चैः शाखोटैः कुटजैर्घनैः॥ अवेगगमनस्पृष्टं शुभमनोगंधवज्जलं॥ महासनं तस्य मध्ये स्मरेन्मंत्री मनोरमं॥ भ्रमभ्रमरमालाभिरलंकृतचतुर्दिशं॥ केकिकेकारवाकीर्णलक्ष्मणासारसाकृतं॥ वरव्यहंससंघातं चक्रकारंडकोज्ज्वलं॥ फुल्लैः सरसिजैरम्यैः कह्लारैः कैरवैरपि॥ नीलेंदीवरसंघैश्च सुगंधिकुसुमैर्वृतं॥ सर्वर्तुशोभिकल्पद्रुवनमंडितमुज्ज्वलं॥ पुलिनं तत्र तन्मध्ये रत्नमंडपकुट्टिमं॥ सबसुपार्कसंमोहकिरणप्रतिभास्वरं॥ हिमरश्मिकरव्रातसिक्तामृतमु

शीतलं ॥ प्रोल्लसन्मालितस्वर्णप्राकारसुमनोहरं ॥ नवरत्नमयप्रोद्यत्कपालास्मालिकावृतं ॥ नूतनोद्यन्महारत्नरचितोत्तुंगगोपुरं
नम्रगालितहेमोघदंडध्वजसमूहके ॥ वैडूर्यादिमहारत्नरचितस्तंभराजितं ॥ संतप्तस्वर्णरजितगवाक्षशतसंकुलं ॥ हेमदंडस्फु
रद्दीपसहस्रसुमनोहरं ॥ नानाविक्षोभवस्त्ररचिताभिश्चकांचनैः ॥ सक्षुद्रघंटिकाउत्क्रूपताकाभिरथावृतं ॥ शरज्ज्ञाकाशुधारश्मि
उज्वलरचितैः शुभैः ॥ विचित्रवसनोज्झैर्युक्तं चंद्रातपैरपि ॥ कांचनोर्वीमणिव्रातकुट्टिमालंकृतं शुभं ॥ घनसाराशुरुनवाक
स्तूरीकुंकुमैरपि ॥ तमालैर्ध्वजातेश्च सुगंधिभिरथ्येतरैः ॥ श्यामोदितचतुर्द्वारं मंडपं प्रविचिंतयेत् ॥ तदंतःपारिजातस्य मूले
सिंहासनं नवं ॥ नानारत्नगणाकीर्णं तत्र देवीं विचिंतयेत् ॥ बालभास्करसत्कांतिं शशिशेखरमंडितां ॥ मुक्ताहारोज्वलां रम्यां रत्न
कल्पविभूषितां ॥ हस्तांभोजेश्च बिभ्राणां नूतनां शालिमंजरीं ॥ पद्मद्वयं कोसुंभवसस्मितास्यसरोरुहां ॥ विकचोत्पलसंशोभिलो
चनत्रयशोभितां ॥ कणन्नूपुरसंस्फुरत्कोमलपदद्वयां ॥ नितंबबिंबविलसद्रसनादाममंजुलां ॥ वलित्रयलसद्देहमध्यदेशसु
शोभितां ॥ गंभीरावर्तसन्नाभिहृन्मंडलमंडितां ॥ यक्षकर्दमसंदिग्धपीनोन्नतघनस्तनीं ॥ कुंभिकुंभोद्भवप्रोद्यन्मुक्तादामविराजितां
हैमोत्तरासंगवतीउध्वदामसुभूषितां ॥ माणिक्यस्वर्णरचितवैडूर्यांगदोज्वलां ॥ कांचनोद्यत्पद्मरागमणिसंबद्धकंकणां ॥ नाना
विधलसद्रत्नमुद्रिकालंकृतांगुलिं ॥ कंबुकंठकलारावांस्वर्णग्रैवेयराजितां ॥ विचित्रनानालंकारालंकृतांगीं सुविस्मितां ॥ उद्यदर्कप्रभा

भास्वद्रत्नताटंकशोभितां ॥ कर्णपूरीकृतस्वर्णवज्ररत्नांकुरांशुभां ॥ प्रवालविलसत्कांतिरुचिराधरपल्लवां ॥ शिखरप्रोल्लसद्रम्यदश
नावलिशोभितां ॥ निर्लांछनशरच्चकाताराधिपशुभाननां ॥ पंचसायककोदंडविलासाधिकविल्लिकां ॥ विभ्राणां नासिकां प्रोद्य
त्फुल्लपुष्पोज्वलोपतां ॥ शीतांशुसकलाकाररुचिरालिकराजितां ॥ घनसौगंधसंपन्नमृगनाभिविशेषतां ॥ मनाकुंचितसस्निग्ध
नीलमंजुलमूर्धतां ॥ पारिजातद्रुकुसुमगंधवाहिसमूर्द्धजां ॥ नवहाटकसंकॢप्तनानारत्नौघशेखरां ॥ सौंदर्यभ्रमरवर्धिंतेजसां जन्म
भूमिकां ॥ विलासलक्ष्मीभवनं महालक्ष्मीं विचिंतयेत् ॥ वामाधःकरमारभ्य ध्यायेद्दक्षकरावधि ॥ आयुधानि महालक्ष्म्याः करांबु
जगतानि च ॥ धर्मविकल्पिते पीठे भूपुरद्वारशोभिते ॥ दलाष्टके केशराग्रे कर्णिकायां यजेदिमां ॥ विभूतिरुन्नतिः कांतिः सृष्टिः की
र्तिश्च सन्नतिः ॥ पुष्टिरुत्कृष्टिरृद्धिश्च संप्रोक्ता नवशक्तयः ॥ पीठं बीजेन तारान्तं चस्वाराम्नामूर्तिकल्पनं ॥ दक्षभागे यजेद्देव्या गणपं वा
न्यतस्तथा ॥ कुमेताजालहस्तं च पुष्पाभरणमर्चयेत् ॥ अंगानि पूजयेद्दलेष्वथ स्थाने च मंत्रवित् ॥ अष्टपत्रे स्थिता पूज्या उमा श्रीश्च
सरस्वती ॥ दुर्गा धरणि गायत्र्यो देव्युषा चेति शक्तयः ॥ नानालंकारणाब्जास्तु रंभोजद्वयपाणयः ॥ अंघ्रिप्रक्षालनार्थं च प्रोच्यते जलकुस्
र्यंजे ॥ पूजनीये प्रयत्नेन कराभ्यां धृतचामरे ॥ निधीपद्मौ च स्वकरौ पश्चिमे छत्रधारिणी ॥ परितश्च यजेद्राशीन्ग्रहान्नवततोर्चयेत् ॥
चतुर्दंतादिग्गजांश्च यजेदाशासु मंत्रवित् ॥ लोकपालांस्तदस्त्राणि तत्र वा पूजयेत्ततः ॥ ॥ अथ लक्ष्मीस्तोत्रम् ॥ अगस्तिरुवाच ॥

मातर्नमामिकमलेकमलायताक्षिश्रीविस्नुहृत्कमलवासिनिविश्वमातः॥क्षीरोदजेकमलकोमलगर्भगोरीलक्ष्मीप्रसीदस
ततंनमतांशरण्ये॥त्वंश्रीरुपेंद्रसदनेमदनैकमातेज्योत्स्नासिपूर्णानरवंद्रमनोहरस्य॥सूर्येप्रभासिचजगत्त्रितयेप्रभासिलक्ष्मि
प्रसीदसततंनमतांशरण्ये॥त्वंजातवेदसिसदादहनात्मशक्तिर्वेधस्त्वयाजगदिदंसकलंविदध्यात्॥विश्वंभरोपिविभृयाद
खिलंभवत्यालक्ष्मीप्रसीदसततंनमतांशरण्ये॥त्वत्यक्तमेतदमलेहरतेहरोपित्वंपासिहंसिविदधासिपरापरासि॥इंड्योवभूव
हरिरप्यमलेत्वदाप्त्यालक्ष्मीप्रसीदसततंनमतांशरण्ये॥भूरः सएवसशुद्धः सगुणीसधन्योमान्यःसएवगुणरूपकलाकलापैः
एकःशुचिःसहिपुमान्सकलेपिलोकेयत्रापतन्नवशुभेकरुणाकटाक्षः॥यस्मिन्नवेक्षणमहोपुरुषेगजेश्वेस्त्रैणेतृणेसरसि
देवकुलेगृहेन्ने॥रत्नेपतत्रिणिपशौशयनेधरायांसश्रीकमेवकमलेनहितास्तिनान्यत्॥त्वत्स्पृष्टमेवसकलंशुचितामुपैतित्वत्त्य
क्तमेतदखिलंत्वशुचीहलक्ष्मि॥त्वन्नामयत्रचसुमंगलमेवतत्रश्रीविस्नुपत्निकमलेकमलालयेति॥लक्ष्मीश्रियंचकमलांकम
लालयांचपद्मांरमांनलिनयुग्मकरांचमांच॥क्षीरोदजाममृतकुंभकरेन्दिरांचविस्नुप्रियामितिसदाजपतांक्वदुःखं॥इतिस्तुताभ
गवतीमहालक्ष्मीर्हरिप्रिया॥प्रणनामसपत्नीकःसाष्टांगंदंडवन्मुनिः॥ ॥श्रीरुद्रउवाच॥उत्तिष्ठोत्तिष्ठभद्रंतेमित्रावरुणसंभव
पतितेत्वंमुनिश्रेष्ठलोपामुद्रेभद्रते॥स्तुत्यानयाप्रसन्नाहंव्रियतांयदभीप्सितं॥ ॥व्यासउवाच॥इतिश्रुत्वाथसमुनिःप्रत्युवाच

श्रियं ततः ॥ प्रणिपत्य महाभागो भक्तिगर्भमिदं वचः ॥ ॥ अगस्त्य उवाच ॥ यदि देयो वरो मह्यं वरयोग्योस्म्यहं यदि ॥ ये पठिष्यं
ति वस्तोत्रं त्वद्भक्त्या सततं नराः ॥ तेषां कदाचित्संतापो मास्तु मास्तु दरिद्रता ॥ मास्तु चेष्टवियोगश्च विच्छेदो मास्तु संततेः ॥ सर्वत्र वि
जयश्चास्तु मास्तु संपत्तिसंक्षयः ॥ ॥ श्रीरुवाच ॥ एवमस्तु मुने सर्वं यत्त्वया परिभाषितं ॥ एतत्स्तोत्रस्य पठनं मम सान्निध्यका
रतां ॥ अलक्ष्मीः कालकर्णी च तद्गेहे न विशेत्क्वचित् ॥ गजाश्वपशुशांत्यर्थमेतत्स्तोत्रं सदा जपेत् ॥ बालग्रहाभिभूतानां बाला
नां शांतिरुत्परं ॥ भूर्जपत्रे लिखित्वा च बध्नीयात्कंठदेशतः ॥ इदं बीजरहस्यं मे रक्षणीयं प्रयत्नतः ॥ अज्ञानिने न दातव्यं न देयं
बाधुवो क्वचित् ॥ ॥ इति श्रीलक्ष्मीस्तोत्रं संपूर्णम् ॥ ॥ अथ लक्ष्मीकवचं ॥ अथ वक्ष्ये महेशानि कवचं सर्वकामदं ॥ यस्य
विज्ञानमात्रेणाभवेत्साक्षात्सदाशिवः ॥ अर्चनं पूजनं तस्या मंत्रजापं जपेन्नरः ॥ स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः ॥ वि
द्यावतार्थिनां सेव्या विरोधे विष्णुवल्लभा ॥ अस्य श्रीचतुरक्षरी विष्णुवनिकवचस्य भगवान् श्रीशिव ऋषिः अनुष्टुप् छंदः वाग्भवी
देवता वाग्भवं बीजं लज्जा शक्तिः रमा कीलकं कामबीजात्मकं कवचं मम सुकवित्वपांडित्य सर्वसिद्धिसमृद्धये विनियोगः ॥ ॥
ऐंकारो मस्तके पातु वाग्भवी सर्वसिद्धिदा ॥ ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी ॥ जिह्वायां मुखवृत्ते च कर्णयोर्दंतयोर्नसि
ओष्ठाधरे दंतपंक्तौ तालुमूले हनौ पुनः ॥ पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी ॥ कर्णयुग्मे भुजद्वंद्वे गुटिके क्रुतिमूलके

॥तंत्रस्वि॥
॥२५१॥

स्तनद्वंद्वे च पार्वती॥ हृदये मणिबंधे च ग्रीवायां पार्श्वयोः पुनः॥ पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा॥ उपस्थे च नितंबे च
नाभौ जंघद्वये पुनः॥ जानुचक्रे पदद्वंद्वे गुटिकेंगुलिमूलके॥ स्वधातुप्राणशक्त्यंते सीमस्यां मस्तके पुनः॥ सर्वांगे पातु
कामेशी महादेवी समुन्नतिः॥ पुष्टिः पातु महामाया उत्कृष्टिः सर्वदावतु॥ व ऋद्धिः पातु मे देवी सर्वत्र शंभुवल्लभाः॥
वाग्भवी सर्वदा पातु पातु मां हरगेहिनी॥ रमा पातु सदा देवी पातु माया स्वराट्स्वयं॥ सर्वांगे पातु मां लक्ष्मीर्विष्णुमायासु
रेश्वरी॥ विजया पातु भवने जया पातु सदा मम॥ शिवदूती सदा पातु सुंदरी पातु सर्वदा॥ भैरवी पातु सर्वत्र भीरुंडा सर्वदाव
तु॥ त्वरिता पातु मां नित्यमुग्रतारा सदावतु॥ पातु मां कालिका नित्यं कालरात्रिसदावतु॥ वनदुर्गा सदा पातु कामाख्या सर्व
दावतु॥ योगिन्यः सर्वदा पातु मुद्रा पातु सदा मम॥ मात्राः पांतु सदा देव्यश्चक्रस्था योगिनीगणाः॥ सर्वत्र सर्वकार्येषु
सर्वकर्मसु सर्वदा॥ पातु मां देवदेवेशि लक्ष्मीः सर्वसमृद्धिदा॥ इतिते कवचं दिव्यं कथितं सर्वसिद्धिदा॥ यत्र तत्र न वक्तव्यं
यदीच्छेदात्मनो हितं॥ शठाय भक्तिहीनाय निंदकाय महेश्वरि॥ न्यूनांगे नातिरिक्तेन दर्शयेत्तु कदाचन॥ न स्तवं दर्शये
दिवं संदर्पस्थिवरा भवेत्॥ कुलीनाय महेशाय दुर्गाभक्तिपराय च॥ वैष्णवाय विशुद्धाय दद्यात्कवचमुत्तमं॥ निजशिष्य
ष्याय शांताय धर्मिणेज्ञानिने तथा॥ शनौ मंगलवारे च रक्तचंदनके तथा॥ यावकैश्च लिखेन्मंत्रं सर्वमंत्रसमन्वितं॥ वि

॥तरुः॥
॥२५१॥

लिखेत्कवचंदिव्यंस्वयंभूकुसुमैःशुभैः॥ स्वशुक्रैःपरशुक्रैश्चनानागंधसमन्वितैः॥ गोरोचनाकुंकुमेनरक्तचंदनके
नवा॥ सुतिथौशुभयोगेवाश्रवणायांरवेर्दिने॥ अश्विन्यांकृत्तिकायांवाफल्गुन्यांवमघासुच॥ पूर्वभद्रपदायोगेस्वा
त्यांमंगलवासरे॥ विलिखेत्स्वपठेत्स्तोत्रंशुभयोगेसुरालये॥ आयुष्मात्प्रीतियोगेचब्रह्मयोगेविशेषतः॥ इंद्रयोगेशुभे
योगेशुक्रयोगेतथैवच॥ कौलवेबालवेचैवनिजेवैवसद्मनि॥ शून्यागारेश्मशानेवाविजनेचविशेषतः॥ कुमारीःपूज
यित्वाचयजेदेवींसनातनीं॥ मत्स्यैर्मांसैःशाकयूपैःपूजयेत्परदेवतां॥ घृताद्यैश्चोपकरणैर्धूपदीपैर्विशेषतः॥ ब्राह्म
णान्भोजयित्वाचपूजयेत्परमेश्वरीं॥ आखेटकसुपाख्यानंतत्रकुर्याद्दिनत्रयं॥ तदाभवेन्महारक्षाशंकरेणचभाषितं
मारणाद्वेषणादीनिलभतेनात्रसंशयः॥ सभवेत्पार्वतीपुत्रःसर्वशास्त्रवरिःकृतः॥ गुरुदेवोहरःसाक्षात्पत्नीतस्यहर
प्रिया॥ अभेदेनयजेद्यस्तुतस्यसिद्धिर्नदूरतः॥ पठतियइहमर्त्योनित्यमार्द्रान्तरात्माजपफलमनुमेनंलप्स्यतेसोविधेयं
सभवतिपदमुच्चैःसंपदांपादनम्रःक्षितिपमुकुटलक्ष्मीलक्षणानांचिराय॥ ॥इतिश्रीविश्वसारतंत्रेलक्ष्मीकवचं
संपूर्णम्॥ ॥अथातःसंप्रवक्ष्यामिनारायणमहामनुं॥ नमोनारायणायेतितारादष्टाक्षरामनुः॥ छंदश्चदेवीगा
यत्रीसाध्यनारायणोमुनिः॥ देवतापरमात्मासापंचांगविधिरुच्यते॥ ॥कुंसोल्कश्चमहोल्कश्चवीरोल्कोद्युल्कएवच

सहस्रोल्कध्वनुर्थ्यन्तः स्वाहांतो हेतिसंयुतेः ॥ पंचांगमंत्राः संयुक्ता अंगुष्ठादावपिन्यसेत् ॥ ॥ किरीटहारकेयूरमकराकृतिकुं
डलं ॥ शंखचक्रगदापद्महस्तं पीताम्बराहृतं ॥ श्रीवत्सालंकृतं वक्षस्थलश्रीभूमिसंयुतं ॥ आत्मज्योतिः संप्रदीप्तं सहस्रादित्य
तेजसं ॥ ॥ समाप्तश्चायं महालक्ष्मीक्रमः ॥ ॥ अथ मातंगीक्रमो लिख्यते ॥ ॥ अथ वक्ष्ये महादेवी मातंगी सर्वसि
द्धिदां ॥ अस्यासेवनमात्रेण वाक्सिद्धिं लभते ध्रुवं ॥ प्रणवं च ततो मायां कामबीजं च कूर्चकं ॥ मातंगीङेयुता वास्त्रं वह्निजाया
वधिर्मनुः ॥ ऋषिरस्या दक्षिणामूर्त्तिर्विराट्छंदऽदीरितः ॥ मातंगी देवता देवी सर्वसिद्धिप्रदायिनी ॥ ॥ अंगन्यासकरन्या
सौ कुर्यान्मंत्री समाहितः ॥ षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ॥ ॥ षट्कोणाष्टदलं पद्मं लिखेन्मंत्रं मनोरमं
एतस्मिन्पूजयेत्पीठे नवशक्तीः क्रमादिमा ॥ विभूतिरुन्नतिः कांतिः सृष्टिः कीर्तिश्च सन्नतिः ॥ पुष्टिरुत्कृष्टिरृद्धिश्च मातंगी
पदपश्चिमाः ॥ सर्वान्ते शक्तिकमलासनाय नमः इत्यथ ॥ वाक्शक्तिलक्ष्मीबीजाद्यो मनुरासनसंज्ञकः ॥ तत्र पूजा प्रकर्त्तव्या ज
वापुष्पेण मंत्रवित् ॥ अष्टशक्तीश्चाष्टदले पूजयेत्सुसमाहितः ॥ रतिः प्रीतिर्मनोभवा क्रिया श्रद्धा च शक्तयः ॥ अनंगकुसुमा अनं
गमदना मदनालया ॥ इत्यष्टशक्तीः संपूज्यऽपहारसमन्वितः ॥ ततो देवीं परां ध्यायेत्साधकः स्थिरमासेनः ॥ श्यामांगीं शशि
शेखरां त्रिनयनां सद्रत्नसिंहासने संस्थां रत्नविचित्रभूषणायुतां सक्षीणमध्यस्थलां ॥ आपीनस्तनमंडलां स्मितमुखीं ध्यायेद्धृ

न्तीक्रमाद्वदेवींकृभिरंकुशासिल्लतिकेपाशंतथाखेटकं॥ एवंध्यात्वामहादेवीगंधपुष्पैर्मनोहरैः॥ नैवेद्यंतुमहादेव्यैपायसं
सर्करान्वितं॥ ॥अथमातंगीस्तोत्रं॥ आराध्यमातश्चरणांबुजंतेब्रह्मादयोविश्रुतकीर्तिमापुः॥ अन्येपरंवाविभवंमुनींद्रा
परांश्रियंभक्तिभरेणचान्ये॥ नमामिदेवींनवचन्द्रमौलींमातंगिनींचंद्रकलावतंसां॥ आम्नायवाग्भिःप्रतिपादितार्थंप्रबोधयं
तींशुकमादरेण॥ विनम्रदेवासुरमौलिरत्नैर्नीराजितंतेचरणारविंदं॥ भजंतियेदेविमहीपतीनांभजंतितेसंपतिमादरेण॥ मा
तंगलीलागमनेभवत्यासिंजानमंजीरमिषाद्भजंते॥ मातस्त्वदीयंचरणारविंदमकृत्रिमाणांवचसांनिगुम्फं॥ पदात्पदंसिंजितनू
पुराभ्यांकृतार्थयंतीपदवीपदाभ्यां॥ आस्फालयंतीकरवल्लकींतांमातंगिनीमद्धृदयंधिनोतु॥ नीलांशुकावद्धनितंवविम्बांना
लीदलेनार्पितकर्णभूषां॥ माध्वीमदाघूर्णितनेत्रपद्मांघनस्तनींशंभुवधूंनमामि॥ तडिल्लताकांतमलक्ष्यभूषंचिरेणलक्ष्यंन
वरोमराज्या॥ स्मरामिभक्त्याजगतामधीशेवलित्रयांकंतवमध्यविम्बं॥ नीलोत्पलानांश्रियमावहंतीकान्त्याकटाक्षैःकमलाक
राणां॥ कदंबमालांचितकेशपाशांमतंगकन्यांहृदिभावयामि॥ ध्यायेयमारक्तकपोलकांतंविम्बाधरन्यस्तललामरम्यं॥ आलो
लल्लीलायत्तमायताक्षंमंदस्मितंतेवदनंमहेशि॥ स्तुत्वानयाशंकरधर्मपत्नीमातंगिनीवागधिदेवतानां॥ स्तुवंतियेभक्तियुतामनु
ष्याःपरांश्रियंनित्यमुपाश्रियंति॥ ॥इतिमातंगीस्तोत्रंसंपूर्णम्॥ ॥अथास्याःकवचं॥ ॥श्रीभैरवउवाच॥ शृणुदेवि

/श्र

/ द्रा /
ना /
/ विनम्रकृत्रि / शि
/ यन्ती /
ला/ 3

प्रवक्ष्यामिमातंगीकवचंशुभं॥ गोपनीयंमहादेविमौनेजाप्यसमाचरेत्॥ ॥श्रीदेव्युवाच॥ साधुसाधुमहादेवकथयस्वमहेश्व
र॥ येनसम्यग्विधानेनसाधकानांजयंभवेत्॥ विनाध्यानंविनामंत्रंविनाहोमंविनावलिं॥ येनस्मरणमात्रेणसाधकोधरणीप
तिः॥ ॥श्रीभैरवउवाच॥ मातंगीकवचंदिव्यंसर्वरक्षाकरंनृणां॥ कवित्वंचधनित्वंचगजवाजिसुखानिच॥ सुखदंशुभदंस
म्पत्तिमादिप्रदायिकं॥ ब्रह्माविष्णुमहेशानांतेषांमान्यामहेश्वरी॥ श्लोकार्द्धश्लोकमेकंवायस्तुसम्यक्पठेन्नरः॥ तस्यहस्ते
सदैवास्तिराजलक्ष्मीनसंशयः॥ उच्छिष्टवदनोभूत्वाकमलासनसंस्थितः॥ योनिमुद्रांकरेवध्वांशक्तिध्यानपरायणः॥ ब्रह्मर
ध्रंसमानीयउच्छिष्टनामसंस्थिता॥ ललाटंरक्षयेन्नित्यंमहाचांडालिनीततः॥ नेत्राभ्यांसुमुखीरक्षेदेवीरक्षतुनासिकां॥ महापिशा
चिनीवास्मान्मुखेरक्षतुसर्वदा॥ लज्जारक्षतुमांदन्तेचाष्टःसन्मार्जनेकरां॥ विबुकेकंठदेशेचठकारत्रितयंततः॥ सविसर्गंमहादेवीहृ
दयंपातुसर्वदा॥ नाभौरक्षतुमांनित्यंकालिकारक्तलोचना॥ उदरेपातुचामुंडालिंगेकात्यायनीतथा॥ उग्रतारागुदेपातुपादौरक्ष
तुचार्चिका॥ भुजौरक्षतुशर्वाणीहृदयंचंडभीषणा॥ जिह्वायांमातृकारक्षेत्सर्वंरक्षतुपुष्टिका॥ उत्तरेकालिकारक्षेद्वियारक्षतुप
श्चिमे॥ विजयादक्षिणेरक्षेन्मेधारक्षतुचाग्नये॥ नैऋत्यांप्रज्ञयारक्षेद्वायव्यांपातुलक्षणा॥ ईशान्यांरक्षयेदेवीमातंगीशुभका
रिणी॥ ऊर्द्ध्वंपातुमहादेवीदेवानांहितकारिणी॥ पातालेपातुमांनित्यंवाशुकीविश्वरूपिणी॥ कंठदेशेभ्रुपातुश्राज्ञाचक्रेतुभैरवः॥

स्वाधिष्ठान

ककारादिठकारांतं द्वादशांते हृदिस्थियां॥ मणिपूरडादिफांतं दशवर्णास्वरूपिणी॥ षट्पत्रे षड्वर्णाख्यां बादिलांत सदावतु॥ वादिलांतं सदावतु॥ वादिसांते सदा देवि चतुष्पत्रे सुरक्षतु ॐ ह्रीं श्रीं श्रीं श्रीं ह्रूं ह्रूं ठः फ्रीं ठः स्वाहा॥ इमं मंत्रं समुच्चार्य धारयेद्वामकेभुजे॥ कंठे वा धारयेद्यस्तु स च देवो महेश्वरः॥ तं दृष्ट्वा देवताः सर्वे प्रणमंति समंततः॥ तस्य तेजः प्रभावेन गंतुं चैव न शक्यते॥ इंद्रादीनां भजन्तस्त्वं भूपतिः सेवकोपमः॥ इच्छासिद्धिर्भवेत्तस्य अणिमादिस्तथैव च॥ कीर्तिश्च कवितां लक्ष्मीमारणादीनि यानि वा॥ स सदा भजते राज्ञां कदाचिद्भक्तिपूजनात्॥ अज्ञात्वा कवचं देवि सुमुखीं यो जपेन्नरः॥ तस्य नश्यंति देवेशि योगिन्यो भक्षयंति तं॥ इहलोके दुःखभागी परत्र मूको भविष्यति॥ जन्मकोटि सदा मूको मंत्रसिद्धिं न विंदति॥ गुरुपादं पुरस्कृत्य यदा मंत्रं लभेत्सुधीः॥ तदा तु कवचं देवि सकला गुरुसेवया॥ इहलोके नृपो भूत्वा परे मुक्तिमवाप्नुयात्॥ नवाच्यं परशिष्याय दुर्जनाय सुरेश्वरि॥ निंदकाय कुशीलाय शक्तिहिंसपराय च॥ यो ददाति स पापिष्ठो मातंगीकवचं शुभं॥ पिबंतु रुधिरं तस्य योगिन्यो भक्षयंति तं॥ तस्माद्रहस्यं परमं सर्वसिद्धिं लभंति ते॥ गोप्याद्गोप्यतरं गोप्यं गुह्याद्गुह्यतरं मतं॥ न प्रकाश्यमिदं भद्रे प्राणैः कंठगतैरपि॥ पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः॥ जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः॥ लयकोटिसमा विमान प्रकाश्यं कदाचन॥ ॥इति गुह्यकालीतंत्रे मातंगीकवचं संपूर्णम्॥ ॥अथ सदाशिवस्य॥ तारमायाधराबीज पूर्वः पं

(9) बादिलान्तेषु वर्णेषु

मद

वाक्षरो मनुः ॥ अष्टवर्णो भवेदस्य वामेवो मुनिर्मितः ॥ देवः सदाशिवः प्रोक्तः पंक्तिश्छंद उदाहृतं ॥ मायाप्रसादवीजाभ्यां भेदिताभ्यां
च षड्स्वरैः ॥ षड्भिस्तथा मंत्रवर्णैः षडंगानि सजातिभिः ॥ ध्यायेत्तनश्च सिंदूरारुणां स्मेरं त्रिलोचनं ॥ टंकं मृगं तथा देवी मालिंगं
तं वरप्रदं ॥ हस्तैः चतुर्भिरारक्तपद्मं च दधती करैः ॥ पीनवृत्तघनोत्तुंगस्तना वामांकसंस्थिता ॥ रक्तपद्मसमासीनं रक्तस्रक्गंधलेप
नं ॥ समाप्तश्चायं मातंगीक्रमः ॥ / ॥ अथ भुवनेश्वरीक्रमो लिख्यते ॥ तत्रपीठन्यासांतं कर्म विधाय ऋष्यादिन्यासं कुर्यात् ॥
ऋषिः शक्तिर्भवेच्छंदो गायत्री देवता मनोः ॥ कथिताखुरसं येन सेविता भुवनेश्वरी ॥ षड्दीर्घयुक्तबीजेन कुर्यादंगानि षट्क्रमात्
संहारसृष्टिमार्गेण मातृकान्यस्तविग्रहः ॥ मंत्रन्यासं ततः कुर्याद्देवताभावसिद्धये ॥ हृल्लेखा मूर्ध्नि वदने गगनां हृदयांबुजे ॥ र
रक्ताकरालिकां गुह्ये महोच्छुष्मां पदद्वये ॥ ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमे मुखेषु च ॥ सद्यादिह्रस्वबीजाद्यान्यस्तव्या मंत्रसप्रभा
अंगानि विन्यसेत्पश्चाज्जातियुक्तानि षट्क्रमात् ॥ ब्रह्माणं विन्यसेद्भाले गायत्र्या सहसंयुतं ॥ सावित्र्या संयुतं विष्णुं कपोले दक्षिणे न्य
सेत् ॥ वागीश्वर्या समायुक्तं वामगंडे महेश्वरं ॥ श्रियाधनपतिं न्यसेद्वामकर्णाग्रके पुनः ॥ रत्या स्मरं मुखे न्यस्य पुष्ट्यमृगणाप
तिं न्यसेत् ॥ सयकर्णी परिनिधिः कर्णगंडांतरालयोः ॥ न्यस्तव्यो वदने मूलं भृययश्चेतान्ततो न्यसेत् ॥ कण्ठमूले स्तनद्वंद्वे वा
मांशे हृदयांबुजे ॥ सव्यांशे पार्श्वयुगले नाभिदेशे च देशिकः ॥ भालांशपार्श्वजठरपार्श्वांशापरिके हृदि ॥ ब्रह्माण्याद्यास्ततो न्यस्या

विधिनाप्रोक्तलक्षणाः॥ मूलेनव्यापकंदेहेन्यसेद्देवींविचिंतयेत्॥ उद्यद्दिनद्युतिमिंदुकिरीटांतुंगकुचांनयनत्रययुक्तां॥ स्मेरमुखींवर
दांकुशपाशाभीतिकरांप्रभजेभुवनेशीं॥ प्रजपेन्मंत्रविन्मंत्रंद्वात्रिंशल्लक्षमानतः॥ त्रिस्वाद्वक्तैः प्रजुहुयादष्टद्रव्यैर्दशांशतः॥ द
यादर्घ्यंदिनेशायनत्रसंचिंत्यपार्वतीं॥ मध्यमष्टदलंवाह्येवृत्तंषोडशभिर्दलैः॥ विलिखेत्कर्णिकामध्येषट्कोणमतिसुंदरं॥ ततः
सं पूजयेत्पीठंनवशक्तिसमन्वितं॥ जयाख्याविजयापश्चादजिताचापराजिता॥ नित्याविलासिनीदोग्ध्रीअघोरामंगलानव वीजाद्य
मासनंदत्वामूर्त्तिंतेनैवकल्पयेत्॥ तस्यांसंपूजयेद्देवीमावाह्यावरणैःक्रमात्॥ मध्यप्राग्याम्यसौम्येषुपश्चिमेषुयथाक्रमात्॥ हृल्ले
खायाःसमभ्यर्च्याःपंचभूतसमप्रभाः॥ वरपाशांकुशाभीतिधारिण्योमितभूषणाः॥ स्थानेषुपूर्वमुक्तेषुपूजयेदंगदेवताः॥ षट्को
णेषुयजेन्मंत्रीपश्चान्मिथुनदेवताः॥ वंङ्कोणेलसद्दंडकुंडिकाक्षगुणाभयां॥ गायत्रींपूजयेन्मंत्रीब्रह्माणमपितादृशं॥ रक्षकोणे
चक्रशंखगदापंकजधारिणीं॥ सावित्रींपीतवसनांयजेद्विष्णुंचतादृशं॥ वायुकोणेपरश्वक्षमालाभयवरान्वितां॥ यजेत्सरस्वतींस
ध्यांरूढांतादृशलक्षणां॥ वह्निकोणेयजेद्रत्नकुंभमणिकरंडकं॥ कराभ्यांविभ्रतंपीनंतुंडिलंधननायकं॥ स्वालिंगसव्यहस्तेनवामेनांबु दि
जधारिणीं॥ धनदांकसमारूढांमहालक्ष्मींप्रपूजयेत्॥ वारुणेमदनंवाणपाशांकुशशरासनं॥ धारयंतंजपारक्तंपूजयेद्रत्नभूषणं
सव्येनपतिमाश्लिष्यवामेनोत्पलधारिणीं॥ पाणिनारमणांकस्थांरतिंसम्यक्समर्चयेत्॥ ऐशानेपूजयेत्सम्यक्विघ्नराजंप्रियान्वितम

शृणिपाशधरं कांतावरांगस्फुरांगुलिं॥ माध्वीपूर्णकपालाढ्यं विघूर्णं दिगंबरं। मुक्तारे विगलद्रत्नस्फारचषकधारणं॥ सिंदूरशदृ-
शाकारामुद्यन्मदविभ्रमां। धृतरक्तोत्पलामन्यपाणिनातद्ध्वजस्पृशां॥ आश्लिष्टकांतामरुणां पुष्टिमर्घे दिगंबरां॥ कर्णिकायां
निधीद्रज्यौ षट्कोणोभयपार्श्वयोः अंगानि केशरेष्वेताः पश्चात्पत्रेषु पूजयेत्। अनंगकुसुमा पश्चादनंगकुसुमातुरा। अनंग-
मदना पश्चादनंगमदनातुरा॥ भुवनपाला गगनवेगा चैव ततः परा। शशिरेखा च गगनरेखा चैवाष्टशक्तयः॥ पाशांकुशवराभी-
तिधारिण्योऽरुणविग्रहाः॥ ततः षोडशपत्रेषु कराली विकराल्युमा। सरस्वती श्री दुर्गोषा लक्ष्मीश्रुत्यौ स्मृतिर्धृतिः॥ श्रद्धा मेधा म-
तिः कांतिः आर्य्यायाः षोडशशक्तयः॥ खड्गखेटकधारिण्यः श्यामाः पूज्याश्च मातरः। पद्माद्वहिः समभ्यर्च्याः शक्तयः परिचारिकाः
प्रथमानंगरूपास्यादनंगमदनाततः॥ मदनातुरा भुवनवेगा तथा भुवनपालिका। स्यात्सर्वशिशिरानंगवेदनानंगमेखला॥ च-
षकं तालवृंतं च तांबूलं छत्रमुज्ज्वलं। चामरे चांशुकं पुष्पं विभ्राणाः करपंकजैः॥ सर्वाभरणसंदिप्तान्लोकपालान्वहिर्यजेत्
वज्रादीनि च तद्बाह्ये देवीमित्थं प्रपूजयेत्॥ ० ॥ अथ भुवनेश्वरीस्तोत्रं॥ अथानंदमयी साक्षात्शब्दब्रह्मस्वरूपिणी॥ ईडे सकलसं-
पत्यै जगत्कारणमम्बिकां॥ आद्यामशेषजननीमरविंदयोनेर्विष्णोः शिवस्य च वपुः प्रतिपादयित्रीम्॥ सृष्टिस्थितिक्षयकरीं
जगतां त्रयाणां स्तुत्वा शिवं विमलयाम्यहमम्बिके त्वां। पृथ्वीजलेन शिखिना मरुतांबरेण होत्रेंदुना दिनकरेण च मूर्तिभाजः॥

"नाभ्यासितं" इत्याद्यर्धम् अशुद्धं अन्यां प्रति
लिपिं दृष्ट्वा अत्रसत्यानि विधायैव संशोधनीयमिति इति मन्ये

५॥२॥

देवस्य मन्मथरिपोरपि शक्तिमत्ता हेतुस्त्वमेव खलु पर्वतराजपुत्रि ॥ त्रिस्रोतसः सकललोकसमर्चिताय वैशिष्ठ्यकारणमवैमि तवैव मातः ॥ त्वत्पादपंकजपरागपवित्रितासु शंभोर्जटासु सततं परिवर्तनं यत् ॥ आनंदयेत्कुमुदिनीमधिपः कलानां नान्यामिनः कमलिनीमथ नेतरां वा ॥ एकस्य मोदनविधौ परमेक ईष्टे त्वञ्च प्रपंचमभिनंन्दयसि स्वदृष्ट्या ॥ आद्याप्यशेषजगतां नवयौवनासि शैलाधिराजतनयाप्यतिकोमलासि ॥ एषां पुरस्त्रपितया न समीक्षितासि ध्येयासि गौरि मनसो न पथि स्थितासि ॥ आसाद्य जन्म मनुजेषु चिराद्दुरापं तत्रापि पाटवमवाप्य निजेंद्रियाणां ॥ नाभ्यर्चयंति जगतां जनयित्रि ये त्वां निश्रेणिकाग्रमधिरुह्य पुनः पतंति ॥ कर्पूरचूर्णहिमवारिविलोडितेन ये चंदनेन कुसुमैश्च सुजातगंधैः ॥ आराधयंति हि भवानि समुत्सुकास्त्वां ते खल्वशेषभुवनाधिभुवः प्रथंते ॥ आविश्य मध्यपदवी प्रथमे सरोजे सुप्ताहिराजसदृशी विरचय्य विम्बं ॥ विद्युल्लतावलयविभ्रममुद्वहंती पद्मानि पंचविहनरथमश्नुवाता ॥ तन्निर्गतामृतरसैरभिषिच्य गात्रं मार्गेण तेन विलयं पुनरप्यवाप्ता ॥ येषां हृदि स्फुरसि जातु न ते भवेयुर्मातर्महेश्वरकुटुंबिनि गर्भजाताः ॥ आलम्बिकुंतलभरामभिरामवक्त्रामापीवरस्तनतटीं तनुवृत्तमध्यां ॥ चिंताक्षसूत्रकलसालिखिताढ्यहस्तामावर्तयामि मनसा तव गौरमूर्त्तिं ॥ आस्थाय योगमवजित्य च वैरिषट्कमाबध्य चेंद्रियगणं मनसि प्रसन्ने ॥ पाशांकुशाभयवरांढ्यकरां सुवक्त्रामालोकयंति भुवनेश्वरि योगिनस्त्वां ॥ उत्तप्तहाटकनिभैः करिभिश्चतुर्भिरावर्जितामृतघटैरभिषिच्यमाना ॥ हस्तद्वये

दयते
था
त

॥ तंत्रचिं॰॥
॥२४६॥

ननलिनेक्षचिरैवहंतीपञ्चापिसाभयवराभवसित्वमेव। स्त्वामिरुग्रविविधायुधमवाह्नीभिर्देवैर्वीरैरभिरधिरुह्यमृगाधिराजं
द्वींदलद्युतिरमर्त्यविपक्षपक्षान्नक्रुद्धवतीत्वमदिदेविभवानिदुर्गे। आविर्निदाघजलशीकरशोभिवक्त्रांगुंजागतेनपरिकल्पि
तहारयष्टिं। भुक्त्रांभुकामशितकांतिमनंगतंत्रामाद्यांपुलिंदतरुणीसमहंस्मरामि। हंसैर्गतिक्वणितनूपुरहस्तैर्मञ्जीरिवाप्यव
वैनैरनुगम्यमाना। पद्मादिवोर्ध्वमुखकुड्मलजाततालोश्रीकंठपत्निशिरसैवदधेतवांघ्रिं। ताभ्यांसमीजुमदद्भ्रमतेवदध्यास्त
न्याप्यभालनयनंस्फुपकेननेन। सद्राजुरागतलेननिरीक्षमाणेजंडभेअपिभवानितवाननतोस्मि। डुहस्मरामिजितहस्तिकरावलेपो
स्थौल्येनमार्दवतयापरिभूतरंभौ। स्त्रोणीभरस्यसहनोपरिकल्पवंतौस्तंभावथामिवयसातवमध्यमेव। श्रोणीपोस्तनौवयुगपत
पृथयिष्यंतोधैर्यात्यात्परेनवयसापरिस्पृष्टमारः। रोमावलीविलसितेनविभाव्यमूर्त्तिर्मेध्यस्तवस्फुरतुमेहृदयस्यमध्ये। सत्व्यास्य
रस्यहरनेत्रकृतांगभीरोल्लावरापवारिभृतंनवयौवनेन। आपाटलंतमिवपल्लवमग्रपृष्ठंनाभिंकदापितवदेविनविस्मरेयं। ईशो
परूहपिशुनंभसितंदधानेकाश्मीरकुंकुममनस्तनपंकजेते। स्तानोधितस्यकरिणःक्षणालक्षफेनौसिंदूरितौस्मरयतःसमदस्य
कुंभौ। कृष्णातिरिक्तगलउज्वलकांतिधारशोभोभुजौनिजरिपोर्मकरध्वजेन। कंठग्रहायरचितौकिलदीर्घपाशौमातर्ममेच्छतिपदं
नविलंघयेते। नात्यायतंरचितमस्तुतिलासमौर्वीयंभृषाभरेणाविविधेनविराजमानं। कंठंमनोहरगुणांगिरिराजकन्येसंविंत्यतृप्ति

भर वा मि
ऊ्री/
न्द्रानुरागतर
ध्ये/ह
पा
रि
ष्ठौ-वा
ल्ल
सि / पे
सि (वा) फल
णे / जड्धे अ
नौ।
ण्यौ
दत्त
नौ
का

तृ रु॰॥
२४६॥

देव

मुपयामि कदापि नाहं ॥ अत्यायताक्षमभिजाततलाटपट्टं मंदस्मितेन दरफुल्लकपोलरेखं ॥ विद्याधरं वदनमुन्नतदीर्घनासं यस्ते स्मरत्यसकृदंब स एव जातः ॥ आदिक्षधारवलैखमनल्पगंधपुष्पोपरिभ्रमदलिव्रजनिर्विशेषं ॥ यश्चेतसा कलयते नव केशपाशं तस्य स्वयं गलति देवि पुराणपाशः ॥ श्रुतिसुचरितपाकं धीमतां स्तोत्रमेतत् पठति य इह मर्त्यो नित्यमार्द्रांतरात्मा ॥ स भवति पदमुच्चैः संपदां पादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानां चिराय ॥ ॥ इति भुवनेश्वरीस्तोत्रं ॥ ॥ अथ भुवनेश्वरीकवचं ॥ ॥ देव्युवाच ॥ भुवनेश्याश्च देवेश याया विद्या प्रकाशिता ॥ श्रुताश्चाधिगताः सर्वाः श्रोतुमिच्छामि सांप्रतं ॥ त्रैलोक्यमंगलं नाम कवचं यत्पुरोदितम् ॥ ॥ ईश्वर उवाच ॥ पार्वति शृणु वक्ष्यामि सावधानावधारय ॥ त्रैलोक्यमंगलं नाम कवचं मंत्रविग्रहं ॥ सिद्धविद्यामयं देवि सर्वैश्वर्यप्रदायकं ॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ त्रैलोक्यमंगलस्यास्य कवचस्य ऋषिः शिवः ॥ छंदो विराड्जगद्धात्री देवता भुवनेश्वरी ॥ धर्मकामार्थमोक्षेषु विनियोगः प्रकीर्तितः ॥ ह्रीं बीजं मे शिरः पातु भुवनेशी ललाटकं ॥ ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनं ॥ श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी ॥ वामकर्णं सदा पातु ऐं घ्राणं पातु मे सदा ॥ ह्रीं पातु वदनं देवी ऐं पातु रसनां मम ॥ वाक् त्रिपुरा त्रिवर्णात्मा कंठं पातु परांबिका ॥ श्रीं स्कंधौ पातु नियतं ह्रीं पातु भुजौ सर्वदा ॥ क्लीं करौ त्रिपुटेशानी त्रिपुरैश्वर्यदायिनी ॥ ओं पातु हृदयं ह्रीं मे मध्यदेशं सदावतु ॥ क्रौं पातु नाभिदेशं सा त्र्यक्षरी भुवनेश्वरी ॥ सर्वबीजं सदा पृष्ठं पातु सर्ववशंकरी ॥ ह्रीं पातु

गुह्यदेशं मेनमो भगवती कटिं ॥ माहेश्वरी सदा पातु शक्तिर्नो जानुयुग्मकं ॥ अन्नपूर्णा सदा पातु स्वाहा पातु पदद्वयं ॥ ह्सां दशाक्ष
रीपायादन्नपूर्णाखिलं वपुः ॥ तारं मायारमाकामः षोडशार्णा ततः परं ॥ शिरस्था सर्वतः पातु विंशत्यर्णात्मिका सुदा ॥ तारं दुर्गे युगं
रक्ष स्वाहेति च दशाक्षरी ॥ जयदुर्गा घनश्यामा पातु मां सर्वतो मुदा ॥ मायावीजादिका चैषा दशार्णा च ततः परा ॥ उत्तप्तकांचनाभा
सा जयदुर्गाननेवतु ॥ तारं ह्रीं दुं दुर्गायै नमो ष्टवर्णात्मिका परा ॥ शंखचक्रधनुर्वाणधरा मां दक्षिणेवतु ॥ महिषमर्दिनि स्वाहा व
सुवर्णात्मिका परा ॥ नैर्ऋत्यां सर्वदा पातु महिषासुरनाशिनी ॥ माया पद्मावती स्वाहा सप्तार्णा परिकीर्तिता ॥ पद्मावती पद्मसंस्था प
श्चिमे मां सदावतु ॥ पाशांकुशपुटा मायेहि परमेश्वरि स्वाहा ॥ त्रयोदशार्णा ताराद्या साश्वारूढाननेवतु ॥ सरस्वती पंचस्वरे नित्य
क्लिन्ने मदद्रवे ॥ स्वाहा रत्यक्षरी नित्या मामुत्तरे सदावतु ॥ तारं माया च कवचं रक्ष रक्ष ततो वधू ॥ हूं क्षें क्रीं फट् महाविद्या द्वादशार्णा
खिलप्रदा ॥ श्रीरित्याद्याभिः पायाच्छिवकोणे सदा च माम् ॥ ऐं क्लीं सौः सा ततो बाला मामूर्द्धदेशतोवतु ॥ विंदंता भैरवी बाला भूमौ
मां सर्वदावतु ॥ इति ते कवचं पुण्यं त्रैलोक्यमंगलं परं ॥ सारात्सारतरं पुण्यं महाविद्योघविग्रहं ॥ अस्यापि पठनात्सद्यः कुवेरोपि धनेश्व
रः ॥ इंद्राद्याः सकला देवा धारणात्पठनाद्यतः ॥ सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः ॥ पुष्पांजल्यष्टकं दद्यान्मूलेनैव पृथक् पृथ
क् ॥ संवत्सरशतायास्तु पूजायाः फलमाप्नुयात् ॥ प्रीतिमनोन्यतः कृत्वा कमला निश्चला गृहे ॥ वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः

यो धारयति पुण्यात्मा त्रैलोक्यमंगलाभिधं ॥ कवचं परमं पुण्यं सोपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत्
पुरुषो दक्षिणे वाहौ नारी वामभुजे तथा ॥ बहुपुत्रवती भूत्वा वंध्यापि लभते सुतं ॥ ब्रह्मास्त्रादीनि शस्त्राणि नेव दंशंति तं जनम्
एतत्कवचमज्ञात्वा यो भजेद्भुवनेश्वरीं ॥ दारिद्र्यं परमं प्राप्य सोचिरान्मृत्युमाप्नुयात् ॥ ॥ इति श्रीरुद्रयामले देवीश्वरसंवा
दे त्रैलोक्यमंगलं नाम कवचं समाप्तम् ॥ ॥ अथ शिवस्य ॥ नमः शिवायेति मंत्रः पंचार्णस्तारपूर्वकः ॥ षडक्षरोयं विप्रा
णां भुक्तिमुक्तिप्रसाधकः ॥ वामदेवो मुनिश्छंदो देवः सदाशिवः ॥ षड्वर्णैस्तु षडंगानि कल्पयेत्साधकोत्तमः ॥ ॥ ततो
ध्यायेत गोक्षीररजताद्रिसमप्रभं ॥ चारुचंद्रकलाराजज्जटामुकुटमण्डितं ॥ पंचवक्त्रधरं शंभुं पंचवक्त्रं त्रिलोचनं ॥ शार्दू
लचर्मवसनं रत्नाभरणभूषितं ॥ दक्षोर्द्ध्वहस्तं टंकं च वरं च दधतः करैः ॥ वामोर्द्ध्वहस्ते हरिणं दधानमभयं परे ॥ सुप्रसन्न
मुखाम्भोजं निविष्टं कुशविष्टरे ॥ ब्रह्मविष्णुमहेशाद्यैस्स्तुतं भक्त्या सुरासुरैः ॥ विश्वाद्यं विश्ववपुषं भवतीति फलं भवं ॥ ॥
समाप्तश्चायं भुवनेश्वरीक्रमः ॥ / ॥ अथ धूमावतीक्रमः ॥ ॥ अथातः संप्रवक्ष्यामि धूमावत्या मनुं परं ॥ धूं धूं धूमावती स्वा
हा मंत्रोष्टाक्षर ईरितः ॥ पिप्पलादो मुनिश्छंदो निवृज्ज्येष्ठास्य देवता ॥ षड्दीर्घबिंदुयुक्तेन धकारेण षडंगकं ॥ आद्यबीजं हृ
यान्तस्थैः षड्वर्णैर्न्यासमाचरेत् ॥ अंगुष्ठादौ षडंगेषु पुनर्देवीं विचिंतयेत् ॥ विवर्णां चंचला क्रुद्धा दीर्घा च मलिनांबरा ॥ विमुक्तकु

उत्लादीर्घाविधवाविरलद्विजा॥ काकध्वजरथारूढाविलंवितपयोधरा॥ शूर्पहस्तातिरुक्षाक्षीधूतहस्तात्वरान्विता॥ प्रवृद्ध
रोमातुभृशंजटिलाकुटिलेक्षणा॥ क्षुत्पिपासार्द्दितानित्यंसदाकलहतत्परा॥ एवंविधांसदाध्यायेत्ततःकर्मसमाचरेत्॥ पूर्वो
क्तेपूजयेत्पीठेज्येष्ठांशत्रुनिवृत्तये॥ केशरेषुषडंगानिपत्रस्याअष्टशक्तयः॥ क्षुधातृष्णारतिर्निद्रानिर्ऋतिर्दुर्गतीस्तथा॥ अक्ष
मेतित्ततोदेवाइत्याद्याआयुधान्विताः॥ एवंज्येष्ठांसमाराध्यसिद्धमंत्रःप्रजायते॥ ॥ ॥अत्रधूमावतीस्तोत्रंपतितम्

अथधूमावतीकवचम्॥ ॥पार्वत्युवाच॥ देवदेवमहादेवभक्तानुग्रहकारकः। धूमावत्याःकवचंब्रूहिमेकरुणानिधे॥ ॥महादेवउवाच॥ अस्तिगुह्यतमंलोकेकवचंशत्रुनिग्रहं॥ सर्वेप्सितप्रदंदेवितवत्रैल्यकाश्यते॥ यच्छ्रुत्वारामचंद्रेणसंगरेरावणोहतः॥ भार्गवेनापियच्छ्रुत्वाजितंसर्वचराचरं॥ तमेवकवचंवच्मिसावधानावधारय॥ कवचस्यमहादेविपिप्पलादऋषिःस्मृतः॥ छंदोविराट्देवताचश्रीमद्धूमावतीप्रिये॥ शत्रूणांमारणेदेविविनियोगःप्रकीर्त्तितः॥ ॐधूमावतीसदापातुशिरोमेशत्रुमर्दिनी॥ चण्डरूपामहादेवीललाटेपातुमांसदा॥ धूम्राक्षामानयनेपातुपातुभीमाश्रुतीमम॥ काकध्वजानासिकीमेसर्वशत्रुविनाशिनी॥ प्रलम्बोष्ठीसदापातुवदनंमुंडमालिनी॥ विकृतास्यासदापातुगलंमेरिपुमर्दिनी॥ धूंबीजाख्यासदापातुघाटंमेरिष्टतारिणी॥ स्कंधौकंकालिनीपातुनृमुण्डस्रग्विभूषणा॥ शुष्कमांसासदापातुःभीषणामेभुजद्वयं॥ लम्बस्तनीसदापातुधूम्रवर्णास्तनद्वयं॥ सूर्पहस्ताचहृदयंपातुभैरववादिनी॥ शत्रुमांसप्रियापातुपृष्ठंमेरुधिरप्रिया॥ मदिराघूर्णनयनापातुपार्श्वेकरंकिनी॥ करालिनीसदापातुकुक्षिंमेशववाहिनी॥ वज्रतुण्डापातुनित्यंकटिदेशंशिवप्रिया॥ करालवदनापातुगुह्यदेशंदिगंबरी॥ घोरट्टहासिनीपातुजानुनीविरलद्विजा॥ पादौमेपातुसततंक्षुत्पिपासाकुलासदा॥ घोरघंटासदापातुसर्वांगेशंकरप्रिया॥ इतितेकथितंदेविकवचंरिपुनिग्रहं॥ यस्यप्रपठनादेविसर्वसिद्धिःकरेस्थिता॥ नतस्यशत्रुपीडास्यादुष्टपीडाकदापिन॥ ग्रहपीडाभूतपीडानभवेत्कुलसुंदरी॥ धूमावतींसमभ्यर्च्यकृष्णपुष्पेणसाधकः॥ मत्स्यमांसासवैर्देवीपूजयित्वायथाविधिं॥ महामांसस्यधूपेनधूपयेत्तांतुमंत्रवित्

अष्टोत्तरशतावृत्तिंपठेदेकमनाःप्रिये॥ पक्षमात्रेणदेवेशिरिपुंहन्यान्नसंशयः॥ एतत्सर्वंमहेशानिमारणेषुनियोजयेत्॥ कवचस्मर
णाद्देविरिपुर्यातियमालयं॥ ॥इतिरुद्रयामलेधूमावतीकल्पेधूमावतीकवचं॥ ॥अथाघोरस्य॥ अथातःसंप्रवक्ष्यामिसाघो
रास्त्राख्यंमनुं॥ मायांस्फुरद्वयंचैवप्रस्फुरद्वितयंवदेत्॥ पश्चाद्वदेत्तरतनूरूपांतेचचटद्वयं॥ प्रचटद्वितयंपश्चात्कहद्वयंवमद्वयं बंध
द्वयंघातयद्विहूंफट्ट्शरवर्णकः॥ मनुःप्रोक्तोघोरमुनिःत्रिष्टुछंदोस्यदेवता॥ अघोररुद्रोवैबीजंह्रींशक्तिःपरिकीर्तिताः॥ शरर्तुदशादि
ग्दंतिदिवाकरमितैर्मनोः॥ वर्णैःकुर्यात्षडंगानिपदन्यासोथवक्ष्यते॥ कटेचवक्त्रगलहृत्नाभ्यंध्रुकरजानुषु॥ सजंघापादयोश्चैव
पदान्येकादशन्यसेत्॥ शरर्तुनेत्रवस्वद्विरशवेदस्विवेदकैः॥ रसनेत्रमितैर्वर्णैस्तदानिभवंतुमे॥ ध्यायेत्तोमेघकालंभीमदंष्ट्रंत्रि
लोचनं॥ भुजंगभूषणंरक्तवसनालेपशोभितम्॥ परशुंकरवालंचबाणांस्त्रिशिखमेवच॥ दधानंदक्षिणेहस्तेसव्येदिक्क्रमतःपरैः
डमरुंखेटकंचापंनकपालंचबिभ्रतं॥ ॥समाप्तश्चायंधूमावतीक्रमः॥ ॥अथातःसंप्रवक्ष्यामिस्तंभनींबगलामुखीं॥ तारंमा
यांसमुच्चार्यवदेद्बगलामुखी॥ तदग्रेसर्वदुष्टानांततोवाचंमुखंपदं॥ स्तंभयेतिपदंजिह्वांकीलयेतिततःपरं॥ बुद्धिंविनाशयह्रींॐस्वा
हाषट्त्रिंशद्वर्णकः॥ नारायणोमुनिस्त्रिष्टुप्छंदश्चबगलामुखी॥ देवीबीजंतुह्लेखास्वाहाशक्तिःसमीरिता॥ विनियोगोस्यविख्यातःपु
रुषार्थचतुष्टये॥ ह्लेखांहृदयंप्रोक्तंशिरश्चबगलामुखी॥ शिखातुसर्वदुष्टानांततोवाचंमुखंपदं॥ स्तंभयेतिचवर्म्मोक्तंजिह्वांकीलयने

त्रकं॥ बुद्धिंविनाशयस्वंस्यात्षडंगंन्यासईरितः॥ मूर्द्ध्निभालेभ्रुवोर्मध्येनेत्रयोःश्रोत्रयोर्नसोः॥ गंडद्वयेतथाचौष्ठेधरास्यचिबुकेभुव॥
गलेचदक्षदोर्मूलेतन्मध्येमणिबंधके॥ अंगुलीनांतथामूलेहस्ताग्रेचैवमेवहि॥ न्यसेद्वामभुजादौचदक्षोरुमूलकेततः॥ दक्षजानुनि
गुल्फेवांगुलिमूलेपदाग्रतः॥ गंभीरांचमदोन्मत्तांतप्तकांचनसंनिभां॥ चतुर्भुजांत्रिनयनांकमलासनसंस्थितां॥ मुद्गरंदक्षिणेपाशंवा
मेजिह्वांचवज्रकं॥ पीतांबरधरांसांद्रवृत्तपीनपयोधरां॥ हेमकुंडलभूषांचपीतचंद्रार्द्धशेखरां॥ पीतभूषणभूषांचस्वर्णसिंहासनस्थि
तां॥ एवंध्यात्वाचदेवेशींशत्रुस्तंभनकारिणीं॥ भूप्रदेशेमनोरम्येपुष्पामोदसुधूपिते॥ गोमयेनाथसंलिप्तेमंडपेत्वासनंचरेत्॥ सौवर्णे
वाथरौप्येवापैत्तलेवाथभूर्जके॥ कर्पूरागुरुकस्तूरीश्रीखंडकुंकुमैरपि॥ लिखेद्यंत्रंप्रयत्नेनलेखन्याहेमतारयोः॥ मध्येयोनिंसमालि
ख्यतद्बाह्येतुषडस्त्रकं॥ तद्बाह्येष्टदलंपद्मंतद्बाह्येषोडशच्छदं॥ चतुरस्त्रत्रयंबाह्येचतुर्द्वारोपशोभितं॥ यत्रनोक्तंदेवतायाःपीठंवापीठ
शक्तयः॥ तत्रमायोदितंपीठंज्ञेयंताएवशक्तयः॥ तद्बीजेनयजेत्पीठंयद्वामायालुनाथवा॥ तत्रावाह्ययजेद्देवींसुपीतैरुपचारकैः॥
यजेदंगानिषट्कोणेपूर्वद्वारादिषुक्रमात्॥ गणेशंबटुकंवापियोगिन्यःक्षेत्रपालकं॥ ईशानादिनिर्ऋत्यंतंगुरुपंक्तिंसमर्चयेत्॥ बग
लांपूर्वपत्रेतुस्तंभनीचततःपरं॥ जंभिनीमोहिनीवश्याअचलाचंचलातथा॥ दुर्द्धर्षाकल्मषाधीराकल्पनाकालकर्षिणी॥ भ्रामिका
मंदगमनाभोगाख्याचैवयोगिका॥ एताःषोडशपत्रेषुगंधपुष्पाक्षतैर्यजेत्॥ षोडशस्वरसंयुक्ताःसंप्रदायात्कुलागमे॥ यजेद्वपत्रम

॥तंत्रवि॰
॥२५०॥

छेसुकल्पिते चाष्टपत्रके। ब्राह्म्याद्यष्टौ तु पूर्वादौ वाहनायुधसंयुताः॥ लोकेशाश्च तदस्त्राणि पूजयेद्बाह्यतस्तथा। योनिमध्ये मूलदेवीं
त्रिपुष्पांजलिभिर्यजेत्॥ धूपदीपमुने वेद्यै गंधतांबूलदापकैः॥ नीराज्य विधिवत्पश्चाज्जपसंख्यां निवेदयेत्॥ ॥अथ बगलामुखी
स्तोत्रं॥ ——— ॥ॐ पीतवस्त्रां सुनेत्रां च द्विभुजां दाहकोज्वलां। शिलापर्वतहस्तां च स्मरेत्तां बगलामुखीं॥ मध्ये सुधाब्धिमणिमंडपरत्नवे
द्यां सिंहासनोपरिगतां परिपीतवर्णां। पीतांबराभरणमाल्यविभूषितांगीं देवीं नमामि धृतमुद्गरवैरिजिह्वां॥ जिह्वाग्रमादाय करे
ण देवीं वामेन शत्रुं परिपीडयंतीं। गदाभिघातेन तु दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि॥ त्रिशूलधारिणीमंबां सर्वसौभाग्यदा
यिनीं। सर्वशृंगारवेशाढ्यां देवीं ध्यात्वा प्रपूजयेत्॥ चलत्कनककुंडलोल्लसितचारुगंडस्थलां लसत्कनकचंपकद्युतिविराजिचंद्रा
ननां। गदाहतविपक्षकां कलितलोलजिह्वांचलां स्मरामि बगलामुखीं विमुखवाङ्मुखस्तंभिनीं। पीयूषोदधिमध्यचारुविलसद्र
त्नोज्वले मंडपे तत्सिंहासनमौलिपातितरिपुप्रेतासनाध्यासिनीं। स्वर्णाभां कलपीडितारिरसनां भ्राम्यद्गदाविभ्रमां यस्त्वां पश्यति या
ति तस्य विलयं सद्योपि सर्वापदः॥ देवि त्वच्चरणांबुजेर्चितरते यः पीतपुष्पांजलिं मुद्रां वामकरे निधाय च पुनर्मंत्री मनोज्ञाक्षरं। पीत
ध्यानपरोपि कुंभकवशाद्बीजं स्मरेत्पार्थिवं तस्यामित्रमुखस्य वाग्हृदयगोस्तंभो भवेत्तत्क्षणात्॥ मंत्रस्यान फलं विपक्षदलने स्तोत्रं
पवित्रं च ते यंत्रं वादिनिमंत्रिणां त्रिजगतां यंत्रं पवित्रं च ते॥ मातः श्रीबगलेतिनाम ललितं यस्तूयनेने मुखे तन्नामग्रहणेन संपदिः

॥पुरु: ॥
॥२५०॥

मुखस्तंभोभवेद्वैरिणां॥ वादीमूकतिसंकतिक्षितिपतिर्वैश्वानरःश्रीततिक्रोधीशांततिदुर्जनःसुजनतिक्षिप्रंगुखंखंजति॥ गर्वीखर्वति
सर्वस्वजगत्तित्वमंत्रणायंत्रिताःश्रीनित्येवगलामुखीप्रतिदिनंकल्याणितुभ्यंनमः॥ दुष्टस्तंभनकंचविघ्नशमनंदारिद्र्यविध्वंसनंभूभृ
त्संयमनंचयन्मृगदृशांचेतः समाकर्षणं॥ सौभाग्यैकनिकेतनंसमदृशोःकारुण्यपूर्णेक्षणंमृत्योर्मारणमाविरस्तुपुरतोमातस्त्वदी
यंवपुः॥ त्वंविद्यापरमात्रिलोकजननीविघ्नौघसंछेदिनीयोषाकर्षणकारिणीचजगतांबन्धैकसंछेदिनी॥ दुष्टोच्चाटनकारिणीजनम
नःसंमोहसंधायिनी॥ जिह्वाकीलनभैरवीविजयतेब्रह्मास्त्रविद्यापरा॥ मातर्संभयमद्विपक्षवदनंजिह्वांचसंकीलयब्राह्मीमुद्रय
मुद्रयाशुधिषणांवङ्घ्रोर्गतिंस्तंभय॥ शत्रूंश्चूर्णयचूर्णयाशुगदयागौरांगिपीतांबरेविघ्नौघंवगलेहरप्रतिदिनंकारुण्यपूर्णेक्षणे॥ मा
तर्भैरविभद्रकालिविजयेवाराहिविश्वाश्रयेश्रीनित्येसमयेमहेशिवगलेकामेसिवामेरमे॥ मातंगित्रिपुरेपरात्परतरेस्वर्गापवर्गप्रदे
दासोऽहंशरणागतःकरुणयाविश्वेश्वरित्राहिमां॥ शाङ्कघेचौरसंघेप्रहरणसमयेवंधनेवारिमध्येवह्नौवादेविवादेप्रकुपितनृपतौदिव्य
कालेनिशायां॥ वश्यात्वंस्तंभनेवारिपुवधसमयेनिर्विपन्नोरणोवागच्छंस्तिष्ठंत्रिकालंस्तवपठनमिदंकार्य्यसिद्धिप्रदंच॥ मातर्य्यध्वनरः
सघासवमिदंदेव्याःपठेत्सारंधत्तायेत्त्वमिदंतथैवसमस्येवाहौकरेवागले॥ राजानोवरयोषितोपिकरिणःसर्प्पाःमृगेन्द्राःखलाःस्तंभंया
तिनिरवेवितेरिपुगणालक्ष्मीर्य्यथासिद्ध्यति॥ अनुदिनमभिरामंसाधकोयस्त्रिकालेपठतिसभुवनेशःपूज्यतेदेववर्गैः॥ भवतिसकलकृत्यं

तस्यदृष्टोवलोकेभवतिपरमसिद्धोलोकमातस्तथैव॥ ॥इतिश्रीनारदपीतांबरास्तोत्रंसंपूर्णम्॥ ॥अथवगलामुखीकवचं
श्रीमहोग्रतारोचाव। राज्ञांमंडलकादीनामएडलोपरिसर्व्वतां॥ सगर्वाणांमहादेवधमविहृतचेतसां॥ गजसर्प्पारिजंतूनां
भंजनंवदशंकर॥ ॥श्रीभैरवउवाच। पुराकृतयुगेदेवियातक्षोभमुपस्थिते। सप्तार्णवानामेकत्वगमक्षोभंययुःसुरा
सेंद्रास्सविस्मवःसर्वसभयामासुपस्थिताः॥ ॥देवाऊचुः॥ शिवशंकरहेईशरक्षास्मान्शरणागतान्॥ महावातादिविक्षोभ
क्षुब्धानस्मान्महार्णवात्॥ तच्छ्रुत्वाहंसुरेशानिकवचंपूर्वनिर्मितं॥ दत्तवान्सर्वदेवेभ्योमहाभयनिकृंतनं॥ कवचंवगलामुख्याः
शिवप्राणप्रदंमहत्॥ पूर्वंभस्मासुरत्रासाजयविद्रावितःस्वयं॥ पठतेतत्वमस्मारणारक्षस्त्वपरमेश्वरी॥ शिवप्राणप्रदंतस्माद्वि
श्वतंरक्षकंपरं॥ षट्त्रिंशदक्षवामेव्याद्वगलापरमाशिरः॥ सहस्रारेगुरुःपातुशक्त्यापरमयोज्वलः॥ विद्रूपापरमाशक्तिर्लल
टेशिवगेहिनी॥ भ्रूयुगंमेमहाकालीनेत्रयुग्मंपरेश्वरी॥ कर्णयुग्मंपीतपुष्पप्रियामेव्यात्कपोलयोः॥ चिबुकेपरमांशक्तिरोष्ठयोःप
रमाकलाः॥ वदनंसकलापातुपरंब्रह्मस्वरूपिणी॥ पीतपुष्पार्चिताकण्ठंस्कंधौस्कंदस्तनप्रदा॥ पीतांबरादक्षभुजंवामंवामांगहा
रिणी॥ हृदयंसस्तनंदंभानुबिंबमुखेकक्षकं॥ पृष्ठंवंडधरंमेव्यात्वष्टिकंदर्प्परूपहृक॥ पातुमांपरमाशक्तिभ्रामरीजटिलाल
काः॥ षट्त्रिंशदक्षराविद्यापीतापीतवपुर्द्धरा॥ पीतपुष्पार्चितापीतनेवेद्यादिवलिप्रिया॥ सर्वांगमेशुभापातुवैरिस्तंभनकारिणी॥

ब्रह्मरंध्रे तु परमा संसारार्णवतारिणी॥ तारयेन्मां महादेवी मनोवांछितदायिनी॥ आज्ञाचक्रे गुरौ पातु महाभयविनाशिनी॥
सर्वविद्यावरा पातु जिह्वाशास्त्रवपुर्धरा॥ विशुद्धे षोडशदले जीवेश्वरवपुर्धरा॥ षट्त्रिंशत्तत्त्वरूपाख्या कंठस्था मां सदावतु॥
हृत्पंकजे भवानीश रूपारूपपरात्मिका॥ इंद्रियादिमहाशत्रून् विदारयतु वारुणा॥ मणिपूरे दशदले महाविष्णुस्वरूपधृक्
दारयन्नखिलान्मोहान्मां माया सा परावतु॥ हृत्पंकजे भवानीश रूपारूपपरात्मिका॥ इंद्रियादिमहाशत्रून् विदारयतु दारुणा॥
मणिपूरे दशदले महाविष्णुस्वरूपधृक्॥ दारयन्नखिलान्मोहान्मां माया सा परावतु॥ प्रजापतिस्वरूपेयं स्वाधिष्ठाने च षड्दले
सृष्टिस्थितापरा विद्या मां मोहाद्गत्तावतु॥ गणेशरूपधृक् पातु स्वाधारे मां चतुर्दले॥ षोडशस्वररूपेयं पातु मां परमा कला
कं खं गं घं तथा ङं चं छं जं झं ञं तथावतु॥ टं ठं डं ढं त्वमाकारा णं तं थं दं सदावतु॥ धं नं पं फं तु शत्रुभ्यः पातु मां ध्यानतत्परः॥ बं भं
मं यं विदायार्थशत्रून्मां वाक्स्वरूपिणी॥ रं लं वं शं तथा षं सं शत्रुजिह्वां विदर्यतु॥ मेधा च मे मुखे जिह्वां सदा रक्षतु शांकरी हं
लं क्षं सकले पातु रक्षेन्मे परमं यशः॥ प्रणवं स्थिरमाया च तृतीयं कात्रितयं तथा॥ पातृतीयं स्वराद्युग्मं पादाद्यं स्वरपंचमं का
द्वितीयं दक्षनेत्रे सर्वदुष्टवकृत्स्नतं॥ षष्ठस्वरा तथा वाचं स्तंभयाथापि जिह्वया॥ द्वितीययाकालपेति तथा तथाशु द्विविनाशय
स्थिरमाया तथा तारं चांते च ह्रीं वधूप्रिये॥ एषा विद्या महाविद्या शत्रुस्तंभनकारिणी॥ त्रिधा मंत्रं समुद्धार्य सर्वाङ्गे व्यापकं कुरु

जयत्येवनसंदेहःशत्रून्शूरान्महाहवे ॥ कुलालमृत्तिकांगृह्यवामहस्तेनदीपकं ॥ कृत्वाप्रज्वाल्यतैलेनवामेस्थाप्यमनुंजपेत्
त्रिरात्रंस्तंभयत्येवशत्रुसेनांमहाहवे ॥ गौरवर्णांपीतपुष्पैर्वालांसंपूज्यभावतः ॥ न्यासान्विधायदेहेनभजन्योगीजपन्मनुम्
पीतोपचारैस्तांशक्तिंसंतोष्यपरिचारणा ॥ वशयेत्येवलोकेशंकिंपुनःक्षुद्रमानुषं ॥ वाचस्तंभनकामस्तुवल्गापरिकरंहठः ॥ श
क्तिलिंगोपरिस्थाप्यत्रिसहस्रंजपेन्मनुं ॥ इंद्राणींवशयत्येवकिंपुनःक्षुद्रमानुषीं ॥ मंडलाधीशवशकृदुत्तराभिमुखंस्थितः
दक्षाननांकुंदरींतुषोडशाब्दांशुचिस्मितां ॥ कुचयोस्तुकरौदत्वापीतायांहसिताननां ॥ लिंगंसंस्थाप्यसंतुंवन्मुखंपीतामनुंजपे
त्रिसहस्रंमहाराजवशयत्येवनान्यथा ॥ येनकेनाप्युपायेनवगलाभक्तितत्परः ॥ स्तंभयेत्सकलांल्लोकान्वशयत्येवशांकरं ॥
मारयेच्छत्रुसंघातमुच्चाटयतिपर्वतम् ॥ देवानांस्थपतिंवंडंछादयेत्किंपरंजनं ॥ अस्यपार्वतिमाहात्म्येकवचस्यकीर्तितं ॥
महाग्रेदारुणेचांतेप्रलयाद्युपस्थिते ॥ स्तंभितंचतदादेविवातसंघंसकृज्जपात् ॥ एवंसापरमाविद्यामहाशत्रुविदारिणी ॥
नास्तिकेतस्करेदुष्टेमूढेपंडितमानिनि ॥ नदेयाहृदयाविद्याददन्नन्धमवाप्नुयात् ॥ सुशीलायसुदांतायगुरुभक्तिपरायच ॥
विशुद्धायमहामंत्रंजापिनेदेयमुत्तमं ॥ कृत्वापुराकवचंजपेन्मंत्रंसमाहितः ॥ नान्यथास्तंभनीविद्यासिद्धास्यादितिनिश्चय ॥
॥ ॥ इतिश्रीएकवीरातंत्रेमहोग्रतारासंवादेवगलामुखीकवचंसम्पूर्णम् ॥ ॥ अथमृत्संजयभैरवस्य ॐजूंसः

तिमंत्रस्य प्रोक्तो मृत्युंजयाभिधः ॥ ऋषिः कहोलो देव्यादिगायत्री छंदईरितं ॥ मृत्युंजयो महादेवो देवता परिकीर्त्तितः ॥ षड्दीर्घयुक्तभगुणा षडंगविधिरीरितः ॥ पद्मद्वयस्थितं स्मेरं चंद्रार्काग्निविलोचनं ॥ हस्ते मुक्तानमुद्रांच पाशमक्षाक्षिमालिके ॥ कर्पूराभं शीर्षचंद्रकरोद्यमृतधारया ॥ आर्द्रांगं च शुभ्रमाभं कांत्या विश्वविमोहनं ॥ ॥ समाप्तश्चायं वगलामुखीक्रमः ॥ ॥ इति श्रीतंत्रचिंतामणौ त्रिपुरभैरवीमहालक्ष्मीमातंगीभुवनेशीधूमावतीवगलामुखीविद्यानां नित्यार्चननिर्णयनाम सप्तविंशतितमः प्रकाशः ॥ २७ ॥

अथ प्रत्येकनित्यार्चननिर्णीयसकलेष्टसाधनोपयुक्तत्वात्प्रथमतश्चक्रपूजामाह ॥ चक्रपूजां प्रवक्ष्यामि सर्वतंत्रेषु गोपितां ॥ अभीष्टसिद्धिदां नातः परं किंचन विद्यते ॥ सर्वेषामेव देवानां प्रिया प्रोक्तेप्सितप्रदा ॥ वैदिकैरपि कर्त्तव्या भीष्टसिद्ध्यै पुरोहितं ॥ कृत्वा तु कौलिकं देवि पूर्णाः स्युस्तन्मनोरथाः ॥ ॥ शांतिके पौष्टिके वश्ये चाकृष्टौ स्तंभमारणे ॥ विद्वेषोच्चाटने मोहे परसैन्यपराजये ॥ आज्ञावृद्धौ च मोक्षार्थे सिद्धिसाधनहेतवे ॥ ऽपसर्गविनाशाय ग्रहदोषनिवारणे ॥ राज्यभ्रंशे नरेंद्राणामलक्ष्मीहरणाय च ॥ अपत्यलाभे चानिष्टेऽपव्याधिनिवारणे ॥ पूजाशांतावनावृष्ट्यां मातश्चक्रं प्रतिष्ठिते ॥ दीक्षाकाले च दमने पवित्रे गुरुपर्वणि ॥ विपन्ने देशिके ज्ञाणाम [redacted] चानिष्टेऽपव्याधिनिवारणे ॥ पूजाशांतावनावृष्ट्यां मातश्चक्रं प्रतिष्ठिते ॥ धवागोत्रमलने पुत्रस्याने च प्रवासे वाऽन्सवानंदसंपदे ॥ अपेक्षितं नराकार्यं मनुजैश्चक्रपूजनं ॥ सर्वदेवप्रियं गोप्यं तद्विधिं कथयाम्यथ ॥ समयश्चक्रपूजायामष्टधा परिकीर्त्तितः ॥ सहस्रोत्पत्ति

नेकार्य्यकार्य्यवापूर्णातांगते॥ देवतोत्साहदिवसे कौलिकस्यागमे पिवा॥ उमामाहेश्वरेयोगे योगवाशक्तिसंगमे॥ वलिराज्ये ः
कामदिने चक्रपूजातिहर्षदा॥ प्रदोषे वाभिजिति वा निशीथे वाष्टमीयुता॥ नवम्यां वेडवे योग उमामाहेश्वराभिधः॥ भौमाष्ट
म्यां चतुर्दश्यां योगोयं शक्तिसंगमः॥ आश्विनस्यासिते पक्षे त्रयोदश्यां दिपं च च॥ वलिराज्यमिदं प्रोक्तं यथेच्छं श्रीउनायतु॥
नत्कामदिनमित्याहुः सोमवारे त्रयोदशी॥ पूर्वस्मिन्दिवसे स्नात्वा देवीमभ्यर्च्य कामनां॥ कृत्वा संकल्पयेद्यत्नं पूजां दद्याद्वलिप
श्रोगः॥ ॥ वलिदानपुरस्कारस्तु अग्रेवाच्य॥ ॥ एवं दत्वा वलिं सम्यङ्गित्यरूत्वं विधाय च॥ तृतीयप्रहरे रात्रा नराश्चोर्थे निमं
त्रयेत्॥ अमुक्ताः श्रीतये देव्याः मन्मनोरथसिद्धये॥ चक्रपूजोत्सवार्थं त्वंश्चोमयामंत्रितास्यसि॥ ॥ अथ निमंत्रणप्रकारमाह॥
ततो निमंत्रयेत्सर्वान्योगिन्यो योगिनामपि॥ पुष्पं दत्वा करे सव्ये संभाषावरांतथा॥ अद्यमेगरूपूजार्थं निमंत्रणं करोम्यहम्॥ त
तश्चागमनं कुर्यात्पादप्रक्षाल्यपानिना॥ आचार्यप्रमुखं देवि मंत्रेणैव निमंत्रयेत्॥ ॥ अत्राधिकानिनेत्रास्तु स्त्रियो न्यूनास्तु नन्नते
स्त्रीभ्यश्च पुरुषान्यूना अधिकास्ते तु हानिदाः॥ सर्वे कौलव्रतस्या वा प्राग्दक्ष्याद्यपवर्जिताः॥ भवंति दीक्षानिरतानिमंत्र्याश्चक्रपूजने॥ तस्यां
रात्रौ नु संपूज्य देवं स्वयमतंद्रितः॥ कुलशुद्धिविधाप्रोक्ता कुलजेतिपिशाचिनि॥ त्रयोदशार्णां स्वासांतमष्टोत्तरसहस्रकं॥ जपेन्निशितततः
पंचशेषचक्रे विघ्नं तथाशुभं॥ विघ्ने दृष्टेन कर्तव्यं कार्यं वा शांतिपूर्वकं॥ शांतिर्गणेश्वरो होमो गुरुणां भैरवस्य च॥ ततो वहिर्वलिं दद्यादिमं

मंत्रमुदीरयन्॥ ॐ नमश्चत्रिरुद्यार्घ्यस्यमुकक्षेत्रपालकः॥ एवेति भगवन्मन्त्रं गृह्य युग्मं वलिं तथा॥ भक्ष्ययुग्मं चक्रविघ्नकरान्तंभययुग्मकं॥ ह्रूं फट् स्वाहा सप्तचत्वर्णो मंत्रः प्रकीर्तितः॥ दिनस्यकृत्यं निर्वर्त्य मायं चक्रं प्रपूरयेत्॥ ॥श्रीदेव्युवाच॥ सांप्रतं श्रोतुमिच्छामि निर्णयं मेलकस्य तु॥ कस्मिन्स्थाने प्रकुर्वीत कुलचक्रसमुद्भवः॥ केन चक्रं प्रकर्तव्यं कथयस्व महेश्वर॥ ॥श्रीभैरवउवाच॥ कथयामि वरारोहे चक्रस्थानपरं शृणु॥ श्मशाने एकवृक्षे च पर्वते मातृकागृहे॥ प्रासादे शून्यवासे च नदातीरेऽरण्यके॥ एतेष्वेकं च संमार्ज्य प्रलिप्तं गोमयेन तु॥ तुषकेशादिकं शोध्य किंकिरीकिंकरेण वा॥ श्मशानं तु प्रयागं च वरणा एकवृक्षकं॥ पर्वताग्रं भवेत्कोल्लागृहमात्राटरासकं॥ प्रासादस्तु जयंती च चरितं भूम्यमेव च॥ एकाम्रकं नदीतीरमरण्यं देविकोटकं॥ स्थानं चकपितं भडेडडवं कथयामि ते॥ अवर्गं पूर्वमुद्दिष्टं कवर्गमाग्नेयसंस्थितं॥ चवर्गं दक्षिणे भागे टवर्गं नैरृते स्मृतं॥ तवर्गं पश्चिमे भद्रे वायव्ये तु पवर्गके॥ यवर्गमुत्तरे भागे शवर्गमीशसंस्थितं॥ एषु स्थानेषु सुश्रोणि चक्रस्य तु समुद्भवं॥ चवर्गं दक्षिणे भागे टवर्गं नैरृते स्मृतं॥ तवर्गं पश्चिमे भद्रे वायव्ये तु पवर्गकं॥ यवर्गमुत्तरे भागे शवर्गमीशसंस्थिते॥ एषु स्थानेषु सुश्रोणि चक्रस्य तु समुद्भवं॥ तत्स्थाने क्रमसमागत्य कुर्याद्वीरस्य योजनं॥ वर्त्तनं कथयिष्यामि आचार्यस्य तु लक्षणं॥ चतुःशास्त्रश्रुताधीराद्दशपंथानुगामिनः॥ पारंपर्य्यक्रमज्ञानगुरुसिद्धप्रपूजकाः॥ पूर्णाभिषेकसंपन्ना अद्वैताचारवर्त्तिनः॥ लब्धानुज्ञां गुरोः सम्यक् स्यात्कुसंगगतस्मृतः॥ सर्वसत्वदयाभूतदंभमात्सर्य्यवर्जितः॥ क्षांतो

दांतः शुचिर्नित्यं गुरुवच्छिष्यपालकः ॥ एभिर्गुणैः समायुक्तं आचार्यस्यात्तु सुंदरि ॥ ॥ अथ मंडलमाह ॥ क्षौमिकेन सुसूत्रेण सुमि
तं कारयेत्प्रिये ॥ सुरेखां पातयेद्भूमौ अष्टकोणाष्टपत्रिका ॥ केशरं च षडंगुल्यं कर्णिकाष्टांगुलानि च ॥ द्वादशांगुलपत्राणि द
लसंधिर्द्व्यंगुलं ॥ चतुरंगुलचंद्राणि वर्तुलाकारमंडलं ॥ तत्रायेद्वारभानि द्वादशांगुलमानतः ॥ चतुर्द्वारः चतुःकोणकोणेषु प
द्मलांछितं ॥ कर्णिका पीतवर्णा च केशरं रक्तमेव च ॥ पत्रं श्वेतकृतं भद्रे दलसंधिहरीतकं ॥ कृष्णद्वारकृतं देवि शुक्लं चंद्रांशुमंडले ॥ रो
गोपशांतशांत्यर्थं भद्रमंडलमालिखेत् ॥ ॥ शिवोक्तं तं वदिष्यामि श्रूयतां वरवर्णिनि ॥ पीतसूत्रेण सुश्रोणि सुमितं कारयेत्
प्रिये ॥ स्वार्द्धहस्तानि चशस्त्राणि भूमौ सूत्रेण पातयेत् ॥ षडंगुलं कर्णिकां च चतुरंगुलकेशरं ॥ द्वादशांगुलपत्राणि शशिमंडलशो
भनं ॥ पीतद्वये दलं भद्रे कृष्णेन दलसंधिषु ॥ चंद्रं शुक्लेन कुर्वीत रक्तकोणद्वारमेव च ॥ एवं संधिसुशोभं च सुरेखं सममेव च ॥ सर्वं कृपा
लं शुक्लेन कृष्णेनासिं च दक्षिणे ॥ पश्चिमे हरितं भद्रे सुरक्तं च सुशोभनं ॥ उत्तरे शुक्लपीतेन त्रिशूलं च वरसुंदरि ॥ शिखांशग्रहणे देवि
पौष्ट्याकर्षणाकर्मणि ॥ विद्वेषोच्चाटने यं सर्वत्र आलिखेन्मंडलानि च ॥ ॥ गणेश्वरं वदिष्यामि शृणुना वरवर्णिनि ॥ रक्तसूत्रेण
सुमितं त्रिहस्तायतमंडलं ॥ कर्णिका केशरे पत्रे हस्तमेकं तु चारयेत् ॥ सूर्यचंद्रजलस्थाने हस्तमेकं तु वर्त्तयेत् ॥ द्वारकं हस्तमालि
ख्य चतुरस्रं सुशोभनम् ॥ कर्णिका हरिता प्रोक्ता केसरं पीतमेव च ॥ जलरूपं सितेनैव सूर्यं रक्तेन चालिखेत् ॥ चंद्रं श्वेतेन द्रव्येण

पत्रं रक्तं सुशोभनं॥ द्वारं श्वेतं सुशोभाख्यमस्मि पूर्णं तु कामकं॥ दक्षिणे श्वेतनरकं कृष्णमभ्रूलं च पश्चिमे॥ उत्तरे हरिताकारं डमरुं च सुशोभनं
वश्याकर्षणवेधेषु मंडलेन महेश्वरि॥ ॥प्रतानकं वदिष्यामि ईशानी वीरमातरि॥ गोचर्मरक्तनाभस्यां पातयेत्सुनितेन वा॥ द्विहस्त
मारभ्य मितं चतुर्द्वारविभूषणं॥ कर्णिकापंचअंगुल्या केशरं चतुरंगुलं॥ पत्रं षोडशमंगुल्या द्विहस्तं जलभागतः॥ सिरस्थं त्वारमंगुल्या
सर्वद्वाराणि वाहयेत्॥ कर्णिका हरिताभं केसरं रक्तमेव च॥ दलं कृष्णेन कुर्वीत दलसंधिं जलं तथा॥ रक्तेन तु सुशोभानि धूमेन द्वार
वाहयेत्॥ असिं कपालं परशुं त्रिशूलं च चतुष्टयं॥ चतुर्द्वारसमालिख्यं यथाशोभं तु जेत्प्रिये॥ महासाधनकाले तु मारणे च विशेषतः
प्रतानके लिखेद्भद्रे मंडले सर्वसिद्धिदं॥ शांतिकं पौष्टिके वश्य मारणे च सुलोचने॥ विशेषमंडलं येन ज्ञात्वा कर्म समारभेत्॥ ॥
पुनरन्यप्रकारेण प्रवक्ष्यामि विशेषतः॥ स्थूलेन कलिरित्युक्तः कृशेन मरणं भवेत्॥ वक्रेण हानिर्भवेद्घोरं छिद्रे राजभयानि च॥
असदृशे कृते पत्रे मंत्रसिद्धिर्न जायते॥ तस्मात्प्रयत्नं कुर्वीत यदिच्छेत्सिद्धिमुत्तमां॥ एवं कर्मविभागानि ज्ञात्वा कर्म समारभेत्॥ कि
मन्यं पृच्छसे देवि कथितं रक्तपातनं॥ ॥अथ पूजाद्रव्यमाह॥ यत्सर्वं भक्ष्यपेयानि द्रव्यवित्तानुसारतः॥ कल्पयितु सुश्रोणि सर्वद्रव्यं
समापयेत्॥ चंदनं च पवित्रं च गंधमाल्यं च मोहिनी॥ आसनं धूपसिंदूरं स्थापयेच्च यथाक्रमं॥ नानाविधानि मांसानि स्वेन कामतस्तजा
तयः॥ चतुर्विधानि भक्ष्याणि उपदंशापदंशकाः॥ पूर्वोक्तं सकलं द्रव्यं पूर्णमत्रप्रकल्पयेत्॥ ॥अथ क्रमेण अष्टकाष्टकमाह॥ तत्रा

दोवीरादीनांपादप्रक्षालनक्रममाह॥ ॥पादप्रक्षालनंदेविसांप्रतंकथयामिते॥वचःप्रियंगुसुरभीउशीरंचंदनंतथा॥वालंमांसितथाचोरं
समभागानिकारयेत॥पिष्टोदकेनभागेनश्लक्ष्णांकृत्वायथार्थतः॥उष्णोदकघटेमध्येवहिःस्थानेनिधापयेत्॥एकैकवीरपादौव
क्षालयेउदकेनतु॥अट्टहासेवचोत्पन्नंचरित्रायांप्रियंगुकं॥कोलापुर्व्यांतुसुरभिर्ज्ञेयंत्र्यांचउसीरकं॥उज्जेन्यांचंदनंभद्रेखुर्यां
गेवालमेवच॥वाराणस्यांचमांसीवकरीमोघांतुचोरकं॥एतदष्टौसमाख्याताअष्टौक्षेत्रस्थलाछने॥ ॥उपहारविधिंव
क्ष्येभद्रेत्वंवरवर्त्तिनि॥चंदनंचपवित्रंचगंधमाल्यंचमोहिनी॥आसनंधूपसिंदूरंदापयेद्यथाक्रमं॥चंदनंविरजंभद्रे
पवित्रमेरुकंतथा॥हाडापुरंभवेद्गंधंमाल्यमेलापुरंस्मृतं॥काश्मीरंमोहिनीज्ञेयाआसनंमेरुकंतथा॥नगरंधूपमित्याहुः
सिंदूरंपुंड्रवर्द्धनं॥एतान्यष्टौभूषणानिउपक्षेत्रस्थलक्षणं॥यदाक्रमेणदातव्यमाचार्यादीन्विचक्षणः॥उपहारविधानंचसं
क्षेपात्कथितंमया॥ ॥वलिसंस्थापनंभद्रेअधुनाकथयामिते॥वृहद्दारुमयंपात्रेओदनैःपरिपूरितं॥समुच्छ्रितंवैजयंत्या
पंचरंगिककारयेत॥अच्छिद्रंअंत्रमालेनदापयेद्वलिभोजने॥विचित्रंउध्वमालेनयथाशोभांवुजेत्प्रिये॥तथातेनप्रकर्त्तव्यंदेव
तालयशोभितं॥मत्स्यमांसानिधूपानितिलपिष्टंचमोदकं॥पृक्षान्नरुधिरंभद्रेआरक्तकंतथैवच॥एतदष्टौमयाख्याताः सं
दोहवलिकर्मणि॥परस्तीरंभवेन्मांसंमत्स्यंएलापुरंतथा॥कुरुणिवोभवेद्धूपंसोपारेतिलपिष्टकं॥क्षिरकेमोदकंभद्रेमाया

पुर्य्यां स्तेमेवं च। आम्रातके भवेतरक्तं गृहराजेअलक्तकं॥ समुद्रं दारुपात्रं च ओदनं मेरुमेव च। अहिराजं तु मालां तु स्रग्दामं रक्त
माल्यकं॥ ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥ पंचवरंगपताकां च अश्वापं च निवासिनी॥ सामुद्रगुदरं भद्रे नाभिर्मेरुः प्रकीर्त्ति
तः॥ कुण्डलाख्यो हि राजं च नेत्रो रोमं च सर्वशः॥ प्राणोपानः समानश्च उदानव्यानमेव च। देवता पंचमं भद्रे श्रुणुश्वासननिवासनं॥
उच्छ्वासमधश्वासः चंद्रसूर्यौ प्रकीर्त्तितौ॥ त्रयविंशत्कोटिदेवाः रोमकूपेव्यवस्थिताः॥ वलिसंस्थापनं भद्रे सर्वास्याभ्यंतरे निव
कथितं सर्वशास्त्राणि दध्ना घृतमिश्रोधृतं॥ मद्यं चाष्टविधं प्रोक्तं महामांसाष्टकं तथा॥ अष्टौ च भैरवास्तेषां स्थाने वीराः प्रकीर्त्तिता
भैरव्यस्तु तथा प्रोक्तास्तथा चाष्टौ च मातरः। तासां स्थाने च शक्तयः स्मृतास्ते चाष्टकाष्टकं॥ ॥ अथ पूजामाह॥ अवीवक्रे स्ववि
धायास्तन्मध्ये स्थापयेद्घटं॥ मद्यपूर्णं तत्र देवीमावाह्यार्चनमाचरेत्॥ नानाविधानि मांसानि ह्यनेका मत्स्यजातयः॥ चतुर्विध
निभक्ष्याणि उपदंशापदंशकाः॥ एतैः सम्यक्पूजयित्वा सांगां सावरणां सुरीं॥ शक्तयश्च तथा वीराः पूज्याः पुष्पाक्षतादिभिः॥
अथवा॥ प्रत्यक्षं पूजयेद्देवि शक्तिं शक्तिस्वरूपिणीं॥ वीरं भैरवरूपेण पुरुषं तु प्रयोजयेत्॥ ॥ यावत्सम्मानयोगिन्यः स्व चक्रे
परिपूजिताः। यावत्समाराणां देवेशि गुरवो भैरवादयः॥ दिक्पालांता महेशानि पुरुषा यंत्रमध्यगाः॥ तावत्समाराणां देवेशि नार्यश्च
पुरुषास्तथा॥ चक्रस्थानविभागेश्च तत्र तु ध्यानि वेशयेत्॥ मध्ये विंदौ मयासा संस्थाप्य वै युग्मान्निमंत्रयेत्। पूर्वोक्तेन स्वरूपेण प्र

जाकल्पप्रकीर्त्तितैः॥ सर्वैर्विविच्य विधिवदुपचारैः प्रपूजयेत्॥ चक्रेया देवतासंख्या संज्ञा चार्घ्यासनानि च॥ पात्राणि पूर्णकुंभांश्च
प्रत्यक्षाणि निवेदयेत्॥ नानाविधैरलंकारैर्वस्त्रयुग्मैः पृथक् पृथक्॥ पुष्पधूपाक्षतैश्चैव सुगंधैश्च मनोहरैः॥ श्रीखंड
गुरुकर्पूरैर्मृगनाभिविलेपनैः॥ पुष्पाभिश्च नमस्कारैर्गीतवाद्यैस्तथैव च॥ विनयेन महादेवि तोषयेदिष्टदेवताः॥ संतर्प्य
जपहोमादि सर्वं पूर्ववदाचरेत्॥ ॥अथ काम्यादौ ध्यानविशेषमाह॥ वरदाभयहस्तास्तु प्रसन्नवदनाः शुभाः॥ शुक्लांव
रूपराधाना शांतिकर्मणि चिंतयेत्॥ पाशांकुशमहाचापपुष्पबाणधरायुधाः॥ रक्तांवरधरा देव्यो वश्यकर्मणि चिंतयेत्॥ कृष्णा
ष्णांवरा घोरा घोरायुधपरिग्रहाः॥ भीमकंकालधारिण्यो मंत्रमालावलीकराः॥ कपालकर्त्तृकाहस्ता पिबंत्यो रुधिरासवं॥
चर्वंत्योस्थीनि खादंत्यो मारणे वै विचिंतयेत्॥ पीतांवरपरीधाना वज्रहस्ता महाबलाः॥ स्तंभने करिकुंभस्था ध्यातव्याश्री कुलं
विके॥ उच्चाटने मृगारूढाः ध्वजहस्तास्तु चंचलाः॥ धूम्रवर्णा महादेव्यो पर्वतात्पातयंत्यपि॥ मोहने नीलरूपाश्च आकृष्टौ कपिलास्तथा
कपोताभाश्च विद्वेषे विद्रारोगविवर्द्धने॥ एवं कर्मानुरूपेण चक्राम्नायमिदं प्रिये॥ यदिष्टं फलप्रदं सम्यक् भविष्यति न चान्यथा॥
पूजा जपस्तथा होमं मंत्रविद्यागणस्य च॥ ध्यानं कौलमार्गेण शांतिकादौ यथाविधि॥ ॥अथ बलिदानं॥ पूजागृहादुत्तरत
स्त्रिकोणे भूगृहांतरे॥ उच्छिष्टभैरवं तत्र गंधपुष्पादिभिर्यजेत्॥ उच्छिष्टदोषो भविता चक्रपूजामहोत्सवे॥ न दोषपरिहारार्थं भै

रवं पूजयाम्यहं॥ नार्च्चयेत्तथोच्छिष्टं भैरवैर्हि द्वयं तथा॥ बलिं गृह्ण युगं ॐ फट् स्वाहा द्वाविंशदक्षरः॥ अनेन बलिदानं तु पूजां मे स्याः
प्रकल्पयेत्॥ पूजागारं समागत्य पुराभे चक्र संस्थितां॥ ॥पठेत्स्तोत्रमिदं भद्रे एकाकारमुभावितः॥ नमस्ते चक्रवर्त्तिस्तु नम
स्ते ज्ञानदायिने॥ नमस्ते शिवरूपाय नमस्ते भवतारक॥ अष्टाष्टकास्तु योगिन्यः क्षेत्रपालास्तथैव च॥ भैरवं च इमं चक्रं एका
कारं नमाम्यहं॥ एवं स्तोत्रं पठेद्यं निवेश्य स्वयमासने॥ ज्येष्ठानुक्रमतः स्थाप्यं वासनेषु यथाविधि॥ स्त्रीणामन्यतमं स्थाने
पुंसामन्यतमं पृथक्॥ अथवा मिथुनं कृत्वा क्रमात्संप्रवेशयेत्॥ पंक्त्याकारेण वा सम्यक् चक्राकारेण वा पुनः॥ शिवशक्तिधिया
सर्वान् चक्रमध्ये समर्चयेत्॥ ॥गुरुपात्रं समादाय मधामृतयुतं करे॥ परिषिंचेत्सामयिकानिति शांतिं स्वयं पठन्॥ ॥
जयंति देव्या हरपादपंकजं प्रसन्नवामामृतमोक्षदायकं॥ अनंतसिद्धांतमतिप्रबोधकं नमामि साष्टाष्टकयोगिनीगणं॥ योगि
नीचक्रमध्यस्थं मातृमंडलवेष्टितं॥ नमामि शिरसा नाथं भैरवीभैरवीप्रियं॥ अनादिघोरसंसारध्वांतविध्वंसकारिणे॥ नमः श्रीना
थवैद्याय कुलौघविधायिने॥ आपदो दुरितं रोगाः समयाचारलंघनात्॥ ये सर्वे ते क्षयं यांतु दिव्यचक्रस्य मेलनात्॥ आयुरारोग्य
मैश्वर्यं कीर्त्तिलाभः शुभं जयः॥ कांतिर्मनोरथश्चास्तु पांतु सर्वाश्च देवताः॥ संपूजकानां प्रतिपालकानां यतींद्रयोगींद्रतपोधनानां
विश्वस्य राष्ट्रस्य पुरस्य राज्ञः करोतु शांतिं भगवान् कुलेशः॥ नन्दंतु साधककुलान्यपि दर्शकाये व्याघनाश्च व्रजंतु रक्तमहान्वयाये॥ नं

जाकल्पेप्रकीर्तितैः॥ सर्वैर्विविधैर्विधिवदुपचारैः प्रपूजयेत्॥ चक्रेयादेवतासंख्या संज्ञा चार्घासनानि च॥ पात्राणि पूर्णकुंभांश्च
प्रत्यक्षाणि निवेदयेत्॥ नानाविधैरलंकारैर्वस्त्रपुष्पैः पृथक् पृथक्॥ धूपधूपाक्षतैश्चैव सुगंधैश्च मनोहरैः॥ श्रीखंड
गुरुकर्पूरैर्मृगनाभिविलेपनैः॥ प्रणामैश्च नमस्कारैर्गीतवाद्यैस्तथैव च॥ विनयेन महादेवि तोषयेदिष्टदेवताः॥ संतर्प्य
जपहोमादि सर्वं पूर्ववदाचरेत्॥ ॥अथ काम्यादौ ध्यानविशेषमाह॥ वरदाभयहस्तास्तु प्रसन्नवदनाः शुभाः॥ शुक्लांब
रपरीधाना शांतिकर्मणि चिंतयेत्॥ पाशांकुशमरुणचापपुष्पबाणधरायुधाः॥ रक्तांबरधरा देव्यो वश्यकर्मणि चिंतयेत्॥ कृष्ण
स्मांबरा रौद्रा रौद्रायुधपरिग्रहाः॥ भीमकंकालधारिण्यो मंत्रमालावलीकराः॥ कपालकर्त्तृकाहस्ता पिबंत्यो रुधिरासवं॥
चर्वंत्योस्थीनि खादंत्यो मारणे वै विचिंतयेत्॥ पीतांबरपरीधाना वज्रहस्ता महाबलाः॥ स्तंभने करिकुंभस्था ध्यातव्याश्रीकुलां
बिके॥ उच्चाटने मृगारूढाः ध्वजहस्तास्तु चंचलाः॥ धूम्रवर्णा महादेव्यो पर्वतात्पातयंत्यपि॥ मोहने नीलरूपाश्च आकृष्टौ कपिलास्तथा
कपोताभाश्च विद्वेषे विद्यारोगविवर्द्धने॥ एवं कर्मानुरूपेण चक्राम्नायमिदं प्रिये॥ यदिष्टं फलप्रदं सम्यक् भविष्यति न चान्यथा॥
पूजाजपस्तथा होमं मंत्रविद्यागणस्य च॥ ध्यानं कौलमार्गेण शांतिकादौ यथाविधि॥ ॥अथ बलिदानं॥ पूजागृहादुत्तरत
स्त्रिकोणे भूगृहांतरे॥ उच्छिष्टभैरवं तत्र गणपत्यादिभिर्यजेत्॥ उच्छिष्टदोषो भविता चक्रपूजामहोत्सवे॥ तद्दोषपरिहारार्थं भै

रवंपूजयाम्यहं॥ नात्त्वयंतथोछिष्टंभैरवीहृदयंतथा॥ वलिंगृह्णयुगं ऊंफट्स्वाहान्ताविंशदक्षरः॥ अनेनवलिदानंतुपूजांमेस्याः
प्रकल्पयेत्॥ पूजागारंसमागत्यप्रणमेच्चक्रसंस्थितां॥ ॥पठेत्स्तोत्रमिदंभद्रेएकाकारसुभावितः॥ नमस्तेचक्रवर्त्तिस्तुनम
स्तेज्ञानदायिने॥ नमस्तेशिवरूपायनमस्तेभवतारक॥ अष्टाष्टकास्तुयोगिन्यःक्षेत्रपालास्तथैवच॥ भैरवंचइमंचक्रंएका
कारंनमाम्यहं॥ एवंस्तोत्रंपठेदाद्यंनिवेश्यस्वयमासने॥ ज्येष्ठानुक्रमतःस्थाप्यंवासनेषुयथाविधि॥ स्त्रीणामन्यतमंस्थाने
पुंसामन्यतमंपृथक्॥ अथवामिथुनंकृत्वाक्रमात्समुपवेशयेत्॥ पंक्त्याकारेणवासम्यक्चक्राकारेणवापुनः॥ शिवशक्तिधिया
सर्वान्चक्रमध्येसमर्चयेत्॥ ॥गुरुपात्रंसमादायमद्यामृतयुतंकरे॥ परिषिंचेत्तान्नयिकानितिशांतिस्तवंपठन्॥ ॥
जयंतिदेवोहरपादपंकजंप्रसन्नवामामृतमोक्षदायकं॥ अनंतसिद्धांतमतिप्रबोधकंनमामिसाष्टाष्टकयोगिनीगणं॥ योगि
नीचक्रमध्यस्थंमातृसंकुलवेष्टितं॥ नमामिशिरसानाथंभैरवीभैरवीप्रियं॥ अनादिघोरसंसारध्वांतविध्वंसकारिणे॥ नमःश्रीना
थवैद्यायकुलौघविधायिने॥ आपदोदुरितंरोगाःसमयावारितंघनात्॥ येसर्वेतेक्षपोहंतुदिव्यचक्रस्यमेलनात्॥ आयुरारोग्य
मैश्वर्यंकीर्त्तिलाभःशुभंजयः॥ कांतिर्मनोरथश्चास्तुपांतुसर्वाश्चदेवताः॥ संपूजकानांप्रतिपालकानांयतीन्द्रयोगीन्द्रतपोधनानां
विश्वस्यराष्ट्रस्यपुरस्यराज्ञःकरोतुशांतिंभगवान्कुलेशः॥ नन्दंतुसाधककुलान्यपिदर्शकायेव्याघ्रनारव्यवनुरक्तमहान्वयाये॥ नं

दंतुसर्वकुलकौलरताःपरायेत्वन्येविशेषपदभेदकशांभवाद्ये॥ नंदंतुसिद्धगुरुवत्सदनुक्रमोपाज्येष्ठानुगाःसमयिनोवटुकाःकुमाराद्याः॥ यद्योगिनीप्रवरवीरकुलेप्रसूता नंदंतुभूमिपतिगोद्विजसाधुलोकाः॥ नंदंतुनीतिनिपुणानिरवद्यनिष्ठानिर्मत्सराश्चिरुपद्रवाश्च॥ नित्यंनिरंजनरतागुरवोनिरंताः॥ शांतोप्रशांतमनसोहृनशोकसंकाः॥ नंदंतुयोगनिरताःकुलयोगयुक्ताआचार्यसामयिकसाधकपुत्रकाश्च॥ गावोद्विजायुवतयोयतयःकुमार्योधर्मेभवंतुनिरतागुरुशिष्ययुक्ताः॥ नंदंतुसाधककुलान्यणिमाप्रतिष्ठाःशापाःपतंतुसमयद्विषियोगिनीनां॥ साशांभवीस्फुरतुकापिममाप्यवस्थायस्यांगुरोश्चरणपंकजमेवलभ्यं॥ ॥याथक्रक्रमभूमिकावसततमोनाडीद्वयाःसंस्थितायाकायद्रुमरोमकूपनित्तयायाःसंस्थिताधातुषु॥ उच्छ्वासोर्मिमरुत्तरंगनिलयानिश्वासवासाश्चयास्तादेव्योरिपुपक्षभक्षणपरास्तृप्यंतुकौलार्चिताः॥ यादिव्याःकुलसंभवाःक्षितिगतायादेवतास्तोपगायानित्यंप्रथितप्रभाशिखिगतायामातरुःस्वाश्रमाः॥ याव्योमामृतमंडलामृतमयायाःसर्वगाःसर्वदाःताःसर्वाकुलमार्गपालनपराःशांतिंप्रयच्छंतुमे॥ ऊर्ध्वेब्रह्माण्डकेवादिविगगनतलेभूतलेनिःकलेवापातालेवानलेवासलिलपवनयोर्यत्रकुत्रस्थितावा॥ क्षेत्रेपीठोपपीठादिषुचकृतपदाधूपदीपा मांसैःप्रीतादेव्यःसदानःशुभबलिविधिनापांतुवीरेंद्रवंद्याः॥ ब्रह्माश्रीशेषदुर्गागुहबटुकगणाभैरवाःक्षेत्रपालावेतालादिरुद्राग्रहवसुमुनयःसिद्धयोगुह्यकाद्याः॥ भूतागंधर्वविद्याधरऋषिपितरःकिन्नरायक्षनागायोगीशा

श्चारणाः किंपुरुषमुनिगणाश्चऋगाः पान्तु सर्वे॥ देहस्याखिलदेवता गजमुखाः क्षेत्राधिपा भैरवाः योगिन्यो वटुकाश्च यक्षपितरो
भूताः पिशाचाग्रहाः॥ अन्ये भूचरदिग्चराश्च खचरा वेतालकाश्चेटकास्तज्ञाः स्युः कुलपुत्रकस्य पिबतः पानं मदीयं च यत्॥ सतंचे कुरु
दक्षे देवपितरो वेदागमा योगिनी प्रीतिश्चेत्परदेवता यदि भवेद्वेदाः प्रमाणं हि चेत्॥ शाक्तेयं यदि दर्शनं भवति चेदन्ताप्य मोपास्ति
वेत्सत्यं चापि च कौलिकाश्च यदि वेस्यान्येजनपः सर्वदा॥ तृप्यंतु साधकाः सर्वे समुज्ञाः सगणाधिपाः॥ योगिन्यः क्षेत्रपालाश्च मम
देहे व्यवस्थिताः॥ शिवाप्रवनिपर्यंतं ब्रह्मादिस्तंबसंयुतं॥ कालाग्न्यादिशिवांतं च जगद्यज्ञेन तृप्यतां॥ षष्ठित्वेस्यचेना पात्रं समुवास्य
गुरुस्ततः॥ दद्याच्छिष्यापङ्क्तिमस्यं योगिनीभ्यः पृथक्पृथक्॥ पात्रेनथैव वीरेभ्यश्चेतरेभ्यस्त्वयं पिबेत्॥ ॥दक्षेथ कौलिकाचारं
लोकद्वयफलप्रदं॥ पात्रमेलापकं कर्म प्रोच्यते सख्यकारकं॥ न भ्राता न पिता मित्रं पात्रमेलापकादृते॥ अदाक्षितैरप्याचारैः
समंत्रैर्नैरदेवतैः॥ दूषकैः समयभ्रष्टैः प्रपंचव्रतधारिभिः॥ स्त्रीद्विष्टैर्गुरुशक्तेभ्यश्च भक्तिहीनैर्दुरात्मभिः॥ अनभिज्ञैरन्यपानैः प
शुभिः क्षुद्रकर्मभिः॥ पादवाक्यप्रमाणज्ञैः श्रुतिस्मृत्यर्थवेदिभिः॥ कुलोपदेशहीनैश्च वैष्णवव्रतकादिभिः॥ ब्रह्मतेजोमुखैः
पात्रमेलनं नैव कारयेत्॥ त्वसूज्ञानिरतैः शान्तैः परद्रव्यपराङ्मुखैः॥ कुलोपदेशाकुलशीलैः कुलमार्गप्रवर्तकैः॥ स्त्रीप्रीयैस्त्रीस्तु
तैर्धन्यैः छंदेरमडुयादिभिः॥ कुलमार्गेति गुप्तैश्च विद्यावह्निः स्वरूपकैः॥ प्रयोगसिद्धैर्द्रव्याद्यैर्भाग्यवद्भिश्च कामुकैः॥ ब्रह्मभः

कैराज्ञमात्यैर्मित्तिनैर्दैवयोगतः ॥ कुर्यात्पात्रस्य मेलापं सौख्यवृद्धिर्द्वयोर्भवेत् ॥ एकपात्रं न कुर्वीत यदि साक्षात्कुलेश्वरः ॥ मंत्राः पराङ्मुखा यांति विघ्नाश्चैव पदे पदे ॥ न दद्याद्भैरवायापि स्वपात्रस्थितहेतुकं ॥ यदि याद्वन मोहेन देवतापमाप्नुयात् ॥ आसनं भोजनं पात्रं मत्स्यशयनादिकम् ॥ अनभिज्ञैरनर्हैश्च संकरं नैव कारयेत् ॥ स्रोतोभेदेन या कुर्यात्कौलिकैः पात्रमेलनम् ॥ पूर्वदक्षिणयोरैक्यमुदक्पश्चिमयोस्तथा ॥ योगिभिर्योगिनीभिश्च प्रदत्तं पूर्णपात्रकं ॥ समंत्रपादुकां मूलमंत्रं जप्त्वा पिबेत्ततः ॥ क्षविघ्नछयाप्राप्तमलिपात्रं तु भक्तितः ॥ आदाय पूर्ववज्जप्त्वा पिबेत्तत्त्वं गुरुं स्मरन् ॥ गुरुशक्तिसुतानां च गुरुज्येष्ठकनिष्ठयोः ॥ स्वज्येष्ठस्यापि चोच्छिष्टं खादेमान्यस्य कर्हिचित् ॥ ज्येष्ठैः कनीयसे योज्यं न पुनर्ग्राह्यमत्नतः ॥ शक्त्युच्छिष्टं पिबेन्मद्यं वीरोच्छिष्टं तु चर्वणां ॥ आत्मोच्छिष्टं न दातव्यं परकीयं न भक्षयेत् ॥ उच्छिष्टं भक्षयेत्स्त्रीणां तान्योच्छिष्टसमर्पयेत् ॥ स्वस्य मेलापकस्यापि स्थापयेदेकमंडले ॥ पात्रं ततो न्वयेद्देवीतर्पणादि समाचरेत् ॥ उत्थाप्यान्यान्यपात्रे च दद्यादन्योन्यहस्तयोः ॥ द्वयोरैक्यं स्मरन्ध्येयमिति पात्रस्य मेलनं ॥ ॥ बालोपि दीक्षितः पूर्वं ज्येष्ठस्स तु कुलागमे ॥ द्विजोपि दीक्षितः पश्चादन्त्यजः पूर्वदीक्षितान् ॥ द्विजकनिष्ठस ज्येष्ठ इति शास्त्रविनिश्चयः ॥ यावन्नयनते दृष्टिर्यावन्नयनते मनः ॥ तावत्पात्रं प्रकुर्वीत पशुपानं ततः परं ॥ स्वशक्तिं वीरशक्तिं च दीक्षितां गुरुरूपिणीं ॥ पाययित्वा पिबेन्मद्यमिति शास्त्रस्य निश्चयः ॥ तस्मात्सुलक्षणां शक्तिं गंधपुष्पाक्षतादिभिः ॥ अभ्यर्च्य

अर्घ्यर्च्यदेवतातुष्ट्या भोगपात्रं निवेदयेत्॥ श्रीमद्भैरवशेखरामृतलसच्चंद्रामृतप्लावितं क्षेत्राधीश्वरयोगिनीजनगणैः सिद्धैः
समाराधितं॥ आनंदार्णवकं नवात्मकमिदं साक्षात्त्रिखंडामृतं वंदे श्रीप्रथमं करांबुजगतं पात्रं विशुद्धिप्रदं॥ ॥सर्वाम्नायक
लाकलापकलितं कोलाहलोद्योतकं वंद्योवेन्द्रमहेंद्रशंभुवरुणं ब्रह्मादिभिः सेवितं॥ आनंदेवगणैः परं मुनिगणैः मोक्षार्थिभि
सर्वदा लोकानामरिवर्द्धनं सुखकरं पात्रं द्वितीयं नमः॥ मद्यं मांसकमत्स्यकं हरिहरब्रह्मादिभिः पूरितं मुद्रामैथुनधर्मकर्मसुख
दं क्षारामलतिकाश्रयं॥ आचार्यार्चितमष्टभैरवकलान्यासेन संशोधितं पायात्स्वचमत्कारसंयुतमिदं पात्रं तृतीयं नमः॥ आदि
भूतसमागोत्तकुंडसुखदं ब्रह्मादिरुद्रार्चितं नाराज्यं प्रथमोंगजातकुसुमं दिव्याधिरूढं परैः॥ मच्छोच्छामलसुन्नमोत्रमरसं संसेव्यदि
व्यामृतं भूयः पंचकमुक्तिकामुकमिदं पात्रं चतुर्थं भजे॥ आधारे भुजगाविराजवरये पात्रं महीमंडलं॥ मद्यं सप्तसमुद्रवारिपिशितं चा
द्योचादिग्दंतिनः॥ सोहं भैरवसर्वयत्नपुत्तिदिनं तारागणैरक्षितं आदित्यप्रमुखैः सुरासुरगणैः राज्ञाकरैः किंकरैः॥ छत्रं चामरभड
पीठपरमानंददायितं दापितं रामाराज्यमनोहरं सुखकरं सायुज्यसाम्राज्यदं॥ नानाव्याधितवांधकारहरणं जन्मांतरं नाशनं श्रीमत
सुंदरितर्पितोंड्वरदं पात्रं च षष्ठं भजेत॥ जाग्रत्स्वप्नसुषुप्तितुर्यपुरतो चैतन्यसाक्षात्सदं विधुभास्करवह्निवं ड्यनुषज्योतिः कथा
व्यापितं॥ ईडापिंगलमध्यमात्रिवलयासत्कुंडली योर्द्धगापात्रं सप्तमपूरितोननतनुरणानदोधिकः पातु मां॥ खड्गपादुकमंजनंचगुटि

फंसारस्वतंसत्यदंमृत्योर्वंचनमुग्रकार्यग्रहणंवैहस्थिरः कारणं॥ पायात्सिद्धिकरंम---------------- पात्रंवाष्टममष्टसिद्धि
करणंश्रेष्ठप्रसन्नंसदा॥ सर्वानंदकरंसदाशिवपदंद्वंद्वंमुक्तिप्रदंसाम्राज्यंसुखदंमनोरथकरंमज्ञानविध्वंसन॥ आयुःकीर्त्ति
यशोविवर्द्धनकरंसंसारमोहच्छिदंपात्रेयंनवनाथशक्तिनवकंश्रेष्ठप्रतापोदितं॥ त्रिपात्रंपंचपात्रंवासप्तपात्रंतथापिवेत्॥
नवपात्रंपिवेद्वापिषोडशार्द्धंपिवेन्नहि॥ यावन्नचरतेदृष्टिर्यावन्नचरतेमनः॥ तावत्पानंप्रकुर्वीतपशुपानमतःपरं॥ ॥
पूर्णाभिषेकयुक्तानांपानंदेविनिगद्यते॥ करास्थांयाचमुद्धृत्यस्मरन्मूलश्चपादुकां॥ आगतांतंपिवेन्मद्यंसयुक्तोनात्रसंश
यः॥ पीत्वापीत्वापुनःपीत्वायावत्पततिभूतले॥ उत्थायचपुनःपीत्वापुनर्जन्मनविद्यते॥ आनंदात्स्पंदतेदेवीमूर्छयाभैरवःस्व
यं॥ वमनात्सर्वदेवास्तुतस्मान्नियमाचरेत्॥ ॥ब्रह्मज्ञानीकुलाचारेसुरांपीत्वास्खलन्गुरुः॥ मूर्छोपत्तितत्स्यांगेतत्रगंतियदि
रेणाव॥ तावत्कालंतरेणुसंख्यंब्रह्मलोकेसमोदते॥ पीत्वापीत्वाजपित्वाचयुक्तकोटिकुलेसह॥ ब्रह्मलोकेवसेद्देविसत्यंसत्यंनसंशय
तत्रैवव्याप्तिमाप्नोतिनपुनःप्रयतेदिह॥ पीत्वाचपूजयित्वैसामीशत्वंलभतेध्रुवं॥ तत्रैवलयमाप्नोतिपुनर्नैवनिवर्त्तते॥ तत्रमंत्रेषु
वीरेषुकार्य्याकार्य्यंनविद्यते॥ तत्रयद्यत्कृतंकर्मशुभंवायदिवाशुभम्॥ तत्तद्वैदैवतांप्रीत्यैज्ञायतेनात्रसंशयः॥ जस्वोजपफलंतंजसमा
धिरपिदीयते॥ विक्तिपूजनंप्रोक्तंछर्दितंभैरवोवलिः॥ मुक्तिःस्याछक्तिसंयोगस्तोत्रंतत्कालभाषणं॥ न्यासोवयवसंस्पर्शोभोजनंहवः

नक्रिया॥ ध्यानंतुवीक्षणंप्रोक्तंशयनंवंदनंभवेत्॥ ततउल्लासकृतानांचयाचेष्टासाचसत्क्रिया॥ कार्याकार्येविचारंतुयःकरोति
सपातकी॥ एतच्चक्रगताधीराविज्ञेयापरयोगिनः॥ येनाप्नुवंतिमनुजाः साक्षाद्भैरवरूपतां॥ संमोदकोपसमनंपंक्तेनोज्ञाननर्त्तनं॥
रेणुवीणादिवाद्यंचकवितारचनादिकं॥ रोदनंभाषणंपातः समुत्थानंविजृंभणं॥ गमनंविक्रियादेवियोगइत्यभिधीयते॥ विकृः
तिंमनसोहित्वायदोल्लासःप्रवर्त्तते॥ यदातुदेवताभावंभजंतेयोगिपुंगवाः॥ कौलिकान्भैरवावेशान्यावानिंदतिमूढधीः॥ तत्रा
शयत्यसौदेहोयोगिभ्योनात्रसंशयः॥ यद्यवक्रिमदावेशात्त्रुतंकौलिकोजनः॥ तत्रजवत्यसंदिग्धंशुभंवायदिवाशुभम्॥ सारोन
मोभगवतेमयप्तांसविहारिणि॥ रतिप्रियेचक्रदेविवदकौलिकवत्त्वभो॥ सत्यंमनोगतंमयेतुत्कामंयंपत्यान्वितं॥ प्रदद्यात्कौलिके
भ्यस्तत्वन्मनाःप्नुवंतिते॥ तत्रकश्चित्कौलश्रेष्ठस्त्वमास्कृरतिभारती॥ ननिंदेत्त्रहसेत्क्रुध्येच्चक्रेमधुतदाकुलान्॥ एतच्चक्रगतांवार्त्तांवहिर्नै
वप्रकाशयेत्॥ तेभ्योद्रोहंनकुर्वीतनाहितंचसमाचरेत्॥ भक्त्यासंरक्षयेत्तान्वैगोपयेच्चप्रयत्नतः॥ चक्रेमदाकुलांदृष्ट्वाचिंतयेदेव
ताधिया॥ मोदतेवंदतेभक्त्यासगच्छेद्योगिनीपदं॥ प्रवृत्तेभैरवीचक्रेसर्वेवर्णाद्विजातयः॥ निवृत्तेभैरवीचक्रेसर्वेवर्णाःपृथक्पृथक्
स्त्रियोथपुरुषाःषंडश्चांडालोवाद्विजोत्तमः॥ चक्रमध्येनभेदोस्तिसर्वेदेवसमाःस्मृताः॥ चक्रमध्येगताःसर्वेपुरुषाःशिवरूपिणः॥
स्त्रियःसर्वाश्चपार्वत्यस्तस्माद्भेदंनकारयेत्॥ कामुकोनस्त्रियंगच्छेदनिच्छंतीमदीक्षितां॥ सद्यःसंस्कारसंयुक्तांविहितत्वाव्रजेत्स्त्रियं

सहस्रचक्रपूजातो राज्यभ्रष्टो नृपो भवेत्। पंचासद्भिश्च पुत्राप्तिर्न रोगो दशभिर्भवेत्।। यस्य चक्रस्य पूजायां रतास्खलितं चांगना।। अ
वश्यं सार्वभौमोसौ वर्षमध्ये भविष्यति।। यथेप्सितप्रियाप्राप्त्यै पंचधा पूजनं चरेत्।। सप्तभिः स्याद्धनप्राप्तिश्चक्रपूजाविधिस्त्वयं।। भ
गिनीं वा सुतां भार्यां यो दद्यात्कुलयोगिने।। मधुमन्नाय चक्रांते तस्य पुण्यं न गण्यते।। ।।अथ कौलिकार्चनं।। महेश्वरं समालोक्य पू
जयेद्विधिपूर्वकं।। यथाविभवरूपेण पंचतत्वं निवेद्य च।। सदा जुष्टा भवेद्देवी सर्वान्कामानलभेदपि।। अन्यथा नैव सिद्धिः स्यात्क्रुद्धा भ
वति योगिनी।। मेदिनीं यस्तु पूर्णां च ब्राह्मणे वेदपारगे। दत्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने।। अश्वमेधसहस्राणि वाजपेय
शतानि च। इष्ट्वा यत्फलमाप्नोति तत्फलं कौलिकार्चने।। मेरुतुल्यसुवर्णं तु ब्राह्मणे वेदपारगे। दत्वा यत्फलमाप्नोति तत्फलं कौलि
कार्चने।। मेरुतुल्यसुवर्णं तु ब्राह्मणे वेदपारगे। दत्वा यत्फलमाप्नोति तत्फलं कौलिकार्चनात्।। वापीकूपतडागादि कृत्वा यत्फल
माप्नुयात्। तत्फलाल्लक्षगुणितं कौलिकानां प्रपूजनात्।। कपिलां च गजां दत्वा यत्फलं लभते नरः। तत्फलं कोटिगुणितं कौ:
लिकानां प्रपूजनात्।। ।।अथ दूतीयागः।। तस्मात्तु शक्तिसंयोगं कृत्वा मंत्रं प्रसाधयेत्।। कौलिके वाममार्गे च पुमान्देवानसि
ध्यति।। आत्मानं तु शिवं ध्यायेद्देवतां शक्तिरूपिणीं।। क्रीडेत्पंचमकारैस्तु तुष्टा तास्तस्य देवताः।। दक्षमार्गे मातृबुद्धिः स्त्रीबुद्धिः ।।गुरु:।।
कौलिके पथि।। यस्य यातादृठतरात्तस्य तु स्यात्तु देवता।। एतद्रहस्यमाख्यातं गोप्यं मातृजारवत्।। ।।शेषाः स्यान्त्यौ याज्ञिकाश्च ।।२६०।।

तांनकुर्वंति पार्वति। कौलानामागमज्ञानां तांत्रिकाचारवर्त्तिनां। ऋतुकल्पपुराणानां मध्यस्थानां तथैव च। देवीतिथुछि
यें धिस्तु येषामतिन वंचला। तेषां कालीकुभक्तानां सर्वदा निश्चितात्मनां। आवश्यकी शक्तिपूजा पीठपूजावदीश्वरि। काली
कुध्येव संपूज्यानकामाकुलया धिया। चतुर्थाश्रमिणो मुक्ता ये काल्यर्चनतत्पराः। कौलिका वाप्य कौलावा ये वेतन्मन्त्रवर्त्तिन
तेषां नित्या शक्तिपूजा प्राहैवं मां पुरा शिवः। कृतायां शक्तिपूजायां सफलं नित्यपूजनं। अकृतायां मनुष्याणां निःफलं नित्यपूज
नं। तस्माद्यत्नेन संपूज्या शक्तिर्नित्यार्चनादनु। देवीधियेव संपूज्या न सामान्यवधूधिया। साशक्तिर्द्विविधा ज्ञेया स्वकीया च पराङ्ग
ना। स्वजातिसंभवा यातु परिणीता भवेत्प्रिये। सा स्वकीया समुद्दिष्टा तथा नैयं प्रशस्यते। परकीया पंचविधा ताः क्रमेण ब्रवीम्यहं
संजीवद्भर्तृकान्यैकानाढ्गेव मृतप्रिया। दासी वेश्या तथा मूढा प्रशुसा चोत्तरोत्तरं। अज्ञातवत्सा युवती तासां श्रेष्ठा प्रशस्यते। क
दाचिज्ञातवत्सापि सा सर्वसदृशी मता। अभावे पूर्वपूर्वायाः पराग्राह्या हि साधकैः। साधिका या स्वकौलाया एवमेव तु मानपि।
न साधकं विना नाद्यं न पुंसः साधिका मते। मंत्रा सिद्ध्यंति देवेशि कल्पकोटिशतैरपि। परस्त्रीसंगमो मद्योपस्य वाङ्गारिणामारणां।
स्वार्थं चेन्नरकाये वदेव्यर्थं सुकृता यदि। को हेतुर्न विजानामि देवीप्रीतिकरास्मे। न पापजनकं यद्वद्यज्ञार्थं पशुघातनं। तत्किल्विष
करस्तद्वत्परस्त्रीसंगमादिकः॥ ॥अथ शक्तीनां जातिविशेषः॥ नटीकापालिनी वेश्या रजकीनापितांगना। ब्राह्मणी शूद्रकन्या

चतथागोपालकन्यका॥ मालाकारस्य कन्याच नवकन्याः प्रकीर्त्तिताः॥ नान्म्रनांग्यो नाधिकांग्यो नस्थूला नाधिकं कृशा-
न छिन्ननासांगुलिका न दीर्घा न च वामना॥ न मुण्डिता न कुब्जाश्च मूकांधवधिरा न च॥ न केकरा न खंजाश्च भिन्नयोनिग-
लन्कुचा॥ वालापत्याश्च विभ्यन्तो नवार्य्यः शक्तयस्त्विमाः॥ वदामि योगणसाधिकं याभिस्तु ख्यातिकालिका॥ गौरांगी युवती
तीरम्या स्मेरास्या चारुविग्रहाः॥ विशाललोलनयनापीनोन्नतपयोधरा॥ विशालजघना क्षीणा वलित्रयविराजिता॥ सु-
पार्श्वतनुमध्या च सुस्वरा कुंचिताकला॥ विचित्रवेशाभरणा विचित्राम्बरधारिणी॥ विचित्रस्रक्समाकीर्णा विचित्ररतिदा-
यिका॥ सदाप्रसन्नवदना देव्या भक्तिपरायणा॥ कौलिका चरणाज्ञा च साधके भक्तितत्परा॥ भयहीना स्मेरमुखी सर्वदाप्रि-
यदायिनी॥ समयाचारसंपन्ना मंत्रज्ञा भयवर्जिता॥ विदग्धा च प्रसूता च धैर्य्यस्वातंत्र्यसंयुता॥ एवं गुणसमायुक्ताः पूज्न
येत्सर्वयोषितः॥ ॥अथ विद्याविशेषे शक्तिविशेषमाह॥ गंधरूपजातिभेदैर्महाविद्याप्रकीर्त्तिताः॥ न तत्क्रमं देवदेवे
सिप्रणुयत्नेन सांप्रतं॥ रूपगंधक्रमेणैव नाम दद्यान्महेश्वरी॥ मातृपितृकृतं नाम त्यक्त्वा यत्नेन पार्वति॥ स्वयं नाम प्रद-
द्यादै यथायोगेन पार्वति॥ ॥या कृष्णा नीलकृष्णाभा मधुपिंगललोचना॥ साधकाकांक्षिहृदया पुंगंधा निंद्यगंधिका
तस्यां काली समायोज्या सा काली परिकीर्त्तिता॥ ॥सर्वलक्षणसंयुक्ता नानागंधसमाकुला॥ सुंदरी चारुकेशी च दीर्घने

त्रामनोहरा॥नानाविलासकुशलाकलशास्त्रविचारिणी॥ गुरुवक्षस्थलाक्रांतमध्याविरलदर्शिनी॥सुंदरीसाभवेद्गौरीसर्व
कार्य्यप्रकीर्त्तिनी॥ ॥यासातृतीयागौरांगीमधुगंधानुलेपना॥ त्रिपुरानामसादेवीस्वपुष्पक्रमसाधिनी॥ ॥चार्वंगीचा
रुनेत्राचकंजपद्मासनस्थिता॥पीताभरणाभूषांगीकमलापरिकीर्त्तिता॥ ॥गुंजाहारविभूषाढ्याश्यामाद्वंचललोचना
चारुहासानुमातंगीविद्याख्यातामहेश्वरि॥ ॥दिव्यवर्णांकुशांगीचदिव्यगंधानुलेपना॥भुवनेशीमयाप्रोक्तानानाभूष
णाभूषिता॥ ॥पिंगनेत्रापिंगकेशाकिंचिदुग्रातिहासिनी॥धूमावतीचसाप्रोक्तासिद्धविद्यांश्टणुप्रिये॥ ॥लंबवक्त्राच
लंबोष्ठीपीतवर्णातिनिश्चला॥वगलासामहेशानिकीर्त्तितातवसुव्रते॥दशविद्याइमाख्याताशक्तिरूपेणपार्वति॥दशवि
द्यामहेशानिमातृस्त्रीभगिनीक्रमात्॥क्रीडंतिसततंदेविविद्यास्ववनसंशयः॥दशक्रमोमहेशानिदशविद्यासुयत्नतः॥सर्वथा
कारयेद्देविनान्यथायुगकोटिभिः॥नहिसिध्यंतिदेवेशिदशपद्मजपेनवै॥तस्मात्सर्वप्रयत्नेनस्वस्वविद्याक्रमंचरेत्॥ब्राह्मीया
चपरांचैवशक्तिमात्रंमहेश्वरि॥मंत्रादिदेवताबुध्यापूज्यासर्वोपचारकैः॥विविधैःफलतांबूलैर्वस्त्रालंकारहेमभिः॥संपूज्यवि
धिवद्भक्त्यावकुहेतुंप्रदापयेत्॥संभोगवासनांधृत्वायःकुर्याछक्तिपूजनं॥सदारिद्रमवाप्नोतिनारकीचभवेद्ध्रुवं॥ ॥वज्रभिः
किंवबोजालैःसमासात्समयंश्टणु॥निर्दिश्यतेशक्तिपूजाकौलिकानांदिनेदिने॥प्रत्यहंचसुरादानंतत्स्वीकारेणचहंतथा॥नित्य

नोक्तस्तयोर्देवी कुलमार्गरतेषु वा। हेयाहेयविचारोऽपि विरलः शक्तिषु प्रिये॥ अनुकल्पप्रदातृणामपि नित्यत्वमेव हि। विह
यगर्हिताः शक्तियोग्याएव हि गृह्यते॥ इतरेषां शक्तिपूजा काम्या नैमित्तिकी तथा॥ समाधिष्ठितविज्ञाना मितरासां निराकृतिः
विधानं कलयेदानीं मंत्रानपि चर्पावति। स्नातां दिव्यांबरधरां नानालंकारमंडितां। युवतीं पीनवक्षोजां तथा चाकृतभोजनां।
हस्ते गृहीत्वा वामोरौ स्थापयेच्छक्तिमुत्तमां॥ स्वशक्तुं वामे वोढुं तां देव्या वामेथवासने॥ वामभागे समालिख्य त्रिकोणं पद्मव
र्तुलं। श्वेतरक्तसमायुक्तं नालं सिंदूरचर्चितं॥ साधकः प्राङ्मुखो भूत्वा देवीं प्रत्यङ्मुखीं यजेत्॥ उड्डीयानं तु नेत्रायां हृते पूर्णगि
रिं यजेत्॥ जालंधरं चापरेषु कामपीठं कलौ युगे॥ तानि चत्वारि वक्ष्यामि गुह्याद्गुह्यतराणि च॥ शक्तेः सर्वशरीरं यत्पीठं पूर्णगिरिं
मतं॥ तस्याः शिरस्थं ड्रभागे ड्यानं कीर्तितं मया॥ स्तनौ जालंधरं प्रोक्तं कामपीठं भगं स्मृतं॥ ॥ प्राणायामत्रयं कृत्वा ऋष्यादिन्या
समाचरेत्॥ ऋष्यादिं च चरेदादौ ततः शोधनमाचरेत्॥ / ॥ ऋष्यादिकं शृणिदानीमेतस्य सुरवंदिते॥ स्त्रीशक्तिपूजनस्यास्य गो
नर्दऋषिरीरितः॥ विकृतिश्छंद आख्यातं शक्तिरूपा परा द तु॥ महाकाली देवता च कामो बीजमुदाहृतं॥ शक्तिर्वधूर्भवनेशी कीः
लकं समुदाहृतं॥ शिवशक्तिसामरस्यप्रकाशे विनियोगता॥ ससर्गां पंचवर्गाद्यैर्वधूबीजे षडंगकं॥ विधायात्मनि शक्त्यंगे न्यासं
वाच्यमथाचरेत्॥ स्त्री चेच्छक्तिपदस्थाने भैरवेति पदं वदेत्॥ योषिद्योनिपदस्थाने स्याल्लिंगपदकल्पना॥ गुरूपदेशतश्चापि स्त्र

उख्यायास्तुरेभ्यरि॒ुहः सर्वत्र कर्तव्यो लिंगे तत्रत्यदेपि वा॥ समानः किंतु गायत्र्यां सा समानो भयत्र हि॥ ॥न्यासो ज्ञारमिदानीं
त्वं सावधाना निशामय। रूपाका मोरमारामेयो गिनीरो षियो षिते॥ उक्तिनी पुलयो हारः केत्कारी कर्णिकापि च॥ पुत्तो नृ
सिंहः कुलिकं चिछुक्तिः सर्वशेषगा॥ एकैकं परतो दद्याद्बीजत्र्यान्त्रां सुरार्चिते॥ तान्यप्यादौ कौलिकी च भगमालिन्यनन्तरं॥
रतिप्रिया तथानंगो कुलासमयपालिनी॥ मदनोन्मादिनी कामावेशिनी तदनंतरं॥ चित्तोन्माथिन्यपि ततो मोहन्याकर्षणी तथा
स्मरातुरानंगरूपा हृत्समोदिन्यनंतरं॥ संतापिनी ततः संक्षोभिणी च त्रिदशार्चिते॥ सर्वशेषपरिज्ञेया सामरस्यस्वरूपिणी
एताः षोडश वै कार्या ऽङ्गनापूर्वाः संयुताः॥ स्त्रीकर्तृकत्वे पुल्लिंगा भैरवार्चनकर्मणि॥ ततः शेषं सर्वं पुस्थानानि कल्पाधु
ना॥ शिरः कपोलौ च गलः स्कंधौ वक्षः कुचौ तथा॥ पार्श्वौ कुक्षिश्च नाभिश्च वस्तिर्वक्षणमेव च॥ ऊरू जानू च जंघे च पादौ योनि
श्चशेषगाः॥ जीवन्यासं वदे तस्याः सामरस्यं तथाचरेत्॥ एतदेवेति संप्रोक्तं शक्तिशोधनमीश्वरि॥ कृत्वा पुरस्तं तु करं दत्त्वा तु हृदुरो
जयोः॥ कामपीठेऽथ वा देवि नाभौ मौल्येयकीमते॥ मनुं गृणान्वक्ष्यमाणं वारैकं वा त्रिवारकं॥ जीवन्यासकमिदं शक्तिशोधनमाचरेत्
अनेभुअनेशक्तिर्जीवात्मपरमात्मकाः॥ प्रतिबिंबाद्वैतसंज्ञे कात्म्यनामभयाभिधान्॥ दत्त्वा कूटानुक्रमात्प्रोच्य व्युत्क्रमात्तद्विपरीतकं॥ इयं
दशार्णाऽष्टार्ण्यमेवमष्टाविंशसंमितं॥ ततो ममानुहृदये तत्तानुहृदयं वदेत्॥ दद्यात्तु ममवाचुक्त्वा नेवाचं समुदीरयेत्॥ ममेन्द्रियेषु

तदनुप्रवदेत्कमलानने ॥ तेइंड्रियाणि च संभाव्य समवावनुपस्तव ॥ ततः सिद्धकरालीनि त्वां समुपेनि पुनःकृत्वा ॥ एव त्वं च स एवा
हं पसवाहमितीरयेत् ॥ सैव त्वं संधिना प्रकृत्य भीत तदनु कीर्त्तयेत् ॥ शिवशक्ति सामरस्यमापन्नो तदनंतरं ॥ नदैक्यमिति संकी
र्त्य साधयावइतीरयेत् ॥ मसंक्षिप्ता रहछीर्ष मंत्रस्तदनुसुंदरी ॥ अयं मंत्रः समुद्दिष्टः शक्तिशोधनकर्मणि ॥ अष्टोत्तरश
तावृत्त्यो न न्यूनो नापि चाधिकः ॥ ध्यानं पूर्वोदितं यन्त्रे भगवत्या मया तव ॥ शक्तिं तां तादृगाकारां ध्यायेद्वीक्ष्णांगसंचयं ॥ भैर
वध्यानसदृशमात्मानं च विभावयेत् ॥ ततआवाहयेद्देवीं शक्त्यंगे पीठसंनिभे ॥ वक्ष्यमाणेन मंत्रेण साधकोंजलिमुद्रया ॥
मायाकामवधूराचकमलायोगिनीरूपः ॥ डाकिनी चापि फेत्कारीन वैतान्यादिगानिहि ॥ एह्येहि भगवत्युक्त्वा महाकालि
ससीरयेत् ॥ शक्तिपीठे तु सान्निध्यमामेशय समुद्धरेत् ॥ ततस्त्वामहमुत्त्विरव्वावाहयामि च कीर्त्तयेत् ॥ सर्वशक्तिसमा
भाव्यस्वरूपिणि ततो वदेत् ॥ तारं पुत्तिष्ठशीर्षं च शक्तिमूलमनुं श्रुतम् ॥ मायाराव: स्मरो नारी शक्तये हृदयं ततः ॥ मंत्रोन
वाक्षरः प्रोक्तः शक्तिपूजनकर्मणि ॥ अष्टादिनोस्ति चैतस्य न हृद्देवीज शक्तयः ॥ किंतु पाद्यादि सर्वोपचारार्पणहेतुकः
जपश्च्योनैव चायं हि त्रिपुरपूर्ववचो यथा ॥ सर्वोपचारान्येतेन प्रदद्यात् किंतु शक्तये ॥ पाद्यदानादिनैवेद्यदानांतं यद्विद्यते
न चान्यमंत्रो भिन्नोस्ति मन्मते जगदीश्वरि ॥ कुर्वते यन्तु मोलेयात तदमूलं विवाव्यतां ॥ शक्तिपूर्वशिष्टं यत् पुष्पस्त्रगनुलेपनं

ॐ भगवत्यैविद्महेयोनिमालिन्यैधीमहीतन्नोशक्तिप्रचोदयात्॥

यदात्ममेद्रीयतेतत्सामरस्यार्चनंभवेत्॥ तदमंत्रंप्रकर्त्तव्यमेवमीशानशासनं॥ ततोदत्वाकरंशक्तेर्योनिपीठेजपंचरेत्।
साधकःशक्तिगायत्र्यासंतमर्घ्याद्दिमेववा॥ योनिपीठंजपःप्रत्योनजपःक्वापिविद्यते॥ सद्यःप्रभावजनकोमंत्राणांपीठउ
त्तमः॥ मंत्राणांवलहीनानांप्रयोगक्षीणचेतसां॥ अनुधृतानांशापेभ्योमूलाधिष्ठार्णतांजुषां॥ गुरुन्निषानामपिवप्रदानो
नौजसांतथा॥ अज्ञानविधिनांपूजानामपात्रार्पणभागिनां॥ त्यक्तानांविस्मृतानांचतथावैवाप्रभाविनां॥ संधुक्षणार्थंसुभ
यंप्रोक्तंत्रिपुरभैरविणा॥ एकंनिर्वाणमंत्रेणसंपुटीकृत्यतज्जपं॥ कौलासनेनापरंचयोनिपीठेजपक्रिया॥ कौलासनंयोनिपीठे
जपःस्त्रीभ्योमनुग्रहः॥ गुरुस्त्रीशक्तिनाचापिमिश्रीभूयजपेत्तद्वयोः॥ अन्यैःसमित्यनंमंत्रैर्वीजाधिककरंपरं॥ ॥अथा
तःशक्तिगायत्रीश्रृणुदेविमहाफलं॥ कामवीजाद्भगवतीङेंतापुरतईरयेत्॥ विद्महेयोनिमालिन्यैधीमहीतितत:परं॥
तन्नःशक्तिरितिप्रोच्यसर्वसर्वप्रचोदयात्॥ एषाहिशक्तिगायत्रीसर्वागमसुगोपिता॥ एतांविनानशक्यश्चानशक्यश्चौक्ति
कोजपः॥ यथाशक्तिजपित्वेनंतत्समर्प्यचशक्तये॥ वामोरावुपविश्यैवकुर्यान्मूलजपंप्रिये॥ ॥पूजयेत्सदनागारे
रक्तचंदनचर्चिते॥ भगेनदीयेविज्ञेयानान्यस्तिस्वःप्रवाहिका॥ एकोत्तराहिकायांडीसोरीचान्यातुवाहिका॥ आग्नेयाचाप
राज्ञेयापूजयेत्तास्तुसाधकाः॥ अंबुश्रवतिचांडीसापुष्पंश्रवतियासानवीवीलंतंश्रवतियागेहीतास्तुतामभिरर्चयेत्॥ वाग्भवा

धेर्न्नमोयुक्तैः पूजयेत्सुप्रसन्नधीः ॥ ध्यानंकुर्यान्महेशानि गह्वरेसकराननं ॥ ताम्रचूडशिखाकारं गजवक्त्रसमप्रभं ॥ तत्रस्थां
चिंतयेद्देवीं विद्यांभुवनमोहिनीं ॥ ॥ भगमालामंत्रस्तु ॥ वाग्भवंनगशय्यांते भगेभगिनिचालिखेत् ॥ भगोदरिभगांतेतु
भगमालेभगावहे ॥ भगगुह्ये भगप्रांते योनिप्रांते भगांतके ॥ निपातिनिचसर्वांते ततोभगवशंकरि ॥ भगरूपेततोलेख्यं
नीरजायतलोचने ॥ नित्यक्लिन्ने भगप्रांते स्वरूपे सर्वचालिखेत् ॥ भगानिमेह्यानमेंतेवरदेथसमालिखेत् ॥ रनेश्वरेते भग
वतिक्लिन्नेक्लिन्नद्रवेततः ॥ क्लेदयद्रवयंचाथसर्वसत्वान् भगेश्वरि ॥ अमोघेभगविच्चेचक्षुभः क्षोभयसर्वच ॥ सत्वान् भगेश्व
रिचयावाग्भवंबीजमादिकं ॥ ऐं ब्लूं मों ब्लूं चैं हैं क्लिन्नेचततः परां ॥ सर्वाणिचभगान्यंतेमेवसंयानयेतिच ॥ स्त्रीबीजंचहरप्रांते
वलमात्मकमक्षरं ॥ भुवनेशीसमालिख्यविद्येयंभगमालिनी ॥ चतुर्थ्यंतेयजेद्देविभगेपुष्पंविनिःक्षिपेत् ॥ प्रक्षाल्यकुलद्र
व्येणांगंपुष्पैः समर्चयेत् ॥ धूपदीपादिकंकृत्वापश्चादावरणंयजेत् ॥ हृल्लेख्यावाहनेनाग्निजीवन्यासेमहेश्वरि ॥ तथैवंचवि
धानेनतांषोडशोपचारकैः ॥ इष्टदेवींप्रपूज्याथसर्वसिद्धीश्वरोभवेत् ॥ ॥ अर्चयेद्गंधपुष्पाद्यैः स्वशिवंतदनंतरं ॥ अथत्या
संप्रवक्ष्यामिशिवात्मानंविभावयेत् ॥ पंचवक्त्रंमहादेवंकलायुक्तंन्यसेत्क्रमात् ॥ ईशानः सर्वविद्यानांशशिनीप्रथमाकला
ईश्वरः सर्वभूतानांमरदातदनंतरं ॥ ब्रह्माधिपतिशब्दांतेब्रह्मणोधिपतिः पुनः ॥ ब्रह्मेष्टदाशिवोमेस्तुमरीचिसंपुटंन्यसेत् ॥

सदाशिवं समुच्चार्य्य स्त्रंभुमालिन्यथापर॥ तत्पुरुषाय विद्महे कला शांतिरितीरिता॥ महादेवाय धीमहि कला विद्यातथैवच॥
तन्नोरुद्रःपदंपश्चात्प्रतिष्ठाकथिताकजा॥ प्रचोदयात्समुच्चार्य निवृत्तिः स्यात्ततःपरं॥ पूर्वपश्चिमयाम्येषुडत्तरस्यनुक्रमात्॥ हृ
दयेविन्यसेद्देवि अघोरेभ्यः स्तमःकला॥ अघोरेभ्यो मोहां च ग्रीवायां विन्यसेत्ततः॥ घोरंतेस्यारक्रिया पश्चाद्दक्षिणांशे प्रविन्य
सेत्॥ नमस्तेस्तु क्षुधां पश्चात् कलां पृष्ठे न्यसेत्क्रमात्॥ रुद्ररूपेभ्य इत्यंते नृषांतानरमोंतकाः॥ वामदेवायनमोंते रजास्याद्गु
ह्यदेशके॥ मूर्ध्निसव्यप्रतिन्यस्य रक्ष्यांतेष्ठायवैनमः॥ रुद्रायनमो रतिं पश्चात्सा समुखे कलामिमां॥ कालाय नम इत्यंते पालि
नीऽरुदक्षिणे॥ कलकामा च देवेशि वामे विकरणाय च॥ नमः पदं समुच्चार्य्य संयमनी दक्षजानुनि॥ बलक्रियासमादिष्टा
वामे विकरणाय च॥ नमोंते बुद्धिमुच्चार्य्य दक्षिणास्फिचि विन्यसेत्॥ बलप्रमथनाय नमो रात्रिं वामे प्रविन्यसेत्॥ सर्वभूतदम
नाय नमोंते ब्राह्मणी कला॥ कटिदेशे प्रविन्यस्य मनांते मोहिनी कलां॥ दक्षिणे पार्श्वके न्यस्य ऽन्मनाय नमो ज्वलां॥ पादयोः स्तन
नासाभुमूर्ध्निवा ऊरुयुगे न्यसेत्॥ सद्योजातोद्भवास्त्वष्टौ मंत्रीकलाः क्रमात्॥ सद्योजातं प्रपद्यामि सिद्धिंस्यात्प्रथमाकला॥
सद्योजाताय वै भूयो नमःस्यादृद्धिरीरिता॥ भवेद्युतिस्तृतीयास्यादभवेत्तदनंतरं॥ लक्ष्मीश्चतुर्थी कथिता ततोनाभिभवे पदं॥
मेधाख्या पंचमी प्रोक्ता कला भूयो भवस्व मां॥ प्रज्ञासमीरिता षष्ठी भवांतेस्यात्प्रभाकला॥ ऽद्भवाय नमः पश्चात्सुधास्याददृष्टम

कला ॥ प्रणवाद्याश्चतुर्थ्यंतान मोन्ताश्च प्रविन्यसेत् ॥ एवं न्यासविधिं कृत्वा स्वयं शैवं विभावयेत् ॥ पंचाक्षरं पुरस्कृत्य रुद्र
ध्यानपरायणः ॥ सामरस्यमयं कृत्वा रक्षार्थं कवचं पठेत् ॥ वध्वा तु क्षोभिणीमुद्रां यंत्रमध्ये विनिःक्षिपेत् ॥ भगांकुरं क्र
धे लिंगमाज्यं चैव तु वीर्यकं ॥ सर्वतत्त्वं समुच्चार्य्य सहस्रं जपमाचरेत् ॥ धर्माधर्म्म हविर्दीप्ते आत्माग्नौ मनसा स्रुवा ॥ सुषुम्नाव
र्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं ॥ स्वाहांतोयं महामंत्र आरंभे परिकीर्तितः ॥ शिवशक्तिसमायोगो योग एव न संशयः ॥ सी
त्कारो मंत्ररूपश्च वचनं स्तवनं भवेत् ॥ आलिंगनं च कस्तूरी कर्पूरं चुंवनं भवेत् ॥ नखदंतक्षतादीनि पुष्पाणि विविधानि
च ॥ स्थापनं तर्पणं विद्धि वीजपातो विसर्जनं ॥ आलिंगनं चुंवनं च स्तनयोर्मर्दनं तथा ॥ दर्शनस्पर्शनं योनिर्विकारं लिंगघर्ष
णं ॥ प्रवेशं स्थापनं शक्तेर्नैवपुष्पाणि पूजयेत् ॥ न दद्याच्चुंवनं यस्तु दारिद्र्यं जायते ध्रुवं ॥ आलिंगनं विना देवि कुष्टी भव
ति पार्वति ॥ विना दंतक्षतैर्देवि विघ्नो वै भवति निंदितः ॥ आलिंगने हरेद्रोगान् धनधान्यादि चुम्वने ॥ नखदंतक्षताप्रेक्ष्य तदा मो
क्षः प्रजायते ॥ सायुज्यं संगमेन स्यात्सत्यमेव न संशयः ॥ उत्काशाकाशहस्ताभ्यां मवलंव्योन्मनीस्रुचा ॥ धर्माधर्मकला
स्नेहपूर्णामग्नौ जुहोम्यहं ॥ स्वाहांतोयं महामंत्रः शुक्रस्याग प्रकीर्तितः ॥ भृहु मंत्रौ छर्धं नैव योनेस्तु मयनं चरेत् ॥ मध्यमा
माने वतस्या हि ज्ञायते तत्वमुत्तमं ॥ गृह्णीयात्तस्य यत्नेन द्भवं कुंडोद्भवं शुभं ॥ तेनाम्रतेन दिव्येन कालिकां तर्पयेत्सदा ॥ सानि

ध्यान्नतक्षणाद्वापिप्रीतासिद्धिंप्रयछति॥ समस्तदेवतानांचतर्प्पणंचसदामतैः॥ गुरूणांसाधकानांचसर्वेषांतर्प्पणंचरेत्
ततोमृतेनदिव्येनसर्वेतुष्टाभवंतिच॥ यत्कामंकुरुतेमंत्रीतत्तत्क्षणादेवसिध्यति॥ कुलामृतंसमादायतत्रापानिःक्षिपेत्सुधीः
ततःसोमकलाःपूज्यासाधकैर्निर्मलाशयैः॥ मधुभारात्सहस्रैस्तुमांसभारशतैरपि॥ नैवतुष्टाभवेद्देविभगलिंगामृतादृते
ऊक्तस्वयंचसंशोध्यशिवशक्तिमयंप्रिये॥ जीवामृतंपरंब्रह्मरूपंनिःक्षिप्यसुंदरि॥ अर्घपात्रामृतैर्येष्ठानिर्विकल्पःसदान
घः॥ अर्घद्रव्यैःस्वदेवेशियोनौदेवीप्रपूजयेत्॥ योनिपूजांविनापूजांकृतावाप्यकृताभवेत्॥ दूतीयागेकृतेमंत्रीसर्वज्ञोजा
यतेध्रुवं॥ नतस्यपुनरावृत्तिःकल्पकोटिशतैरपि॥ यैःकृतंयजनंदूत्यातैरिष्टाःक्रतवोखिलाः॥ सर्वतीर्थमयःप्रोक्तःसर्व
देवमयोभवेत्॥ पुरश्चर्यादिसकलंकृतंतेननसंशयः॥ अश्वमेधसहस्राणिवाजपेयशतानिच॥ आसमुद्रवधरणीदत्ताते
नसदक्षिणा॥ मेरुमंडलतुल्यानिसुवर्णान्यर्पितानिवै॥ गोकोटिदानायत्पुण्यंतत्सुकृतंजायतेप्रिये॥ तस्मात्सर्वप्रयत्नेनदू
तीयागंसमाचरेत्॥ पूजासंपूर्णदंभद्रंसर्वारिष्टप्रनाशकं॥ योनिपूजापुनापूजाकृतमप्यक्षयंभवेत्॥ आयुरारोग्यविभ
वानमितांल्लभतेन्नरः॥ अनेनैवविधानेनविषार्त्तोनिर्विषोभवेत्॥ पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनं॥ मातंगीशक्ति
मभ्यर्च्यतयासाकंसमर्पयेत्॥ मातंगीतन्त्रथोपेतांसर्वकामार्थसिद्धये॥ शक्त्याशाकंसदापूज्यामातंगीमंत्रदेवता॥ सादेवीश

क्षिहीनानुनन्दन्ति मनोरथं ॥ ॥ पर्णाभिषेकरहितो यः शक्तिं साधयेन्नरः ॥ सोधमः पतितो रोगी पंचत्वं लभते ध्रुवं ॥ इंद्रिया
णामदृष्यत्वात्कामलोभादिसंभवात् ॥ प्रायः कलौ कौलिकोयं पंथा नरकहेतवः ॥ ॥ उत्तमा नित्यपूजा स्यान्मध्यमं प
र्वपूजनं ॥ मासपूजाधमा प्रोक्ता मासादूर्ध्वं पशुर्भवेत् ॥ मासेथवा त्रिमासे वा षण्मासे वत्सरेपि वा ॥ श्रीगुरुं पूजयेद्भक्त्या
प्रोप्नोत्त स्त्रीसुतादिकान् ॥ नदभावेन न कुलीनं न छिद्ध्येवान्ययोगिनं ॥ संतोषयेत्कुलद्रव्यैश्चक्रपूजापरः सदा ॥ ॥ अथ
चक्रस्य विशेषाचारमाह ॥ उच्छिष्टो न स्पृशेच्चक्रं क्रमद्रव्यं तथा गुरुं ॥ वहिः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत् ॥ मद्यमां
डं समुद्धृत्य न पात्रं परिपूरयेत् ॥ भोगपात्रे सुराङ्गं च निःक्षिपेन्न कदाचन ॥ चक्रमध्येषु विधिया करास्यक्षालनादिकम् ॥
यः करोति हि मूढात्मा स भवेदापदां पदं ॥ निष्ठीवनं मलं मूत्रमधोवायुविसर्जनं ॥ श्रीचक्रमध्ये यः कुर्यात्स भवेद्योगिनीप
शुः ॥ चक्रमध्ये घटभिन्ने पात्रे वा स्खलिते तथा ॥ दीपनाशे राष्ट्रपीडा तच्छांत्यै चक्रपूजनं ॥ परिहासं प्रलापं च विडं चैव जृम्भा
षणं ॥ औदासिन्यं भयं क्रोधं चक्रमध्ये विवर्जयेत् ॥ पात्रहस्तश्चक्रमध्ये न भ्रमेत्पूर्णपात्रकं ॥ चिरं न स्थापयेद्धस्ते नालपेत्पा
त्रपाणिकौ ॥ पादाभ्यां न स्पृशेत्पात्रं न च भिंद्यात्कदाचन ॥ नैकहस्तेन दातव्यं न बिंदुं पातयेदधः ॥ पात्रं न चालयेत्स्थानान्नमुश
वर्जितं पिवेत् ॥ सशब्दं न पिवेन्मद्यं न कुर्यात्पात्रशंकरं ॥ पात्रस्यांशद्वयं मद्यपूर्णं त्र्यंशं तुरीयकं ॥ नान्योन्यं ताडयेत्पात्रं न पात्रं

ताडयेदधासाधारं नोधरेत्पात्रं मनाधारे रानिःक्षिपेत्॥ रक्तं पात्रं न कुर्वीत न पात्रं लंघयेत्तथा॥ प्रस्थान्यगोपयेत्पात्रं नेमं
तो विप्रमोक्षयेत्॥ श्रीचक्रस्थं कुलद्रव्यं दद्याद्योवाकुलेजने॥ फलानि तस्य नश्यंति क्रुद्धो भवति देवता॥ ॥ इति श्री
तंत्रचिंतामणौ सकलसाधारणचक्रार्चन निर्णयनामाष्टाविंशतितमः प्रकाशः॥ ॥अथासांविद्यानां नित्यपूजाः
यां प्रत्यहं यंत्रं लिखितुमशक्तश्चेत्तदा स्फटिकादौ स्थिररेखात्मकं यंत्रं निर्माय संस्कारानंतरं प्रत्यहं तमेव प्रयजेत्तथा च॥
यंत्राणां लिखने देवि प्रत्यहं शक्यते न चेत्॥ स्फटिकादौ तदा यंत्रं स्थिररेखात्मकं लिखेत्॥ ॥स्याद्वज्री वैश्ववर्णी स्याद्रौप्ये
वा विंशति प्रिये॥ ताम्रे वा दशकं वर्षं तद्धैमजे पत्रके॥ ताम्रे वा दशवर्षाणि धारणे न तु पूजने॥ ताम्रार्थं ताम्रयंत्रे च देवतास
वेदा स्थिता॥ संस्कृत्य पूजयेद्देवि स्फटिकादौ तु सर्वदा॥ ताम्रे लक्षगुणं प्रोक्तं रौप्ये कोटिगुणं भवेत्॥ सौवर्णे न तत्फलं क
मन्यादौ किं वदामि ते॥ ॥विद्रुमे रचिते यंत्रे पद्मरागेथवा प्रिये॥ इंद्रनीलेथवैडूर्ये स्थापिते मरकतेपि वा॥ धनं पुत्रं न
धाराराज्ययशांसि लभते ध्रुवं॥ सुवर्णरचिते पीठे भूपाला वशवर्त्तिनः॥ रजतेन कृतं यंत्रमायुरारोग्यकामदं॥ ॥ताम्रेण
रचितं यंत्रं राज्यदं भुक्तिमुक्तिदं॥ यंत्रं तु स्फाटिकं स्वच्छं मनोभिलषितप्रदं॥ कृतं मरकते यंत्रं [illegible] सर्वशत्रु
विनाशनं॥ लोहजयोजवेयंत्रं सर्वसिद्धिकरं मतं॥ श्रीखंडं शांतिदं ज्ञेयं पौष्टिकं रक्तचंदनं॥ श्रीपर्णीपीठमुद्दिष्टं पूजार्थं धन

राज्यदं ॥ पैडुमेवकृत्वासंपतत्भूर्जेपत्रेचतुष्पदा ॥ गंडकीभवपाषाणोभुक्तिमुक्तिरद्भुतः ॥ अश्मोसिंदूररजसारचितंसर्वका
मदं ॥ सीसकांस्यादिषुकृतेसंपत्तिंसंततिंहरेत् ॥ फलकायांपदेभित्तौस्थापयेन्नकदाचन ॥ स्थापितंयदिमोहेननाश
येत्स्वजनंकुलं ॥ तेषांमध्येस्फाटिकंतुसर्वसिद्धिप्रदंभवेत् ॥ ॥अथत्रिलोहानांसंख्यामाह ॥ दशभागंसुवर्णस्यताम्रस्
दक्षंतथा ॥ षोडशंरजतस्यापिएतल्लोहत्रयंमतं ॥ ॥अथपरिमाणमाह ॥ अर्कांगुलेनहेमस्यरजतस्यतथैवच ॥ ता
मुस्यऊर्द्धसंख्योचमातिकार्थेदेयपृच्छया ॥ महांशंवेशिलायांचनवयंत्रविचारणा ॥ ॥अथसंख्यामाह ॥ एकतोलं
द्वितोलंचत्रितोलंपंचतोलकं ॥ रसतोलंवेदतोलंसमाष्टतोलकंतथा ॥ दशतोलंसप्ततितोलंकलासंख्यकतोलकं ॥ रद
तोलंचतुःषष्टितोलकंशततोलकं ॥ यंत्रंमनोज्ञंसुरदंसुरेखंपीठमुत्तमं ॥ ॥अथप्रस्तारमाह ॥ चातुर्विध्याद्धिचक्रस्य
प्रस्ताराश्चभवंतिहि ॥ भूकूर्मपद्मप्रस्तारामेरुश्चापितथाविधिः ॥ निम्नरेखासमायोगोभूप्रस्तारेमयोदितः ॥ कूर्मपद्मक
प्रस्तारेउर्द्धरेखामयोदिता ॥ ॥भूप्रस्तारोद्विधादेविउर्द्धपातालभेदतः ॥ त्रिविक्रमाउन्नतंस्यात्क्रमात्क्रममथापिवा ॥ ॥
द्विविक्रमाउन्नतोपिद्विद्विक्रममथापिवा ॥ ॥तंडुलार्धंतत्त्ववास्यात्द्वयक्रमभेदतः ॥ ॥मेरुःस्वर्गेचकैलाशेमर्त्य
लोकेप्रकीर्तितः ॥ भूप्रस्तारस्तुपातालेत्रितयंकीर्तितंम्या ॥ कज्जकूर्मरत्नगर्भासर्वत्रप्रजनेष्वशुभाः ॥ शुभाःसर्वेमहेशानि

सर्वसिद्धिप्रदायकाः ॥ ऊर्द्ध्वरेखाभिधोयस्तु पूजार्थमस्तु गोचरः ॥ स्थापनार्थं तु पातालेरेखा च कृत्र विन्मता ॥ ॥ अथ यंत्र
लिखने कर्णिकादीनां लिखने स्थानमाह ॥ पंचवृत्तानि संलिख्य तत्र यंत्रं लिखेद्बुधः ॥ आद्यस्यां कर्णिकास्थाने केसराणां द्वि
तीयकं ॥ तृतीयं दलमध्यस्य दलाग्राणां चतुर्थकं ॥ पंचमे भूपुरं लिख्य मेवं यंत्रविधेः स्मृतं ॥ केसरद्वयसुक्तं च दलं प्रोक्तं महे
श्वरि ॥ दराङ्काकारं विन्दुवक्त्रं तद्वयोः क्रमं महेश्वरि ॥ पातालरेखा प्रस्तारे केसरे मुख्यविंदुना ॥ ऊर्द्ध्वरेखा विधौ देवि रेखा केसरतां म
ता ॥ श्रीविद्यायां कालिकायां केसराणि कचिद्वचा ॥ श्रीविद्यायां महेशानि केसराणि न कारयेत् ॥ यथा दलकेशरेण विसु
क्तं कर्मवर्जितं ॥ यथा त्रिकोणं देवेशि विंदुना वर्जितं भवेत् ॥ विंदुहीनं तु यद्यंत्रं न यंत्रं शववद्भवेत् ॥ तथैवाष्टदलं स्योर्द्ध्वरत्रंय
त्नेन कारयेत् ॥ वृत्तं विना चाष्टदलं गर्भभूषणवर्जितं ॥ ऋजुरेखा भवेल्लक्ष्मीर्वक्ररेखा दरिद्रता ॥ नराञ्चावं कये यंत्रं साधकस्तु
कदाचन ॥ प्रमादादं क्षिने चैव देवताशापमाप्नुयात् ॥ यंत्रमात्रे महेशानि निर्णयः कथितो मया ॥ अभिरूप्या सविंदस्य पू
जायां च विशेषतः ॥ साधकस्य च विश्वासाद्देवः सान्निध्यमिच्छति ॥ ॥ अथ यंत्राणां ध्यानमाह ॥ देव्युवाच ॥ पूर्वं संसूचितं
नाथ यंत्रध्यानं त्वया प्रभोः ॥ कथं ध्येयं किं विशिष्टं किं ध्येयाध्येयमेव हि ॥ यंत्रं मूर्तिस्वरूपं वा मेखलावत्स्वरूपकं ॥ किं वा रेखा
मयं ध्येयं किं वा वै भूस्वरूपकं ॥ विश्वरूपं स्मरेद्वापि तत्सर्वमपि कथ्यतां ॥ ॥ ईश्वर उवाच ॥ ध्यानं तु त्रिविधं प्रोक्तं यंत्रमात्रेम

हेश्वरि ॥ आद्ये विन्दुस्वरूपं विश्वचंद्रस्वरूपकं । यंत्रं संभावयेद्देवि सर्वत्र कथितं त्विदं । श्रीचक्रादौ महेशानि त्रिकूपेण
साम्मता ॥ द्वितीयं चक्रपं ध्येयं तन्मेयस्महेश्वरि ॥ तेजः पुंजनिभा रेखा सर्वचैतन्यरूपिणी ॥ सर्वदर्पणवजायं स्वप्रकाश
स्वरूपकं । चैतन्यं भावयेत्सर्वं विंद्वादिभूरांतकं ॥ मूलं तेजः प्रकाशेन अभिन्नं भावयेत्प्रिये । तृतीयं भृगुदेवेशि मेरुरूपं
सनातनं । उत्तरोत्तरमुद्धं स्यात्किंशारम्यविभावयेत् ॥ विंदधौ भावयेद्देवि एकैकोत्तरतः प्रिये । नवोत्तरक्रमेणैव भावयेद्वाम
हेश्वरि ॥ कालीविद्याविधौ देवि नवरत्नस्वरूपिणी ॥ रेखां संभावयेद्देवि मेरुप्रस्तारवद्वा ॥ श्रीचक्रे वीजसंयुक्तं निःफलं प
रमेश्वरि ॥ वीजहीनं तु यच्चक्रं निर्वीजं सिद्धिदं नहि ॥ सृष्टिचक्रं भवेदादौ स्थितिच्चक्रं द्वितीयकं ॥ लयचक्रं तृतीयं स्यात्त्रिधा च
क्रं विभेदितं । वीजसंलेखनं देवि त्रिधा च गदितं मया ॥ वीजं विना तु निर्वीजं शावपत्रारिकीर्तितं । वीजयुक्तं भवेद्यंत्रं निःशंसं सिद्धिद
यकं । वीजाभावे मातृकार्णान्संलिखेदुभूषितान् ॥ यंत्रमध्ये तु संलिख्य तद्यंत्रं पूजयेच्छिवे ॥ दलाकारं तु यद्यंत्रं तद्यंत्रं सिद्धि
दायकं । दलाकारे कलौ पूज्यं नान्यथा सिद्धिदं भवेत् ॥ मंत्रचैतन्यकं देवि यंत्रचैतन्यकं तथा । गुरुचैतन्यकं देवि तस्मिन्नवितय
भावना ॥ न तत्र ध्यानरूपादि तेजो यंत्रविभावना ॥ सप्रपंचे तु संसारे दुराचारावृते शिवे ॥ भावेनैव तु संप्रोक्ता भावना सिद्धिदा
मता ॥ ॥ अथ सर्वसाधारणयंत्रसंस्कारमाह ॥ श्रीदेव्युवाच । चक्रभेदा महादेव त्वत्तु साक्षान्मया पुनः ॥ इदानीं श्रोतुमिच्छामि

प्रतिष्ठाकर्मनिर्णयं ॥ श्रीशंकर उवाच ॥ शृणु देवि प्रवक्ष्यामि जगत्कारिणि धौलिनि ॥ तस्यो पापनकर्मांगसर्ववर्णविनि
र्णयं ॥ लग्ने शुभग्रहोपेते तु कृत्ल गुणशालिनि ॥ प्रतिष्ठां कारयेदैमासक्षतिथ्यादिके क्षणे ॥ स्नात्वा संकल्पयेन्मंत्री गुरो
र्वैनमाचरेत् ॥ गुरुर्मंत्रेण विलिखेद्यंत्रं स्वर्णशलाकया ॥ पंचगव्ये ततः कृत्वा शिवमंत्रेणमंत्रितं ॥ तत्र चक्रं क्षिपेन्मंत्री प्र
णवेन समाहितः ॥ तस्मादुद्धृत्य तच्चक्रं स्थापयेत्स्वर्णपंकजे ॥ पंचामृतेन दुग्धेन शीतलेन जलेन च ॥ स्नापयेच्चंदनेनापि
कस्तूरीकुंकुमेन च ॥ हारकैः कलशैर्देवि अष्टाभिर्वारिपूरितैः ॥ कल्यायजलसंपन्नैः स्नापयेन्मंत्रमुच्चरन् ॥ तत उद्धृत्य तद्यंत्रं
स्थापयेद्धेमपात्रके ॥ यंत्रराज्ञाय विद्महे महायंत्राय धीमहि ॥ उग्ररेदेतदंतेतु तन्नो यंत्रः प्रचोदयात् ॥ स्पृष्ट्वा यंत्रं कुशाग्रेण गा
यत्र्या चाभिमंत्रयेत् ॥ अष्टोत्तरशतं देवि देवताभावसिद्धये ॥ आत्मशुद्धिं ततः कृत्वा षडंगैर्देवतां यजेत् ॥ तत्रावाह्य यजेद्देवी
जीवन्यासं च कारयेत् ॥ उपचारैः षोडशभिर्मूलमुद्रादिभिः सदा ॥ फलतांबूलनैवेद्यैर्देवीं तत्र समर्चयेत् ॥ पट्टसूत्रादिकं दद्या
द्वस्त्रालंकारमेव च ॥ मुकुरं चामरं घंटां यथायोग्यं महेश्वरि ॥ सर्वमेतत्प्रयत्नेन दद्यात्तास्महितेरतः ॥ त्रिरात्रं पूजयेद्देवीं त्रिसंध्यं
च पुनः पुनः ॥ ततो जपेत्सहस्रं तु सकलेप्सितसिद्धये ॥ बलिदानं ततः कृत्वा प्रणमेद्यंत्रराजकं ॥ अष्टोत्तरशतं हुत्वा संपाताज्यं
विनिःक्षिपेत् ॥ होमकर्मण्यशक्तश्चेद्द्विगुणं जपमाचरेत् ॥ धेनुमेकां समादाय हेमशृंगाद्यलंकृतां ॥ गुरवे दक्षिणां दद्यात्ततो देव्या

॥तंत्रविं॥ विसर्जनं॥ ॥अथ कौलिकादेर्विशेषमाह॥ ॥देव्युवाच॥ देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकं। वामिनां वै वकौलानां यंत्रसं
॥२६२॥ स्कारकर्म च॥ ॥शिव उवाच॥ अथोच्यते महायंत्रसंस्कारः सर्वसिद्धिदः। शुभे ह्नि स्नानमाचार्यः शुभे लग्ने शुभेक्षणे। कृतनित्य
क्रियो मंत्री प्राङ्मुखो वाप्युदङ्मुखः। पूर्वोक्तयान्तु द्रव्यैश्च सुंदरं सुमनोहरं। सुरेखं शुभदं यंत्रं लेखयित्वा विधानतः। प्रतिष्ठां चरतः कुर्या
द्यथाशास्त्रप्रमाणतः। शुभे लग्ने पुण्यकाले शैलादिविहितस्थले। मंत्री कल्यानुसारेनु पूर्वेद्युरधिवासयेत्। सायं संकल्प्य वि
धिवत् यंत्रस्थापनपूर्वकं। गणेशादीन् समभ्यर्च्य दिक्पालान् परिपूजयेत्। मत्स्यं मांसं तथा मद्यं मुद्रां मैथुनमेव च। यंत्रसंस्का
रकर्मादौ द्रव्यमेतन्मयेरितं। यथाशक्त्युपचाराद्यैः पूजयेन्मूलदेवतां। सुगंधतैलगंधाद्यैर्द्रव्यैस्तमभिवासयेत्। चंडेत्यादि
च मंत्रेण जपघोषपुरःसरं। इत्यधिवासितं कृत्वा संयतो विजितेंद्रियः। प्रातर्नित्यं विधायादौ ततो योग्यस्थले विशेत्। पताका
ध्वजसंकीर्णे दिव्यमंडलमंडिते। वितानचामरछत्रपुष्पमालाविराजिते। मंगलांकुरपत्राद्यैः कलशैश्च परिभूषिते। मंडलं सर्वतो
भद्रं रेखासहस्रसंयुतं। सामान्यभद्रं वा देवि देव्याश्चोपरि नो लिखेत्। अथवा दक्षिणावामे वक्ष्ये वारुणमंडलम्। चतुरस्रं चतुः
षष्टिकोष्ठं विधायान्निवेशयेत्। अंत्योपांतिमपंक्तौ तु दिक्षु कोष्ठानि मार्जयेत्। मध्यस्य चतुरक्षीणि द्वाराण्यानि च पूर्ववत्। पीत ॥गुरुः॥
रणमश्वेतहरिद्रजोभिः परिपूजयेत्॥ कोशकोष्ठं निहायेर्कपंचातः पादसंज्ञिताः॥ पीठस्य पादुरा रक्तपीतकृष्णप्रपूरयेत्। आग्नेय ॥२६२॥

तः कोणकोष्ठान्यारक्तहरित्तासितैः॥ श्वेतवर्णानि चत्वारि मध्येवृत्तानि कारयेत्॥ पूरयेदथ तस्योर्द्धं वितानं वं धयेयथा॥ पद्मविंशांस्थ
व्यासार्धवृत्तमाद्यं तु पीतं ततः॥ तत्पीतं कर्णिकाकारसितत्तेरखूरतं ततः॥ द्वितीयं द्विगुणं व्यासमष्टपकेशरसंयुतं॥ पीतरक्तश्वेतव
र्णामूलमध्याग्रकेशरं॥ द्विसप्तत्यंशिकाश्वेतां तस्याग्रेऽरुणरेखिकां॥ तृतीयं तु तृतीयांशेन तु व्यासं तु वर्त्तुलं॥ श्वेतमष्टदलं तत्र
रक्ताग्रं तद्दलांतरे॥ श्वेतं वहिः कुलमवर्णां प्राग्वदेखां सितां कुरु॥ तद्वहिर्वृत्तसंलग्नान्षोडशारान्प्रकल्पयेत्॥ श्यामपीतारुणाश्वे
तेन तदंतस्तु यवाकृती॥ सितपीतारुणश्याम हरित्ताः पंचरेखिकाः॥ कार्यास्तु रुचिराः पंच स्यांतरे हं प्रपूरयेत्॥ वज्रशक्तिदंडख
ड्गपाशध्वजगदां लिखेत्॥ पूर्वतस्तत्थैशान्यां भूलचक्रांगजान्वितं॥ वामदक्षिणयोरेतमंडलं वारुणाकृयं॥ प्राङ्मुखो वाग्य
तः कुर्यात्संकल्पाभीष्टसिद्धये॥ पंचभूशुद्धिं समाचर्य कुर्वल्लक्षतसंयुतं॥ संस्थाप्य मंडले तत्र यजेदाधारशक्तितः॥ पीठमंत्रं
समास्तीर्य स्थापयेत्कलशं वुधः॥ दीक्षाक्रमोक्तविधिनाभिषेककलशं तथा॥ पंचगव्यं ततः कुर्यात् शिवमंत्रविशोधितं॥ तेन सुधा
पयेन्मंत्री यंत्रं च प्रणवं जपन्॥ पंचामृतेन हविषा दध्ना च पयसा क्रमात्॥ ततउद्वर्तनं कृत्वा जलेन स्नापयेदपि॥ पंचगव्यं समानीय
तत्र यंत्रं समाहितः॥ जपन् क्षिपेत्सु वर्णादौ वेदमूलपुरःसरन्॥ ततउद्धृत्य स्वर्णादिपात्रे संस्थाप्य मंत्रवित्॥ पंचामृतेन तीर्थेन शीतले
न जलेन च॥ सहस्रशीर्षामंत्रेण मूलमंत्रपुरःसरं॥ सुस्नाप्य पावमानेन कर्पूरागुरुनीरतः॥ सर्वौषधिजलैर्गंधजलैर्यत्नेन मार्जनं

ततः शुद्धदुकूलेनं जमुत्सार्य साधकः ॥ परिधाय दुकूले द्वे स्वर्णनिर्मितदोलया ॥ मंस्तुतेतं समानीय नृत्यगीतैर्जपस्तवैः ॥ कुंकुमा-
द्यैर्विलिप्याथ पूजयेत्सर्वोपचारकैः ॥ पीठपूजां ततः कुर्यात्स्वस्वकल्पोक्तमानतः ॥ ॐ शेः कुलीनेर्थ देविशान्तमष्टोत्तरं जपेत् ॥
पूर्वोक्तां यत्र गायत्रीं जप्त्वा देवत्त्वमाप्नुयात् ॥ अथ चेष्टदेवतां ध्यात्वा मुद्रया वाहयेत्ततः ॥ जीवन्यासं ततः कुर्यात्पूजयेदिष्टदे-
वताः ॥ नृत्यगीतैश्च वाद्यैश्च पंचघोपपुरःसरं ॥ ततो जपेदिष्टमंत्रमष्टोत्तरसहस्रकं ॥ कुंडे वा स्थंडिले मंत्री हविषा संस्कृतेनले
यथाविधिविधानेन स्वाहान्तं समाचरेत् ॥ ग्रासप्रमाणं चवरुं मूलेनाहुत्यमंत्रयित् ॥ घृतंश्च वं ततो दत्वा जुहुयादग्निसंमु-
खे ॥ पंचविंशतितत्वैश्च तत्वेन तर्पणं चरेत् ॥ इंद्रादिदिक्पतिभ्यश्च दद्यात्सर्वादितं वली ॥ ततश्चा पृथिवीदेवेभ्यो घटेनाहुतिमाचरेत्
तदंते देवि मंत्रेशाकुनेदष्टोत्तरं शतं ॥ मातृकापुक्रमंत्रस्तु जपं जपजपस्तवैः ॥ गत्वा होमसमीपे तु दत्वा पूर्णाहुतिं चरेत् ॥ इष्टसि-
ध्येवति स्वल्पपुराणेन तवक्रजन्मं ॥ तोषयेत्स्वर्णवस्त्राद्यैश्च दद्याद्दक्षिणामपि ॥ मकारैः पंचभिर्देवि वीरपूजां समाचरेत् ॥ शक्ति-
कुमारिकावालां पूजयेत्पंचपंचकं ॥ कुर्यादृशाष्टकं वापि कुलद्रव्यैः समस्तकैः ॥ त्रैलोक्यनाथो भवत यंत्रपूजनयोगतः ॥ भक्त-
शुद्ध्यादिकं कृत्वा कल्पोक्तन्यासमाचरेत् ॥ निशायां शक्तिपूजां च भूतीयागं च कौलिकाः ॥ मकारैः पंचभिर्युक्तं चरेत्कुर्वामिनोर्चनं ॥
एवं दिनत्रयं कृत्वा ततो नित्यक्रमं यजेत् ॥ सृष्टिस्थितिलयत्वेन सुंदरीयंत्रपूजनं ॥ सृष्टिसंहारमार्गेण कालिकायंत्रपूजनं ॥ सृष्टि

संहारमार्गेणतारा छिन्नाव पीतभा॥ एवं देवि प्रतिष्ठायां क्रमः सान्निध्यकारकः॥ स्त्रीभूजालं वामिनी चकोलिकानामयं विधिः
विधियुक्तं प्रकर्त्तव्यं विधिहीनं न कारयेत्॥ विधिहीनस्य विघ्नानि यानि ते कथयाम्यहं॥ कलहोद्वेगदंदश्च व्याधिश्चलज्वलं तथा
राजोपद्रवहानिश्च द्रव्यनाशं रुजं तथा॥ चिल्ला काकाध्वकाङ्क्ष्योशिवाफेत्कारदारुणाः॥ कपोताश्च गृहे तस्य आरुहंति विशं
ति च। विघ्नं कुर्वंति ये तस्य विधानं गुरुसंस्थिता॥ छिद्रं इति तस्य योगिन्यो नानाविघ्नैः प्रबाध्यते॥ सर्पवृश्चिकलूताश्च कीटाश्चै
वसुदारुणाः॥ दर्शंति च महाडयाप्रेरितास्ते मरीचिभिः॥ वृद्धैश्चावेगजैर्दैश्च मेघैर्वज्राशनिस्तथा॥ उपद्रवंति दुष्टाश्च ज्वरो भक्ता
दयस्तथा॥ लूतागर्दभापस्मारा अभिभवंति नान्यथा॥ कदाचित् लुप्तचिह्नं वा स्फुटितादि विदूषणं॥ मंत्रं करोति यो मोहात्तस्य तस्त
स्य भवेद्ध्रुवं। तस्मात्तीर्थराजे वा गंगादि सरितां च वा। समुद्रे वा क्षिपेद्देवि अन्यथा दुःखमाप्नुयात्॥ ॥इति श्रीतंत्रचिंताम
णौ यंत्राधारादिपूर्वकप्रतिष्ठांत निर्णय नामो नत्रिंशत्तमः प्रकाशः॥ २९ ॥अथ मालानिर्णयमाह॥ ॥अथ मालां प्रव
क्ष्यामि द्विविधा सा स्थिरा चला। स्थिरा तु स्थिरचित्तानां चंचलानजचेतसां॥ ॥अथाचलमालामाह॥ अकारादि क्षकारांते र्विं
दुमन्मातृकाक्षरैः। अनुलोमस्थैः क्लृप्तया वर्णमालया॥ एकैकं वर्णमुच्चार्य्य वर्णानां तारितं मनुं॥ सुधीरेवलकारांते तमैत्रं तं स
माचरेत्॥ क्षकारं मेरुरूपं तु लंघयेन्न कदाचन॥ महदेवो स्वरे क्षांतं तत्र दंते नोच्चरेन्मनुं॥ मेरुहीना च या माला मेरुलंघ्या च या भ

विलोम

वेत्॥ स्वपुष्ठानुभवेद्वसाम्मालानिष्फलाभवेत्॥ विद्रोणे हिसतं घाभावुस्मनाडीगतानुया॥ तया सं ग्रथिता ध्येया सर्वकामफलप्रदा॥ अष्टोत्तरशते जप्ते त्वाधेली वं समुद्धरेत्॥ ऋॠलृलॄ वर्णाचतुष्टयं लीवं प्रवक्षते॥ वर्गाणामष्टकानापि कास्यभेदक्रमेण तु॥ अकचटतपयशों इत्येवाष्टवर्गकं॥ किंवा मृतत्रयं प्रोच्य प्रणवां तेन मातृका॥ अनुलोमविलोमानु त्वष्टोत्तरशती भवेत्॥ मायावाक्कामश्रीयोगात् मातृकावर्णयोगतः॥ अनुलोमविलोमाभ्यां त्वष्टोत्तरशती भवेत्॥ त्रयं गुरोस्त्रयं देविगाणापपरिकीर्त्तितं॥ न्यूनातिरिक्ते छित्तयं शेषमिष्टाय योजयेत्॥ अष्टोत्तरशतीभेदः कथितं परमेश्वरि॥ अष्टोत्तरशतीमाला सर्वकार्यार्थसिद्धिदा॥ मातृकावर्णरूपत्वात् प्रोक्तेयं स्थिरमालिका॥ अकारादिक्षकारान्ता सैवेयं त्वक्षमालिका॥ उत्प्रकीलितसंरुद्धाछिन्नव्याकीर्णयोगतः॥ धनीवैरीवीर्यहानकाराखंजादयोपि ये॥ तेपि सिद्धा भवंत्येव स्थिरमालाप्रभावतः॥ अथास्या ध्यानं॥ अंतर्विंदुमनासमानभुजगीसुप्रोथवर्णोज्ज्वलां आरोहामवरोहिकांशतमयीवर्गाष्टकाष्टोत्तराम् साक्षाद्बुल्लमयीं क्षमेरुशिरस्वरांश्री मातृकाक्षावलीं विघ्रांतोमिसमस्तमंत्रजननीं ज्ञानैकदीपांकुरां॥ ॥दंताक्षमालाश्रीकान्त्यां तारायां नरस्थांरवजा॥ छिन्नमस्ताविधौ शस्ता नरास्थिमालिकाशुभा॥ रक्तचंदनबीजानां माला स्यात्त्रिपुराविधौ॥ स्वयंभूमालिका देवी भैरव्यां मालिका विधौ॥ गुंजामालानुमातंग्यां धूम्रायां खरदंतजा॥ हारिद्राख्यानु बगलायां कमलाख्यानु माविधौ॥

वालायांभुवनेश्वर्य्यां स्फाटिकी परिकीर्त्तिता ॥ श्वेतगुंजा सिद्धिविद्याविधौ प्रोक्ता महेश्वरि ॥ शंखमाला वैस्मवे च रुद्राक्षा शक्तिमात्रके
रुद्राक्षा शरभे प्रोक्ता गणेशे गजदंतजा ॥ त्रिपुटायां पुत्रजीवो गोविंदे तुलसी मता ॥ सर्वमंत्रे च रुद्राक्षा शक्तिमेवतु वा नहि ॥ रत्नस्वर्णरौ
प्यमयी तथा ताम्रमयी शिवे ॥ श्रां इंद्रवीजमयी वट्वीजमयी तथा ॥ पूगीफलमयी माला जातीफलमयी तथा ॥ मधुमत्या कर्ष
णार्थे वीरवस्याविधावपि ॥ प्रवासेस्तूर्य्यमंत्रे च मौक्तिकैः शक्तिमात्रके ॥ पूर्वाम्नाये स्फाटिकैर्द्दक्षिणे रुद्रनेत्रजैः ॥ प्रवालैर्मौक्ति
केर्द्देवि पश्चिमाम्नाये देवते ॥ उत्तराम्नायदेवानां महाशंखाख्यमालिका ॥ मणिभिः पुत्रजीवैश्च न जपेदुत्तरेश्वरी ॥ ऊंउली मालिका
देवि भैरव्यां परिकीर्त्तिता ॥ ऊर्ध्वाम्नाये स्वयंभूस्था पाताले रत्नसंभवा ॥ तत्रापि कालिकाताराविद्यायां शवसंभवाः ॥ शंखमाला
विद्यायाथ पुस्तरीकालिकां जपेत ॥ मंत्रक्षोभोथवाभ्रष्ट्या क्रियासिद्धिसुभैरव ॥ शिवशक्तिमयी माला रुद्राक्षस्फाटिकैर्युता ॥ रु
द्राक्षस्वर्णसंयुक्ता माला हरिहरात्मिका ॥ रुद्राक्षरौप्यसंयुक्ता माला विधिशिवात्मिका ॥ शक्तिरूपी साधकः स्याद्रुद्राक्षः शिवरूप
धृक् ॥ शिवशक्तिविहीनत्वान्न रुद्राक्षैर्दिवा जपः ॥ वियोगपूजिता काली सहसा न प्रसीदति ॥ रात्रौ संयोगरूपा स्याद्विद्यारूपा तथेश्व
रि ॥ रुद्राक्षैः शक्तिमंत्रं तु दिवा यो जपति प्रिये ॥ स दुर्गतिमवाप्नोति जपस्तस्य निरर्थकः ॥ शक्तिस्त्रीमंत्रजप्ये तु रुद्राक्षैर्न दिवा जपेत
इत्थंकारणतो देवि रात्रावेव जपः स्मृतः ॥ वैष्णवैः सौरसेवाद्यै रुद्राक्षैर्नस्पृशेत्त्रिसि ॥ ॥ कार्त्तिकेय उवाच ॥ भगवन्देवदेवेश

अनेकफलमद्भुतं॥किमर्थंसस्यतेनतुरुद्राक्षंपरमेश्वर।रुद्राक्षाणांयउत्पत्तिप्रभेदंवापिलक्षणं॥रुद्राक्षंकीदृशंदेवको
देवःकिंफलंभवेत्॥धारणेकिंफलंवापिस्थानंदेहेकथंकथं॥भगवन्श्रोतुमिच्छामिवक्तुहिपरमेश्वर॥ ॥ईश्वरउवाच॥
कदाचित्समयेदेविदक्षोयज्ञपरायणः॥सकलाश्चषयोदेवायक्षविद्याधरोरगाः॥पुत्रीजामातृसंबंधात्गृहेनाकारि
ताचसा॥महादेवःसत्यवतीतेननाकारितावतो॥सतीवभर्त्तनिकटेउक्तातत्रप्रगम्यते॥ ॥शिवोवाच॥समैवाकारतांते
नेनकृतंप्राणवल्लभे॥तवलज्जाकथंनास्तित्वयातत्रप्रगम्यते॥प्रियोदेवःप्रियःप्राणप्रियएकविभूषणं॥मांविहायक
थंदेवित्वयातत्रप्रगम्यते॥पातिव्रत्यमिदंक्वास्तिप्रतियोगिविहीनतः।तथापितववांछाचेत्त्वीप्रगंतुंकृपांकुरु॥भर्तुराज्ञा
गृहीत्वातुप्रस्थितंयागमंडपे॥ततःसिंहेनक्षणात्तनीतंवुस्मणोयागमंडपं॥तेननादरिताकन्यादुःखितादीनमानसा॥अथोपुत्री
स्थितातत्रपार्वतीरूपमावहत्॥सर्वेदेवाचात्रसंतिमद्भर्त्तानात्रदृश्यते॥महद्दुःखंममकृतमेतावहृदयस्थितं॥एतस्मिन्नंतरेदेवि
दक्षप्रजापतिःस्वयं॥शिवनिंदापरोभूयेपुनर्निस्मार्थमुद्यतः॥अनान्वारितरूपोभूत्तविस्नुनावारितोपिवा॥गुरुर्निंदापरोभू
त्वाभृंगीवृषभवाहनः॥श्मशानवासीमांसाशीनग्नोधीरतरोविराट्॥कपालीचत्रिशूलीचमुंडमालाविभूषितः॥भस्मीद्धुलि
तसर्वांगोव्याघ्राजिनसमास्थितः॥लोलुपोलंपटश्चैवबहुनिंदापरोभवेत्॥दुःखितानिंदयात्वंहिमंडपाद्वहिरागता॥दूरेने

त्रंतरे गत्वा वह्निकुंडं विधाय च ॥ हुती त्यक्ता तत्र देहं वह्निरूपत्वतां गता ॥ ॥ शिव उवाच ॥ शिवोहं क्रोधरूपेण ज्वालाभास्वरमं
डलं ॥ मत्क्रोधेन महेशानि भस्मीभूतं जगत्रयं ॥ मज्ज्वालया समुत्पन्नो वीरभद्रो महाद्युतिः ॥ कोटिकालानलदहनो दुःसहस्सर्व
जंतुषु ॥ दक्षप्रजापतेर्यज्ञः ध्वंसनार्थं समुद्यतः ॥ त्रिशूलहस्ती क्रूरं च जगध्वंसपरायणः ॥ शवरूपां शिवां देवि गृहीत्वा स्कंध
गोचरां ॥ रोदनं चक्रतुः तस्मात्पतितो वाष्पविंदवः ॥ तत्राश्रुविंदवो जाता महारुद्राक्षवृक्षकाः ॥ स्थावरत्वमनुप्राप्य मर्त्यानुग्रह
कारणात् ॥ फलंति सर्वकालं हि स्वविछिन्नफलप्रदा ॥ स्तूयते तेन रुद्राक्षं त्रिषु लोकेषु विश्रुतं ॥ नेत्रत्रयात्समुत्पन्ना रुद्राक्षास्त्रि
विधाः कलौ ॥ धनाश्री दक्षनेत्रोत्थो मोरंगो वस्तु चापरः ॥ तृतीयस्तु महत्वक्षी स्यान्नाग्निर्दहति नत्रतु ॥ ॥ अथ रुद्राक्षमाहात्म्यं वर्णि
यामि समासतः ॥ रुद्राक्षं मोक्षकामं तु रुद्राक्षं श्रेयसाधनं ॥ रुद्राक्षं हरते दुःखं रुद्राक्षं पापनाशनं ॥ सर्वपापक्षयकरं पठतां श्रृण्वता
मपि ॥ अभक्तो वापि भक्तो वा नीचो नीचतरोपि च ॥ रुद्राक्षं धारयेद्यस्तु मुच्यते सर्वपातकैः ॥ रुद्राक्षधारणात्पुण्यं केन वा सदृशं भवेत् ॥
महाव्रतमिदं प्राहुर्मुनयस्तत्वदर्शिन ॥ सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः ॥ तं नमंति सुराः सर्वे यथा रुद्रः तथैव सः ॥ शिरोमाल
तु षट्त्रिंशत् द्वात्रिंशत्कंठमालिका ॥ कूर्प्परे षोडश प्रोक्ता द्वात्रिंशन्मणिबंधयोः ॥ अष्टोत्तरशतैर्युक्तमुपवीतं विधायते ॥ तदर्धं मुर
सोमाला शिखायामेकमुच्यते ॥ कर्णयोश्चापि षट्संख्या धारणाक्रममीरितं ॥ संख्याहीनं न कर्तव्यमधिकं नैव दूष्यति ॥ रुद्राक्षास्तथा

रयन्त्रैवदृष्टांतेसशिवोभवेत्॥ वज्रलंलभतेउग्रंभाग्यवानिरुद्रजायते॥ स्नानेदानेजपेहोमेवैश्वदेवेसुरार्चने॥ प्रायश्चित्तेतथाश्राद्धे
दीक्षाकालेविशेषतः॥ रुद्राक्षधारीभूत्वाचयत्किंचित्कर्मवैदिकं॥ योविप्रःसततंकुर्यात्तत्कर्मसफलंभवेत्॥ कंठेशिरसिहस्ते
चकर्णयोरुपवीतके॥ रुद्राक्षधारणादेवरुद्रोभवतिवानवः॥ खादन्मांसंपिबन्मद्यंसंगच्छन्नन्त्यजातिषु॥ सद्योभवतिपूतात्मा
रुद्राक्षंमूर्ध्निधारयन्॥ देवान्दुष्यंतियेदेवपशवस्तुवैदिकाः॥ तान्पातयंतियेकौलेतेषांशास्तास्वयंयमः॥ तेषांसरक्षणा
र्थायनान्योरुद्राक्षतोभुवि॥ रुद्राक्षाःसर्वदेवानांमंत्रसिद्धिविधायिकाः॥ रुद्राक्षंकंठमाश्रित्यश्वानकोमृयतेयदि॥ सोपिरुद्र
त्वमाप्नोतिकिंपुनर्मानवादयः॥ उच्छिष्टोवाविकर्मस्थोयुक्तोवासर्वपातकैः॥ मुच्यतेसर्वपापेभ्योनरोरुद्राक्षधारणात्॥ रुद्राक्ष
मालिकांकंठेधारयन्भक्तिवर्जितः॥ पापकर्मापियोनित्यंरुद्रलोकेमहीयते॥ योधारयतिरुद्राक्षान्रुद्रवत्सोपिपूज्यते॥ मुक्ता
प्रवालस्फटिकैरौप्यवैदूर्यकांचनैः॥ समस्तान्धारयेद्यस्तुरुद्राक्षान्सशिवोभवेत्॥ केवलानथवापिरुद्राक्षान्यथालस्यान्नवि
भर्त्तियः॥ तत्रस्पृशंतिपापानितमांसीवविभावसु॥ रुद्राक्षमालयाजप्तोमंत्रोयंतस्फलप्रदः॥ रुद्राक्षंहंतिपापानितमांसीव
विभावसुः॥ अरुद्राक्षोजपःपुंसांतावन्मात्रफलप्रदः॥ यस्यांगेनास्तिरुद्राक्षएकोपिबहुपुण्यदः॥ तस्यजन्मनिरर्थंस्यात्त्रिपुं
ड्रहितस्यच॥ रुद्राक्षंमस्तकेधृत्वाशिरःस्नानंकरोतियः॥ गंगास्नानफलंतस्यजायतेनात्रसंशयः॥ रुद्राक्षंपूजयेद्यस्तुविना

तोयाभिषेचने। यत्फलं लिंगपूजायां तद्वाप्नोति निश्चितं॥ भक्त्या संपूजितो नित्यं रुद्राक्षः शंकरात्मकः। दरिद्रं वापि कुरुते राज
राजसमाश्रितं॥ गंगास्नानसमं पुण्यं दर्शनात्फलमाप्नुयात्॥ लक्षकोटिसहस्राणि लक्षकोटिशतानि च॥ रुद्राक्षधारणाद्वापि ना
त्रकार्या विचारणा॥ ॥ एकवक्त्रः शिवस्तस्य मालां तु जपतो हरेत्॥ ब्रह्महत्यादिपापानि न पाराज्यादिकेषु च॥ एकवक्त्रसमायुक्तं
रुद्राक्षं यस्य तिष्ठति॥ स साम्राज्यमवाप्नोति सत्यं ज्ञानी हि पार्वति॥ उमाशंकरनामास्यो द्विमुखो व्यपोहति॥ गोहत्यादिकपापा
नि गार्हस्थ्याशुभसौख्यदः॥ त्रिमुखस्त्वग्निरूपः स्यात् स्त्रीहत्यादिकपापहा। धर्मार्थकामाः सिध्यंति धारणा[illegible]रूपादपि। चतुर्मु
खो भवेद्ब्रह्मा गुरुहत्यादिनाशकः॥ स्फुरंति सकलाविद्या याकसिद्धिश्चापि ज्ञायते॥ पंचवक्त्रः शिवः साक्षात्कालाग्निर्नाम
नामतः॥ शैवगाणेशशाक्तानां द्रुतं सिद्धिस्तु तज्जपात्॥ अगम्यागमने चैव अभक्ष्याभक्षणात्तथा॥ उच्यते पातकं घोरं पंचवक्त्र
स्य धारणात्॥ कार्तिकेयस्तु षड्वक्त्रः स्खलितव्रतपापहा॥ भ्रूणहत्यादिभिः पापैर्मुच्यते नात्र संशयः॥ विधिना दक्षिणे वाहौ ध
रणात्समरे जयः॥ सप्तवक्त्रो महानागोऽनंतो नामाथ तज्जपात्॥ अनंताः सिद्धयः सर्पविषभीश्च न जायते॥ सुवर्णैः शुभगश्चै
व दरिद्रोपीश्वरो भवेत्॥ गुरुतल्पादिभिः पापैरत्यावकृतैरपि॥ मुच्यते नात्र संदेहो रुद्राक्षस्य च धारणात्॥ अष्टवक्त्रो गणे
शः स्यात्सर्वविघ्ननिवारकः॥ नश्यंति तज्जपात्सर्वे कामक्रोधादिशत्रवः॥ एष्टोदरकरेणापि संस्पृशेद्वा गुरुस्त्रियं॥ एवमादीनि

पापानिघ्नंतिपापानिसर्वशः॥ विप्रास्तस्यचनश्यंतिमुक्तोयातिपरांगतिं॥ जीवेद्वर्षशतंसाग्रंमृत्युर्नास्तिसभूलभत्॥ तृणायेनेशु
सर्वेषुअष्टवक्त्रस्यधारणात्॥ नववक्त्रेभैरवःस्यात्कपिलंमुनिदंस्मृतं॥ जपादेवप्रसीदंतिवाममार्गस्यदेवताः॥ धारयेद्वामहस्ते
चममतुल्यबलोभवेत्॥ लक्षकोटिसहस्राणिब्रह्महत्यांकरोतियः॥ तत्सर्वंहरतेक्षिप्रंनववक्त्रस्यधारणात्॥ दशवक्त्रोमहासेनस्व
देवोजनार्दनः॥ सहसैवपिशाचाद्यावेतालाब्रह्मराक्षसाः॥ शाकिन्योमातरश्चैवतथावैप्रेतनायकाः॥ पन्नगाश्चविनश्यंतिद
शवक्त्रस्यधारणात्॥ वक्त्रैकादशरुद्राक्षंरुद्रैकादशकंस्मृतं॥ शिखायांधारयेन्नित्यंतस्यपुण्यफलंशृणु॥ अश्वमेधसहस्रा
णिवाजपेयशतानिच॥ गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलं॥ सद्गुतत्फलमाप्नोतिरुद्रैकादशधारणात्॥ वक्त्रद्वादशरु
द्राक्षंभास्करद्वादशात्मकं॥ धारयेत्कंठदेशेचजपेद्वापिसमाहितः॥ तेजस्वीचप्रतापीचआदित्यसदृशोभवेत्॥ दुर्भगासु
भगायांतिरोगीरोगात्प्रमुच्यते॥ गोमेधनरमेधादिसर्वक्रतुफलप्रदः॥ हस्त्यश्वमृगमार्जारान्सिंहव्याघ्रर्क्षकादिकान्॥
श्वानंशृगालवृकलंवृक्षोवहतत्रापिमुच्यते॥ नात्रसंदेहोद्वादशादिस्यधारणात्॥ वक्त्रंत्रयोदशंयस्तत्स्वतुयदिधार
येत्॥ पूज्यतेसततंदेवैःप्राप्यतेपुण्यमुत्तमं॥ सर्वफलमवाप्नोतिसौभाग्यंवोत्तमंभवेत्॥ रसंरसायनंरवक्रधातुर्वादमनेक
धा॥ कामधेनुश्चरुद्राक्षंइच्छासिद्धिमवाप्नुयात्॥ मिधारयेतेनरुद्राक्षंमानवोपियथसो॥ मातापितातथावंधुगुरुर्वाय

दिहश्यते। मुच्यते पातकैर्घोरैस्तथान्यैरुपपातकैः॥ पुरोपश्चतुर्दशं वक्त्रं रुद्राक्षं यदि लभ्यते॥ धारयेत्स प्रयत्नेन शिखायां यज्ञो
पवीतके॥ त्वासुंग्रनुस्वयं वत्स शक्तिपिंडं प्रविस्यमु॥ अर्चयित्वा धृते कंठे न पुनर्जायते ह्यसौ॥ सिध्यते नात्र संदेहः सत्यं सत्यं च
षण्मुखं। विचेत्नस्पृतो केसौ प्रासादछ्ययपातत्या॥ योगी वह्निवरैस्तद्वत्सर्वेषु च प्रियो भवेत्॥ पञ्चमु[illegible]खो वापि नगरं वाप
विद्वकं। रसं रसायनं चैव जरामृत्युविनाशनं॥ लभेद्वेतालखड्गं च सिद्धिं महाद्भुतं॥ न पुण्यं न च पापेन न व्याधिर्न दुपीडनं जी
वेद्वर्षसहस्राणि मर्त्ये भवति भूलधृक्॥ अप्राप्यं तां लभेदर्थानुच्चाप्यं स्पक्षयो भवेत्॥ उच्यते सर्वपापेभ्यो ज्ञानी यज्ञफलं लभे
त॥ चतुर्दशमुखेर्जप्रं तु शानन्माय जायते॥ पूज्यते देवमनुजै रक्ष्यां लभते गतिं॥ शतमष्टोत्तरं ज्येष्ठं पंचाशद्वतुराधिकम्
सप्तविंशत्तथा वापि कुर्याद्रुद्राक्षमालिकां॥ गुरोः सकाशात्संगृह्य यो जपेन्नेन सिध्यति॥ मोक्षार्थे पंचविंशत्या सप्तविंशति पौ
ष्टिके। त्रिंशद्धनसंपत्त्यै पंचदश्याभिचारके॥ यथा हरिश्च देवेषु सदेहः क्षतुमर्नके॥ रविर्यथा ग्रहाणां च मुनीनां कश्यपो
यथा॥ नदीनां जाह्नवी यद्वद्भूतानां च चतुर्दशी॥ यमारयो यथा स्कंदो देवानां च महेश्वरः॥ देवीनां च उमादेवी ऐरावत गजेश्व
राः॥ धेनूनां च सुनंदो वै अश्वानां हरिर्नतथा॥ एवमन्येषु सर्वेषु रुद्राक्षस्तु विशिष्यते॥ ॥[illegible]मुखं शिरसा धार्यं त्रिमुखं कंठके
स्मृतं॥ पंचवक्त्रं मतं बाहौ चतुर्वक्त्रं करे शुभं॥ द्विमुखं धारयेत्कर्णे एकवक्त्रं च मूर्द्धनि॥ नवचक्त्रं च रुद्राक्षं धारयेद्वामबाहु

ना चतुर्दशमुखेचैव शिखायांधारयेद्बुधः । रुद्राक्षान्धारयेद्विप्रः सध्यादिषुचकर्मसु । तत्सर्वस्यफलंप्रोक्तंलक्षकोटिगुणंभ
वं । लिंगदर्शनवत्पुण्यंभवेद्रुद्राक्षदर्शनात् । तत्कोटिशतंपुण्यंलभतेधारणान्नरः । शिरसाधारयेत्कोटिकर्णयोर्दशको
टयः । गलेवध्वाकोटिशतंमूर्द्धिकोटिसहस्रकं । अयुतंचोपवीतंच लक्षकोटिर्भुजद्वये । अप्रमेयफलंह्येतद्रुद्राक्षधरोभ
वेत् । निश्छिद्राश्चैवपक्वाश्चरुद्राक्षाधारणेमताः । परीक्षात्रकर्त्तव्यारुद्राक्षस्यतुषण्मुख । सुपक्वंसुदृढंचैवठवेधंसुसमंसु
रवं । निश्छिद्रंनिर्व्रणंचैवकल्पोक्तफलदायकं । पांडुरंचाधमंज्ञेयंमध्यमंहरितवर्णकं । उत्तमंकृष्णवर्णंतुसर्वसिद्धिप्रदायकं
वक्रंचखंडितंचैवछिद्रंचैवविशेषतः । किंचित्किंचिद्भवेत्तस्यफलंदोषेणहन्यते । कुशग्रंथ्याजपेद्विप्रः सुवर्णमणिभिर्नृ
पः । पुत्रंजीवैर्जपेद्वश्यः पद्माक्षैः सर्वएवच । अथमालान्तंफलमाह । रुद्राक्षैः सर्वकार्याणिपद्माक्षैः पुष्टिरत्नमा
कीर्त्तिश्रीशंखमणिभिर्मौक्तिकैर्मुक्तिमान्भवेत् । प्रवालैर्वश्यसिद्धिः स्यात्गुंजयामोहनंभवेत् । रुद्राक्षैर्भोगसंपत्तिर्द्राक्षाभि
र्गुरुत्नमं । धनधान्यसुतप्राप्तिर्भवेद्वैपुत्रजीवकैः । अरिष्टमालाविद्वेषेवदीमारणेमता । मरीचैर्क्रसनेमालापितृमेर्दविना
शने । अकस्मादीक्षितासिद्धिर्महाशंखाख्यमालया । दंताक्षमालयादेवि षष्ठिसिद्धिम्बोभवेत् । रचिताचास्थिमणिभिः सर्व
शत्रुविनाशिनी । खरदंतैःशत्रुनाशोगजदंतैर्गुणोभवेत् । कुवंदंतैःसमाकर्षोहारिद्रस्तंभनंभवेत् । तुलस्यामोक्षमाप्नोतिलोहैर्म

रक्तमादिशेत्॥ तामैः शांतिर्लौहरोप्यैः सर्वसौख्यकर्त्री भवेत्॥ सौवर्णी राज्यलक्ष्मीस्यात्सर्पास्थिमालया रिपून्॥ त्रासयेत्रासयेद्दे
विनाश्चकार्यो विचारणा॥ वाक्सिद्धिः स्फाटिकैर्भव्या पंखाभावे पि मालिका॥ अंगुलीपर्वभिः सर्वसिद्धिराज्यं समिंदति॥ औदुंबरै
र्भृत्तनाशो नक्षैर्वा रिपुनाशने॥ याबीजैर्यक्षिणी सिद्धिः कपर्दाभिर्महोदयः॥ ॥अथ महाशंखादिलक्षणरहस्यमालाभेदानाह
करोनेत्रांतरस्थायो महाशंखः प्रकीर्त्तितः॥ महाशंखमयी माला सर्वविद्यास्वरूपिणी॥ दंताक्षमालिका देवि मेरुसडाजर्दंतः
तः॥ सर्वविद्याविधौ सस्ता सर्वसिद्धिपरांस्विके॥ नरांगुल्यस्थिभिर्माला ग्रथिता पर्वभेदतः॥ सर्वसिद्धिमयी प्रोक्ता सर्वशक्तिमयी
स्मृता॥ अस्थिमाला पि च तथा तथा षडंगमालिका॥ सैव ब्रह्मोउमाला च देहे देहांतरस्थिनी॥ करास्थिमालिका देवि तथा यत्सर्वमा
लिका॥ जंघास्थिकीलकार्ये पि मालायामपि सिद्धिकृत्॥ तन्माला ग्रथनं देवि नाप्मारकेनवा समा॥ उत्तरोर्द्धगता न्याये माला सर्वफ
लप्रदा॥ चंडुमंडुलमारभ्य कर्णांतं परमेश्वरि॥ वामदक्षयुग्मके च माला स्यान्मेरुमंडला॥ मेरुमंडलमाला तु सर्वसिद्धिपरांविके॥
द्वितीया षडवयवी माला सांम्राज्यमोहिनी॥ उन्मनी मालिका देवि माला श्रीभुंभमालिनी॥ दक्षभ्रुविंदुमारभ्य कर्णांतं परमेश्वरि॥ वाम
भ्रुविंदुमारभ्य वामश्रूत्यंतगं शिवे॥ माला त्रिपुंडुमार्गेण शिवशक्तिमयी स्मृता॥ अर्द्धत्रिपुंडुमार्गेण शिवशक्तिमयी स्मृता॥ उर्द्धक
मेणदेवेशि माला सर्वोत्तमोत्तमा॥ केशक्रमेणदेवेशि कपालार्द्धस्तु मालिका॥ तथैव मणयः कार्याः शिवसद्वचनापरः॥ महाशंखम

यीचाद्या द्वितीया ध्रुवमंडला॥ उन्मली मालिका देवीन्तृतीया परिकीर्तिता॥ मेरुमाला चतुर्थी स्यात् पंचमी मेरुमण्डला॥ राजदन्तो
न्नमेरुस्तु तेन सा मेरुमण्डला॥ राजदंतद्वयो मेरुर्नियोज्यः पंक्तिमार्गतः॥ ऊईउऊक्रमेणैव इष्टा इष्टांतरं शिवे। सर्वसिद्धिम
यी माला राजदंतेन मेरुणा॥ सिद्धिदा भोगदा योगदात्री राज्यप्रदा तथा॥ चतुःषष्ठी सिद्धिमते माला तु पंचमी स्मृता॥ ब्रह्मावि
ष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥ एते पंच महाप्रेता पंचमालाधिका विधौ॥ तारा छिन्ना तथा कामकला काली करालिका॥
श्रीविद्यादावपि शिवे मालिका मालिकामयी॥ अथ गोवाजिवृषभमृगवानरम्भकरैः॥ भल्लुकाम्बूकशार्दूलव्याघ्रवारणदं
तजा॥ गवयादिमृगोत्था च कस्तूरीमृगजातिजा॥ जीवमात्रास्थिसंभूता खरोष्ट्रवाजिदंतजाः॥ दंताभावे प्रतिनिधेर्महाशं
खेन नैव तत्सदा॥ विश्वामित्रभवं तत्र सर्वसत्त्वोद्भवं भवेत्॥ ॥ अथ विशेषतः त्रिशक्तिमालामाह॥ माला तु त्रिविधा प्रोक्ता उत्त
मा मध्यमाधमा॥ दंताक्षमालया चैव राजदंतेन मेरुणा॥ उत्तमा मालिका प्रोक्ता कालिकाकर्पूरीपरा॥ कर्णनेत्रांतरस्थो यो म
हाशंखेति कीर्तितः॥ महाशंखमयी माला पंचाशन्मणिनिर्मिता॥ मध्यमा मालिका प्रोक्ता तारे जापे प्रकीर्तिता॥ अस्थिभिर्वा
नृमुंडैर्वा किं वा नरललाटजा॥ देहे देहांतरस्थैर्वा माला प्रोक्ता कनिष्ठिका॥ छिन्नादेव्या विधौ देवि एवं हि त्रिविधा मता॥ सप्तरेखौ यौ
उभौ दंतौ राजदंतौ प्रकीर्तितौ॥ करालास्या महाकाल्या दानवा भक्षिताः पुरा॥ त्रैलोक्यगामिनो दंतो राजदंतो विनिस्सृतो॥ राजदंते

तिसंज्ञा वै देव्या पूर्वं कृता भवेत्। योदैत्यवर्वैकोदैतौ मम कार्यकरावुभौ॥ तस्मात्त्वीतेन मनसा मे स्कार्ये नियोजितौ॥ ॥अथ माला वि
शेषफलप्राप्तिमाह॥ रुद्राक्षमालाजापेन दशवर्षेण वैशुरा॥ स्फाटिके रुद्रवर्षेण मुक्तायानंदवर्षतः॥ प्रवाले सूर्यवर्षेण पद्माक्षे परमे
श्वरि॥ काचवर्षेण देवेशि पुत्रजीव्यां भृगुप्रिये॥ भूतवर्षेण फलदा गुंजाख्ये वसुवर्षतः॥ रक्तचंदनजापीत्वम नववर्षात्फलं भवेत्। रौप्यस्य
युग्मवर्षेण ताम्राक्षे फलमीरितं॥ अकस्मादीप्सितासिद्धिर्महाशंखस्य मालया॥ महाशंखेप्यशक्तश्चेत्स्फाटिकामालया जपेत्। दंता
क्षमालया देवि दशदिन फलं स्मृतं। अंगुलीपर्वमालायाः सप्तताहेन फलं लभेत्। महाशंखाख्यमालायां सूर्याहेन फलं ध्रुवं। रुद्रा
क्षे षोडशाब्देन माहेंद्राक्षे पितृर्वचत्॥ माणिक्ये पंचवर्षेण रत्ने वर्षाष्टकेन च॥ अस्थिभिः पक्षमात्रेण फलं भवति पार्वति। चंडघंट
विधौ देवि नरास्थिमालिका स्मृता॥ एकाक्षरी छिन्नमस्ता चंडघंटा प्रकीर्तिता। नरदंक्षैर्न पद्माक्षैश्चंडघंटविधौ शिवे। इतोप्युग्याना
न्यविधानकाविद्वे भविष्यति। सिद्धिर्वा मृत्युरपि वा द्वयोरेकतरं भवेत्। ताराबीजं तथा काल्याः शक्तिश्छिन्ना मनुर्भवेत्। बीजदेवतयोगेन
अधिप्रत्याधियोगतः॥ अधिष्ठात्री महेशानि तयाप्रत्याधियोगतः॥ नरास्थिमालिकासक्ता सर्वकार्यकरी स्मृता॥ त्रिशक्तिमंत्ररुद्राक्षे
र्लक्षं वा प्रजपेच्छिवे। स दुर्गतिमवाप्नोति जापकस्य निरर्थकः॥ रात्रौ त्रिपुवमंत्रेषु रुद्राक्षैर्न जपेद्बुधः॥ पीताक्षे रसवर्षेण फलं भवति
पार्वति। कुंडलीमालिका देवि भैरव्याः परिकीर्तिता॥ स्वयंभूमालिका देवि स्त्वबीजमंत्रयोगतः॥ याप्राप्ताविधिना देवि पंचाहेन फलप्रदा॥

खरदंतेववर्षेणगजदंतेद्विवेदतः॥ राजदंतेप्यशक्तश्चेत्गजदंतेमवेजपेत्॥ कुलवृक्षस्यवीजेनमासात्भवतिवैफलं॥ कुशाग्रं
थ्यासूर्य्यपुत्रैश्चफलमत्रप्रकीर्तितं॥ नारिकेलमयीमालाप्रोक्ताकापालिनीविधौ॥ वनपक्षसुंहमालेयंषण्मासेनफलप्रदा॥ ॥
अथसामान्यमालासंस्कारमाह॥ चतुर्थ्यांशोनयेन्मालांगणनाथस्यमंत्रकैः॥ मध्याह्नेर्कसप्तम्यांरवौवानस्यनंदने॥ शक्तीना
मपिकर्त्तव्याशुक्लाश्चेयथाविधि॥ ॥अथसूत्रभेदः॥ ग्रथितापट्टसूत्रेणदेव्याःप्रीतोतुमालिका॥ कार्प्पासैर्वेष्टवीमाला
पद्मसूत्रैस्तथापिवा॥ दर्भाभिर्वावल्कलैर्वांशैर्वीकार्प्पाससूत्रजा॥ ॥अथसूत्रः सर्वदेवानांसूत्रोत्पत्तिविधिंशृणु॥ सूत्रंद्विजेन्द्र
पुण्यस्त्रीनिर्मितंग्रंथिवर्जितं॥ त्रिगुणंत्रिगुणीकृत्यग्राह्यंप्रक्षाल्ययत्नतः॥ ॥याजीववत्सकानारीसुंदरीपतिवल्लभा॥ तया
कर्त्तितसूत्रेणसुटमालाशुभावहा॥ मरुसूत्रेणपट्टेनत्रसरेणुविनिर्मिता॥ निर्मितास्वर्णरत्नैःस्वर्णेनापिशुभावहा॥ कन्या
कर्त्तितसूत्रेणग्रथितागुरुणास्वयं॥ मंडलीकृतगोपुच्छरूपश्लक्ष्णमालिकाशुभा॥ हारिडंसर्वथासूत्रंग्राममकार्प्पाससंभवं॥ वेत्र
कार्प्पासजंवापित्यजेत्ग्रथनकर्मणि॥ एकभक्तोविधायादौसाधकोग्रथयेत्स्वयं॥ कृतनित्यक्रियःशुद्धऽक्रुरिक्षेषतंडितः॥ श्वेत
रक्तसुवर्णाभक्तस्मवर्णाद्विजादितः॥ एतेषुप्रशस्ताःश्रेष्ठोजपमालाकृतंभृशं॥ अलाभेतुद्विजातीनामपिवास्वस्वजातयः॥ ॥
अथमालाकृतिंवक्ष्येक्षालयेत्पंचगव्यकैः॥ ॥अथपंचगव्यं॥ गोमूत्रंगोमयंक्षीरंदधिसर्प्पिःकुशोदकं॥ पंचगव्यमितिप्रोक्तं

महापातकनाशनं॥ दुग्धं कांचनवर्णायाः श्वेतायाश्चैव गोमयं। गोमूत्रं ताम्रवर्णाया नीलयाश्च भवेद्दधि। घृतं तु कृष्णवर्णाया सर्वं पंचामृतेपि वा॥ गवां वर्णास्तु दुर्लभाः संति देशे घृतत्र च। तत्र वर्णविभागेन पंचगव्यानि चाहरेत्। वर्णालाभेन दोषोस्ति मात्राहीनं तु वर्जयेत्। गोसकृत् द्विगुणं मूत्रं सर्पिर्दद्याच्चतुर्गुणं॥ क्षीरमष्टगुणं प्रोक्तं पंचगव्यं तथा दधि॥ ॥अथापरप्रकारः॥ पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते॥ घृतं च पलमात्रं स्यात् गोमयं तोलकद्वयं॥ दधि प्रसृतिमात्रं स्यात् पंचगव्यमिदं स्मृतं। अथवा पंचगव्यानां समानो भाग उच्यते॥ गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति दधि। तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं। क्षालयेत्पंचगव्योदैः सद्योजातेति मंत्रतः। चंदनागुरुगंधाद्यैर्वामदेवेन घर्षयेत्। धूपयेदथ घोरेण कृष्णागुरुसुगुग्गुलैः। तत्पुरुषाख्यमंत्रेण लेपयेच्चंदनादिभिः॥ ईशानः सर्वमिति च प्रत्येकं मंत्रयेच्छतं॥ तेनैव मंत्रयेन्मेरुमघोरेणाथ मंत्रयेत्। अन्योन्यसमरूपाणि नाभिस्थूलकृशानि च। कीटादिभिरदुष्टानि निर्जीर्णानि नवानि वै॥ गव्यैस्तु पंचभिस्तानि प्रक्षाल्य च पृथक् पृथक्। अश्वत्थपत्रनवकं पद्माकारेण कल्पयेत्। सूत्रं मतीश्चगंधाभिः क्षालितं तत्र निःक्षिपेत्। तारं ताम्रं मातृकां च सूत्रे रौप्यमणिं तथा। विन्यस्य पूजयेद्रुद्रैर्जुहुयाच्चैव शक्तितः॥ देवदेव महादेव सृष्टिस्थितिलयेश्वर॥ रुद्राक्षैर्जपमाला तु कथं कुर्यान्महेश्वर॥ संस्कारं च कथं नाथ कर्तव्यं कीदृशं फलं। शृणु षण्मुख वक्ष्यामि रुद्राक्षैः क्रियते यथा। जपमालाविधानेन येन सा जपसिद्धिदा॥ ॥एकवक्त्रैर्द्विवक्त्रैश्च चतुर्वक्त्रैश्च

पंचभिः॥ षड्भिर्वाथ कर्त्तव्या मिथोभिस्तांस्तु वर्त्तयेत्॥ मुखे मुखं तु कर्त्तव्यं मुखं मूले तु वर्जयेत्॥ मुखं मुखेन संयोज्य पृष्ठं पृष्ठेन योजयेत्॥ रुद्राक्षस्योत्तमं प्रोक्तं मुखं उच्चं तु निम्नकं॥ धात्रीफलोपमं श्रेष्ठं मध्यो बदरसंनिभं॥ अधमश्चणकाभः स्यात्ततो हीना विपत्तिकृत्॥ प्रायं स्थूलं ततस्तस्मात्सूत्रं तन्सूनतरं मतः॥ एको मेरुस्तत्र देयः सर्वेभ्यः स्थूलसंभवः॥ अस्योर्ध्ववक्त्रं जानीयात्तं मेरोस्तेनैव लंघयेत्॥ विन्यसेत्क्रमनस्तस्मात्सर्प्याकारावसायतः॥ ब्रह्मग्रंथियुतं कुर्यात्प्रतिबीजं यथाविधि॥ ॥ त्रिरावृत्याथ मध्येन चार्द्धवृत्यानुदेशतः॥ ग्रंथिः प्रदक्षिणावर्त्तो ब्रह्मग्रंथिरितीरिता॥ ॥ गोपुच्छसदृशी कार्या एकाग्रा वा समेरुका॥ अथवा ग्रंथिरहिता दृढरज्जुसमन्विता॥ ॥ अथ मालाग्रथने मंत्रविवेकमाह॥ येन मंत्रेण ये माला कृता तेन जपेत्तया॥ अन्यमंत्रजपाच्छापो देवतायाः प्रजायते॥ रुद्राक्षस्फाटिकादीन्वै समानीय प्रयत्नतः॥ ध्रुवेन ग्रथनं कार्यं प्रत्येकं मणिकाक्रमात्॥ सर्वमंत्रमयी माला सर्वसिद्धिकरी परा॥ तन्मंत्रदेवतारूपं ध्यात्वा तु मालिकांतरं॥ सर्वे मंत्राः प्रजप्तव्याः सर्वकार्यार्थसिद्धये॥ ॥ अथवा मातृकाभिस्तु ग्रथनं कारयेत्प्रिये॥ पंचाशन्मणिभिर्माला अकारो मेरुसंज्ञिकः॥ अनुलोमविलोमेन माला शतमयी भवेत्॥ अष्टवर्गैः क्षकान्त्यथ माला त्वष्टोत्तरं शतं॥ मातृकामालया जापः सर्वमंत्रेषु शस्यते॥ सर्वसिद्धिमयी माला उक्ता सिद्धिकरी परा॥ तत्तन्मंत्रमयी देवीः तत्र ध्यात्वानु यक्षरेण॥ जपं कुर्यात्प्रयत्नेन नास्त्र कार्या विचारणा॥ सर्वसिद्धिप्रदा माला सर्वकार्यकरी परा॥ ॥ शक्तिमंत्रेण सं

ग्रंथ्य शिवमंत्रैं जपेच्छिवे॥ शिवमंत्रेण संग्रंथ्य शक्तिमंत्रं जपेच्छिवे॥ शिवशक्त्योरभेदेन मालाकार्यं करोपरा॥ येनैव ग्रथ्यते देवि तमेव प्रजपेन्मनुं॥ इत्याद्युक्तं त्वया पूर्वं किं त्वया विस्मृतं प्रभो॥ इदानीमन्यथा प्रोक्तं संशयोस्ति मम प्रभो॥ मातृकातारभिन्नानि शिवशक्तिविहीनके॥ मालिकायामिदं प्रोक्तं अन्यमालाविधौ मतं॥ अन्यप्रकारग्रथने येनैव ग्रथनं चरेत्॥ तमेव प्रजपेन्मंत्रं नान्यमंत्रं जपेच्छिवे॥ मातृकादावपि शिवे मालां तन्मंत्ररूपिणीं॥ ध्यात्वा बीजं प्रविन्यस्य नान्यथा सिद्धिरीधकृत्॥ द्वित्रिमासोत्तरं देवि जीर्णसूत्रस्य मालिका॥ यस्थापयेन्महेशानि तस्य नाशो भविष्यति॥ त्रुटितां चेत्स्वयं माला प्रायश्चित्तं समाचरेत्॥ गजांतक सहस्रं तु जप समाचरेत्॥ पुनः संग्रथनं कृत्वा प्राणस्थापनपूर्वकं॥ तदा मालासिदा स्यान्नान्यथा शांकरं वचः॥ ॥अथान्यमालासंस्कारः॥ वस्त्रोश्वत्थस्य पत्रकैर्नव पद्माकारेण नवभिः स्थापितैस्तत्र विन्यसेत्॥ मणिसूत्रं च गंधोदैः क्षालयित्वाथ मंत्रयेत्॥ ॐ ह्रौं पूर्वमातृकार्णैः क्रमादेकैकशो मणिं॥ सूत्रं च तत्र विन्यस्य पूजयित्वा जुहेत्ततः॥ तिलाज्यैः केवलाज्यैर्वा सद्योजातादिभिः क्रमात्॥ पंचमंत्रैः शतं वाष्टावष्टाविंशतिमेव वा॥ होमाभावे जपः प्रोक्तः प्रीतये मालिकान्ततः॥ आवाहनादिमुद्राणामष्टकं दर्शयेत्ततः सद्योजातादिभिर्मंत्रैः पूर्ववत्क्षालनादिकं॥

॥अथ स्त्रीशूद्रार्थे मालासंस्कारः॥ शूद्रार्थं स्त्रियामर्थे मालासंस्कार उच्यते॥ गणेशसूर्यविष्णीशदुर्गाः संपूज्य भक्तितः॥ मालायामथनां मालां हसौः बीजेनाभिमंत्रितां॥ अष्टोत्तरशतं पंचगव्यैः

तिस्थापयेच्च हौं । चतुर्थेनु समुद्धृत्य क्षालयेदष्टमंत्रतः ।। उक्तेष्वक्षेषु क्रमेत्रैर्ग्रथितां साधकोत्तमः ।। मालां विधाय वै पात्रे क्ष
पिद्गंधादिचर्चितां ।। भूतशुद्ध्यादिकां पूजां समाप्य तत्र पूजयेत् । गणेशसूर्यविष्ण्वीशदुर्गां चावाह्य पूजयेत् । पंचगव्येन
तां सिक्त्वा हौं मंत्रेणाव मंत्रयेत् । तस्मादुत्तोल्य तां मालां स्वर्णपात्रे निधाय च । पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् । ततो
धूपांतरैः कृत्वा पंचामृतविधिं बुधः । क्रमान्नैव संस्थाप्य स्नापयेच्छीतलोदकैः ।। ततश्चंदनसौगंधिकस्तूरीकुंकुमादिभिः
तामालिप्य जयो हंसो मंत्रमष्टोत्तरं शतं । तस्यां नवग्रहान् पंक्तिदिक्पालांश्च प्रपूजयेत् । ततः संपूज्य च गुरुं स्वं गृह्णीयात्कालि
कांशुभां ।। अथ साधारणमालासंस्कारस्तु । हन्मंत्रेण ग्रंथयित्वा स्थंडिले ह्लि निधापयेत् । ततस्तूत्तोल्य तां मालां स्था
पयेद्धेमपात्रके । पंचामृतेन संस्नाप्य शीतलेन जलेन वा । चंदनेन सुगंधेन कस्तूरीकुंकुमादिभिः ।। अभिषेकं ततः कुर्यात्त
हस्तौ मंत्रेण साधकः ।। नवग्रहान्पूजयित्वा दिक्पालांश्चापि पूजयेत् ।। ।। तलेन यत्तदुक्तेन शक्तितो होमयेत्ततः । स्वर्णं तु द
क्षिणां दद्यात्गुरवे मणिसंख्यकान् ।। तन्मंत्रजापिनो विप्रान्भोजयेद्वाप्यवैदिकान् ।। अभावे स्वर्णपात्रस्य ग्राह्यमश्वत्थपत्रकं
मालासंस्कार इत्युक्तो जपः स्यात्सिद्धिदायकः ।। कौलिकादौ विशेषोऽयं गुरव्यामणितत्परां ।। ।। अथ रहस्यमालाग्रथेंमु
रुद्राद्यानमाह । कालरात्रौ महारात्रौ वीरमोहेति पार्वति ।। ग्रहणे संक्रमे वापि शनिभौमदिने तथा । रणे वीरं महावीरं तथापा

शृगालं प्रिये। भल्लवीरं वेष्ववीरमामे शववीरमे वचः॥ एतत्स्थाने नरो धीरः सर्वमंत्रपरायणः। दीपोत्सवचतुर्दश्यां फाल्गुनोत्सव
केपि वा। वीरवेषं समासाद्य मुक्तकेशो दिगंबरः॥ सिंदूरकृतेतित्लको रुद्राक्षं वित्तदायकः। सामग्रीं पूर्ववत्कृत्वा मुंडग्रह
णमाचरेत्। भल्लारोपितवीराग्रे तथा पाशृगालेपि वा। गत्वा पलेन देवेशि शिवापूजापुरःसरं। शिवासमभ्यर्च्य तेन ततो
वीरं प्रपूजयेत्। कृत्वा वैजात्याद्वीरं तं तेन खड्गपूजनं। खड्गं संपूज्य विधिवत्वाराही सहितां क्रमात्। स्वयं वा कर्त्तयेद्वीरेश
मांडबलिमर्पयेत्। यत्साधकैः कपालानि नीयंते परमेश्वरि। तस्या निष्ठं भवेद्देवि तच्छिद्रहरा भवेत्। तेनापि त्वकपालाः
निरक्षणीयानि पार्वति। अन्यथा साधकेंद्रस्य नाशो भवति पार्वति। एवं संग्रह्य मुंडं तु मुंडसाधनमाचरेत्॥ ॥ सद्यः कृ
तं त्रिरात्रस्थं सप्तरात्रस्थगं तथा॥ त्रिसप्तरात्रमध्यस्थं तत्र चादिक्रमाच्छृणु। उत्तमं मध्यमं चैव ह्यधमं त्वधमाधमं। सद्यः कृ
त्तं तु यन्मुंडमुत्तमं परिकीर्त्तितं। त्रिसप्तमध्यगं मुंडमध्यमं परिकीर्तितं। षड्रात्रोत्तरगं मुंडमध्यमं परिकीर्त्तितं। त्रिसप्तरात्रमध्य
सुकीर्त्तितं ह्यधमाधमं। कालिकापरितिष्ठं तु ह्यन्यथा परिकीर्त्तितं॥ त्रिरात्रमध्यगं मुंडं मालार्थे परिकीर्त्तितं॥ षड्रात्रोत्तरगं मुंडं सा
मान्यं तदुदीरितं। सद्यः कृत्तं तु यन्मुंडं मालायंत्रे प्रशस्यते। पात्रार्थे साधने स[illegible]लं ह्यभावात्सप्तरात्रजं। सद्यः कृत्तं तु यन्मुंडं साध
नार्थे प्रकीर्त्तितं॥ उत्तमं मुंडमादाय हस्तमात्रं खनेद्बुधः। तुलवृक्षस्य मूले तु श्मशाने वा चतुष्पथे। निर्जने शून्यगेहे वा तस्योः

परिजपं चरेत्। बलिं दत्वा प्रयत्नेन दिक्पालेभ्यो विशेषतः॥ दिग्बंधनं ततः कुर्यादीन्कृत्वा वै जपमाचरेत्। यावत्संख्यमतुं जप्त्वा त
द्दशांशेन होमयेत्। सिद्धमंत्रं गुरोराज्ञत्वा मालादीन्कारयेत्प्रिये॥ ॥अथ मालाधिकारिणमाह॥ पूर्वोर्ध्वाम्नायभूषाप्यस्तथा
चरणदीक्षितः॥ षडाम्नायक्रमाशक्तः श्रीमेधासंयुतस्तथा॥ महाचीनक्रमो[illegible] शाक्तो महानीलक्रमी च वा। ब्रह्माद्यक्रमी वापि
महाब्रह्मक्रमी च वा॥ ईदृक्विधः साधको हि मालाजपपरायणः॥ मालाधिकारिणः प्रोक्ताः क्रमेण परमेश्वरि॥ ॥अथ रहः
स्यमालानिर्माणप्रकारस्तु॥ शिल्पिनं पूजयेदादौ वस्त्रगंधानुलेपनैः॥ संतुष्टः कारयेन्मालां मंत्रपूतं पिबन्मधु॥ यथायोग्यं वेध
वतीमालां कुर्याद्विचक्षणः॥ पंचाशन्मणिभिः कार्याक्तमत्या भगे छिपत्॥ निशामेकं सगुद्धत्यकारणैः क्षालयेत्ततः॥ सुधी
र्देशं तन्मंत्रेणाभिषिंचेद्विजयारसैः॥ प्रक्षाल्य धूपयेत्पश्चात्स्रोतयोर्दिष्टसत्रकैः॥ कीकसादिकमालानां कौलिकानां च वामिनां
सिद्धेवसामिसंस्कारं सर्वतंत्रेषु गोपितं॥ अष्टम्यां वा चतुर्दश्यां नवम्यां भूमिनंदने॥ शाक्तीनामपि कर्तव्या भुक्त्वा रात्रौ शुभा मता
स्वयंभुवाक्ता यानाडी सा नाडी सर्वतोत्तमा॥ इयं तु सिद्धिदा माला विद्याक्रिमालिका मता॥ स्वयंभुकुसुमाक्तैश्च तूलकैर्वीरनायिका॥
कुमारीकर्तितं सूत्रं गणस्त्रीकर्त्तितेन च वा॥ ततो द्विजेंद्रपुरुषस्त्रीकर्तितं ग्रंथिवर्जितं। वेश्याहस्तभवं चापि मातंगीहस्तजं परं। रजस्व
लाहस्तभवं सूत्रं च कीर्त्तितं शुभं॥ अंडजं चैव गोलाकं [illegible] तथैव च। स्वयंभुकुसुमं यन्नवसूत्रं नत्नसूत्रं सर्वतोत्तमं। कृत्वा सूत्रं प्रय

न्मेनतेनैवग्रथनंचवा॥ सूत्रंस्वेष्टजपेनीलंकृत्स्नंमारणकर्मणि॥ मोहनेहरितंसूत्रंमेधसामंभिषनालमां॥ शांतौपीतोश्वेतोसितंद्वे
षेरक्तसुधाटनेभवेत्॥ वश्येपीतंकषायंतुविपक्षकरणेमतं॥ कालीतारातथाछिन्नास्वरूपाकालिकापरा॥ सर्वासिद्धिप्रदा
भूमिःसर्वदेवमयीपरा॥ येनैवग्रंथ्यतेदेवितत्सर्वंप्रजपेन्मनुं॥ ॥ अथमालाग्रथनाधिकारिणमाह॥ गुरुणास्वश्चैवदंतास्वे
ग्रथनेवाधिकारिणः॥ कथ्यंतेदेवदेवेशिसावधानमनाभव॥ मातापुत्रीतथाभार्यातथाष्टकन्यकाप्रिये॥ वधूंशज्ञातिजास्त्रीवा
स्वकुलाष्टकयाचवा॥ नाराकुलाकुलंवापिदशविधास्त्रियश्चया॥ पंचाशस्त्रीठज्ञावापिवेश्यासप्तकमेववा॥ ॥ मालायाग्रथने
देविशकुनाशकुनंशृणु॥ दधिमांसगुरापुष्पशंखवादित्रघोषणः॥ मृदंगकाहलोगीतंदुंदुभिर्वाद्यदर्शनं॥ गजाश्वरथवेश्यादिस्त्री
णांपूर्णघटस्यच॥ जपसिद्धेरलक्षणानिमालायांपरमेश्वरि॥ रोदनंवज्रानंकुंडंरण्डादर्शनमेवच॥ कलहेगुरुनिंदाचदेवतावीरनिंद
नं॥ सूत्रत्रुटिश्चापाप्तिमणिकास्फोटनंतथा॥ मालाग्रथनकालेतुसूत्रसंत्रोटनंतथा॥ एवमादीनिदेवेशिनसिद्धिलक्षणानिच॥ ॥
मालाग्रथनकालेतुसूत्रस्यत्रोटनंयदि॥ वैपरीत्यंशिवस्यापिभवत्येवनचान्यथा॥ मालाग्रथनकालेतुमणिस्खलितश्चेदुवितांतस्यशो
कोविनिर्दिष्टोनात्रकार्याविचारणा॥ त्रुटितामेरुमूलेतुस्त्रीनाशंतस्यचादिशेत्॥ ॥मालारात्रिविधिंवक्ष्येशृणुसावहिताभव॥
कुदिनेषुभक्ष्मक्षादिदिनेयुद्धदिनेशिवे॥ महामालीसमादायवीरपात्रंसमानयेत्॥ वीरयंत्रंसमासाद्यवीरमालांचशोधयेत्॥

देवीसावरणां पूजयन्सर्वसत्वं तं महेश्वरि। द्वाविंशत्पंचविंशत्तदीपां दत्वा बलिं चरेत्। एवं मालांभ्भों कृत्वा मलसंस्कारमाचरेत्। शुभे मुहू
र्तेसंलग्ने मालां वा पंचगव्यके। निमज्य पंचगव्यं च गोमूत्रं गोमयं पुनः। दधिसर्पिः क्रमेणैव पंचगव्यं प्रकीर्तितं। तदुत्तार्य पुनर्जले
संक्षाल्य संविदासवैः। मूलमंत्रेण संस्थाप्य तज्जलेऽस्थापयेद्दिनं। तृतीये दिवसे देवि यक्षकर्दमके यजेत्। सर्वगंधैरष्टगंधै रशि
माग्यष्टकैर्यजेत्। अष्टनीरांश्च ताराया नारस्योरोचनीमतौ। चतुर्थदिवसे देवि प्राणान्स्थाप्य यजेत्क्रमात्। रहस्यमालामंत्र
स्यास्य ऋषिः परमेश्वरः। श्रीमहातारिणीदेवी उष्णिग्छंदः प्रकीर्तितं। स्त्रीं बीजं ह्रीं तथा शक्तिः हूं मंत्रकीलकं स्मृतं। महामालादंतमा
लासाधने विनियोजनं। विशन्न्यानुषडंगानि ध्यानं मंत्रवदाचरेत्। ध्यात्वा संकल्पयत्नेन मंत्रेणानेन पार्वति। प्रणवं च तथा लज्जा श्री
लज्जाकामकूर्चकैः। फट्स्वाहेति च मंत्रेण चमकेमालिनी क्षिपेत्। तत्रावाहनमंत्राये कालिंकालसारदां। सायुधां परिवारांश्च पूज
येत्परमेश्वरि। मूलमावृत्य नार्तियं संस्मरन्धेनुमुद्रया। अमृतीकृत्य कवचेनावगुंठ्य महेश्वरि। महामुद्रया समाच्छाद्य देवीरूपी
विभावयेत्। ध्यायेत्तत्र क्षिपेद्विंदुं तत्र मंत्रान्शृणु प्रिये। प्रणवं कूर्चयुग्मं च स्वाहां प्रणवकूर्चकौ। वह्निजाया च ताराद्यं वह्निजायावि
पं तथा। तारं च वह्निजायां च तारलज्जासकूर्चकैः। वह्निजायान्ततस्तारे लज्जा फट् वह्निजायया। द्वितृंशल्लिकाव्यस्तसमस्तमंत्रमालया
शतधानेन मंत्रेण विंदुप्रक्षेपमाचरेत्। कस्तूरिकाकेसरं च चंदनागुरुधूपकैः। धूपमालां समुत्तार्य विधया चाभिमंत्रयेत्। प्रणवं च

कौं५

तथामायाश्रीमहावज्रिणीत्विवं॥ ततोमहाघोररूपेकर्कशेतिपदंवदेत्॥ महास्थिमंडलेप्रोच्चपुष्पितेतिपदंतथा॥ सर्वसिद्धिप्रय
छेतिप्रणवंहूंचवीजकं॥ मायावीजंवह्निजायामहाकपालिनीतिवः॥ ततोमहाघोररूपेस्वाहाप्रणवमायया॥ मायाकूर्चंत्रिस्वाहांता
विद्योज्ञात्वाभिमंत्रणे॥ उर्वीक्षतैःसमभ्यर्च्यकामेलोद्दीपनंचरेत्॥ उपचारैःसमभ्यर्च्यमातृकामूलमंत्रतः॥ उद्दीपनंततःकृत्वाहंका
रेनतुवेष्टयेत्॥ वलिंदद्याद्दनेनैवतारेमायांद्वयंवदेत्॥ वासुदेवविंदुयुतंकूर्चंनवदितंवदेत्॥ कूर्चतारेफट्स्वाहूंचप्रणवद्वयमुद्धरेत्॥
कूर्चवीजंवह्निजायाप्रणवेकूर्चवीजकैः॥ महायोगिनिशब्दांतेततस्त्रिभुवनतारिणी॥ महाशंखास्थिमालाचमध्येनीचासकुर्वति॥ कु
रुशद्वंसर्वसिद्धिंदेहिपुरूचक्षुतपदं॥ मांसोपहारंगृह्णेतिपुरूकण्ठ्ह्लायपदद्वयं॥ कुल्लुकाफट्ततःस्वाहामंत्रेणानेनपार्वति॥ यथोचित
तेनस्वेच्छावलिंदत्वाविधानतः॥ पंचरक्षैःपंचदिनंमालांस्थापयेच्चवैचमे॥ मालातत्रविधिंकुर्यात्तेनसिद्धतिमालिका॥ त्रिमृतेस्थाप
येन्मालांरहस्यमालिकाविधिः॥ ॥ दंतमालाविधौदेविविविधेयंशृणुचापरं॥ प्रणावेहूंभगवतिमानरंजिनिचोद्धरेत्॥ विष्टेविष्टेवने
त्रेवहरविष्टेपदंवदेत्॥ मालाविघ्नेतथामालाधारिणिहरलुंपदं॥ हसद्वंसमहाशंखास्थिधारिणीतिपदंवदेत्॥ कर्कशास्थिमहामाला-
वासिनीतिपदंवदेत्॥ छिन्नेतारेकालिकेचतदंतेजपमालिके॥ कुल्लुकाफट्महादंतमालामध्येपदंवदेत्॥ निवासकुरुयुग्मंचराजेंद्र
मालिकान्ततः॥ वासिनीत्रितयंप्रोच्चक्रींद्वयंह्रूंद्वयंतथा॥ मायाद्वयंचफट्स्वाहामालामंत्रेणहन्मनुः॥ वलिदानमनुंवक्ष्येशृणुसावहिता

मवं। घ्राणाक्षकर्णपदं मंडलेत्यंविके पदं॥ मालिनि कौलिनि पदं गौरांगधारिणि वोच्चरेत्॥ गिरिजे मायावतिपदं क्रियावतिपदं ततः॥ गा
यत्रीच गानप्रिये स्वाप्रियशांकरि च॥ कालिकापालिके क्रूरमुण्डधारिणि वोच्चरेत्॥ असितांधारिणीति तदंते ज्ञानवेदसे॥ श्रीकालि
कालिच पदं सज्जनिरुद्राणि च तथा॥ इमं बलिं गृह्णयुग्मं मालासिद्धिं च वोच्चरेत्॥ देहि दापय युग्मं च क्लीं षट्कमन्त्रया युतं॥ बलिं दद्या
दनेनैव तदंते जाग्रतीकृतिः॥ कपालकज्जलं चोरपादकज्जलयुग्मकं॥ विम्बमोहननामानं कज्जलं विद्धि पार्वति॥ तत्पादभस्म देवेशि फ
ल्गुनोत्सवजं परं॥ जगन्मूलीति नामानं विख्यातं शत्रुनिग्रहे॥ अनेन मनुना गृह्णऽड्रां त्रिधूलिनामिकां॥ शत्रुमूर्ध्नि तथा देहे गेहे सज्जोग
नेजने ला। दापयेत्परमेशानि ऽड्रान्ति धूलि शरिता॥ ऽड्रान्मक्षूल्या देवेशि भ्रमाक्रांतं जगद्धयं॥ यथा गृहराज्युग्मं च तथा पर्द्ध द्वयं भवेत्॥ नक्ष
त्रराशिवारादि शुद्धभुद्धिं न्वारयेत्॥ कामबीजं तथा बीजं श्रीं श्रीं फट् त्र्यं वदेत्॥ सिद्धे जगद्धूलिसिद्धिं देहि स्वाहा मनुर्मतः॥ मंत्रेणानेन
संगृह्यऽड्रान्ति धूलि मुत्तमां॥ मालासिद्ध्या सर्वसिद्धि र्भवत्येव नसंशयः॥ ॥सद्यजातकुसुमं देवि कुंडगोलोद्भवं तथा॥ अनंगगंधं देवे
शि चतुर्थी परिकीर्तिता॥ एवं संपाद्य देवेशि जाग्रतीकरणं चरेत्॥ सिंदूरतिलकं भाले वदने संविदासवो॥ वीरासनी वीरवेशी धूपदीपप्रमोदि
तः॥ संविदाधरसे मालां क्षिप्त्वा दग्धं ततो ददेत्॥ ततो रक्ते क्षिपेन्मालां धूपेनैव प्रधूपयेत्॥ ततो बलिं प्रदद्याद्धि मालासंसिद्धये शिवे शिवे॥
शान्तिं कुमारीमालां च संपूज्य सिद्धिभाक् कलौ॥ बलिदानविधौ देवि बलिं कृत्वा विधानतः॥ अजागलस्य रक्तेन तर्पयेन्नत्र मालिकां॥ रक्तधारा

भिमंत्राभिर्योनिरक्तैरपिप्रियेत् तर्प्पणात्सिद्धिदा माला जाग्रद्रूपा फलप्रदा॥ पूर्वक्रमेणादेवेशि आवेशोत्क्रमेणवा। तत्र देवी देहरूप
मालिका वरदा कलौ॥ एवं कृत्वा परां मालां साधकः सिद्धिमाप्नुयात्॥ स्वयं न कर्त्तयेद्ग्रंथिं जपमालां न गुंफयेत्॥ ॥ अथ विशेषस्तु। च
क्रपूजां ततः कृत्वा साष्टोत्तरसहस्रकं। ऋनेन्त्रयफलाप्त्यां च मूलमंत्रेण साधकः॥ ततो वलिं यथान्याये महिषादेः प्रदापयेत्॥
शक्तीश्च साधकांश्चापि भोजयेन्मणिसंख्यकान्॥ एवं संसाधितां मालां पशवे न प्रदापयेत्॥ ॥ इति श्रीतंत्रचिंतामणौ मालाभेदादि
प्रतिष्ठांतनिर्णयनाम त्रिंशत्तमः प्रकाशः॥ ॥ अथ पुरश्चरणमंत्राणां प्राणभूतत्वाउपदेशादनंतरं यद्यपि तन्निरूपणीयं तथापि प्रयुक्त
तया नित्यार्चनादेर्निरूपणादनंतद्विधानं निगद्यते॥ ॥ ईश्वर उवाच॥ दीक्षां प्राप्य पुरश्चर्यामकृत्वा म्रियते यदि। पच्यते रौरवे घोरे यावच्चंद्रा
र्कमेदिनी। पुरश्चरणकं देवि त्रयोदशप्रकारकं॥ आत्मवित्तानुसारेण कृत्वाश्रद्धासमन्वितः॥ गुरुं संतोष्य यत्नेन प्रयोगं कारयेद्बुधः॥ पुरश्च
रणकं कृत्वाष्टोत्तरशतं दिने। अंतरं च प्रयोगानां कथयते स दुरात्मवान्॥ भक्ष्यंति तस्य मांसानि द्राक्षीप्रमुखा गणाः॥ डाकिन्याद्या महाक्रोधा
नर्जयंति मुहुर्मुहुः॥ मृते नरके पच्यंति कुंभीपाके निदारुणे॥ प्रयोगेषु च कार्येषु दीक्षास्तु च विधानतः॥ पुरश्चरणकं देवि अंतरं नैव का
रयेत्॥ दीक्षापुरश्चरणकं प्रयोगस्त्रिविधो मतः॥ यथोक्तं क्रियमाणस्य मंत्रसिद्धिर्न संशयः॥ ॥ श्रीपार्वत्युवाच॥ पुरश्चरणमंत्रस्य
स्वरूपं च विधिं तथा। वैदिकाद्याः सर्वमंत्रा न सिद्ध्यंति च यं विना॥ ॥ ईश्वर उवाच॥ धर्मार्थकाममोक्षाणां साधको मंत्र उच्यते। तत्तसि

स्वयेपुरोयद्वत्वर्यनेतत्तुकीर्त्तितं ॥ पुरश्चरणकंमास्यंवेदादौमावरांतके ॥ मंत्रयंत्रेतथावश्यंतस्यकाशान्तुवृम्पहं ॥ जपोहोमस्तर्प्पणं
चमार्ज्जनंविप्रभोजनं ॥ पंचांगकर्मरूपंनदाङ्गःकेवनततत्रतु ॥ चतुरंगास्तथात्र्यंगाद्व्यंगाएकांगिनोपिच ॥ मंत्रास्तिष्ठंतिदेवेषुतथातं
त्रेपिशावरेकेचित्सउंगास्त्रास्तुसदंगानोऽजपादिति ॥ अघमर्षणास्तर्प्याघंजलपानप्रणामकैः ॥ देवार्च्चयापंचसिंचनैरेवंस्युर्द्वशांगिका
तृतीयांगंतथाचोभीक्रमतःचक्रपूजनात् ॥ ध्वजलिंगसमायोगजपाद्यवलिदानतः ॥ महावलिप्रदानाद्यभवंत्येकादशांगतः ॥ षोडशांगाः
कौलिकानांवामकानांद्विकेरितं ॥ अमर्षणशिखेवातोष्टादशांगाः त्वघोरिणां ॥ सर्वपापक्षयंकुर्यादथवासिद्धिवंधकृत् ॥ यावत्पापंतस्यनाशंकृत्वा
कुर्यात्पुरस्कृतिं ॥ यथाप्रोक्तेनमार्गेणतस्यसिद्धिरदूरतः ॥ सर्वपापक्षयस्तत्रभवेद्वैदिकवर्त्मना ॥ / ॥ असिद्धगुणादन्तोमंत्रस्याद्रुक्विघ्न
तत्रादौशोधयेद्विघ्नराजमंत्रंततःपुनः ॥ निःपापस्यपुरश्चर्यावलात्सिध्येन्मनूत्तमः ॥ तत्राम्नायविभेदेनसर्वतंत्रेषुगोपितं ॥ यत्साधनेविना
सर्वमंत्राधिपेस्तुविघ्नताः ॥ तस्मादादौमहेशानप्रसाधप्रनराचरेत् ॥ देवतासाधनंतत्तुनिर्विघ्नेनप्रजायते ॥ निजालस्यंक्षुधाक्रोधो
लोभोमोहोमनोभवः ॥ गणनाथानर्चकानामेतेविघ्नकराःस्मृताः ॥ विधानपूर्वकंतस्माद्विघ्नराजंसमर्च्चयेत् ॥ एकवीरात्मकंवक्ष्ये
विघ्नमंत्रेषुसिद्धिदं ॥ तत्रादौवैदिकानांचगकारःकेवलोमतः ॥ दक्षिणांकेवलंविंदुयुक्तोद्विविंदुःपूर्वमार्गिणां ॥ एतत्तद्वयंपुनःपश्चा
दूर्ध्वाम्नायेतुगोमिति ॥ गोकुन्तेरगोमितिचपातालाम्नायमीरितं ॥ गणपेस्यमुनिःछंदोनिचृद्विघ्नोस्यदेवता ॥ गणंजयायस्वाहाहृन्मंत्रक

मिकदंष्ट्राय हुं फट् ॥ अचलकर्णिने नमः शिखा प्रोक्ताश्चैव तु ॥ गजवक्त्राय नमस्त्वथ चास्त्रमुदीर्यते ॥ महोदराय वर्म्माय हुं फडन्त
श्च वेदिकैः ॥ षड्दीर्घयुक्तवीजेन तत्तांश्चिकान्यासमारंचरेत् ॥ रक्ताम्बरं रक्तवर्णं रक्तगंधानुलेपनं ॥ रक्तपुष्पैः पूज्यमानं तुंडिलं चंद्रमौलि
नं ॥ त्रिनेत्रं वामनं विभ्रत्वीजपूरं च शुंडया ॥ वामदक्षोर्द्ध्वयोः पाशांकुशौ दंत्रवरस्त्वधः ॥ पद्मासने सर्वभूषं ध्यायेद्विघ्नविनायकं
श्रीपर्णादिकृतेपीठे रचयेत्कुंकुमादिना ॥ चतुर्द्वारयुतं कुर्य्याद्यंत्रं रत्नत्रयं शुभम् ॥ तन्मध्ये षट्दलं कार्य्यं पूजापीठं गणेशितुः
तत्र पूर्वोक्तविधिना मंडूकादीन्प्रपूजयेत् ॥ पृथिव्यंतं समुद्रेत्र विन्यसेद्रसात्मकः ॥ रत्नद्वीपादिपर्यन्तं यावन्तः षट्दलाम्बुजे ॥
अभ्यर्च्चयेत्कर्णिकायां देवं पत्रेषु चक्रमात् ॥ तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी ॥ उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी
अग्रान्मध्यांतमेतास्तु शक्तिवर्णाः पीठमंत्रकः ॥ गं सर्वशक्तिकमलासनाय नमः स्वयं ॥ पूर्वादिषु चतुर्दिक्षु यजेत्पीतं गणाधिपं ॥ ग
णेशानं गौरवर्णं रक्तं च गणनायकं ॥ गणक्रीडं नीलवर्णं केशरेषु ततो यजेत् ॥ अग्नीशासुरवायव्यमध्येष्वानार्दिक्षु च ॥ मंत्रस्या
स्य षडंगानि ध्यात्वा यथांगदेवताः ॥ एकदंतैकदंष्ट्रौ च महोदरगजाननौ ॥ लंबोदराख्यविकटौ विघ्नराट्धूम्रवर्णकौ ॥ पूर्वादिषु
दलेष्वर्च्या ब्राह्म्याद्यास्तद्दलाग्रतः ॥ ध्यानं तासां प्रवक्ष्यामि प्रोक्तः सव्यक्रमेण तु ॥ ब्राह्मी स्वर्णसमा ध्येया मृगचर्मविभूषिता ॥ अक्षमा
लाभयवरकनकान्दधती करैः ॥ त्रिशिखं परशुं हस्ते डमरुं च कपालकं ॥ बिभ्राणां चंडगौरांगीं माहेशीं भावयेच्छुभां ॥ गुणां खट्वांगकं

तंत्रचिं
२८४

कंररातुमंकुशंदधती करे॥ ऐंद्रगोपारुणां ध्यायेत्कौमारीं करुणालया॥ असि शंख पात्राणि घंटा चक्र करपंकजैः॥ विभ्राणी वैष्ण
वीं ध्यायेत्नीलमेघघनप्रभां॥ तोमरांकुशविभ्रेकविधुपुक्रकरांबुजा॥ ऐंद्रीं भावयेन्नंत्रीनीलवर्णां ऊर्ध्वपर्णां॥ हलेचमु
शलं देभिर्दधानां खैड्रुखेटकौ॥ वाराहीं भावयेच्छक्तिमंजनाचलसन्निभां॥ धारयंती भूलखक्षौ कपालं न्नशिरः करैः॥ चामुंडा
शोणावर्णां च मुंडमालाधृतां स्मरेत्॥ स्वर्णाभामक्षमालां च बीजपूरकपालके॥ पद्मं च दधती हस्ते महालक्ष्मीं स्मरेत्सुधीः
चतुरस्रत्रयांतस्थवीथीं देवसमर्चयेत्॥ दिक्पालाश्च तदस्त्राणि पूजाविधिरहस्यतु॥ एवं यः पूजयेद्देवं गणेशं विघ्ननाशनं॥
असिद्धादपि संप्राप्तो मंत्रोसौ सिद्धिदो भवेत्॥ लक्षमेकं मनुं जप्त्वा जुहुयात्तद्दशांशतः॥ ॥ अथपदशमहाविद्यायाः षडाम्ना
यनिर्णयमाह॥ भुवनेशी महालक्ष्मी पूर्वाम्नायप्रकीर्तिता॥ त्रिपुराधिकलावाला त्रिशालाक्ष्यन्नपूर्णिका॥ दक्षवक्रेणदेवे
शिमायाद्यापिप्रजायते॥ बगला चैव मातंगी सिद्धिलक्ष्मी अरुंधती॥ आम्नायाः पश्चिमाख्या तु तत्र केन प्रजप्यते॥ तारा छिन्ना पिशा
ची च धूम्रा चोत्तरगोचराः॥ कालिका भेदसहिताऽर्ध्वाम्नायप्रगोचराः॥ उपविद्याश्च पाताले विद्याम्नायः प्रकीर्त्तितः॥ अथ यमाम्ना
यसंदोहो रहस्यातिरहस्यकः॥ केकलं कालिकायां च षडाम्नायो महेश्वरि॥ आदौ पुरश्क्रियां कुर्यात्तन्नियमेन यथाविधिः॥ ॥गुरुः॥
ततः सिद्धमनुर्मंत्री प्रयोगार्हो न चान्यथा जपहोमं तर्प्पणं च सेकोब्राह्मणभोजनं॥ पंचांगोपासनं लोके पुरश्चरणमिष्यते॥ कल्मोक्त ॥२८४॥

वसर्वेषां दिवाविधिरिहोच्यते ॥ भूशायी च तथा प्रोक्तं रात्राविष्टं महाफलं ॥ ॥ अथ तारायाः ॥ नक्तभोजी हविष्याशी जपेल्लक्ष
चतुष्टयं ॥ रहस्यमालामालां मादाय जपेद्वा लक्षमेव च ॥ लक्षमात्रं जपेन्मंत्रं दशांशमसितोत्पलैः ॥ आज्यांतैर्जुहुयान्मंत्री तद्दशां
शेन तर्प्पयेत् ॥ कालागुरुद्रवोपेतैर्विमलैर्गंधवारिभिः ॥ तर्प्पयेच्च परां देवीं तत्प्रकारमिहोच्यते ॥ जले चावाह्य विधिवत्पाद्याद्यैः सूप
चारकैः ॥ सन्तर्प्य विधिवद्देवीं परिवारान्सकृत्सकृत् ॥ देवी ध्यात्वमात्मानं संपूज्य साधकोत्तमः ॥ तारणीं चिंतयामीति जलं मू
र्ध्नि विनिक्षिपेत् ॥ कुंभात्पसुडया देवि नमोनेनाभिषेचनं ॥ ॥ अथ निशाक्रममाह ॥ रतं कुर्वन्दलं लक्षमेनकं दधिमत्स्यापि मधुमांसं
च तांबूलं जपेल्लक्षचतुष्टयं ॥ दशांशं जुहुयाद्रक्तपद्मैः क्षीराज्यलोलितैः ॥ शवमुंडं पूरयित्वा जप्यानेजपं चरेत् ॥ नारीपश्यन्नमस्कृत्य गच्छतः
महानिशि बलिं हरेत् ॥ न कार्यः सुध्रुवां द्वेषो यत्नेनतः परिपूजयेत् ॥ जपेन कालनियमो न स्थितो सर्वदा जपेत् ॥ ॥ अथ छिन्नायाः ॥ आ
दौ पूजा प्रकर्तव्या जपेल्लक्षचतुष्टयं ॥ पलाशे बिल्वजैर्वापि जुहुयात्कुसुमैः फलैः ॥ तर्प्पणांयं ततः कुर्याद्देवं सिद्धो भवेन्मनुं ॥ ॥ अथ षो
डशीविद्यायाः ॥ तत्रस्थित्वा जपेल्लक्षं साक्षाद्देवीस्वरूपकः ॥ किंशुकैर्हवनं कुर्याद्दशांशेन महेश्वरि ॥ कुसुंभकुसुमैर्वापि मधुरत्रयमिस्र
तैः ॥ ॥ अथ त्रिपुरभैरव्याः ॥ दीक्षां प्राप्य जपेन्मंत्रं तत्त्वलक्षं जितेंद्रियः ॥ पुष्पैर्भानुसहस्राणि जुहुयात्तद्बलवृक्षजैः ॥ त्रिमध्वक्तैः प्र
सूनैर्वा करवीरैः समुद्भवैः ॥ ॥ अथ महालक्ष्म्याः ॥ जपेद्भास्करलक्षं च नियताशी जितेंद्रियः ॥ तद्दशांशं प्रजुहुयात् घृतेस्विस्वाडुसं

जपसंख्यायादशांशेहवनंस्मृतं हवनस्यदशांशेनतर्पणांपरिकीर्तितं तर्पणास्यदशांसेनअभिषेकः प्रकीर्तितः। अभिषेक
दशांशेनविप्राणांभोजनंस्मृतं कल्यौकैकयुतेसंख्याचैतायांद्विगुणाभवेत्। द्वापरेत्रिगुणाप्रोक्ताकलौसंख्याचतुर्गुणा॥ ॥
कालीतारामहाविद्याषोडशीभुवनेश्वरी॥ भैरवीछिन्नमस्ताचविद्याधूमावतीतथा। वगलासिद्धिविद्याचमातंगीकमलांविके। ए
तादशमहाविद्यासिद्धिविद्याप्रकीर्तिता। सिद्धिविद्यामहाविद्यायुगसेवापरिश्रमः। नास्तिकिंविश्वमहेशानिदुःखसाध्यंकदाचन।
भावनारहितानांचमूढाणांमूढचेतसां। चतुर्गुणोजपःप्रोक्तःसिद्ध्येनान्यथाभवेत्॥ अथासितायाःपुरश्चरणमाह। दिवा
नक्तंशुचिर्भूत्वाहविष्याशीजपेद्बुधः ततस्तस्यदशांशेनहोमयेद्धविषाप्रिये। तर्पयेत्तीर्थतोयेनपयसासर्पिषापिवा। मधुनावासि
तामिश्रतोयेनपरमेश्वरी॥ देवीनाभिषिंचेत्तोयैस्तर्पणास्यदशांशतः। तद्दशांशेनविप्रांश्चभोजयेत्भक्तितःप्रिये। कालीमंत्रवि
दोविप्रान्दक्षिणांगुरवेददौ। पाशवंकथितंकल्पंशृणुचैवंततःप्रिये। रात्रौमांसासवैर्देवींपूजयित्वाविधानतः। ततोनग्नास्त्रि
यंनग्नोरमन्लेरयुतोपिवा। जपेल्लक्षंततोदेविहोमयेत्ज्वलितेनले। योनिकुंडेस्थितेसर्पिमांसमद्ययुतेतथा। दशांशत
र्पयन्मद्यैःमांसमिश्रैःसुसाधकः। तर्पणस्यदशांशेनअभिषिंच्यजगन्मयं। दशांशभोजयेत्साधुसाधकंकालिकाप्रियं। मद्यंमांसं
चमत्स्यंचतर्पणांचप्रदापयेत्। ततस्तुतोषयेद्गुरुंस्वर्णादिभिःप्रिये। एतत्कल्पद्वयोदेहिमंत्रःसिद्ध्यतिवैध्रुवम्। द्विजातीनां

काविस्तु सिद्धिदा ॥ केदारं त्र्यंबकः काशी कात्यवंत्यो घनानि ॥ गंगातीरं वैद्यनाथं रामेशः शिवसिद्धिकृत ॥ ज्वालामुखी प्रयागं च कामि
नीमालिकापदे ॥ सरस्वत्यास्तथा तीरं शक्तिमंत्रस्य रोधकृत ॥ तीरं च कमलेश्वर्या मेखलायक्षपर्वतः ॥ अंगवंगकलिंगाश्च क्षुद्रदे
वसिद्धिदाः ॥ कामरूपं च नेपालं हिंगुलाविंध्यवासिनी ॥ जालंधरं पूर्णगिरी वामनमार्गेण सिद्धिदा ॥ तरं पद्माकरालावकदली
घर्कवाटिका ॥ पिडुमाकुलितो ग्रामो गरो शस्यातिवल्लभः ॥ ॥ पद्माकरतरारण्य करवीरार्कवाटिका ॥ गोक्षमहर्वाक्षेत्राणि :
शिलाभानुमतः प्रियाः ॥ तुलस्यश्वत्थधात्रीषु शालग्रामादिसंनिधौ ॥ गोष्ठ आश्वियुग्रामे हेरंडैदिकांतिके ॥ ॥ पश्चिमा
भिमुखे लिंगे नंदीवर्जे शिवालये ॥ शिवातोयाचदस्याहात्संगमे विपिने हृदे ॥ कदलीधूतचंवेलीसेवंतीवर्वरीवने ॥ ग्रंथख्यातनदीत
टेशान्तेः प्रीतिश्च निर्जने ॥ पल्वलारामिवंकोलंशाकोटमधुकाकुले ॥ वाल्मीके धुस्तूरयां च मोदं ते क्षुद्रदेवताः ॥ पितृगेहे स्मशाने च
विपणे च चतुष्पथे ॥ शून्यालये शवाकीर्णे भवितुष्यंति यामकाः ॥ गृहे गोष्ठेत्योद्याने वने पर्वतमस्तके ॥ नद्यांतत्संगमे देवालये
स्याद्वैदिकोधिकः ॥ अथ गुह्यतमं वक्ष्ये रहस्यं पीठसंभवं ॥ यंज्ञात्वा साधकाः सर्वे सिद्धिं यांति न चान्यथा ॥ पीठानां चैव पंचाशतां चा
म्नायस्वदेवताः ॥ तत्र तिष्ठंति भो देवास्त्रयस्त्रिंशन्मितानि वा ॥ उपपीठानि ये प्रोक्ता षष्ठाम्नायास्तु देवता ॥ न तेषां स्थानमुद्दिष्टं तत्रार्थे
हृदयोर्ध्वतः ॥ नैगपातोयचजातस्तत्र तिष्ठंति वैदिकाः ॥ ॥ अथ दक्षिणामार्गं च वक्ष्ये मंत्रवामकः ॥ अकारः कामरूपाख्यमादिपी

पुनैः पंचैरमाद्रुमफलैः प्रत्येकमयुतं हुनेत् ॥ हुतीतेषु विभिस्तोयैस्तर्प्पयेदयुतद्वयं ॥ ॥ अथ मातंग्याः पुरश्चरणकालेतु षट्सहस्त्रं ज
पेन्मंत्रं ॥ तद्दशांशेन हुनेदाज्यैः शर्करामधुभिः सह ॥ वुलतरुभवैः काष्ठैः साधकः शक्तिभिः सह ॥ एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत्
अथ भुवनेश्वर्याः ॥ रविलक्षं जपेन्मंत्रं पायसैर्मधुराचिते ॥ दशांशं जुहुयान्मंत्री तद्दशांशं यथाक्रमं ॥ तर्प्पणं मार्ज्जनं कुर्यात्तथा ब्राह्मण
भोजनं ॥ ॥ अथ धूमावत्याः ॥ जपेल्लक्षचतुर्द्दशं शून्यागारे दिवानिशि ॥ उपवासपरश्चैव मेकाहास्सिद्धिमाप्नुयात् ॥ यद्वा श्मशाने विपि
ने जपेल्लक्षं तु वाग्यतः ॥ सोस्मीयश्चाज्ञावासं च नेन मंत्रः प्रसिद्ध्यति ॥ होमं चात्र घृतेनैव तर्प्पणादि तनश्चरेत् ॥ अथवा प्रजपेल्लक्षं श्मशाने वि
गतांबरः ॥ निशाभोजी दशांशेन तिलैर्हवनमाचरेत् ॥ ॥ अथ वगलामुख्याः ॥ पीतांवरधरो भूत्वा पूर्वाशाभिमुखस्थितः ॥ लक्षमेकं ज
पेन्मंत्रं हरिद्राग्रंथिमालया ॥ व्रह्मरतो नित्यं प्रयतो ध्यानतत्परः ॥ प्रियंगुपायसेनापि पीतपुष्पैश्च पूजयेत् ॥ ॥ अथ पुरश्चरणादौ का
लादिनिर्णयमाह ॥ चंद्रतारानुकूले च शुक्लपक्षे शुभे हनि ॥ आरभेत् मकरादौ तु सप्तविंशो जपेत्तच ॥ शुभे मुहूर्त्ते नक्षत्रे तिथौ स्नात्वा य
थाविधि ॥ प्रारभेत्पुरश्चर्यां दीक्षोक्तदिवसे शुभे ॥ प्रणम्यादौ गुरुं विप्रान् गणेशं परिपूज्य च ॥ जपस्थानानि वक्ष्यामि कृत्रिमाकृत्रिमाणि
च ॥ गुप्तानि सर्वतंत्रेषु देवतानां पृथक्पृथक् ॥ महागणपतिक्षेत्रं मायापुरं नर्मदातटं ॥ महाश्मशानमायापुरं मतोशमनुसिद्धिदं ॥ प्रभासं च कु
रुक्षेत्रं पुष्करं भृगुपर्वतं ॥ यमुनायास्तटं काशी दिनेशमनुसिद्धिदं ॥ अयोध्या मथुरा माया काशी बदरिकाश्रमं ॥ गया च गण्डकीतीरं द्वार

वर्ष५

तदुच्यते ॥ यस्मिन्पीठमये देवि कुलमार्गः प्रकीर्त्तितः ॥ तत्रैव पतिता योनिस्तां देहाद्वस्त्रियेकृतं ॥ कुलशास्त्रं तु कौलानां ज्ञानि
नां मुक्तिदायकं ॥ पंचमायां तु तं सिद्धिरमानां नैवज्ञायते ॥ तत्प्रकाशाणिमादीनां सिद्धिकालोपगम्यतां ॥ श्रीविद्यायाणमूलं मन्त्रा
सिमासिशरे इज्ञः ॥ कुलसिद्धस्य लोपेतु रजस्तंभश्चज्ञायते ॥ अस्योपपीठं द्वितयमासामेतरमूत्रणात् ॥ वंगाख्यं लोमतोजातं सिद्धि
शावरखेटकाः ॥ अकारः काशिकापीठं त्वद्देहाभेदतां गतः ॥ पुलयोपि न नाशोस्य यत्प्रोक्तं तन्महेश्वरम् ॥ न पापं यत्र पुण्यं न रहत्या
गात्परं पदं ॥ ध्यमेव फलं तत्र मुक्तिस्याद्धर्म्मकर्म्मतः ॥ यातना भैरवी प्रापा तत्र पीठं परे परे ॥ मयानग्नक्यते मातुं तत्र तेसनकं भत
निःसृतं धारयोर्युग्मं साभिश्च वरुणाभवेत् ॥ कोऽप्यावहिर्योजनैकं देवभूमिरितिस्मृता ॥ तत्र वाराधिता मंत्रास्तत्कालं फलदायकाः ॥
येषां स्थाने चतुर्दिक्षु तत्राम्नायस्य देवता ॥ तिष्ठंति देवतासिद्धिः पुरश्चरणमंत्रतः ॥ गंगायाः पारपारेयः काशिभागः पवित्रितः ॥ व्यासश
पेन तत्स्थानं गर्धभक्षेत्रमुत्तमं ॥ तत्कालं तत्र संसिद्धिः षडाम्नायस्य जायते ॥ उपपीठमसेस्तीरे सारनाथस्य दक्षिणे ॥ तत्र दक्षिणमार्गस्य
मंत्राः सिद्धिप्रदायकाः ॥ वरुणायाः सौम्यभागे सारनाथस्य चोत्तरे ॥ तत्रोपपीठं वामस्य मार्गस्यातीव सिद्धिदं ॥ नेपालं तु इकारः स्या
दुदं तत्र तु पार्वति ॥ तस्माद्वामस्य मार्गस्य मूलस्थानं तदुच्यते ॥ षट्पंचाशल्लक्षमिता भैरव्यो भैरवास्तथा ॥ शक्तीनां च सहस्रे द्वे पीठा
नां च शतत्रयं ॥ चतुर्दश श्मशानानि तत्र संनिहितानि च ॥ दक्षमार्गे सिद्धिदानि पीठान्यष्टौ च तत्र तु ॥ सिद्धिर्वैदिकमंत्राणां तत्र पीठचतु

॥ तंत्रचिं॥
॥२८७॥

ष्ये॥ तन्मलं यत्र पतितं जातं तदुपपीठकं॥ नेपालात्पूर्वदेशे तु तत्किरातैरुपवेष्टितं॥ त्रिंशन्नवसहस्त्राणि देवयोनीनि सन्त्रि
हि॥ ईकारस्य समुत्पत्तिस्थानस्यास्योंडुयद्धृतं॥ पतितं वामनेत्रं नेत्रमहत्पीठं तदुच्यते॥ यस्य कस्यापि मंत्रस्य जपात्सिद्धिः प्रजायते
वामाचारास्तत्र देवा देवतादर्शनं भवेत्॥ उकारस्य समुत्पत्तिस्थानं काश्मीरमीरितं॥ कर्णौ निपतितस्तत्र तस्मात्पीठेन्नमंनुतत
यस्य कस्यापि देवस्य तत्र मंत्रजपत्परः॥ विद्यानां पारदर्शी स्यान्नत्वज्ञानी भवेत्तथा॥ वैदिकाद्याकौलिकाद्यास्मान्त्री द्वादशमा
गतः॥ श्रुतानां तत्र देवेशि प्रायश्चित्तं करोति च॥ मया कृतानि तीर्थानि समग्रः प्रत्ययचात्यपि॥ करिष्याम्यतिगुप्तानि कलौ म्लेछा
वृत्तानि च॥ ऊकारस्य समुत्पत्तिस्थानस्यात्कान्यकुब्जकं तत्रैते दक्षकर्णस्तु पतितो नीवशोभनः॥ गंगायमुनयोर्मध्ये तदं
तर्वेदिसंज्ञकं॥ तत्सोमपानां देवानां निवासायोपकल्पितं तत्र ब्रह्मादयो देवाः स्वस्वतीर्थानि- क्रिरे॥ तत्र वैदिकमंत्राणां सिद्धि
र्देवाः पदे पदे॥ तस्य देवि मलाज्जातं यमुनातटमास्थितं इंद्रप्रस्थं नाम लोके प्रसिद्धमुपपीठकं॥ ब्रह्मणाविस्मृता वेदायत्पीठ
स्य प्रभावतः॥ पुनर्लब्धास्ततो जातं तीर्थं निगमबोधकं तत्र कालीनपक्तेपेपरितोष्यंति ये च मां॥ पंचमेस्तु दर्केस्तु भूयादिति
वरेस्मया॥ सा तु तत्र वरं प्राप्य महाकालाज्जगत्तदा पंचमेषु रया मासमसिद्धिं च विकटं ददौ॥ ऋकारो भ्रूस्तूणागिरौ पतितानात्र
नासिका॥ श्वेतो योगस्य संसिद्धस्तत्र तूर्णं प्रजायते ॠकारस्य समुत्पत्तिस्थानस्यादर्बुदाचलः॥ वामस्तनो निपतितस्तत्र नमेतव

॥गुरुः॥
॥१८७॥

यत्रत्वमं शक्तिस्तत्रांविकानामयामाचारसदाप्रिया। पुरश्चर्यायदेकापिभोगकालेप्रजायते। तत्रप्रत्यक्षतांजातिमंत्राधिष्ठान
देवता तस्मिन्पीठेभवेन्मुक्तिःसहस्रभगसंगमात्। दिव्यस्त्रीणांतुतत्स्थानमवतारस्यपार्वति। प्रतिज्ञामहतीजातातयादेव्याम
यासह। निर्वाहयेन्ममक्षेत्रेपुत्रवर्ष्यंतुयःपुमान्॥ द्वादशाब्दंतुमन्त्रीसर्वैकाभविष्यति। योन्योपिस्खलितस्तत्रत्रिदिनेनार्क
वत्सरे। निर्वाहस्तत्रवामस्यदक्षेविद्याभवंतिहि। लृकारस्यसमुद्रेयत्रवाशातकेश्वरः। दक्षगंडेनिपतितोस्तत्पीठंमहदद्भुतम्।
धनदायास्तत्रयक्षायक्षिण्योधनदादिकाः। वसंतितत्रजप्तव्यंतेषांसिद्धिःप्रजायते। लृकारस्यसमुद्रस्यत्रिरेफाग्रेतुपुराभवत्।
नखास्तेगलितास्तत्रतत्रविद्याधरैर्वृतः। विद्यार्थिनांतुतत्पीठंमिष्टविद्याविधायकं। श्रुतंतुश्यतेग्रंथंतत्रसारस्वताङ्गपात्॥
एकारजन्मविख्यातेपतितास्त्रिवलीतत्र। त्रिधातेवसनंजातंप्राक्पश्चाद्दक्षिणोपतत्। त्रिरूपेतास्तुपपीठानिगह्नस्तस्यासिद्ध
ति। द्विजश्चेनतरोवर्णीमनवःपुस्तकस्थिताः। ऐकारोभूत्कामकोटेनाभिस्तत्रतुनेपतत्। तत्रसर्वेपिसिध्यंतिकाममंत्रानसंशय
कामिनीत्वांसमाराध्यछाछिकातीरसंगता। षोडशस्त्रीसहस्राणांभोगेसामर्थ्यमाप्नुवान्। चतुर्दिक्षुपपीठानितत्रजातानिपार्वति
स्थानमप्सरसांतत्रयेमंत्राःस्त्रीप्रसंगिकाः। सर्वेतेतत्रसिध्यंतितत्रदा[illegible]यदेवताः। तेषांतुदर्शनेनापिलभेद्देष्टांमनोरमां। ओका
रोभूद्वकैलासेहिमावत्सनगोदरे। अंगुल्यःपतितास्तत्रपर्वशोलिंगतांगताः। करमालिकतत्रयपंचमंत्रजपेद्विज। पुरश्चरणमा

मात्रेणातुष्टा भवति देवता ॥ श्रीकारस्य समुत्पत्तिर्भृगुपीठभवत्पुरा ॥ तत्रैव पतिता दंता तत्पीठं महदद्भुतं ॥ समस्ता वैदिका मंत्राः कल्पो-
क्ताः स्वस्वरूपतः ॥ तत्र निर्वृति मेवातस्तत्र सिद्धा भवंति हि ॥ अंगुकेदारसंभूतो दक्षकरतलं तत्र ॥ पतितं तत्र पीठे तु सिद्धयः सरसं:
स्थिताः ॥ तस्य दक्षे चोपपीठे अगस्त्या समसंस्थितं ॥ कंकणं पतितं तत्र सर्वसिद्धि- विधायकं ॥ तत्पश्चान्मुद्रिकापाते जातस्तेपीठम-
द्भुतं ॥ इंद्राक्षी नाम यंत्रत्वमिंद्रेणोपासिता पुरा ॥ तत्पश्चाद्धवलातीरे वलयानि तवांतिके ॥ पतितान्युच्यते तत्र राजराजेश्वरी ति-
व ॥ वामाचारेण तत्रापि सिद्धिस्तूर्णं प्रजायते ॥ जपादेव तु पक्षिणस्तत्र स्युर्दृष्टिगोचराः ॥ अःकारोद्भूत्वं ड्ठरे पतितो वामगंड-
कः ॥ तत्र सर्वेपि मनवः सिद्ध्यंत्यत्र न संशयः ॥ श्रीपीठं तु ककारोद्भूतमस्तकं पतितं तत्र ॥ प्रायस्तत्र सपापानां दुर्लभं गमनं कलौ ॥
समस्ताः शक्तयो यत्र रमंति निशि तेक्षया ॥ अपमृत्युं न बाधंति विधर्मभक्ष्ययंति च ॥ कर्णाभरणतो जातमुपीठं तु पूर्ववत् ॥ ब्राह्मी तत्र
स्थिता शक्तिर्बुद्धिविद्याप्रकाशिका ॥ कर्णाद्याभरणाद्द्विकोणोद्भूतपपीठकं ॥ माहेश्वरी तत्र शक्तिः सुखशुभकरी मता ॥ यत्र वलयस्तन-
दक्षे पतितास्ते तदा भवेत् ॥ उपपीठं तत्र शक्तिः कौमारी जयकारिणी ॥ कंठमाला तु नैऋत्यां पतिता चोपपीठकं ॥ वैष्णव्याधिष्ठिता
जातं तज्जपदायकं ॥ ऋं खलिका चोत्तरे तत्र पतिता ह्युपपीठकं ॥ चामुंडाधिष्ठितं जातं क्षुद्रदेवनसिद्धिदं ॥ वैश्वाभरणतस्ते
भूदीक्षाणापामुपपीठकं ॥ अधिष्ठितं महालक्ष्म्या सुज्ञानां तत्रयः --- ॥ खकारोद्भूतध्रौंकारेक्षेत्रे चामरकः ८ ॥ तत्ग्रीवाप

ततास्पीठं नर्मदाधिष्ठितं भवेत्। तत्र सर्वैर्मुनिवरैः प्रणवोपासकैः कृतं। महातपस्ततो जाता जीघ्रमुक्ता महर्षयः॥ तदूंकारे चोपपीठकं तुका
पतनादभूत्॥ ज्योतिष्मस्यानिवासोभूज्ज्योतिर्मंत्रप्रकाशकः। तस्याश्चांशोन भद्रस्यातीरे तेंगविक्षेपनं। पतितं चोपपीठं तेनाशिलां प्रस्त
कारकं। जालंधरं गकारस्य स्थानं तत्र स्तनं तव। दक्षो निपतितस्तत्र जातं पीठं महद्भुतं। विख्याता ज्ञानपा तत्र वह्निनाच तपः कृतं॥ सदेव
मुखतां प्राप्य स्थितस्तस्योपपीठके। ज्वालामुखीति विख्यातं स वह्निर्देवतामुखं। पुरश्चर्याया ज्वस्य पुरश्चरणसंख्यया॥ तत्र होमः प्रक
र्त्तव्यो मंत्रसिद्धिः प्रजायते॥ गोरक्षेणातु तत्रैव प्राप्तं सिद्धाष्टकं पुरा॥ मालावं तु घकारस्य वामस्कंधोत्र संस्थितः॥ उपासितं तु गंधर्वै रागस्त
नमसंकितं॥ ऊलांतके ङकारोभूत्कक्षानिपतिता नव। ठेषास्वारनमृत्तूनां प्रयोगास्तत्र सिद्धिदाः॥ कोटके तु चकारोभूद्वासकक्षाप्रतिष्ठित
लक्षातुराक्षसैस्तत्र सिद्धिर्देवजयाभिधा॥ छकारस्य समुत्पत्तिर्गीकर्णौ परिकीर्तिता॥ जठरं पतितं तत्र तत्पीठं महद्भुतं॥ ॥ मारुते स्वर
संज्ञातो जकारस्तत्र तेबलिः॥ प्रथमापतितापीठं शिवमंत्रप्रकाशकं॥ अट्टहासे झकारस्य स्थानं तत्राधराबलिः॥ पतिता तं गणेशस्य मंत्र
सिद्धिकरं स्मृतं। विरजे तु ञकारस्य स्थानं तत्र परावलिः॥ समस्तविष्णुमंत्राणां तत्र सिद्धिरुदाहृतः॥ ॥ टस्योत्पत्ती राजगृहे वस्तिपातस्तु
तत्रैते। तदधस्तात्तुइंघेटापतिता चोपपीठकं। तत्पीटिकाभिधं प्रोक्तं मिंडजाख्यं प्रसिध्यति॥ उपवेदार्थनिष्पत्तिर्भवेत्राजगृहेद्भुता॥ ॥
महापथे ठकारोभूत्त्रितेवः पतितस्तव॥ जन्मभुवेडिजेस्तत्र स्वशरीरं समर्पितं॥ प्राप्य जन्मांतरं ते स्तुवे दमार्गप्रलुंपकाः॥ अघोराख्यः क

लोमांगीश्वा सुता देवसौख्यदाः ॥ डकारोभूत्कोल्लागिरौ जघनं पतितं तव ॥ समस्तबलदेवानां तत्र सिद्धिरहरतः ॥ ॥ एलापुरे ढकारो
भूद्दक्षोरू पतितस्तव ॥ बालायास्तत्पीठमुक्तं स्वल्पार्णमनुसिद्धिदम् ॥ कालेश्वरे णकारोभूद्वामोरुः पतितस्तव ॥ मृत्युंजयायुःकरणा मंत्राः सिद्धं
ति तत्र तु ॥ जयंती तु तकारस्य स्थानं जानुनिपातितः ॥ तत्र दक्षो जपान्नासिध्येधनुर्वेदो न संशयः ॥ ॥ उज्जयिन्यां थकारोभूत्तवामजा
नुस्तत्र ते ॥ सिद्धिः कस्य मंत्राणां भवतीति निगद्यते ॥ तस्योत्पत्तिस्तु योगिन्यां तत्र जंघानिपातिता ॥ कौलिका वामका मंत्रास्तत्र सि
ध्यंति नेतरे ॥ धकारोभूत्क्षुरिकायां वामजंघा तु तत्र ते ॥ तत्र वैतालिका मंत्राः सिद्ध्यंति शाबराः ॥ हस्तिनाउरेऽस्याग्निर्नकारस्य प्र
कीर्तिताः ॥ दक्षस्ते पतितस्तत्र गुल्फानूपुरमेव च ॥ उपपीठं तु तज्ज्ञातं यत्वातेनूपुरार्णवं ॥ पीठोपपीठयोस्तत्र मंत्राः सिध्यंति भास्करे
उड्डीशाख्यं पकारस्य पीठं तत्र तु वामकः ॥ गुल्फो निपतितस्तत्र कृतं साधकसिद्धिदं ॥ उड्डीशाख्ये महातंत्रे सिद्धं भवति तत्र तु ॥ नूपुरं
पतितं यत्र डामरं चोपपीठकं ॥ प्रयागे तु फकारस्य स्थाने देहरसोत्र तु ॥ यत्रैव पतितस्तत्र दृश्यते श्वेतमृत्तिका ॥ गंगायमुनयोर्म
ध्ये पारावारे तथैव च ॥ एवं स्थानेषु तेष्वीति पतितानि द्विजोत्तमैः ॥ कृतानि तानि भूम्यंतं तत्र पीठानि जज्ञिरे ॥ गंगायाः प्राक्कुवग
लास्फपपीठं महद्भुतं ॥ उत्तरेस्यास्तु वामं डास्फपपीठं महद्भुतं ॥ गंगायमुनयोर्मध्ये राजराजेश्वरी स्वयं ॥ यमुना दक्षिणे कूले भुवने
शीसमाश्रिताः ॥ प्रयोगोत्र तीर्थराजः पीठराजश्च कथ्यते ॥ षष्ठीशास्तु वकारस्य स्थानं पार्श्विस्तु तत्र के ॥ दक्षिणः पतितो देवि पादुकाः

सिद्धिरत्र तु । मायापुरे वामपार्ष्णिः पतितो भूत्स्थलं तु तत् । देवदानवगंधर्वा मायाः सिध्यंति तत्र तु ॥ मकारो भून्मलयाख्ये पीठे भंग्प
त्रेतपतत् । रक्तांवराद्दिवौत्तानां मंत्रसिद्धेः स्थलं तु तत् ॥ श्रीशैले तु यकारो भूत् तत्र पिन्नंतवांछिके । सर्वमंत्रास्तत्र सिद्धा वै सर्वास्तु विशेष
तः रस्थानं तु हिमागस्य मेरुनामकभृंगकं । तत्रैद पतितं सिस्थ्यः स्वर्गाकर्षणभैरवः ॥ ॥ लकारस्य समुत्पन्नि गिरिपीठे तु यत्रते
जिह्वाग्रं पतितं यत्र जपात्वाक्सिध्यति ध्रुवं । माहेंद्रस्तु वकारस्य स्थानं मज्ञापतंत्वत्र । सर्वे यांशाक्ति मंत्रा लां सिद्धिस्तत्र न संशयः ॥
वामनं तु शकारस्य स्थानं तेंगुष्ठतो भवेत् । जपान्नत्र तु मुलत्वं मंत्रिषु प्रभवंति हि ॥ हिरण्यपुरसंभूतः षकारो नामतो भवत् । श्रंगुष्ठा
देवतत्पीठं वाममार्गधिको भवेत् ॥ पीठे चापि महालक्ष्म्या सकारो भूद्गुविस्तव । शरीरात्पतिता तत्र सर्वसिद्धिः प्रजायते ॥ हकारश्चोड्डि
याने भूदुन्मनी तत्र तेपतत् । दृग्गोचरास्तदावेत्यः सिद्धयस्तत्र संस्थिताः ॥ छायापीठे लकारोभूत् तेदृष्टा छायामयातव । स्वनीचेयं लब्ध्वा
भूत् छायापीठमनस्तु तत् ॥ क्षत्रपीठे समुत्पन्नः क्षकारः केशपाशकः । यत्र तेपतितो देवि तत्र सिद्धिर् इरतः ॥ एतद्देवि मयाप्रोक्तं
रहस्यं पीठसंभवं । सर्वपीठोपपीठेषु सर्वक्षेत्रोपक्षेत्रके । तत्रस्थाः पूजिता मंत्राः क्रियामार्गवलंवकाः ॥ म्लेछदुष्टमृगव्याल
शंकातंकविवर्जिते । एकांते पावने निंदारहिते भक्तिसंयुते । स्वदेशे धार्मिके राष्ट्रे सुभिक्षे निरुपद्रुते । रम्ये भक्तगणस्थाने निवसेन्नपराश्र
ये ॥ राजानः सचिवा राजपुरुषाः प्रभवो जनाः । वर्तिये नमार्गेण नवसेत्तत्रतत्ववित् । श्रीगिरिदेवालयोद्यानगृहवृक्षतलेषु च । नदीकूलादि

फलेषुभूछिद्रेषु नोवसेत्। एवंविचार्यमतिमान्कुर्यात्भूमिपरिग्रहं। एषीवतहंसंपूज्यभूतस्यवलेनच॥ पूयाच्छुरुमंत्रस्यपु
रश्चरणसिद्धये॥ मयेयंगृह्यतेभूमिर्मंत्रोयंसिद्धनामिति॥ ॥ भूमेः परिग्रहंकृत्वापरिमाणंच सर्वतः॥ ग्रामेकोशमितंस्थानंन
गरेतद्द्वयंस्मृतं॥ नदीपर्वततीर्थादौपरिमाणंनवर्जितं। क्षीरवृक्षमयान्कीलानसप्तमंत्राभिमंत्रितान्॥ न्यग्रोधोडुंवराश्वत्थप्लक्षान्य
तरवक्षजान्॥ वितस्तिप्रमितान्वृक्षान्गृह्णीयान्कीलकान्दश। अष्टौनिखनयेदष्टदिशास्वीशानपूर्वयोः॥ मध्येनिखन्या
न्नवमंमूर्ध्निकुर्यात्तथाप्यधः॥ पूजांतथाशुभेवेशानेषस्त्रंचुप्रपूजयेत्। क्षेत्रेचकीलितेमंत्रैर्निर्विघ्नैःपरिभूयते। क्षेत्रपालादिकां
स्तत्रपूजयेद्विविधिवन्नमः॥ दिक्पालेभ्योवलिंदत्वाततः क्षेत्रंसमाश्रयेत्॥ दिक्पालेभ्योमाषभक्तंवलिंदिक्षुप्रकल्पयेत्। स्वत्र
मध्येक्षेत्रपालंपूजयेद्गणाधिपं। ततीयंवास्तुपुरुषंतेभ्योदद्याद्वलित्रयं॥ क्षेत्रपालंचसंपूज्यवलिंदद्याद्यथाविधिः॥ ॥ एहे
हिविदुषीपुत्त्रामुरुभंजयवुग्रमकं॥ नर्तयद्वितयंपश्चाद्विघ्नविघ्नमहेतिच। भैरवक्षेत्रपालेतिवलिंगृकृद्वयंस्वाहा॥ त्रिचत्वा
रिंशद्वर्णीयंक्षेत्रपालवलेर्मनुः॥ तस्मैसपरिवारायवलिंदद्यान्नभक्षयेत्॥ जपःस्थानेततःकुर्यात्त्रिकोणमंडलंवहिः। तद्वहि
श्चतुरस्रंचतत्रक्षेत्रेसमर्चयेत्॥ इत्यग्रछेत्यादिवाक्ये त्रिकोणादग्रतः पुनः॥ अंभोदकादिसंपूर्णंवलिपात्रंनिधापयेत्॥ वामिभि
र्महिषोदयःकीलिकैर्वल्कलस्तथा॥ अन्नैःसिद्धाक्षिभिस्तत्रनिर्घोषैर्मनुनामुना। ऋषिछंदादिन्यस्याद्दिक्देवेभ्योवलिंहरेत्॥ ॥

६२

असितांगादिवृत्स्यादिपदं ङेतं समालिखेत्। बलिं च द्विधा कुर्यात् द्विठांतो दिग्बलिर्मनुः॥ असितांगो रुरुश्चंडो ऽन्मत्तः क्रोधभै
रमः। कपाली भीषणश्चैव संहारश्चाष्टभैरवाः॥ ब्राह्मी माहेश्वरी पश्चात् कौमारी वैष्णवी तथा। वाराही च तथैंद्राणी चामुंडा तद
दनंतरं। महालक्ष्मी समाख्याता स्वस्वबीजाद्यनुक्रमात्। धूपदीपैः समभ्यर्च्य पश्चात्तत्कोणं निवेशयेत्॥ प्रणवं पूर्वमुच्चार्य मायाल
क्ष्मीश्च मन्मथः। इंद्राण्यै पदमुच्चार्य चामुंडेति पदं ततः। विच्चे इति पदं पश्चात् नैर्ऋत्ये च मनुं पुनः॥ वारुण्यै वायवी चेति कौवेरी
शान भैरवी। स्वादेमंत्रं समुच्चार्य पुनर्देवी वदेत्प्रिये। बलिं दद्यात् क्रमेणैव दिग्विदिक्षु बलिं हरेत्॥ प्रणवं पूर्वमुद्धृत्य स्हस्ह्स्त्रे ख्वाबीज
मुद्धरेत्। वटुकाय पदं दद्यादापदुद्धारणाय च। कुरुद्वयं समुच्चार्य मायांतारं समुद्धरेत्। वह्निजायान्वितो मंत्रो वडुकस्य बलिं हरेत्॥ अ
ग्नेय्यां बलिमुद्धृत्य माया लक्ष्मी च मन्मथः। गाणेशबीजमुद्धृत्य बीजं पंचांतकं पुनः। गणपते पदं पश्चाद्वरद वरदेति च। सर्वजनं वदे
शं च वदेत्पश्चाद्वशमानय। अंते वह्निवधूं दद्यात् गणनाथो महामनुः॥ रोडं त्रिकोणमुद्धृत्य नारायणं तथोद्धरेत्। बीजसक्ष्मे समुद्धस
मरेशंबीजमुद्धरेत्। ङें·तं तु क्षेत्रपालं च बलिं ग्रक्षयेत्ततः। वह्निजायान्वितो मंत्रो क्षेत्रपालस्य कीर्तितः॥ वायुबीजं द्विधा लिख्य अंत
तोमाधवस्तथा। वर्तुलाक्षीं ततो धृत्य योगिनीभ्यस्तथैव च। वह्निजायान्वितो मंत्रो वायव्यां योगिनीबलिः॥ क्षकारं कालमारूढं त
दंते अनलाक्षरं। सर्वविघ्नपदं कृत्वा भ्यः सर्वेभ्यो भूतेभ्यो हरेत्। भ्योनर्सक समसुम्स बलिं ग्रापयेति च। द्विठान्तः सिद्धिदः प्रोक्तः स

वीभूतवलिं हरे ॥ ओदनं पायसं क्षीरं मत्स्यं मांसं तथैव च ॥ मोदकं पूरिकापूपं वटकं त्रिविधा उरा ॥ हयोदनानि पक्वान्नमात्स्यं मधुसश
र्करं ॥ सर्वत्र विधिवत्कुर्याउर्गे नोत्संगमाचरेत् ॥ अत्र मध्यं समाश्रित्य कूर्मचक्रं विचारयेत् ॥ कूर्मचक्रमधिज्ञानान्महाविघ्नो नजायते ॥ परदेश
ग्रामगृ भेदात्कूर्माचतुर्विधः ॥ व्यंजनं देशकूर्मे स्यात् गृहकूर्मे स्वरास्तथा ॥ ग्रामकूर्मे तद्धितं परकूर्मे न तद्वयं पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे
कुरुक्षेत्रे प्रयागे च गंगासागरसंगमे ॥ महाकाले च काश्यां च कूर्मस्थानं न चिंतयेत् ॥ चक्रद्वयं प्रकुर्वीत नवकोष्ठकल्पितं ॥ कवर्गाद्याः सप्तले
ख्याः पूर्वाशादिषु लक्षकौ ॥ ऐशान्यां विलिखेन्मध्ये चक्रकोष्ठद्वयं द्वयं ॥ स्वरानांत्र्वेतोलेख्यं श्रीबीजं मध्यकोष्ठके ॥ पाशुरवः परकूर्मस्तु सर्वदै
व प्रजायते ॥ देशनामादिमो वर्णो यस्यां दिशि व्यवस्थितः ॥ देशकूर्मे मुखं तस्यां दिशि स्यात् ग्रामकूर्मके ॥ मुखद्वयं तु विज्ञेयं स्वरान्त्यव्यंजनं त
स्तथा ॥ गृहकूर्मस्य वदनं यद्द्वारमुखं भवेत् ॥ मुखस्य पार्श्वयोः पाणी कुक्षी पादौ ततस्ततः ॥ पुछमेकं तथो मध्यं पृष्ठमेकं षडंगवान् ॥ ॥
मुखे सर्वार्थसिद्धिः स्यात् करयोरल्पसिद्धयः ॥ कदैनकिं विद्यासत्वं पादयो पुछगे मतिः ॥ मंत्राक्षरेण मेवं च दीपनाम्नो भवे यदि ॥ साधकस्य
स्वनाम्नाथकिं न सिध्यति संचिताः ॥ पंचाशद्वर्णरूपेण क्षेत्रेशा विश्वविग्रहाः ॥ तस्मात्तत्सगुणां क्षेत्रं सिद्धये स्यान्न वान्यथा ॥ विगुणं चो
मुखस्योपि नेनेव सिद्धिमाप्नुयात् ॥ तस्माच्चक्रं विचार्यैवं मित्रं चेत्सर्वसिद्धिदं ॥ यस्मिन्देशे रिपपति सगुणानाममंत्रयोः ॥ तत्रयत्नेन
गतव्यंसपीठो दुर्लभो मतः ॥ क्षेत्रसाधक मंत्राणामेकमेवाग्रतंतरं ॥ यदि स्यात्सध्रुवं मंत्रः सर्वसिद्धिफलप्रदः ॥ महारित्वे जीवनाशो वैरे स्या

द्वदनाशनं ॥ किंचिद्वैरेस्सुखाल्पत्वं तदिदानीं निगद्यते ॥ अगोऽऋठौ नृपो जधौ पधो जझौ ठोइवौ डतौ ॥ फक्षौ भनौ यमौ वेति मनारीपारकीर्तितौ
अक्षो अश्रौ द्वयधौ तद्वत् जटौ रिपाबुधौ ठलौ ॥ अनुस्वारो ऽस्फस्वदीर्घो ग्राह्योसाधकसत्तमैः ॥ वैरं तु पंचमे वर्गे तान्नकिंचित् कष्टयोर्भवेत् ॥ चयो
र्यचयोश्चैव तटयोर्दशयोरपि ॥ एते वर्णा यदाऽशीतिः स्ववर्गे द्विगुणां कुरु ॥ स्थानवर्गयुतं नष्टमष्टभिश्चाथ ऽप्यते ॥ स्थानवर्गो द्विगुणानः
स्ववर्गस्याष्टमे स्थितः ॥ स्थानान्मन्त्री भयोः कार्यं मंतरं यस्य शेषकं ॥ यावत्तास्थितं सार्धदः स्यात् साधकोर्थप्रदो न मतः ॥ एवं क्रमेणाधि
ज्ञाय रिपुस्थानं त्यजेद्बुधः ॥ रिपुत्वे निश्चिते तस्य द्वितीयाक्षरादि शोधयेत् ॥ इत्थं स्थानग्रहं कृत्वा ततश्च मंत्री वलिं हरेत् ॥ दीपनाथं लिखेत्सधे
पूजयेत्तं विभावयेत् ॥ ~~अ~~मंत्रो वृषभः शैलराजो वासुकिरेव च ॥ अर्घपद्म छत्रिकाकूर्म वंकाष्ठादौ वलिनार्चयेत् ॥ पद्मयोनिं महाशंखं च्छा
यारवं चापि मध्यमः ॥ कूर्मपृष्ठे गृहं गत्वा गृहस्यां जपमाचरेत् ॥ मुखं तस्य समभ्यर्च्य स्वातातनपसहां पुरः ॥ चतुर्हस्तां चतुरस्रां हस्तोन्नत
मुवेदिकां ॥ वेज्ञतपपताकादितोरणैरप्यलंकृतां ॥ विचित्रामतिलिप्तांश्च ज्ञाकारेणाक्षिवेष्टितां ॥ ॥ निर्माय च ततः कुर्याद्देकभक्तं शु
भेदिने ॥ प्रातस्नात्वाप्रगाय क्षाश्रयुतं प्रयतो जपेत् ॥ ज्ञाताज्ञातस्य पापस्य क्षयार्थं पृथमं ततः ॥ विरच्य विधिवद्विद्वान्मंडपं कुमतो
रमं ॥ तस्मिन् कलशमारोप्य तीर्थतोयैः प्रपूरयेत् ॥ तिः क्षिप्य नवरत्नानि तत्र गंधाष्टकं पुनः ॥ आवाह्य पूजयेत्तत्र देवीमावरणैः सह ॥ क
लशाग्रे जपेन्मंत्रं संख्याया पूरणावधिः ॥ संपूर्णं तु समागम्य गुरुर्देवो विधानतः ॥ अभिषिंचेत् शिष्यं तं सर्व्वकलशोदरवारिभिः ॥ ततः शिष्यः

प्रयत्नेन धनाद्यैस्तोषयेद्गुरुं॥ ॥अथ वक्ष्यामि मंत्रस्य पुरश्चरणमुत्तमं॥ कृताभिषेको विधिवत् मंत्रं लब्ध्वा गुरोर्मुखात्॥ शुभे मुहू
र्त्ते नक्षत्रे तिथौ स्नात्वा यथाविधिः॥ विप्रान्संतर्प्पयेत्नेन भोजनाच्छादनादिभिः॥ भूषित्वा वस्त्रभूषाद्यैस्संतोष्य गुरुमात्मनः॥ स्वार
भेत जपं पश्चात्तदनुज्ञापुरस्सरं॥ भुंजानो वा हविष्यान्नं शाकं यावकमेव वा॥ पयो मूलं फलं वापि यत्र यन्नोपलभ्यते॥ बिंबाम्बुनालि
काशाकं कलायं निकुचं तथा॥ कदंबं नारिकेलं च वृंतकुष्मांडकं त्यजेत्॥ मलिनांवरकेशादिमुखदौर्गंधसंयुतं॥ योजपेत्तं दहत्याशु
देवता गुप्तिसंस्थिता॥ आलस्यं जृंभणं निद्रां क्षुतं निष्ठीवनं भयं॥ नीचसंस्पर्शनं कोपं जपकाले विवर्जयेत्॥ अधःशायी ब्रह्मचारी
निशाशी प्रजपेन्मनुं॥ नियमव्यतिरेकेन यत्कर्म च करोति यः॥ किंचिदप्यस्य सफलं सिध्यति श्रमदोषतः॥ न्यूनातिरिक्तकर्माणि न
फलंति कदाचन॥ यथाविधि कृतानीह सत्कर्माणि फलंति हि॥ तद्विधानकृतं कर्म जपहोमार्चनादिकं॥ देवताप्रीतिदं भूयात्
भुक्तिमुक्तिफलप्रदं॥ स्वभार्यायां प्रमादेन स्खलितं चेत्तदोषसि॥ स्नात्वा ईशानसामोनीदशकुंभमिदं जलं॥ श्रोत्रियस्य गृहे दद्या
त् परनार्यां सहस्रकं॥ त्यजेद्विंशतिकर्माणि सिद्धिविघ्नकराणि च॥ कुर्याद्विंशतिकर्माणि जपसिद्धिकराणि च॥ लोभं क्रोधं च मा
त्सर्य्यं कामद्वेषं च तांडवं॥ दंतमुखाटनालंगाप्रियमिथ्यावचस्तथा॥ गीतवाद्यं मधुच्छायां विभीतककरंजयोः॥ मांसं प्रतिग्रहं माल्यं
तांबूलं पापभाषणं॥ एतानि वर्जयेद्विद्वान् कर्तुमात्मग्रमेष्टया॥ मनोनिरोधो मंत्रार्थचिंतनं नित्यकर्म च॥ नैमित्तिकं शौचमौने वच

सांमाररांभेदः॥ भूमिशय्यात्रिषवणं स्नानं प्रात्यहिकार्चनं॥ नित्यदानं गुरोः पादपूजाहारः नियंत्रणा॥ स्नानं च पंचगव्येन पवित्रकधारणं॥ त्रिसंध्यावंदनं पंचयज्ञास्तर्पणाकं च तु॥ यथोक्तवस्त्रधरणं प्रायश्चित्तमथोच्यते॥ सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत्॥ प्राणे पामरशब्दे पि प्राणायामं समाचरेत्॥ चंडालापत्यावरूपं भ्यस्यां गामिन्तततो जपेत्॥ क्षुते प्येवं तथा स्पृश्य स्थानानां स्पर्शने पि च॥ मौनस्यागे जपेन्मंत्रं वैष्णवं वा स्मरेद्धरिं॥ पतितांत्यजसंदर्शने जातेत्निरीक्षयेत्॥ सूर्याग्निचंद्रमाः खेये मुनयो भानितारकाः॥ विद्वान्गोब्राह्मणाश्चेति तेजोहीनाः पदेपदे॥ क्षुते थोवायुगमने पतितादिकभाषणे॥ त्यक्तो जपं तथाचम्य प्राणायामं षडंगकं॥ कृत्वा पश्चाज्जपेन्मंत्रं भार्यां विस्मृज्य चरेत्॥ मार्जारकुक्कुटं क्रौंचं श्वानं गर्दभं खरं कपिं॥ स्पृष्ट्वाचम्याचरेत्कर्म स्पृष्ट्वा स्नानं विधीयते॥ देवा दस्तत्यभाषीवेत्समन्तेपोरुषं जपेत्॥ वडवस्त्रैकवस्त्रो वामुक्तकेशोगलावृतः॥ उष्णीषी कंचुकी नग्नः शिरसि प्रावृतो पि वा॥ विना व्याउलश्चिन्नोपात्कंठो भ्रांतः क्षुधान्वितः॥ उपानत्कूढपादो वा पानशय्यागतस्तथा॥ शयानो वा धौतपादः पश्चाद्वा दक्षिणामुखः॥ स्नानवस्त्रोर्द्रवस्त्रश्च तथाद्विगरावस्त्रकः॥ स्युतवस्त्रो रक्तवस्त्रः स्निग्धवस्त्रो द्विकच्छकः॥ बहिः कोनुन्नरीयो विकच्छस्त्वेककच्छकः॥ कौपिनी पो ठपादश्च तथासीवितवस्त्रवान्॥ जपाशक्तः प्रमादाद्वै जप्तस्सैगृह्यते फलं॥ विश्वासास्तिक्यकरुणा श्रद्धा नियमनिश्चयेः॥ संतोषेः शुद्धधर्मादियोर्युक्तो जपेत्सिद्धये॥ अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः॥ जनसंगोथ लौल्यं च षड्भिर्मंत्रो न सिध्यति॥ अथ संकल्प

ततः संकल्पं कुर्वीत पुरश्चरणमादितः ॥ पुण्याहवाचनं कृत्वा कुशहस्तो वदेदिति ॥ सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा ॥ पवनो
दिक्पतिर्भूमिराकाशं खेचरामराः ॥ ब्राह्म्यं शासनमास्थाय कल्पध्वमिह संनिधिं ॥ पठित्वेत्थं ताम्रपात्रे कृत्वा कुशतिलाक्षतान् ॥ ५८
स्पुरवस्तु संकल्पं कुर्यात्संवरादिकान् ॥ कामनांतानुश्चरेत्तत्र विंशतिसंख्यकान् ॥ संवत्सरायने मासपक्षः पंचांगमेव च ॥ नवग्रहस्थि
तिर्घस्रभागमुहूर्त्तके त्विति ॥ स्वदेशभेदातः तुल्या कामनासंहितां वदेत् ॥ द्वीपमुके मुके खंडे मुके वर्षे च नादिति ॥ अमुके चामुके क्षेत्रे
गोत्रप्रवरमुश्चरेत् ॥ स्वनामजातिनामांतं द्विजाकर्म्मेव वर्मीच ॥ गुप्तो दासोथामुकस्य मंत्रस्य सिद्धिकामुकः ॥ करिष्येहं पुरश्चर्यामेनत्र
संख्यांजपात्मिकां ॥ आधारभ्यजपेरेतेरसत्तिप्रतिबाधकां ॥ करिष्य इति संकल्पं मनसैव प्रकल्पयेत् ॥ वदेद्वा वाभिलाषं च कर्मता चो
पपादयेत् ॥ अथारब्धं कर्मसूतकोतत्याज्यं ॥ यज्ञेवृतविवाहेषु श्राद्धे होमार्चने जपे ॥ आरब्धे सूतकं नस्यादनारंभे च सूतकं ॥ आरंभो व
रणं यज्ञे संकल्पो वृतजापयोः ॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥ जपो दीक्षार्चने विधिः कार्यादिश्वान्वितैनैरैः ॥ नास्ति पापं
यतस्तेषां सूतकं वा यतात्मनां ॥ सूतके मृतके चैव वध्मो नारादिके तथा ॥ जपं वार्चनं तथा कुर्यात्संचेन्यासपुरःसरं ॥ गुरुं गणपतिं दुर्गां
मातॄन्नत्वा च पूजनं ॥ संपूज्याथ जपं कुर्यात्प्राह्वे प्रहरद्वयं ॥ त्रिसंध्यमर्चयेद्देवं द्विः सकृद्वा विधानतः ॥ एककालं भवेत्पूजा न जपेत्पू
जनं विना ॥ जपांते च भवेत्पूजा पूजांते वा जपेन्मनुं ॥ यदि पूजापराशक्तः स्याद्द्रव्याभावेन सुंदरि ॥ केवलं जपमात्रेण पुरश्चर्या विधीयते ॥ नि

यमः पुरुषोक्ते येन योषित्सु कदाचन ॥ नत्वा सो योषितां चात्र तत्ध्यानं न च पूजनं । केवलं जपमात्रेण मंत्राः सिध्यंति योषितां ॥ प्रभुभावे
स्थिता मंत्राः केवलं वर्णरूपिणः ॥ अथ जपरहस्यमाह ॥ स्वत्वच्छाग्निद्रोद्धरितापृथुत्वं शाम्भुवंति ते ॥ मंत्राक्षराणि चित्सूत्रे प्रोतानि प
रिभावयेत् ॥ तामेव परमे व्योम्नि परमामृतसंज्ञके । दर्शयेदात्मसद्भावं पूजाहोमादिभिर्विना ॥ अथ मंत्राणां सूतकादिनिर्णय
माह ॥ ज्ञानसूतकमादौ स्यान्मृतसूतकमेव कं । सूतकद्वयसंयुक्तो यो मंत्रः स न सिध्यति ॥ गुरुकुंडलि ध्यानं विवाहः परिकीर्तितः
द्विरागमो भवेत्स्नानं संयोगः संध्यया भवेत् ॥ अर्घ्यदानं भवेत्सर्वं गायत्री त्वष्टमासिकं ॥ मृतस्तु प्रादिराणां तेन चावयवकल्पनं ॥ दे
होपि मातृकया प्राणायामस्तु संस्क्रिया ॥ ध्यानोच्चारे महेशानि बालकोत्पत्तिरीरिता । मंत्रोच्चारणतो देवि ज्ञातसूतकमीरितं ॥ जा
तसूतस्य दोषस्य शमनार्थं महेश्वरि ॥ दशविंशति पंचाशद्यथाशक्त्या जपेद्दिवे । दशांगादिपुरश्चर्या संस्कारा दश वै शिवे ॥ इदमादिस
मारभ्यं मृतिसंस्मृणु सादरं ॥ संस्कारान्गुणवांस्तावन्नथजप्याहृदिः शिवे ॥ प्रसन्नोनंतस्कमैणोवतत्सिद्धिसाधनं तथा ॥ सोहंभावो मातृका
पिष्यं च वै तन्मेलनं ॥ अंगज्ञानं च तादात्म्यं तदनेतरमीरितं ॥ विसर्जनं महेशानि मृतसूतकमीरितं ॥ मृतसूतकशांत्यर्थं दशविंशति वा
जपेत् ॥ तेन तस्य निवृत्तिर्हि भवत्येव न संशयः ॥ अथ वा तुल्यबीजमनोर्दत्वा प्रायोने परमेश्वरि ॥ सप्तरं ॥ जपेन्मंत्रं सूतकद्वययुक्त
यो एवं जपं पुराकृत्वा तेजोरूपं समर्पयेत् ॥ स्वापकाले तु मंत्रस्य जपो नैव भवेद्यदि ॥ स्वापकालो वामवाहो जागरो दक्षिणाव

॥ तंत्रवि॥ हः॥ आग्नेयस्य मनोः सौम्यमंत्रस्यैतद्विपर्ययः॥ प्रबोधकालज्जानीयादुभयोरुभयोरपि॥ ज्ञेया मंत्रास्तु आग्नेया विद्याः सौम्याः प्र
॥ २९४॥ कीर्तिताः॥ ॥अथ मंत्रविद्ययोर्भेदमाह॥ मंत्रविद्याविभागेन त्रिविधा मंत्रजातयः॥ मंत्राः पुंदेवता प्रोक्ता विद्याः स्त्रीदेवता मता
पुंमंत्राः हुंफडंतास्तु द्विठांतास्तु स्त्रियो मताः॥ नपुंसका नमोंताः स्युरित्युक्ता मनवस्त्रिधा॥ एतत्तु व्यासमहाविद्यामहामंत्रस्तु गीय
ते॥ वह्न्यात्मिकास्मृता विद्या मंत्रा दैवप्रदीपकाः॥ आग्नेयाः संप्रसुप्ते ते प्राणे चरति दक्षिणे॥ भागेन्यस्मिन्गते प्राणे सौम्या बोधं प्रयांति
हि॥ नाडीद्वयगते प्राणे सर्वे बोधं प्रयांति ते॥ प्रयच्छंति फलं सर्वे प्रबुद्धा मंत्रिणां द्रुतं॥ ॥ अथ मंत्रशिखामाह॥ श्रणु देवि परं तत्त्व
सर्वज्ञानोत्तमोत्तमं॥ येन विज्ञानमात्रेण क्षिप्रं विद्या प्रसीदति॥ मूलकुंडे तु या शक्तिर्भुजगाकाररूपिणी॥ ततभ्रमाकर्त्तवातोयं प्र
णाख्यमभिधीयते॥ तेन त्यक्ता त्यक्तमधुरां रुजंती सहसा स्थिता॥ गच्छंती चुलरंध्रेण प्रविशंती पुनस्तनुं॥ यातायातक्रमेणैव
नत्रजर्यत्मनालयं॥ तेन मंत्रशिखा जाता सर्वमंत्रप्रदीपिनी॥ तमः पूर्णे गृहे यद्वत् किंचिन्न प्रतिभासते॥ शिखाहीनास्तथा
मंत्रा न सिध्यंति कदाचन॥ शिखोपदेशः सर्वत्र गोपितः परमेश्वरि॥ विना येन न सिद्धिः स्याद्वर्षकोटिशतैरपि॥ तस्माद्यत्नेन कर्त्तव्यं शि
खाया भावनं मनोः॥ ॥ अथ चैतन्यमाह॥ मंत्ररूपी भवेद्देवो देवरूपी गुरुर्भवेत्॥ गुरुरूपी भवेदात्मा आत्मरूपी मनुर्भवेत्॥ इति ॥ गुरुः ॥
ते कथितं देवि मंत्रचैतन्यमुत्तमं॥ यस्य विज्ञानमात्रेणाश्वैतंज्ञानमुत्तमं॥ ॥ श्रीदेव्युवाच॥ अथ वैकुल्लुकां नाथ कथयस्व ॥ २९४॥

ममाधुना कुल्लुका कीदृशी नाथ सेतुर्वा देव कीदृशः ॥ कीदृशो वा महासेतुर्निर्वाणं त्वथ कीदृशं ॥ अन्यच्च कथितं यत्ते कीदृशं तद्वद प्रभो ॥ श्रीशिव उवाच ॥ रहस्यमपि ते देवि कथ्यते शृणु सांप्रतं ॥ विनायेन महेशानि निष्फलं तु जपादिकं ॥ कुल्लुका च तथा सेतुर्महासेतुस्तथैव च ॥ निर्वाणं कुंडली षष्ठी सर्वोत्पत्तिस्मृता प्रिये ॥ विद्यानां कुलपूज्यत्वात् कुल्लुका तेन कीर्तिता ॥ विद्यासंबंधिदोषाणां नक्षयित्री यतः शिवे ॥ तेनेयं कुल्लुका नाम्ना सर्वतंत्रेषु गोपिता ॥ विद्यासिद्धार्णवे देवि येन पारं प्रगच्छति ॥ तेन सेतुर्महेशानि विद्यामार्गः प्रकीर्तिता ॥ मन्त्रविद्याप्रसंदर्शी महासेतुर्महेश्वरि ॥ महाविद्यार्णवस्यार्थवेन स्वस्य प्रदर्शकः ॥ महासेतुर्महेशानि महाविद्यास्वरूपधृक् ॥ देवतायास्तु निर्वाणं चैतन्यं यत्प्रकीर्तितं ॥ निर्वाणं कथितं भद्रे विद्यालाक्रमात्कारणे ॥ निर्वाणं परमेशानि चतुश्चरणारूपधृक् ॥ निर्वाणं च महेशानि परंब्रह्मात्मतामता ॥ चतुर्थं कथितं भद्रे विद्याचरणमीरितं ॥ पंचमी कुंडली देवि यथावदवधारय ॥ मूलाधारादावलांतं विसतंतुतनीयसी ॥ सर्वदेवस्वरूपा च सर्ववर्णप्रदीपिनी ॥ महाकुंडलिनी देवि ममली कुंडली परा ॥ ॥ श्रीदेव्युवाच ॥ क्रमेण दशविद्यायाः कुल्लुकाया विधिं वद ॥ पंचाक्षरी कालिकायाः कुल्लुका परिकथ्यते ॥ ॥ कालीकूर्चवधूमायाफडंता परमेश्वरि ॥ अघोराख्यो ऋषिः प्रोक्तो विराट्छंदः प्रकीर्तितं ॥ देवता कुल्लुकाकाली वीजमायाभियं मतं ॥ कामं शक्तिस्तथा कूर्चं कीलकं परिकीर्तितं ॥ षड्दीर्घाद्येन कामेन षडंगन्यासमीरितं ॥ ध्यानपूजादिकं सर्वं कालिकावत्समापयेत् ॥ ॥ मायाव

ध्रूं तथा हूं वं तारिणी कुल्लुका मता ॥ तारिणी कुल्लुकायाश्च विरूपाक्षो ऋषिः स्मृतः ॥ उष्णिक् छंदः समाख्यातं देवता नीलतारिणी
हूं वं बीजं तथा माया शक्तिर्वक्षूं च कीलकं ॥ मायया तु षडंगानि सर्वं नीलसरस्वती ॥ ॥ छिन्नायाश्च महेशानि कुल्लुका च्छाक्ष
री भवेत् ॥ वज्रवैरोचनीये चक्रं तेवर्म प्रकीर्त्तयेत् ॥ क्रंतिकालो ऋषिः प्रोक्तो गायत्री छंद ईरितं ॥ हंबीजं भूतथा शक्तिः कीलकं रोच
नी मता ॥ शिवः षड्दीर्घयुक्तेन षडंगन्यासमाचरेत् ॥ ध्यानपूजादिकं सर्वं छिन्नावत्समुपाचरेत् ॥ सुंदर्याः कुल्लुका देवी संप्रोक्ता
द्वादशाक्षरी ~~।~~ वाग्भवं कामराजं च लज्जा च त्रिपुरे पदं ॥ भगवतीति पदं प्रोच्य नंदते ठठ यं वदेत् ॥ सुंदरी कुल्लुकायास्तु ऋषिरानन्द
भैरव ॥ गायत्री छंद आदिष्टं वाग्भवं बीजमीरितं ॥ लज्जाशक्तिर्महेशानि कामबीजं च कीलकं ॥ देवता त्रिपुरेशी च षडंगं त्रितयेन
च ॥ ध्यानपूजादिकं सर्वं सुंदरीवत्समाचरेत् ॥ ॥ संपत्प्रदायाः प्रथमं बीजं श्रीभैरवीमतो ॥ विकरालो ऋषिः प्रोक्तः पंक्तिः छंदः
प्रकीर्त्तितं ॥ देवता भैरवी नाम्ना कुल्लुका परिकीर्त्तितं ॥ हंबीजं स महाशक्तिर मंत्रकीलकं मतं ॥ षड्दीर्घाद्येन बीजेन षडंगन्यासमा
चरेत् ॥ ॥ मातंगी बगलालक्ष्मी धूमोच्छिष्टा क्रमेण तु ॥ तारं हूं वं नारसिंहे पंचानां कुल्लुका मता ॥ ऋषिर्भैरवनामा च यावत्त
छंदासि पार्वति ॥ देवता सैव बीजादि स्वस्वदेवक्रमेण च ॥ ध्यानपूजादिकं सर्वं स्वस्वदैवतवदाचरेत् ॥ देयं ते कथिता देवि संक्षेपात्कुल्लुका
मया ॥ अज्ञात्वा कुल्लुकामेतां जपते यो धमः सुधीः ॥ पंचत्वमाशु लभते सिद्धिहानिः प्रजायते ॥ मंत्रा पराङ्मुखा यांति मंत्रहानिश्च जा

यते ॥ तथा जपादिकं सर्वं निःफलं नात्र संशयः ॥ तस्मात्सर्वप्रयत्नेन योजयेन्मूर्ध्निकुल्लुकां ॥ अथातः संप्रवक्ष्यामि तच्छृणुष्व प्रि
यंवदे ॥ यस्माज्ज्ञानेन विफलं जपहोमादिकं भवेत् ॥ विप्राणां प्रणवः सेतुः क्षत्रियाणां तथैव च ॥ वैश्यानां तु फडुरीः स्यान्मायाशूद्रस्य कथ्यते
अजप्यारुद्दिदेवेशि यो वै मंत्रं समुच्चरेत् ॥ सर्वेषामेव मंत्राणामधिकारेन तस्यति ॥ महासेतुस्त्वदेवेशि सुंदर्या भुवनेश्वरी ॥ कालिकायाः स्व
वीजं तु तारायाः कूर्चवीजकं ॥ अन्यासां तु वधूवीजं महासेतुर्वरानने ॥ आदौ जप्त्वा महासेतुं जपेन्मंत्रमनन्यधीः ॥ धनैर्धनेशतुल्यास्तो
वाण्या वागीश्वरोपमः ॥ क्रुद्धोकृतांतसदृशो नारीणां मदनोपमः ॥ जपकालोऽभवेत्तस्य सर्वकालो न संशयः ॥ निःसेतुकं यथा तोयं
क्षणान्निम्नं प्रसर्पति ॥ मंत्रस्तथैव निःसेतुः क्षणात्क्षरति यज्वनां ॥ तस्मात्सर्वत्र मंत्रेषु चतुर्वर्णो द्विजातयः ॥ पार्श्वयोः सेतुमादा
यजपकर्मसमारभेत् ॥ अथवा मंत्राणां प्रणवं सेतुर्द्विजानां परिकीर्त्तितः ॥ चतुर्दशस्वरोन्येषां चंद्रनुस्वारसंयुतः ॥
अथ वक्ष्यामि निर्वाणं शृणु सावहितानघे ॥ प्रणवं पूर्वमुच्चार्य मातृकाद्यं समुच्चरेत् ॥ अथ मूलं महेशानि ततो वाग्भवमुच्चरेत् ॥
मातृकां च समस्तां च पुनः प्रणवमुच्चरेत् ॥ एवं पुटितमूलं तु प्रजपेन्मणिपूरके ॥ एवं निर्वाणमीशानि यो न जानाति पामरः ॥ वर्ष
कोटिशतेनापि सिद्धिस्तस्य न जायते ॥ तस्मात्सर्वप्रयत्नेन युक्तं तन्महेश्वरि ॥ तत्तदाचार्यविधिवज्जपेन्मंत्रमनुत्तमं ॥ ऋषिछंदो देव
ताच वीजं शक्तिश्च कीलकं ॥ भावयेद्यत्नतो देवि ततः स्वेष्टादि[illegible] ॥ एवं यो हि जपेन्मंत्री मंत्रराजमनुत्तमं ॥ षण्मासात्सिद्धिमाप्नोति

नात्रकार्य्याविचारणात्॥साक्षात्सएवजगतामधीशोनात्रसंशयः॥सधन्यःसचविज्ञानीसएवमंत्रतत्त्ववित्॥सएवनिवृतात्मामे
विहरेत्तंयदागृहे॥तस्यदर्शनमात्रेणपलायंतेचवैरिणः॥एवंकृत्वाप्रणवपुटितंयोजपेन्मंत्रराजं॥तत्त्रिवीराणांभुवनमहिले
कलुकांतांवजस्रा॥तेयांतच्छिन्निखिलभुदनंसिद्धयाष्टौचहस्तेस्तेराउक्तंरहसिवचनंजन्मजन्मांतरेषु॥ ॥महाकुंडलिनींवक्ष्ये
सर्वतंत्रेषुगोपितं॥प्रणवंचत्रपाजंसःकालमूर्त्तिपदंततः॥कालएवोधिनिपदंकालातीतपदंवदेत्॥कालदायिनीशब्दांतेकप
लपात्रधारिणि॥भ्रमरीतिकुण्डलीतिजंसःवंवत्रयंतथा।स्वहंस्वासामहेशानिमहाकुंडलिनीमनुः॥चिंतनकुंडलींदेविमूल
स्थलीनिवासिनी॥तदधःकामराजंचसाप्रोक्तास्पर्शकुंदरी॥महाकासकलारूपांकाकिनीमूर्द्धिसंस्थितां॥ ॥अथशापोद्धारः
श्रीदेव्युवाच॥शापोद्धारोत्कीलनेतुतत्रभेदःकियान्भवेत्॥तन्मेवदमहादेवयथैवतववल्लभा॥ ॥श्रीमहादेवउवाच॥
उत्कीलनंबंधनंस्याच्छापस्तेजोनिरोधकः॥कीलनेतुमहादेविनगतागतमीरितं॥गतागतंमहादेवितुगतागतमीरितम्
शापोद्धारंतुवर्ण्णते॥भक्तानुग्रहकामत्वाद्देवीसाधकसन्निधौ॥गत्वादैत्यावरोदेविसमयेनातएवहि॥मंत्रचैतन्यरोधत्वान्मृषा
जातामहेश्वरि॥अयंशापोनिगदितस्तथोत्कीलनमुच्यते॥भक्तानुग्रहकाम्यत्वाद्दानव्योहिवरःशिवे॥बंधनस्ययदामुक्ति
स्तदैवतुगतागतं॥शक्तिस्तुवर्ण्णतेदेव्यावरदानेमहेश्वरि॥यथाहस्तान्वेवत्सेधेनुपीतिसुवर्ण्णते॥बंधनस्ययदामुक्तिस्तनपाने

गी

तद्देवहि ॥ कालीताराथाछिन्नातेजःपुंजानिभामता ॥ त्रयाणांतेजसंरोधंकोहिकर्त्तुंक्षमोभवेत् ॥ तस्माच्छापादिकंनास्तिकालिका:
यामहेश्वरि ॥ कालिकातारिणीछिन्नाउत्कीलनविमोचिनी ॥ दमसंज्ञोठनंकृत्वाधनुर्यातियथासुखं ॥ भक्तानुग्रहकामत्वात्तथे
यंकालिकापरा ॥ ताराछिन्नास्तंभनेशीसर्वबंधविमोचिनी ॥ शापेनुप्रस्तवोनास्तिकीलनेप्रस्तवोस्तिहि ॥ कालिकायामहादेविस
र्वदाप्रस्तवोस्तिहि ॥ शापोद्धारनिरुक्तिस्तुभृणायत्वेनसंयुतं ॥ वत्सानिकटवर्ज्जीस्याद्धेनुर्निकटवर्त्तिनी ॥ दुग्धाभावान्महादेविने
कट्येकिंफलंभवेत् ॥ कालांतरेसमायातेपुनर्दुग्धंयथाभवेत् ॥ शापोनिर्मोचनादेवपुनस्तेजःप्रवर्त्तते ॥ वत्सबंधनमुक्तित्वात्फल
सिद्धिर्हिवर्त्तते ॥ उत्कीलनेबंधनंहिफलसिद्धिःसदाप्रिये ॥ तस्मादुत्कीलनंभिन्नंशापोभिन्नःप्रकीर्त्तितः ॥ अक्षरस्यान्वयोदेविउत्की
लनविधौस्मृतः ॥ मंत्रचैतन्यरूपत्वाच्चैतन्यव्यत्ययोनच ॥ चैतन्यव्यत्ययात्मन्त्रीपापभागीनरोभवेत् ॥ तत्पापस्यनिवृत्यर्थंप्राणा
यामःप्रकीर्त्तितः ॥ देहवन्मंत्ररूपत्वंह्यक्षरेवर्त्ततेशिवे ॥ अक्षरस्यान्वयाद्देविहीनांगत्वंप्रजायते ॥ शापदानेमहादेविसर्वांगंसिद्धिमे
वहि ॥ वत्सबंधनकंकर्मपुनःसिद्धिंयथाभवेत् ॥ तथोत्कीलनकंकर्मपुनःसिद्धिंमहेश्वरि ॥ शापदानेमहादेविचैतन्याभावएवहि
विद्यमानोयथागावेदुग्धंनास्तिमहेश्वरि ॥ शापदानेमहेशानिचैतन्यंनास्तिशांभवि ॥ उत्कीलनेमहादेविचैतन्यंसिद्धिमेवहि ॥
एकदासमयेकोपिसाधकःस्थिरमानसः ॥ संस्मारदक्षिणांदेविंसदाभक्तेरुमानसां ॥ एतत्कीशंमयासार्द्धंप्रश्नोचविहायसा

गता सा साधको यत्र दत्वा तस्मै वरं ततः ॥ निवृत्ता सा मया शप्ता क्रुद्धेन मनसा मुने । यतो मां त्वं विहायैव गता साधकसंनिधिं ॥ अ
तस्त्वं शीघ्रफलदा न भविष्यसि दक्षिणे ॥ ततो दीनमना देवी संस्तुतो घस्तवैर्नवैः ॥ ततस्तुष्टोहमनया पुनरेनां समन्वविवान् ॥ म
हाविद्यां संपुटितोजप्त्वा यत्त्वां सुमध्यमे । ततस्त्वं शापनिर्मुक्ता भविष्यसि फलप्रदा । ततः प्रभृति विद्येयं द्रुतं च फलदायिनी ॥ साधकः
त्वं महाभाग जननीं वधमुक्तये ॥ इत्युक्त्वांतर्दधे शंभुर्भार्गवस्य हि पश्यतः ॥ भार्गवो हि मुनिश्रेष्ठस्तपस्येव मनो दधे ॥ शापो
द्धारं प्रवक्ष्यामि वशिष्ठमुनिना कृतं ॥ चतुर्विंशतिलक्षाणि जप्त्वा कोपेन सप्तवान् ॥ अद्य प्रभृति देवेशि कालिके कालरूपिणी ॥
तव मंत्रेषु संसिद्धिः कष्टेनैव भविष्यति ॥ इति श्रुत्वा महादेवी प्रादुर्भूता तापसाग्रतः ॥ उवाच पुत्र किमिदं शापदानं वृथा कृतं ॥ एवं
फलं यथा न स्यात्तथा कुरु मुनीश्वर ॥ ज्ञानं दत्तं पुराणार्थं दुर्लभं यत्सुरैरपि ॥ ततः प्रीत्या वरं लब्ध्वा ज्ञानविज्ञानसंयुतं ॥ उवाच प्री
तमनसा शापांतं मंत्रसंकटे ॥ मातः क्रोधेन कथितं तत्रोपायमहं वदे ॥ प्रणवं पूर्वमुद्धृत्य घोररूपे च दक्षिणे ॥ सिद्धिं कुरु द्वयं प्रो
च्य कालिकेति पदं ततः ॥ ममाभीष्टफलं शीघ्रं देहि द्रविणसंपदां ॥ जपादौ मंत्रमुच्चार्य जपांते च पुनः पठेत् ॥ भविष्यति ततः सि
द्धिरचिरात्परमेश्वरि ॥ ॥ अथ मंत्रावयवध्यानमाह ॥ तत्रवर्णस्य हृदयेनेत्रज्ञानान्मोक्षो मनोः सयः ॥ सिद्धिः सर्वविधानं स्या
त्साक्षाच्छिव एव साधको ध्रुवः ॥ श्रोत्रादीनां ज्ञानाभावे मंत्रस्य ग्रहणमात्रतः ॥ दारिद्रं च विपन्निस्तारकप्राप्तिर्यशोवंशः ॥ दीनोऽतिदु

खभागीपराजितःशत्रुपीडितःशोकी ॥ कुर्यादवस्थितविज्ञोमंत्री श्रोत्रादिविज्ञानं ॥ स्वेनातिमक्ष्याश्रोत्रादीनांगुरोर्ज्ञानंभवतितदा
कृतकृत्योलोकत्रयपूजितोनयमंत्री ॥ लयश्रोत्रामगास्याहछुन्याःशदशस्वराः ॥ गर्जिनीधूम्रभैरव्याअभावेचदशोस्मृतो ॥ मूला
र्णामुखमादिष्टंहृदयेस्वरशक्तयः ॥ सौरेतथागाणपत्येदौर्गेशैवेवैथवेस्मवे ॥ भौतिकेवमतावास्यहन्नेत्रंयोज्यतेयथा ॥ रुभिरक्षे
षमंत्राणांहन्नेत्रवदनानिच ॥ असवोस्यपरिज्ञेयाःसर्वतंत्रेषुगोपिताः ॥ वीजेरक्तमुखाःसर्वेमूलार्णेहृदयंस्वराः ॥ दक्षवाम
दशोवणीविवारेमध्यमाननः ॥ वीजाभावेमनोविधुवन्नेत्रमास्यंमनोहरी ॥ मूलार्णोहृदयंदंडीपाशोवस्वरशक्तयः ॥ चिंतामन
णिनृसिंहाख्योनेत्रास्यप्राणहत्स्मृती ॥ यत्रवीजाक्षरंमंत्रंतत्रसर्वसम्भवहि ॥ प्रधानपूर्वापरगाविकरायन्नदृश्यते ॥ तस्मनेः
त्रंविजानीयान्मुखेवशतजोक्षितं ॥ रक्तवर्जमनोमलेवर्णामास्यंप्रकल्पितं ॥ ॥ अथमंत्रार्थमाह ॥ वाच्यतावाचकभावेनस
र्वेमंत्राःप्रतिष्ठिताः ॥ यदेवतायायोमंत्रःसवाच्यासचवाचकः ॥ जपादौपूजयेन्मालांतोयेरभ्युक्ष्ययत्नतः ॥ विधायमंडलस्यां
तेसव्यहस्तगतांववा ॥ इष्टमंत्रेणमालायाःप्रोक्षणंपरिकीर्तितं ॥ ॐ मांमालेमहामालेसर्वशक्तिस्वरूपिणी ॥ चतुर्वर्गस्त्वयि
न्यस्तस्तस्मान्मेसिद्धिदाभव ॥ वाग्भवंवतथालक्ष्मीमक्षादिमालिकांतथा ॥ ऐं तांहृदयवर्णान्तोमंत्रेणानेनपूजयेत् ॥ पूजयित्वाततो
मालांगृह्णीयाद्दक्षिणेकरे ॥ जपंसमाचरेन्मध्येसर्वत्रध्यानमास्थितः ॥ चिंतयित्वागुरुंमूर्ध्नियथावर्णादिकंभवेत् ॥ मंत्रंध्यायेत्कंठ

मध्ये पीतवर्णां हिरण्मयीं। महामायां च हृदये स्वात्मानं गुरुपादयोः॥ आज्ञाचक्रे ततः पश्चाद्गुरोर्मंत्रस्य चात्मनः॥ देव्याश्चाप्येकतां
नीत्वा सुषुम्नावर्त्मना ततः॥ तत्त्वस्वरूपमेकं तत् षट्चक्रं प्रतिलंघयेत्॥ षट्चक्रेपि महामायां क्षणं ध्यात्वा प्रयत्नतः॥ लंघयेन्मूलमं
त्रेणाचादिषोडशचक्रकं॥ आदिषोडशचक्रस्थं साधकानंददायिनीम्॥ चिंतयेत्साधकां देवीं जपकर्म समारभेत्॥ ऋज्वोरूपरि
नाडीनां त्रयाणां प्रांतउच्यते॥ तत्प्रांतं त्रिपथस्थानं षट्कोणं चतुरंगुलं॥ तच्चक्रं कुलयोगज्ञैराज्ञाचक्रमितीरितं॥ कण्ठे त्रया
णां नाडीनां वेष्टनं विधते नृणां॥ सुषुम्नेडापिंगलानां षट्कोणं तत्वडंगुलं॥ तच्चक्रमिति शोक्तं भुक्तं कण्ठस्य मध्यगं॥ त्रया
णामपि नाडीनां हृदये चैकता भवेत्॥ तत्स्थाने षोडशारं स्यात्सप्तांगुलप्रमाणतः॥ तत्पीतपद्मं योगानां आदिषोडशचक्रगम्॥
एवं विचिंत्य मध्याया मध्यभागे तु मालिकां॥ मालां स्वहृदयासक्तां धृत्वा दक्षिणपाणिना॥ जपः स्यादक्षरावृत्तिः स त्रिधा परिकीर्तितः
हीनो वाग्जपः कायिको मध्यः श्रेष्ठस्तु मानसः॥ यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः॥ मंत्रउच्चार्यते वाचा हीनो सो वाचकः स्मृतः
शनैरुच्चारयन्मंत्रमीषदोष्ठौ प्रचारयेत्॥ किंचिछ्रवणयोग्यश्च कायिकः स तु मध्यमः॥ बुध्या पदाक्षरश्रेण्या यथा स्थानेषु चोच्चरेत्॥ अ
र्थस्मरणपूर्वं तु स श्रेष्ठो मानसो जपः॥ उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः॥ जिह्वाजपः शतगुणः सहस्रो मानसो जपः॥ यद्ध
र्मरूपाविकः स्यात्कायिकः सर्वसिद्धिकृत्॥ मानसः साधयेन्मोक्षं न तेन त्वः श्र [illegible] र्ण [illegible] न्यादिकं षडंगं च प्राणायामत्रयं पुनः

कृत्वा मंत्रं जपेत्पश्चात्षडंगादिकमाचरेत् देवतागुरुमंत्राणामैक्यं संभावयन् धिया सवासनां जपेद्विद्यां संतुष्टः स्थिरमानसः तर्जन्या न स्पृशेन्मालांमंगुष्ठाग्रेण चालयेत् पूर्वं मंत्रं जपन्यस्तु संस्पृशेदपरं मणिं अंगुष्ठेन भवेत्तस्य निःफलः स जपः सदा एकचित्तः प्रसन्नात्मा अक्षसूत्रकरः शुचिः अभग्नग्रीवोन्नतः शांतः करणोन्मीलनवर्जितः सविसर्गसमाक्षंच सविंदु साक्षरं स्फुटं न द्रुतं नापि विश्रांतं क्रमान्मंत्रं जपेत्सुधीः जपेदेकमनाः प्रातः कालात्मध्यंदिनावधि यत्संख्यया समालब्धं तत्कर्त्तव्यमहर्निशं यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टोभिजायते प्रातर्मध्यदिनं यावज्जपकालः प्रकीर्त्तितः न न्यूनं नातिरिक्तं वा जपं कुर्याद्दिने दिने नैरंतर्यविधिः कार्यो न दिनान्यतिलंघयेत् दिवसातिक्रमे पुंसां सिद्धिरोधः प्रजायते मंत्रं जपन्नपानीयस्नानाचमनभोजनं ध्यात्वेष्टदेवतारूपमात्मानं प्रजपेन्मनुं / अथ जपसंख्याकृते द्रव्यमाह नाक्षतैर्हस्तपर्वैर्वा न धान्यैर्न च पुष्पकैः न चंदनैर्मृत्तिकया जपसंख्यां न कारयेत् लाक्षाकुशीतसिंदूरं गोमयं च करीषकं विलोड्य गुटिकां कृत्वा जपसंख्यां तु कारयेत् संख्यापूर्त्तौ पुनः कुर्याद्दृष्ट्यादिप्राणसंयमान् जपांते चोत्तरशतं जप्त्वा शिरसि धारयेत् ग्रहणोत्स्थापने पूजाप्रोक्ता मालिकामनुः पंचाक्षरस्ततो देवं स्वेष्टं संप्रार्थयेदिति मूलमंत्रं समुच्चार्य देवहस्ते निवेदयेत् तं जपं चार्घतोयेन मध्याह्नसमये त्विदं तदूर्ध्वं पूर्ववत्स्नात्वा विशेषेण विधानतः न्यासावसानमखिलं कर्म कुर्यात्पुरोदितं पूजाग्निहोमपर्यंतं ततश्च जपमाचरेत् यावद्दिनावसानं तु भूयः स्नात्वा ततो द्विजः उपास्य पूर्ववत्संध्यां देवं संपूजयेत्पुनः विसृज्य भोजनं कुर्यात्स नक्तं तारकोदये सत्कंद

फलमूलाशी मद्भिक्षाशी हविष्यभुक् ॥ पयोव्रती भवेच्छुद्धस्तासां लक्षणमुच्यते ॥ आम्रफलं रत्नमूलं पिण्याककसेरुकं ॥ रक्तहस्ती
शंखमधुसालुकं श्रेष्ठमुच्यते ॥ द्राक्षाम्रजंबूपनसं कपित्थं खर्जूरिकादाडिमनारिकेलं ॥ पद्मकं क्षीरिणीचारतिंदुकं कर्कंधुधात्री
रुभवेत्पवित्रं ॥ शतमूलं त्वचोमूलं विमलं पंतमीजरा ॥ अकवाकुः कुवाकश्च मूले पाविघ्नकारकं ॥ वेदिकाचारयुक्तानां शुचीनां श्री
मतां सतां ॥ सत्कुलस्यानजातानां भिक्षाशी वाग्रजन्मनां ॥ चरुमूलफलं क्षीरदधिभिक्षान्नसक्तवः ॥ एतत्सप्तविधं भिक्षान्तत्सर्वं भक्ष्यं व्रतः
स्थितैः ॥ हविष्याणि तु पंचाशत्स्वेतान्यन्नाहिमोद्भवाः ॥ तण्डुलाष्षष्टिकानां वा नाश्च त्रिविधं तंदुला ॥ मुद्गा यवास्तिलाः क्रमाः कलाया
स्त्रिपुटाश्च पि ॥ अंगवश्च मकुष्टाश्च पावमानः कनंशिका ॥ कारकं शोववास्तूकं करमुहिंडमोचिका ॥ चक्रवर्ती वक्रमर्दं पलंकः शतपुष्पि
काः ॥ मूलं हेमंतजं चैतं राजकं माषजं तिलं ॥ मृणालं भृशली घोटा शतमूली विदारिका ॥ सैंधं पिण्यालकोशघ्नावाराहीत्वकसेरुकम्
आरुष्कारः कंचुकश्च केलूटे माणवारकौ ॥ सामुद्रसैंधवं गावो दध्याज्यं गोजमाहिषं ॥ दुग्धं ससारं मधुरं फलं प्रत्यल्पबीजकं ॥ पनसाम्रामलं
बिंबाविफाणितगुडेक्षवं ॥ हविष्यं भेषजं सर्वं हित्वामीनास्तुतंपलं ॥ ॥ श्रेष्ठं गवां दुग्धमुक्तं मध्यमं सुरभीभवं ॥ अधमं माहिषं चान्य
द्रुतस्थानां निषिध्यते ॥ न्यजं त्रिविधमाहारं मध्यमं शास्त्रनश्वयेत् ॥ निषिद्धदेशजलतः पृथक्शोधनः स्मृतः ॥ निषिद्धान्यथ कथ्यंते पंचा
शत्समतानि तु ॥ श्वेतमुक्तामसूराश्च कोद्रवाश्चवकास्त्रिधा ॥ माषाश्च भूमिलवणं पक्वजातं रसांतरं ॥ क्षौद्रं क्षारं च चपलां गृंजनं कांस्यभोज

नं मांसंचवश्चिक्लवणं माठकीवारमालकं अन्नंपर्युषितंतैलंताम्बूलंकृष्णधान्यकं पटोलंवापिवृन्ताकंमूलकंचकलिंजकं
दग्धान्नंचद्विषद्भक्षंगणान्नंचविसृष्टकं उपोदिकांवलशुनंपलाण्डुंफाणितंगुडं तुण्डीमलाबुंकूष्माण्डंगोजिक्कांचगडंविडं छत्राकं
स्कडरवर्जरीमधुकंतालजंफलं नूदंकुक्कुटमादांववेशांजरंकविभिंदे गजकोशानगणान्तंवध्याकर्कोटकीमिति / देवाविशे
षंश्रुतंत्वनुवर्णाश्रमविभेदतः तिलतैलंमंत्रपूतंपावनंदेवदुर्लभं मर्दयित्वागृहस्थेनस्नानंकार्यंहिसर्वदा द्विजेमृशोभनेका
र्यंभुपत्नीर्याभिघार्यच याचयेत्तैर्दिकैर्मंत्रैःप्रोक्षणादिककर्मणि पुनर्मूलेनसंमंत्र्यभुञ्जीयाद्धृदयाणुना मूलाभिमंत्रितंतोयं
भोजनेतुषिसंपिबेत् पलाशपत्रेभुंजीयान्मध्यपत्रविवर्जिते तदभावेकदल्यावामधूकेशार्ङ्गकेपिच भुक्त्वाशयीतशयनेमधुष्ठे
वसुधातले अहतास्तरणास्तीर्णेसंदर्भशयनेशुचौ मंत्रिमेमूलमंत्रेणजितक्रोधोजितेन्द्रियः अभिष्टदेवतांध्यायन्नाशिरस्को
निशिल्पयेत् अर्द्धरात्रेसमुत्थायपादशौचंविधायच आचम्यदेवंसंस्मृत्यशीघुंसंपूज्यपूर्ववत् जपंकुर्याद्यथाशक्तिरर्प्पयेत्तत्पेश्व
रे स्वप्नेतत्तत्सुयहृष्टंस्वप्नंतंगुरवेवदेत् जपश्चाद्यंवनस्यान्तांप्रोक्तोयंब्रह्मचारिणां देशापुपद्रवाभासाद्याचेत्तसमापनं क
र्तव्यंवेदयंकालाप्रोक्तोत्वावश्यकेपिच / आमध्याह्नंजपःश्रेष्ठोमध्यमःप्रहरत्रयं सार्द्धयामंत्रयंहीनोऽवश्यकेप्रोक्तरक्षणः पंचधा
त्रविधिःप्रोक्तोजपमंपुरस्कारकं आद्यकल्पःप्रतिदिनंमामध्याह्नंजपंचरेत् तदशांशेनकल्पोक्तद्रव्यैर्होमंप्रकल्पयेत् तर्प्पणंमा

कृत्वा तथा ब्राह्मणभोजनं॥ तत्र दशांशतश्चायं प्रथमः कल्प ईरितः॥ अथ द्वितीयकल्पस्य लक्षमेकं जपं चरेत्॥ होमादिकं तस्य कृत्वाग्रिमं लक्ष समारभेत्॥ अथयं तृतीयकल्पस्य संपूर्णजपमाचरेत्॥ पूर्णे होमे तर्पणादि पूर्ववमेवाचरेदिति॥ चतुर्थकल्प तथा कल्पोदरिडैर्द्विगुणो जपः॥ होमाद्यभावे कर्त्तव्यस्त्वाद्विनिघ्नो नपादिकैः॥ पंचमस्तु तथा कल्पो यस्य देवस्य च स्त्रियां॥ तदेव द्विगुणं कार्यं शीघ्रं देवतुष्टये॥ जपःप्रिया सर्वदेवा वाममार्गे वलिप्रियाः॥ पानप्रियास्तु सिद्धांते कौलिके तु रतिप्रियाः॥ होमप्रियो महादेवो भास्करस्तर्पणप्रियः॥ मार्जनस्तु गणेशस्य विष्णोर्ब्राह्मणभोजनं॥ संख्यापूर्त्तौ निजेष्टस्य जपसंख्या दशांशतः॥ यथोक्तमुंडे कुर्याद्यथावत्तु समाहितः॥ अथवा प्रत्यहं जत्वा कुर्यात्तद्दशांशतः॥ स्त्रीशूद्राभ्यां न होतव्यं मंत्रोच्चारणपूर्वकं॥ यदि कामी भवेच्छूद्रोपि होमकर्मणि॥ वह्निजायां परित्यज्य स्वाहास्थाने नमो वदेत्॥ ततो होमदशांशेन जलैः संपूज्य देवतां॥ तर्पयामीति मंत्रांते प्रोक्ताग्निमूर्ध्नि तर्पयेत्॥ तर्पणस्य दशांशेन नमोंतं मंत्रमुच्चरेत्॥ अभिषिंचेत्स्वमूर्द्धानं जलैः कुंभाख्यमुद्रया॥ ॥ विशेषस्तु तर्पणांते महामंत्री अभिषेकं तु कारयेत्॥ गोमयेनोपलिप्तायां भूमौ पद्मदलं लिखेत्॥ कलशं स्थापयेत्तत्र कलां वै प्रपूजयेत्॥ गंधदुर्वांकुरैर्वापि अशोकैश्चूतपल्लवैः॥ संपूज्य गंधपुष्पाद्यैरुपचारैः प्रपूजयेत्॥ मातृकामंत्रमुच्चार्य प्रत्येकं मंत्रमुच्चरेत्॥ अभिषिंचामीति पदं शिरस्याभिषिंचयेत्॥ मार्जनस्य दशांशेन कर्त्तव्यं विप्रभोजनं॥ होमकर्माद्यशक्तानां विप्राणां द्विगुणो जपः॥ इतरे

यांतु वर्णानां त्रिः चतुः पंचसंख्यया । होमद्विगुणजप्येन संपूर्णतर्प्यणं भवेत् । अकृते मार्जने प्रोक्तस्तर्पणाद्द्विगुणो जपः । इत्याम्नायो वुस
भोजेपनजत्रापि समयाश्रुतः ॥ सर्वथा भोजयेद्विप्रान् कृतसांगत्वसिद्धये । विप्राराधनमात्रेण व्यंगं सांगं प्रजायते । यानि यान्यपि कर्मा
णि हीयंते द्विजभोजनैः । निरर्थकानि तानि स्युर्वीजान्यूषरजानि च ॥ पुरश्चर्यां विधायैवं सम्यक्साधकसत्तमः । तदंते महती
पूजां कुर्याद्ब्राह्मणभोजनं । वसुभिर्वस्त्रभूषाभिः पूजयेद्गुरुमात्मनः । दीनानाथांश्च संतोष्य मंत्राः सिद्ध्यंति मंत्रिणां । गुरुं संतोषये
त्पश्चाद्धिरण्यवस्त्रादिभिः । गुरौ तुष्टे हि संतुष्टो मंत्रः सिद्ध्यति मंत्रिणः ॥ अथ वीरपुरश्चरणमाह । तत्र कालो यथा । गते तु ग्रहणे
यामे तत्तीयप्रहरावधिः । प्रजपंश्च निशायां च तत्रिशेषे जपेन्न च । हविष्यं भक्षयेन्नित्यमेकभक्तं तु संयतः । लघ्वाहारं प्रकुर्वीत युव
तीपूजनेरतः । पुरश्चरणकाले च परशक्तिं प्रपूजयेत् । क्षेत्रमादौ तु संशोध्य समं सत्त्वं मनोहरं । वेदिकां कारयेत्तत्र मध्ये मुण्डं विनिःक्षि
पेत् । अग्निना लेपनं कुर्यान्मध्ये वाष्टदलं लिखेत् । पूर्वादिक्रमतो ज्ञेयं स्वरयुग्मं लिखेत्क्रमात् । वर्गाष्टकं लिखेत्तत्र मध्ये प्रासा
दमालिखेत् । गगनं विंदुसंयुक्तं लांगलीशं तथैव च । सविसर्गवरारोहे केशरेषु लिखेत्ततः । तत्राधारादि संपूज्य आसनं स्थापयेद्बुध
उष्टविन्यासनं वीरो यद्वा तत्रापि चूडके । पाणिपात्रत्रयं कुर्यात्कोटिकावितयं ततः । दिग्बंधनास्त्रमंत्रेण पूर्वादिक्रमतो बुधः । वकेशांतेपि
नाकीशं नादबिंदुविभूषितं । पशुपदं समुद्धार्य परमांते नमोऽनुत्तमं । पशुपतास्त्रविधेयं सर्वविघ्नविनाशिनी । गोमयेन विलिप्तायांभ्

मौमरउत्तमालिखेत्। अलिना लेपनं कुर्या यक्षकर्दमकेन वा॥ सूत्रेण सूचितं पद्मं समसूत्रं मनोहरं। रक्तं श्वेतं हरिद्वर्णं कृष्ण
पत्रं सुकेसरं। चतुरस्रं सुशोभाढ्यं तन्मध्ये योनियुग्मकं। त्रिकोणं चैव तन्मध्ये सूत्वं स्रुत्वं विचिंतयेत्॥ योजयेद्दीक्षिता नारी·
तत्र संपूजयेन्मनुं। तत्रैव देवि संस्थाप्य ६ षड्वासां सुलोचनां॥ षोडशाब्देन युवतीमप्रसूतां तपस्विनीं॥ स्वाधीनां स्वच्छवस्त्रां
च भीतिहीनां दृढाहिनी। तीव्रबुद्धिं दृढाचारां मुक्तकेशां दिगंबरां॥ योगमुद्राभरां चापि योगाचारपरायणां॥ ईदृशीं मंत्रयुक्तां
न्वायागकाले प्रपूजयेत्। मातंगीतंतुकारी च भवा द्विभीतिनाशिनी। खट्टाकारी चर्मकारी शिल्पिनी नापिताङ्गना। हट्टनारी विशे
षात्तु सुपुष्पकीर्णकोमलां। सामान्यार्घविशेषार्घस्वपात्रं शक्तिपात्रकं॥ तन्मध्ये निक्षिपेद्द्रव्यं सामरस्यामृतोऽद्भवं। तत्त्वपंच
कमंत्रेण एकैकं शोधयेत्सुधीः॥ वह्निसूर्यकलाचंद्रकलांते हृदयं मनुः॥ त्रिकोणं विलिखेन्मध्ये त्रिकोणामकथादिकं। खा
न्तं षान्तं तथा नान्तं मान्तं धान्तं शसक्रमं। वामकर्णसमायुक्तं बिंदुनादैरलंकृतं। रत्नेश्वरीति विद्याख्यं पांचरत्नात्मकं मनुं। ष
डंगेनैव संपूज्य मूलमंत्रेण मंत्रयेत्॥ आसनं प्रथमं दत्वा स्वागतं च वदेत्सुनः॥ अर्घ्यं पाद्यं च पानीयं मधुपर्कजनं ततः॥ स्नाप
येद्गंधपुष्पाद्यैः केशसंस्कारमाचरेत्॥ धूपयित्वा ततः केशकोशं विनिवेदयेत्। तां तां शक्तिं समावाह्य मूर्छितां सां समानयेत्
भोज्यमंडपमध्ये तु स्वर्णपात्रे सुशोभने॥ चर्व्यं चोष्यं लेह्यपेयं भोज्यं चैव हि भक्ष्यकं। तत्रासां सव्यकर्णे तु ततस्तां च समाचरेत्॥

मानदे विनमस्तेस्तु ब्रह्मरूपधरेनघे। कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे॥ महेश्वरदेदेविपरमानंदरूपिणि। कृपयाहरविघ्नंमेमं
त्रसिद्धिंप्रयच्छमे। कौमारिसर्वविघ्नेशिकुमारक्रीडनेवरे। कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे॥ विष्णुरूपधरेदेविविनतासुतवा
हिनि॥ कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे॥ वाराहिवरदेदेविदंष्ट्रोधृतवसुंधरे। कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे॥ शक्ररू
पधरेदेविशक्रादिसुरपूजिते॥ कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे॥ चामुंडेमुण्डमालासृक्चर्चितेविघ्ननाशिनि॥ कृपयाहरवि
घ्नंमेमंत्रसिद्धिंप्रयच्छमे॥ महालक्ष्मीमहामोक्षोक्षोभसंतापनाशिनी॥ कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे॥ मातिमात्रमयेदेवि
मितिमात्रवहिःस्थिते॥ एकैवऽन्तरेदेविविश्वरूपेनमोस्तुते॥ एतत्स्तोत्रंपठेद्यस्तुमंत्रारंभेतुसंयुतः। विदध्यान्वासमालोक्यतस्य
विघ्नंनजायते। यद्विद्विजपरास्तास्तुभोजनेनतर्पहद्बुधिः॥ स्थितस्तोत्रंपठेत्तावद्यावत्तृप्तिःप्रजायते। आचम्यमुखवासादितांबूलंच
निवेदयेत्॥ ॥ ततोदद्यात्सुनर्मात्स्यंचंदनंपंक्तितंशुभं॥ विसृज्यप्रदक्षिणीकृत्यचरंप्रार्थ्यसुखीभवेत्॥ अन्यायदिनगच्छंतिनिज
कन्यानिजानुजा। अग्रजामातुलानीवाजननी-- त्पुत्रिका। वयस्याज्ञातिजावापिमधवावापिनिःपतिः॥ पूर्वाभावेपरांपूज्यामदंसा
योषितोयतः॥ एकाचेद्युवतिस्तत्रपूजिताचापिलोकिता। सर्वाएवतदादेव्यःपूजिताःकुलभैरवः॥ आरावंतेचमध्येवतस्यपूर्णोवि
शेषतः। नपूजयंतिचेत्कांतांतदाविघ्नैर्विलुप्यते॥ ॥ संवर्गांकंतंत्रीमाकिंपंचमुद्राविधानतः॥ अलिनापिशितंमीनंमुद्रामैथुनमेव

मकारपंचकंयत्रतत्रदेवीनसंशयः॥नमयंमाधवीमद्यमद्यशक्तिरसोद्भव॥कुकुन्नाशक्तिनीमत्स्यंमुद्राउन्मत्तनुत्तमा॥सामरः
स्यामृतोल्लासंमैथुनंतत्सदाशिवं॥सम्यकसिध्येकमंत्रस्यपंचांगोपासनेनच॥सर्वमंत्राःप्रसिध्यंतितत्प्रसादान्महेश्वरि॥ ॥एवं
प्रकुर्वतस्तस्यप्रथमेवत्सरत्रये॥भवंतिवहवोविघ्नाःश्रद्धाभावादयोऽशुभाः॥अस्मिन्नर्थेभवेन्मंत्रीयदिनोद्विमानसः॥सिध्यं
तीतिचविश्वासस्तदासौसिद्धिभाग्भवेत्॥नवमाद्वत्सरादूर्द्ध्वंस्वयंसिध्यतिमंत्रराट्॥सिद्धेसुत्रीणिचिह्नानिदाताभोक्ताभया
वकः॥ ॥अथमंत्रसिद्धिचिह्नानि॥सिद्धिद्वारामहन्नस्यचिह्नंलक्षणमुच्यते॥स्वप्नेवाक्षिसमक्षंवाआश्चर्यमतिहर्षदं॥अक
स्माद्यदिजायेततन्नख्यातव्यंगुरोर्विना॥प्रकाशनीयंनक्वापिहेहिकिंसिद्धिमिच्छता॥प्रकाशयतियोमोहादेतत्स्वान्मंत्रजंसुखं॥
निकटस्थाश्चतास्तस्यसिद्धयोयांतिदूरतः॥आविर्भवंतिदुःखानिशोकाश्चविविधाअपि॥अल्पाशनंस्वल्पनिद्रासदाचिन्नप्रसन्नता
नातासौम्यारिहृदयेमंत्रसिद्धिमयानवे॥अत्यानंदप्रदास्याश्चप्रत्यक्षेणावहिस्तथा॥जडधीसुक्षणांविप्रक्षणमस्तिप्रहर्षितः॥अ
लंडुंडुभितिघोषंम्ग्रोत्पथ्यंतरिक्षतः॥क्षणंचमधुरंवाद्यंनानागीतसमन्वितं॥आजिघ्रतिक्षणंगंधात्कर्पूरमृगनाभिजान्॥अप्स
नंतंक्षणंवापिपश्यत्यात्मानमात्मना॥चंद्रार्ककिरणाकीर्णंक्षणमालोकयेन्नभः॥गजगोवृषनादांश्चशृणुयात्क्षणंद्विजः॥नि
मेरायतसंक्षोभंक्षणमाकर्णयंत्यपि॥तारकाणिचिविश्राणियोगिनांनभसिस्थितान्॥पश्यत्सुज्ञाहृयंतंवक्षणांमंत्रव्रतीसदा॥

चतुर्दशीं समारभ्य यावदन्या चतुर्दशी॥ तावज्जपेमहेशानि पुरश्चरणसिध्यते।। केवलंजपमात्रेण मंत्राः सिद्धा भवंति हि॥ वलिहोमादि
दानेन विशेषात्पीठपूजने॥ योनिपीठं महापीठं कामरूपं तथापरं॥ तयोरेकतमंप्राप्यं रुद्रदेहद्वापरः॥ ॥अथवान्यप्रकारेण
पुरश्चरणमुच्यते॥ महालक्ष्मीं समारभ्य आमहानवमीश्वरी॥ सस्माष्टम्यामानवमिमध्येशाक्ते मनोस्मृतं॥ उज्जैनपसिराधेवा
शुक्लपक्षस्तुवैष्णवे॥ एकादश्यां तु शैवे तु भूतांतः फाल्गुने मतं॥ भाद्रेपि वैष्णवेतु माघमाघे तु वासरा॥ अन्येष्वपि च मंत्रेषु पूर्वो
क्तनवरात्रकं॥ तपोमासत्कया प्रातः कालात्मध्ये दिनावधिः॥ रात्रौ याममितः कार्य्यं पंचमूलफलाकृतिः॥ चतुर्थयामे कर्तव्याः
मालामंत्रे दशांशतः॥ विंशांशाद्वादशांशश्चान्येष्वपि गतं मतं॥ दक्षिणाचयथोक्तात्र वित्तशाठ्यं न कारयेत्॥ एवंमंत्रः प्रयोगा
होभवत्येव न संशयः॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ कुजे वा शनिवारे वा नरमुण्डं समाहृतं॥ पंचगव्येन सिलितं चंन्द
नाद्यैर्विशेषतः॥ निक्षिप्य भूमौ हस्तार्द्धमानतः कानतांतरे॥ ततस्तत्र दिवसे रात्रौ सहस्रं यदि साधकः॥ एकाकी साधयेन्मंत्रं स भ
वेत्कल्पपादपः॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ शवमानीय तद्द्वारे तेनैव परिखन्यते॥ तद्दिनान्नदिनं यावन्नावद्दष्टो
त्तरं शतं॥ सभवेत्सर्वसिद्धीशो नात्र कार्या विचारणा॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ अष्टम्यां वा चतुर्दश्यां पक्षयो
रुभयोरपि॥ सूर्योदयात्समारभ्य यावत्सूर्योदयांतरं॥ तावज्जप्त्वा निराहारः सर्वसिद्धीश्वरो भवेत्॥ ॥अथवान्यप्रकारेण पुरश्च

क्षणं किलिकिल्लारावं हंसवर्हिरवं तथा। क्षणाम्मेघोदयं पश्येत् क्षणांरात्रिं दिने सति॥ रात्रौ च दिवसालोकं ससूर्यं क्षणमीक्षते
बलेन परिपूर्णाश्च तेजसा भास्करोपमः॥ पूर्णेन्दुसदृशः कान्त्या गमने विहगोपमः॥ समेन युक्तः प्रौढेन गाम्भीर्येण सुखेन च॥
स्वल्पासनेनाशक्तताव ऊनापि न खद्यते॥ विरान्नत्रयोरल्पत्वं हि भवेन्निद्रा जपस्तथा। जपध्यानगतो मन्त्री न खेदमधिगच्छति। वि
नाभोजनपानाभ्यां पक्षमासादिकं नयेत्॥ ज्योतिः पश्यति सर्वत्र शरीरं वायुकाशयुक्॥ निजं शरीरमथवा देवतामयमेव हि। इ
त्येवमादिभिश्चिह्नैर्महाविस्मयकारिभिः॥ प्रयत्नैः संप्रवोढव्यं प्रसन्नो मन्त्रसंततिः॥ एवं सिद्धे मनो देवा मोक्षमार्गनिरोधकाः
तपक्षयकराश्चैव जायंतेऽनेकसिद्धयः॥ स्वप्रसिद्धौ निमग्नश्चेन्न जायंतेऽणिमादयः॥ अणिमादिषु मग्नश्चेन्मोक्षवार्त्तातिदुर्लभा॥
अल्पं तपः क्षणान्नश्येत्सध्यमं वापि वर्गतः॥ तस्मात्सिद्धावनास्थां च कृत्वा मन्त्रं समभ्यसेत्॥ ॥अथ चान्यप्रकारेण पुरश्चरणमुच्य
ते कृष्णाष्टमीसमारभ्य यावत्कृष्णाष्टमी भवेत्॥ सहस्रसंख्याजपेन तु पुरश्चरणमुच्यते॥ ॥अथ चान्यप्रकारेण पुरश्चरणमुच्य
ते वाममार्गीयमन्त्राणामेवमेवान्यदुच्यते॥ कृष्णाष्टमीसमारभ्य यावत्कृष्णचतुर्दशी॥ एवं ध्यात्वा जपेन्मन्त्रमयुतानां चतुष्टयं
दशांशं होमयेत्पश्चात्तर्पयेदभिषेचयेत्॥ ॥अथ चान्यप्रकारेण पुरश्चरणमुच्यते॥ कृष्णाचतुर्दशीं प्राप्य नवम्यन्तं महोत्सवे
अष्टमीनवमीरात्रौ पूजां कुर्याद्विशेषयेत्॥ दशम्यां पारणां कुर्यात्मत्स्यमांसादिभिर्युतः॥ षट्सहस्रं जपेन्नित्यं भक्तिभावपरायण

रणमुच्यते॥ शरत्काले चतुर्थ्यादिनवम्यंतं विशेषतः॥ भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकं॥ जपेदेकस्तु विजने केवलं तिमिरालये॥ अष्टम्या
दिनवम्यंतमुपवासपरो भवेत्॥ स भवेत्सर्वसिद्धीशो नात्र कार्या विचारणा॥ ॥अथवान्यप्रकारेण पुरश्चरणमिष्यते॥ अष्टमीसंधिवेलाया
मष्टोत्तरलतागृहं॥ प्रविश्य मंत्री विधिवन्नाः समभ्यर्च्य यत्नतः॥ पूर्वोक्तकल्पमासाद्य पूजादिकं समाचरेत्॥ केवलं कामदेवोसौ जपेदष्टोत्त
रशतं॥ तासां तु यत्र मूले वजस्वा स गृहमस्तके॥ महासिद्धिर्भवेत्तस्य योलनादर्शनपूजनात्॥ ॥अथवान्यप्रकारेण पुरश्चरणमिष्यते॥ आकृ
ष्माया: कुलागारे लिखित्वा मंत्रमेव च॥ संपूज्य तत्र संस्कारं कृत्वा तस्यै निवेद्य च॥ किंचिज्ज्ञ मांसमन्नं नीत्वा देवताभावतत्परः॥ तां विसृज्य नमः
स्कृत्य स्वयं सुखासुसंयुतः॥ प्रातः स्त्रीभ्यो बलिं दत्वा मंत्रसिद्धिर्न संशयः॥ गुरुमानीय संस्थाप्य देववत्पूजनं विभोः॥ वस्त्रालंकारहेमाद्यैः सं
तोष्य गुरुमेव च॥ तत्सुतं तत्सुतां चैव तत्पत्नीं चैव पूज्य च॥ पूजयित्वा मनुं जप्त्वा स्वयं सिद्धीश्वरो भवेत्॥ ॥अथ ग्रहणपुरश्चरणं॥ चंद्रसूर्य
ग्रहे देवि ग्रासावधि विमुक्तितः॥ यावत्संख्यामनुं जप्त्वा तावद्धोमादिकं चरेत्॥ पंचांगतां वदेत्स्याज्जपहोमौ समौ स्मृतौ॥ सिद्धेश्वरीमतं प्रोक्तं सर्वसि
द्धिप्रदायकं॥ चक्षुषा दर्शनेराहोर्यत्र ग्रहणमुच्यते॥ चक्षुषा दर्शनेराहोर्मुक्तिर्ग्रहणमोचने॥ पुरश्चरणकार्ये तु सूर्यचंद्रग्रहस्त्वयं॥ चक्षुषा
दर्शनेराहोरित्यत्र मुख्यता मता॥ ॥अथवान्यप्रकारेण पुरश्चरणको विधिः॥ चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः॥ संस्पर्शादिविमोक्षांतं ज
पेन्मंत्रमनन्यधीः॥ दृष्ट्वा स्नात्वा तु संकल्पो विमोक्षांतं जपं चरेत्॥ तावद्धोमादिकं कुर्याद्ग्रहणांतेषु विप्रतः॥ ॥अथवान्यप्रकारेण पुरश्चरण

उच्यते ॥ सूर्यवंशोपरागेतु नाभिमात्रोदके स्थितः ॥ ग्रासादिमुक्तिपर्यंतं जपं कुर्यान्महेश्वरि ॥ तद्दशांशं होमयेद्धि तद्दशांशे स्त्वयं क्रमात् ॥
अनेन क्रमयोगेन संगमे संजपेद्यदा ॥ एकांगुष्ठोपरि स्थित्वा ग्रासावधि विमुक्तितः ॥ पंचांगं वाथवाष्टांगं दशांगा स्वपुरस्क्रिया ॥
कुर्याद्यत्नेन देवेशि सर्वसिद्धीश्वरो भवेत् ॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥ ग्रहणेर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः ॥
घटिकार्द्धं पूर्वमेव ग्रहणोपरिवर्त्तते ॥ तदा स्नानं विधातव्यं ग्रसे संकल्पमाचरेत् ॥ ज्ञानशौचं मृताशौचं ग्रहणे नास्ति पार्वति ॥ विमो
क्षांतं जपं कुर्यात्स्पर्शकालाते समापनं ॥ सूर्याच्छन्ने अनायाते घटिकार्द्धं विचारयेत् ॥ ततः समापनं कुर्यात्सिद्धिमंत्रो भवेद्ध्रुवम् ॥
प्रमादात्स्खलिते योगे वसु विप्रान्सुभोजयेत् ॥ यद्यदंगं विहीयेत तत्संख्यं द्विजभोजनं ॥ दशांशहवनं कुर्यात्तर्प्पणं तद्दशांशतः ॥
मार्जनं तद्दशांशेन दशांशेनाभिषिंचनम् ॥ दशांशं विप्रभोज्यं च देवरूपो नरो भवेत् ॥ यद्यदंगं विहीयेत तत्संख्याद्विगुणो जपः
द्वित्रिवेदचा समभेदैर्विप्रादीनां क्रमः स्मृतः ॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥ सूर्योदयं समारभ्य यावत्सूर्योदयांतरं
तावज्जप्त्वा निरातंक सर्वसिद्धीश्वरो भवेत् ॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥ सूर्यास्तं च समारभ्य सूर्यास्तं यावदेव तु
तावज्जप्त्वा निरातङ्क सर्वसिद्धीश्वरो भवेत् ॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥ सूर्योदयं समारभ्य यावद्दष्टमयं भवेत्
तावज्जप्त्वा जयेद्देवि सर्वसिद्धीश्वरो भवेत् ॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥ सूर्यास्तं च समारभ्य यावत्सूर्योदयो भवेत्

जप्त्वा सर्वसिद्धीश्वरो भवेत्॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ पर्वते विपिने वान्ये नवरात्रं जितेन्द्रियः॥ मणोपरि भवेत्कुंडं कपा
लं च तत्तोपरि॥ तत्र दीपं च प्रज्वाल्य दीपालोकनतत्परः॥ नवरात्रं जपेद्देवि दीपालोकनतत्परः॥ मूलमंत्रं कपालेषु कोमार्य्याबीज
मुत्तमं॥ सिंदूरेणाकृतं यंत्रं सर्वसिद्धीश्वरो भवेत्॥ ॥अथ समालसपुरश्चरणं॥ अयोग्यगुरुतो लब्धा वार्यादिस्थानमाश्रिताः॥
उद्देशत्वा पुरश्चर्यां कर्त्तुं वेछकतेन हि॥ राज्ञो भाग्यमतो वापि सुकुमारस्य वा यथा॥ सिद्धिर्भवेन्नथा वक्ष्ये वर्णौषधिपरिक्रियां॥ सप्त
धासापरि ज्ञेया वर्णमासे सुसिद्धिदा॥ मंत्रवर्णौषधीकाष्ठे रचयेद्गुटिकाः शुभाः॥ वर्णक्रमेण ताः प्रोक्ता अनुलोमविलोमतः॥
स्थूलादिकाश्च लघ्वंताः कर्त्तव्या मननयोयथा॥ सर्पवत्या कृती माली भवेन्नित्यं तया जपेत्॥ मालाया मणिसंख्यांकं प्रथमो यंत्र
पः स्मृतः॥ सर्वे समानामणयः प्रोक्तव्याः स्वर्णसूत्रके॥ कंठे धार्या कंठमाला नित्यमेषा द्वितीयकः॥ तथैव राजते सूत्रे प्रोज्यताः परिस्र
जयेत्॥ तद्देवकल्पमार्गेण प्रक्रमो यंत्रतीयकः॥ वर्णौषधीनां क्वाथेन नित्यस्नानं चतुर्थकः॥ वर्णौषधिरजोलेपंगो घृतेन तु पंचमः
तद्वर्णाहर्त्तनं कुर्याद्देशषष्ठः प्रकीर्तितः॥ तद्रसधारणानि स्युः कुर्यादिति तु सप्तमं॥ चुल्लहेमा गुरुर्देवास्त्री ते धावनजायते॥ ८
अथ मंत्रसिद्धिदीपो यथा॥ अथातः संप्रवक्ष्यामि सर्वतंत्रेषु गोपितं॥ मंत्रसिद्धिकरं दीपं न वाच्यं यस्य कस्यचित्॥ शस्त्रापहर्गणार्केषु
भक्तो वर्णप्रजायते॥ मंत्रवर्णस्य दिवसे क्रमादीपं प्रकल्पयेत्॥ सायं तु गुडवास्य सवर्णान्नैवेद्यं चतुर्भिः॥ यावज्ज्वलति दीपो सौ तावन्मंत्रं जप

तावज्जपेन्महेशानि सर्वसिद्धीश्वरी भवेत्॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ शरत्काले चतुर्थ्यादि नवम्यंतं महेश्वरिले
मरूपी पुरश्चर्या सर्वसिद्धीश्वरी भवेत्॥ ॥अथ तर्पणारूपं च पुरश्चर्यां ब्रवीमि ते॥ दुग्धेनासवतोयेन रक्तैर्मज्जाभिरेव च॥ मधु
नागं धत्तोयेन रक्तधाराभिरेव च॥ केवलं शुद्धतोयस्य तर्पणेन महेश्वरि॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ तथा मार्जनरू
पं च पुरश्चर्यां चरन्शिवः॥ ब्राह्मणान्कुमारिकां भोज्य जपात्सिद्धीश्वरो भवेत्॥ ॥अथवान्यप्रकारेण पुरश्चुच्यते॥ पूजारूपं पुरश्च
र्यां केचिद्वदंति तांत्रिकाः॥ शरत्काले चतुर्थ्यादि नवम्यंतं महेश्वरि॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ दिवा जपेन्युङ्सहस्रं रात्र
वपि तथा जपेत्॥ एवं क्रमेण देवेशि सर्वसिद्धीश्वरो भवेत्॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ दिवा जपेन्युङ्सहस्रं तावत्स्तोमं वरात्रि
शि॥ सर्वसिद्धीश्वरो भूयादतोन्यं श्रृणु पार्वति॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ नित्यं कृत्यं दिवा कृत्वा केवलं तिमिराल
ये॥ रात्रौ जपेन्नरापरः सर्वसिद्धीश्वरो भवेत्॥ सहस्रमात्रं प्रजपेद्दानिषान्नपरायणः॥ सर्वसिद्धीश्वरो भूयाद्दिनान्तसिद्धिमाप्नुयात्
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ गानमंडलगो जप्त्वा त्रैलोक्याधिपतिर्भवेत्॥ ॥अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ दिवाज
पेद्विक्तरत्वं रात्रौ पूजां चरन्जपेत्॥ सहस्रमात्रं प्रजपेद्दानिषान्नपरायणः॥ ॥सर्वसिद्धीश्वरो भूयाद्वेतालसिद्धिमाप्नुयात्॥ ॥
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ प्रतिपत्तु समारभ्य नवम्यंतं महेश्वरि॥ एकांते पर्वते शून्ये केवलं तिमिरालये॥ उदयास्तमयं जः

सहस्रनामरूपं वै कीदृशं परमेश्वरि॥ तथा च कवचं देवि किंरूपं परिकीर्त्तितं॥ शिवदेव्यास्तु संवादो ब्रुत्संधेति कीर्त्तितः॥ अन्ये श्लोका
केशतुल्या ऋषिः शिर इतीरितं॥ छंदो मुखं भवेद्देवि देवता हृदयं भवेत्॥ बीजं गुह्यमिति प्रोक्तं शक्तिस्तु परगा मता॥ सर्वांगं कीलकं
देवि ह्यर्थवादः प्रकीर्त्तितः॥ स्तोत्रमध्ये स्थितं यद्यत्तत्सर्वं स्तोत्ररूकम्॥ एवं च देवदेवेशि स्तोत्ररूपं प्रकीर्त्तितम्॥ तथैव कवचं
देवि ज्ञात्वा पाठं पठेत्प्रिये॥ अंगहीनं भवेन्नाशः सर्वथा परमेश्वरि॥ फलस्तुत्यादिकं देवि गारिति त्वभिधीयते॥ आद्योपांतं विना दे
वि फलमर्द्धं प्रकीर्त्तितं॥ अत्रार्थे अत्ययो देवि षड्गाथा यथास्मृतं॥ हवनं कवचादीनां श्लोकांते विहितं च वा॥ आद्योपांतं पठित्
वा पश्चात्तु हवनं मतं॥ अथवा देवदेवेशि नामांते हवनं मतं॥ कवचादावपि प्रिये मंत्रांते हवनं भवेत्॥ उपक्रमस्य संहारी श्लोकां
ते हवनं मतं॥ आदौ पूर्णे तु संपद्य तथैवांते महेश्वरि॥ मध्ये नामानि पाद्यानि पुरश्चर्या प्रकीर्त्तिता॥ श्लोकांते हवनं प्रोक्तं श्लो
कांते मार्जनादिकं॥ ततः स्तोत्रोक्तविधिना पुरश्चर्यादिकं चरेत्॥ स्तोत्रमावर्त्य संपूर्णं तदंते गणनां चरेत्॥ संपूर्णहोमयोगोयं कथित
स्तु प्रिये वदेत्॥ मार्जनाभिषेककर्म कुर्यादत्र महेश्वरि॥ सारूप्यं कवचाख्यं च सायुज्यं स्तोत्रमीरितं॥ सांनिध्यं नामसाहस्रं त्रित
यं परिकीर्त्तितं॥ कवचं कवचरूपं स्यात्स्तोत्रं सहचरो भवेत्॥ सहस्रनामस्तोत्रं तु पूजास्थाने प्रकीर्त्तितं॥ पूजा दुर्गस्वरूपा स्यात्तद्बलि
दानं तु मारणं॥ मंत्रो राजा पुरश्चर्या राज्यसंपत्तिरीरिता॥ संपत्त्यास्तु विना राज्ञो [illegible] महेश्वरि॥ संपत्तिः फलमेतद्धि सर्वमेव प्रकीर्त्ति

मन्तुं जपेत्॥ मंत्राणां संख्यदीपे प्रज्वलिते स्थपनदिने॥ उनदीपे हुते सातुदीपमदर्शने स्फुटं॥ इष्टस्वकीयं कथये पाचं येन्मनसेप्सितं म
दताति देवतानुष्टा गुह्यते मत्प्रकाशितम्॥ ॥ अथ शावरमंत्रपुरश्चरणं॥ अथ शावरमंत्राणां पुरश्चरणमुच्यते॥ कामरूपाख्यदे
शे तु कामाक्षा यत्र देवता॥ कामशैलोस्ति यत्रासौ कामपीठं तदुच्यते॥ तत्र मंलेख्य मंत्रं हि वंशोपरि यथाक्रमं॥ गुरुणा वाचनीय
सस्वयं पश्चात्पठेन्मनुं॥ गुरोरभावे तस्यैव मूर्तेशे तस्य पर्वतिं॥ लिखित्वा प्रपठन्मंत्रं कामपीठं गुरुर्मतः॥ अथवा योगिनीशो
तं ~~मंत्रमस्तुजपे~~ने दक्षिणास्यां दिशि ध्रुवं॥ योगांवा यत्र देवी सा लिखित्वा प्रपठेन्मनुं॥ ज्वालामुखी समीपे वा हिंगुलाया समी
पतः॥ लिखित्वा प्रपठेन्मंत्रं नान्यथैव प्रसिध्यति॥ मुख्यतः स्त्री समीपे हि कामपीठमनोर्ग्रहः॥ अथवा सर्वदेशेषु मंत्रग्रहणं
मुच्यते॥ तालपत्रे मनुं लिख्य पूर्णाकुंभे निधापयेत्॥ भास्करं तु गुरुं ध्यात्वा वाचयेच्छ्रीगुरूरविः॥ इति शावरमंत्रपुरश्चरणविधिः
अथ सहस्रनामस्तवकवचानां पुरश्चरणं॥ ॥ ईश्वर उवाच॥ सहस्रनामस्तोत्रेषु कवचेष्वपि पार्वति॥ तत्कवचादिषु प्रोक्ता
सो वै कार्या पुरस्क्रिया॥ यत्र नोक्ता पुरश्चर्या तत्र किं वा विधीयते॥ अथ तु तत्पुरश्चर्या स्तोत्रमात्रे प्रकीर्तिता॥ सहस्रनामकवचे पु
रश्चर्यात्वियं मता॥ एवं पुरस्क्रियां कृत्वा दशांशं हवनादिकं॥ तर्पणं मार्जनं देवि कुर्यात्विस्तरिकीर्तितं॥ महाकालमते प्रोक्तं तत्र स्थ्यं
त्समाचरेत्॥ विप्रभोजनमेवात्र सर्वथा कारयेत्प्रिये॥ विप्रसंतोषणेनैव सर्वे सिध्यन्ति पार्वति॥ हवनं तु कथं कार्यं पुरश्चर्याकृपं भवेत्

तं॥ होममंत्रमिति प्रोक्तं पर्जन्यास्त्रं तु तर्पणं॥ जलदुर्गस्वरूपं वै त्वभिषेकः प्रकीर्त्तितः॥ ब्राह्मणानां भोजनं तु दुष्टसैन्यप्रभक्षणं म
देवतागुरुविप्रैकत्वान्मैत्र्यं परिभाव्य च॥ सर्वसिद्धीश्वरो भूत्वा त्रैलोक्याधिपतिर्भवेत्॥ यथा च राजा राज्यादेः शत्रुसैन्यभयं भवे
त्॥ सिद्धिराज्यं महादेवि तथैव परिकीर्त्तितं॥ दुर्गाद्यष्टादिकं देवि देशराज्ये यथा मतं॥ तथैव सिद्धिराज्यस्य पुरश्चर्यादिकं मतं
मंत्रो राजा गुरुर्मंत्री गणेशो द्वारपालकाः॥ साधनं शवमुण्डस्य सिंहासनमितीरितं॥ साधकेन तथा कार्य्यं येन सर्वं तु सिध्यति॥ नै
मित्तिकं च काम्यं च हयद्विरदकौ मतौ॥ होमधूमः पताका स्यात्ततस्तु सिद्धिभूमिकाः॥ सिद्धिराज्याधिपे देवि किं न सिध्यति भूतले॥
षोढान्यासादिकं सेना देवता राज्यदायिका॥ यंत्रं तु वज्रदुर्गं तु जीवचक्रं त्वभेदकं॥ कवचादि पुरश्चर्या प्रोक्ता किं श्रोतुमिच्छसि॥ ॥
अथ यंत्रपुरश्चरणमाह॥ आदौ यंत्रस्य सिद्ध्यर्थं तन्मंत्रस्य पुरस्क्रियां॥ कृत्वा युतप्रमाणेन पश्चाद्यंत्रस्य चाचरेत्॥ यथाधारे यथा
द्रव्ये यंत्रं संलिख्य यत्नतः॥ तत्रावाह्य च तद्देवं संपूज्य विधिपूर्वकं॥ ध्यात्वा जपं बलिं होमं कृत्वा देवं विसर्जयेत्॥ एकैकवारमावल्यः
मंत्रं यंत्रं स्मरन् बुधः॥ इत्थं जपादिभिः सिद्धे यंत्रं नासाध्यता क्वचित्॥ दिक्सहस्रप्रमाणेन यंत्रे कार्या पुरस्क्रिया॥ ॥इति श्रीतंत्र
चिंतामणौ पुरश्चरणनिर्णयो नाम एकत्रिंशत्तमः प्रकाशः॥ ३१ ॥अथ द्वित्रिपुरश्चरणैर्मंत्राणामसिद्धत्वे सति पुनस्तत्रोपायमाह
तथा च॥ सम्यगनुष्ठिते मंत्रे यदि सिद्धिर्न जायते॥ पुनस्तेनैव कर्त्तव्यस्ततः सिद्धिर्भवेद्ध्रुवं॥ पुनश्चानुष्ठिते मंत्रे यदि सिद्धिर्न जायते॥ ड

पायास्तत्रकर्त्तव्याः सप्तशंकरभाषिताः ॥ असित्कृत्वा गुरोरेव शिष्यसिद्धिर्न जायते ॥ तदोपायं प्रकुर्याद्यत्नमोघमधुनोच्यते
अनुलोमविलोमेन बिन्दुमन्मातृकाक्षरैः ॥ जपेत्संपुटितं मंत्रं प्रत्यहं शतसंख्यया ॥ एकमासं ततो होमादिकात्सिद्धो भवेन्मनुः
पुरश्चर्याक्रमं खिलं माहिकं च समाचरेत् ॥ क्रूरदैवतमंत्रं तु भूतलिप्यापुटीकृतं ॥ ॥ क्रमोत्क्रमाक्षरावृत्तिं कुर्यात्सिद्धिः
स्त्रमासतः ॥ ॥ अथवोहयरवलांश्चांतिमादिद्विचतुर्थकं ॥ तृतीयं च क्रमेणैव वर्गाणामक्षरं पठेत् ॥ ङञणत्रयं ततश्चैव द्विचत्वा
रिंशदक्षरैः ॥ असग्रैर्देवते जाप्यस्त्वष्टोत्तरसहस्रकं ॥ त्रिकालं गंधपुष्पाद्यैर्निशीथे पंचमैः पुनः ॥ एवमासं कौलिकाधैश्च अ
र्चिता तु प्रसीदति ॥ ॥ शापतो वा कीलितत्वान्मंत्रोपायाष्टकं भवेत् ॥ संपाताप्यायने जपो बोधनं च वशीकृतिः ॥ पीडनं पोषः
शोषो वद्दहनं तत्क्रियोच्यते ॥ भूर्जपत्रे समानीय पद्ममष्टदलं लिखेत् ॥ अष्टगंधेन देवस्य रोचनाचंदनेन वा ॥ साधकस्य तु नामा
र्णौ मंत्रं संदर्भितं लिखेत् ॥ यावत्तद्वर्णोः समाप्तिः स्यात्तस्य वा पंतयो लिखेत् ॥ तारादिकं साधकस्य नामाद्याष्टदले पुनः ॥ छोछौले:
रयोः स्वरैस्तत्र सम्यग्ध्यायन्तु धात्मकं ॥ ततं ठव्यम्रदास सप्तवेष्टयेद्भूस्तरादिकं ॥ भुक्तादिवर्णायापश्चात्सिक्थकेन वेष्टयेत्
क्षिपेत्त्रिमधुरे तत्तु मृण्मये लघुभाजने ॥ क्षीरपूर्णे नवे कुंभे तत्क्षिपेल्लघुभाजने ॥ अग्निसंस्थापनं कृत्वा संनिधौ तस्य तं घटं ॥ सं
स्थापयेत्त्रिमधुरैर्मूलमंत्रेण होमयेत् ॥ अष्टाधिकसहस्रं तु संपातं कलशे क्षिपेत् ॥ होमं समाप्य तं कुंभं निक्षिपेज्जलाशये ॥

तदेशानीयस्मिंस्तेहोस्तिमांप्रति॥ ईश्वरउवाच॥ यस्मिन्परिश्रमेनापिनराणांसिद्धिःसमीरिता।नजातातत्रकर्त्तव्यासाधकैर्वीरसाध
ना॥पुरासिद्धैर्नपाराणांचकर्त्तव्यैस्समुपास्यते।नान्यत्सिद्धिकरंशीघ्रंवीरसाधनवर्जितं।तस्मात्सर्वप्रयत्नेनविधेयावीरसाधना।भ
यमुक्तेनभुविनासर्वसिद्धिमभाप्स्नता।नानयादुर्लभंकिंचित्साधकस्यसमीहितं।गिरिजेतत्प्रयत्नेनमयाद्येयंप्रकाश्यते॥अष्टम्यांचच
तुर्दश्यांपक्षयोरुभयोरपि।कृष्णपक्षेविशेषेणसाधयेदनयाहितं॥ ॥देव्युवाच॥महावीरक्रमंदेवत्वत्सूचितंनप्रकाशितं।कथयस्वम
हादेवसर्वसिद्धिप्रदंमहत्॥ ॥भैरवउवाच।सर्वसिद्धिप्रदंसाक्षात्सर्वदेवनमस्कृतं॥सर्वपापहरंदेविसर्वरोगविनाशनं।ब्रह्मविष्णुशि
वादीनांदिक्पालानांचभाविनि।भैरवाणांचसर्वेषांगंधर्वाणांचयोगिनां।शीघ्रसिद्धिप्रदंदेविसर्वेषामालयंमहत्।नान्यत्सिद्धिप्रदंदे
विवीरसाधनवर्जितं॥महाबलोमहावीरोमहासाहसिकःशुचिः।महास्वच्छोदयावांश्चसर्वभूतहितेरतः॥तेषांकृतेमहादेविकथितंवीर
साधनं॥ ॥धरीवस्त्रेणवेष्ठवैमूलेनपरिधायच।तदाहेचपुनर्वस्त्रंमूलेनांगविलेपनं।कृतोमीषष्ठमूलेनसिंदूरेनार्द्धकुंकुम।
इष्टदेवंगुरुंनत्वायात्राप्रहरमध्यतः॥कार्याच्चसाधकैःसार्द्धंदिसंत्रेपणमशान्॥अक्षुब्धोभुक्तभोज्यस्तुयदिस्याद्वीरसाधकः॥दिव्योवा
मपशुस्तत्रअर्क्कासाधनमाचरेत्॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि॥भौमवारेतमिश्रायांसाधयेत्सिद्धिमुत्तमां॥उपचारंसमा
दायकुलाम्नरसंतथा॥मांसिमान्नंगुडंछागंसुरापिष्टकमेवच।नानाफलंचनैवेद्यंसमस्तकल्प्योक्तसाधितं॥चितास्थानेसमानी

होमंसमाप्यतंकुंभंनिक्षिपेच्चजलाशये॥स्वगुरुंग्रामनाथांश्चतोषयेद्दक्षिणादिभिः॥संपाताप्यायनंचैतदुक्तंसिद्धिर्नचेद्भवेत्॥शवगांतुनरा
कुर्यात्तत्प्रकारइहोच्यते॥तंबीजेनग्रथयित्वाभूर्जपत्रेलिखेत्तु॥उशीररोचनाभ्यांचशिलाकर्पूरकुंकुमैः॥क्षीराज्यमधुतोयानांमध्येनलिखि
नंक्षिपेत्॥पूजनाज्जपाद्धोमात्शवितफलदोभवेत्॥ ॥शवितोपिनसिद्ध्येच्चेद्बोधनंतस्यकारयेत्॥वाग्भवेनचबीजेनसंपुटीकृत्यतं
जपेत्॥एवंतुबोधवेत्सिद्धोनोचेत्कुर्याद्वशाकृतिं॥ॐचंदनंमहादारुहरिद्रामदनीशिलाः॥एतैस्तुलिखितोमंत्रोभूर्जपत्रेशुभोभवे
कंठेधृतोभवेद्वश्योनोचेत्तत्कुर्य्याद्वपीडनं॥अनुदात्तस्वरेणाद्यमुदात्तेनद्वितीयकं॥तृतीयमनुदात्तेचपठेत्तूर्ध्वमुदात्ततः॥एवंप
दानिसर्वाणिपठेन्मंत्रस्यसाधकः॥अनुदात्तपदोच्चारेदेवंध्यायेदधःस्थितं॥ऊर्ध्वस्थितमुदात्तस्योच्चारेऽष्टाधिसहस्रकं॥जपेन्मंत्रंत
तोभूर्जेभानुदुग्धेनलेखयेत्॥मंत्रंतमाक्रमेद्वामपादेनाथचहोमयेत्॥अष्टोत्तरशतंमंत्रैःपीडितःसम्प्रसीदति॥ ॥नासिद्धिश्चेत्त्र
दापोष्यःप्रोच्यतेतत्क्रियाधुना॥सौःबीजपुटितंमंत्रंविलिखेद्भूर्जपत्रके॥रोचनाकुंकुमाभ्यांचधारयेद्दधिदुग्धयोः॥इदंपोषणमि
त्युक्तंशोषणंप्रोच्यतेधुना॥ ॥यत्रस्यभस्मनालेख्यंवायुबीजविदर्भितं॥भूर्जपत्रस्वेष्टमंत्रंतत्कंठेधारयेदिति॥एतच्छोषणमित्युक्तं
दहनंप्रोच्यतेधुना॥पृथक्पृथक्स्वमंत्राणांचतुर्दिक्षुसमावृतान्॥रंबीजेनपलाशस्यबीजतैलेनसंलिखेत्॥भूर्जपत्रेथतद्धार्य्यंकं
ठेदारुक्रियात्वियं॥ ॥अथचितासाधनं॥भगवन्सर्वतत्त्वज्ञसर्वशास्त्रविशारद॥श्मशानेचपुरश्चर्यात्वयासंसूचितापुरा॥कथयस्व

यसुहृद्भिः शस्त्रपाणिभिः॥ समानगुणसंपन्नैः साधकोगतभिःस्वयं॥ न निरीक्षे चतुर्दिक्षु देवतो ध्यानतत्परः॥ भीतश्चेत्साधकस्तत्र
चतुर्दिक्षु च साधकाः॥ नोचेत्केवलमेवासौ भैरवः परिकीर्तितः॥ वस्त्रालंकारभूषाद्यैर्भूषितः पूर्वसंमुखः॥ प्रक्षालितं चिता भूमिं गत्वा साधक
सत्तमः॥ प्रक्षालितोयद्वायः क्षारयेदस्थिसंचयं॥ अस्त्रांतमूलमंत्रेण प्रोक्षणं यागभूमिषु॥ गुरुपादरजो ध्यात्वा गणेशं वटुकं तथा॥ योगिनीमा
तृकां चैव वामपादपुरस्सरं॥ ॥ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः॥ पिशाचाः सिद्धयक्षाश्च गंधर्वाप्सरसां गणाः॥ योगिन्यो मातरो
भूताः सर्वाश्च खचरस्त्रियः॥ सिद्धिदात्रा भवन्त्वत्र तथा च मम रक्षकाः॥ ॥प्रणम्यमनुनानेन पुष्पांजलित्रयं क्षिपेत्॥ श्मशाना
धिपतिं पश्चाद्भैरवं कालभैरवं॥ महाकालं यजेद्यत्नात्पूर्वादिदिक्चतुष्टये॥ पाद्यादिभिश्च मंत्रज्ञो वलिं पश्चान्निवेदयेत्॥ ॥शव्वोमंत
तः पश्चात्श्मशानाधिपतत्परं॥ इमं मंत्रं सामिषान्नं वलिं गृह्णपदं ततः॥ ॥गृह्ण गृह्णापय गुणं विघ्ननिवारणं ततः॥ कुरु सिद्धिं मे समु
त्वा प्रयच्छ स्वाहा इत्यन्वितं॥ ॥ताराद्यमनुना देवि प्रथमो वलिरीरितः॥ मायांते भैरवात्पश्चाद्भयानकपदं ततः॥ पूर्ववद्वलिमाहृत्य दक्षिणे
वलिमाहरेत्॥ ह्रूंमंत्रेश्च महाकालात्पश्चात्पूर्ववदुद्धरेत्॥ ॥पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत्॥ शक्त्यंते कालशक्त्यंते भैरवांते पदं
ततः॥ श्मशानाधिपइत्येवं पूर्ववच्चोत्तरे दरेत्॥ ॥चितामध्ये ततो दद्याद्वलित्रयमनुत्तमं॥ ॥कालरात्रि महाकाले कालिके घोरनिस्व
ने ग्रहाण मम वलिं मातर्देहि मे सिद्धिमुत्तमां॥ ह्रूं कालिकायै स्वाहेति भूतनाथाय चार्पयेत्॥ शक्त्यंते भूतनाथांते गणानाधिपइत्यपि॥ प्र

॥ तंत्रचिं ॥
॥ ३०२ ॥

णावाधेनमंत्रेणा दापयेद्बलिमुत्तमं॥ हूं सर्वगणनाथ स्वकामाधिपतये॥ घणाद्येनमंत्रेणा दापयेद्बलिमुत्तमं। ततश्चितापश्चिमत
एकीकृत्यास्थिसंचयं॥ ॐ ह्रीं आधारशक्तये नमः इत्यमुनापुनः। पंचगव्येन संप्रोक्ष्य भूर्जेवावटपत्रके॥ हसौरिति लिखेन्मंत्रं स्थापयेन्न
न्नतत्पुनः॥ कम्बलासनमनंतत्र विन्यस्याधारशक्तये। नम इत्यमुना तत्र ह्रीं मायां च प्रपूजयेत्॥ वीराह्देन देवेशि उपविश्यास
नेतत्त्र॥ कूर्चबीजद्वयं देवि मायायुग्मं ततः परं॥ कालिके घोरदंष्ट्रे च प्रचंडे चंडनायिके॥ दानवान्दारयेत्युक्त्वा हरेति द्वितयं तत
तः॥ परवीरं महाविघ्नं छेदयद्वितयं ततः॥ वर्मास्त्रांतो द्विठांतो यं वीरार्दनमनुर्मतः॥ अनेन मंत्रितं तोयं दशदिक्षु क्षितौ क्षिपेत्त:
तन्मध्ये भैरवो देवो न विघ्नैः परिभूयते॥ यदि प्रमादाद्देवेशि साधको भयविह्वलः। तैस्तैश्च सुहृदिश्च रक्षितो नाभिभूयते॥ अर्के
डुमित्तवधान्नमृत्तैर्निर्मितवर्त्तिकां॥ प्रदीपं तत्र संस्थाप्य अस्त्रेण तत्र प्रपूजयेत्॥ हेतेतास्मिन्महादीपे विघ्नैश्च परिभूयते॥ तद्य
श्चास्त्रमंत्रेण निखनेत्कुलदीपकं॥ तत्रत्कल्पविधानेन भूतभृत्यादिकं चरेत्॥ बोठाम्वा नारकाम्वापि विधिवत्संपूजयेत्ततः॥ ॥
ततः पंचोपचारेणाडरतो देवतां यजेत्॥ निमील्य चक्षुषी पश्चाद्देवं ध्यात्वा मनुं जपेत्॥ एकाक्षरी यदि भवेद्दिकसहस्रं ततो जपेत्
द्व्यक्षरे वाष्टसाहस्रं त्र्यक्षरे चायुतार्द्धकं॥ ततः परं तु मंत्रज्ञो गणनांतकसहस्रकम्॥ निशार्द्धं तु समारभ्य उदयांतं समाचरेत्॥ यद्यस
दांभयंकरीं नेत्रवस्त्रेण बंधयेत्॥ ततोर्द्धरात्रपर्यंतं यदि किंचिन्न लक्ष्यते॥ जयदुर्गामनुं नाद्यं तेनैव सर्षपान्क्षिपेत्॥ ॥ॐ तिलो

॥ उरु ॥
॥ ३०२ ॥

CC-0 In Public Domain. Digitization by eSangotri

स्तिसोमदेवस्यो गोसवस्तृप्तिकारकः॥ पितृणां स्वर्गदाता त्वं मर्त्यानां ममरक्षकः॥ भूतप्रेतपिशाचानां विघ्नशान्तिकारकः॥ इति क्षिप्त्वा तिलांस्तत्र चतुर्भागैः शिवादिनः॥ ततः सप्तपदं गत्वा उनत्तैव संविशेत्॥ एवं तत्रापि संकृत्य प्रजपेन्मन्त्रमुत्तमं॥ निर्भयः प्रजपेन्नाव यावत्सिद्धिः प्रजायते॥ भयं तु स्वप्नवज्ज्ञेयं परे हि शेषमाचरेत्॥ ॥जपान्ते च बलिं दद्याद्देवताये [illegible] यथाविधिः॥ मरिषं छागलं वापि गृहीत्वा वरमेव च॥ गृहं कृच्छेत्सुहृद्वर्गैः सार्द्धं संहृष्टमानसः॥ ॥अथ वीरसाधनं॥ श्रीदेव्युवाच॥ देवेश श्रोतुमिच्छामि शवानां साधनं शिवे व॥ यः कश्चित्क्रियते वीरसाधनं सुसमाहितैः॥ संप्राप्नोति परां सिद्धिं देवैरपि सुदुर्लभां॥ ॥शिव उवाच॥ काली तारा तथा छिन्ना चतुर्थी सुंदरी मता॥ एवं दशसु विद्यासु वीरसाधनमाचरेत्॥ शेषे गाणपते चांडे षोढे स्वायंभुवे तथा॥ वैष्णवे चापि देवैः शिवीरसाधनकं चन॥ वैदिकेप्याचरेद्देवि यदि वेतादशो मनुः॥ केचेरप्याचरेद्देवि यदिक्रूरो भवेन्नहि॥ मुख्या तु साधना काल्यां तारायामपि कीर्तिता॥ या काली सैव तारा स्यात् छिन्नायामपि संमता॥ एवं पाशुपतास्त्रेषु वीरसाधनमाचरेत्॥ बगलाद्यासु विद्यासु वीरसाधनमाचरेत्॥ वीरसाधनकं कर्म विहाय सिद्धिकामुकः॥ स चक्षुषा विना रूपं द्रष्टुमिच्छति॥ तस्मात्तु साधना मुख्या दशविद्यासु पार्वति॥ सिद्धमंत्रं परामृत्वा वीरसाधनमाचरेत्॥ सर्वेषां जीवहीनानां जंतूनां फलमुद्भवेत्॥ तत्र सिद्धिं वदेद्देवि वीरसाधनवर्जिते॥ अनाचारादधर्माद्वा भ्रष्टत्वादपि पार्वति॥ कलौ पापसमाकीर्णे कस्यैव निश्चलं मनः॥ सर्वदोषसमायुक्तो वीरसाध

ततःपुनः। सएवसिद्धिर्देवि नात्र कार्या विचारणा॥ नैवसिद्धिर्नैवसिद्धिर्यावत्साधनवान्नव। महापातकसंयुक्तो वीरसाधन
संयुतः। सएवसिद्धिदोज्ञोको सर्वदेवनमस्कृतः॥ याममात्रेण संसिद्धिर्वीरसाधनयोगतः॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयो
रपि। बिल्वमूले प्रांतरे वा श्मस्मागोरनदीतटे॥ समुद्रे विपिने घोरे श्मशाने चत्वरे तथा। गगागर्भेत गगेव कामिनीमंडलेपि वा॥ ए
कलिंगे विशेषेण मध्ये विशेषतः। वीरवेषं समासाद्य वीरसाधनमाचरेत्॥ सिद्धमंत्रेगुरा कृत्वा देवतादर्शनोत्सुकैः॥ सार्द्धयामोत्र
रे देवि वीरसाधनमाचरेत्॥ ॥पूर्ववत्तिलकं कृत्वा बलिद्रव्याणि संग्रहेत्॥ मंत्रं वा साधयिष्यामि देहं वा पातयाम्यहं॥ प्रतिज्ञामी
दृशीं कृत्वा बलिद्रव्याणि चाग्रहे। मेषमाहिषमार्जारछागकुक्कुरगंजरान्॥ गुडपायससंयान्नमोदकापूपलड्डुकान्॥ जंवीरपन
सादीनि नानास्वादूनि पार्वति॥ फलानि वाहरेद्देवि तांबूलाद्यैः समन्वितः॥ जातीपत्रं फलं चैव कंकोलं विजया तथा॥ कस्तूरीकुंकुमा
दीनि भक्ष्यद्रव्याणि यानि च। तानि सर्वाणि संगृह्य यथोक्तस्थानमाचरेत्॥ साधयेत्त्वहितां सिद्धिं साधनस्थानमाश्रयेत्॥ गुरुध्याना
दिकं सर्वं पूर्वोक्तमाश्रयेत्सुधीः॥ वीराईतांकिते भस्मे मायामोहेन विद्यते। येवात्रेस्यादिमंत्रेण भस्मोपुष्पांजलित्रयं। श्मशानाधिप
तीनां तु पूर्ववद्बलिमाहरेत्॥ अघोरास्त्रेन मंत्रेण बलिसाधनमाचरेत्॥ छदर्शीनेन वारक्षाडंभाभ्यां वा प्रकल्पयेत्॥ ॥मायास्फुर
द्वयं भयः प्रस्फुरद्वितयं पुनः। घोरघोरतरे रूपे तेतदनुरूपपदं ततः। त्वरयुग्मांतरे देवि प्रचटद्वितयं ततः॥ कहयुग्मं वमयुग्मं ततो वंध

मुगं ततः॥ घातयेद्वितयं वर्म्म फडंतः समुदाहृतः॥ एकपंचाशदर्णोयमघोरास्त्रमयो मनुः॥ ॥हालाहलं समुद्धृत्य सहस्रारस्व-
रूपकं॥ वर्मास्त्रांतं महामंत्रं सुदर्शनस्य कीर्त्तितं॥ ॥भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत्॥ जयदुर्गाख्यमंत्रेण सर्षपान्दि-
क्षु निःक्षिपेत्॥ प्रणवं च ततो दुर्गे दुर्गे च रक्षणीति च॥ वह्निजायांतको मंत्रो जयदुर्गाख्य ईरितः॥ ॥तिलोसीति च मंत्रेण तिलानपि
विनिःक्षिपेत्॥ यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतं॥ रज्जुविद्धं सर्प्पदष्टं चाण्डालं चाभिभूतकं॥ तरुणं सुंदरं शूरं रणे नष्टं समुज्वलं
पलायनविहीनं च संमुखे रणवर्त्तिनं॥ स्वेच्छामृतं द्विवर्षं च वृद्धं स्त्रीं च विवर्जेत्तथा॥ मत्राभावमनेकष्टं सग्रास्योर्द्धगं तथा॥ एवं चाष्टवि-
धं सत्वा पूर्वोक्तान्यतमं शवं॥ गृहीत्वा मूलमंत्रेण पूजास्थाने समानयेत्॥ चाण्डालाद्यभिभूतस्याशीघ्रं सिद्धिफलप्रदम्॥ प्रणवाद्यस्त्र-
मंत्रेण शवस्य प्रोक्षणं चरेत्॥ प्रणवं कूर्चबीजं च मृतकाय नमः फट्॥ पुष्पांजलित्रयं दत्वा प्रणमेत्स्पर्शपूर्वकं॥ ॥ देवीरपरमा-
नंदशिवानंदकुलेश्वरि॥ आनंदभैरवाकारदेवीपर्यंकशंकर॥ वीरोहं त्वां प्रपद्यामि उत्तिष्ठ चंडिकार्चने॥ प्रणम्यानेनेन मंत्रेण क्षालयेत्त-
दनंतरं॥ ॥तारं शवं मृतकाय नमोंतं मंत्रमुच्यते॥ शवस्नापनमंत्रोयं सर्वतंत्रेषु दर्शितं॥ धूपेन धूपितं कृत्वा गंधादिनानुलिप्य च॥
रक्ताक्तो यदि देवेश भक्षयेत्कुलसाधकं॥ गत्वा शवस्य सान्निध्यं धारयेत्कटिदेशतः॥ यद्युपद्रावयेदस्य दद्यान्निष्ठीवनं मुहुः॥ पुनः
प्रक्षालितं कृत्वा जपस्थानं समानयेत्॥ कर्पूरवासितं धूपं त्रिगंधाष्टोत्थपंचच॥ षोडशांगं दशांगं वाष्टादशसमन्वितं॥ श्रीखंडधू-

॥ नेत्रवि ॥
॥ ३११ ॥

धूपोदेवेशितस्तथावागुरुसंभवः॥गुग्गुलुर्लोहवाणाश्चरालश्चदेवदारुकः॥लाक्षागुडश्चवादेविगोघृतेशर्कराचवा॥मांसीनखीचवा
देविकर्पूरमेकमेववा॥श्रीखंडमगरुंवापिगंधसारेशिलारसं॥दशविधाक्रमेणोक्ताकीर्तितायेमयानवा॥देवदारुमयोधूपःस
र्वभूतविनाशकः॥एवंसंधूप्ययत्नेनखड्गहस्तोभवेद्ध्रुवं॥मुक्तकेशोदिशावासोपुरेचोत्तरसाधकान्॥दीपंप्रज्वाल्ययत्नेननैवे
द्यैःसमाजलम्॥कुशशय्यांपरिस्तीर्यतत्रसंस्थापयेच्छवं॥एलालवंगकर्पूरजातीखदिरसारकैः॥ताम्बूलंतन्मुखेदत्त्वाशवं
कुर्यादधोमुखं॥स्थापयित्वातस्यपृष्ठेचंदनेनविलेखयेत्॥बाहुमूलादिकट्यंतंचतुरस्रंविभावयेत्॥मध्येपद्मंचतुर्द्वारंदलाष्ट
कसमन्वितं॥ततश्चैणेयमजिनंकम्बलोत्तरितंन्यसेत्॥तालवाश्चांगुलमानेनयन्त्रकाष्ठानिदिक्षुच॥संस्थाप्यपूजयेत्तत्रइंद्रादिदश
देवताः॥विधिमिश्रायसंलिखन्सुराधिपतयेततः॥इमंवलिंगृह्णगृह्णंगृह्णापययुगंततः॥विघ्ननिवारणंकृत्वासिद्धिंप्रयच्छठठयं
श्चनेनमनुनापूर्वंवलिंदद्याद्वसामिषं॥स्वस्वनामादिकेरुत्वापूर्ववद्वलिमाहरेत्॥सर्वेषांलोकपालानांततःसाधकसत्तमः॥श
वाधिष्ठानभूतेभ्योवलिंचवटुरयासह॥चतुःषष्टियोगिनीभ्योडाकिनीभ्योवलिंदिशेत्॥पूजाद्रव्यंसन्निधौवदूरेचोत्तरसाधकं॥सं
स्थाप्यासनमभ्यर्च्यस्वमंत्रांतेत्रयांततः॥फ्रेंडिंसंतेनमंत्रेणानन्द्राभ्यारोहणंविशेत्॥कृशानुपारतंलेदत्त्वाशवकेशान्समान्बद्ध्व॥दृढंनि
वध्यगुटिकांकृतसंकल्पसाधकः॥शवोपरिसमारुह्यप्राणायामंविधायच॥वीराईनेनमंत्रेणदिक्षुलोष्टान्समाक्षिपेत्॥ततोदेवंच

॥ पुरः ॥
॥ ३११ ॥

संसृज्य उपचारैः सुविस्तरैः॥ शक्त्यस्य विधिवद्देवि देवस्याप्यामनं चरेत्॥ उत्थाय संमुखे स्थित्वा पठेद्भक्तिपरायणः॥ ॥ॐ वरोऽसि भव
देवेश ममामृकपदं ततः॥ सिद्धिं देहि महाभाग भक्ताग्रमपरं पुनः॥ मूलं समुच्चरन् मंत्री शवपार्श्वयं ततः॥ पठस्तोत्रेण वप्रायान्तरेस्था
तुं न शक्यते॥ ॥ॐ भीमभीरुभयाभावभवलोचनभावुक॥ त्राहि मां देववदेवेश शवानामधिपाधिप॥ इति पादतले तस्य त्रिकोणं च
कमुल्लिखेत्॥ तदोक्ष्याउं नराक्रान्तिशवोपि निश्चलो भवेत्॥ उपविश्य पुनस्तस्य वाकृतिस्सार्थ्य पार्श्वयोः॥ हस्तयोः पुष्पमाल्यर्घ्य-
पात्रे तत्र निधापयेत्॥ श्रोष्ठौ तु संपुटौ कृत्वा स्थिरचित्तः स्थिरेन्द्रियः॥ सदा देवीं हृदि ध्यात्वा मौनी तु जपमाचरेत्॥ रक्ष्यमानेद्रोक्तसं
ख्याभिन्नपंकुर्यात्कुलेश्वरः॥ अथवारंभकालात्तु यावद्योदयते रविः॥ यथर्द्धरात्रपर्यंतं जप्त्वा किंचिन्न लभ्यते॥ तदा पूर्ववदर्घ्यादि सप्त
पात्रगतानि च॥ कृत्वोपविश्य तत्रैव जपं कुर्यादनन्यधीः॥ चलासनाद्भयं नास्ति भये जाते वदेन्नतः॥ यत्प्रार्थयसि देवेशि तत्तथ्यं कुंजरा
दिकं॥ दिनांतरे प्रदास्यामि स्वनामकथयस्व मे॥ इत्युक्त्वा संस्कृतेनैव निर्भयस्तु पुनर्जपेत्॥ पुनश्चेन्मधुरं वक्ति वक्तव्यं मधुरं ततः॥ त
दा सत्यं च संकार्य्यं वरं च प्रार्थयेन्नतः॥ यदि सत्यं न कुर्याश्च वरम्वा न प्रयच्छति॥ तदा पुनर्जपेद्धीमानेकाग्रमानसं जपन्॥ नररूपेणात्र देवो
नरो यो वाप सर्प्यति॥ यत्नतस्तेन वोढव्यं नरो वा देवयोनयः॥ माता वा तनुजा वापि मातुलानी तथापि वा॥ आगत्य विघ्नं चरते मायया च्छा
द्यविग्रहं॥ उत्तिष्ठ वत्स ते कार्यं संजातं न संशयः॥ प्रभातसमये जाते त्वञ्चिताक्रोशते गृहे॥ प्रायेण सकला लोका राजानो दण्डधारि

राः ॥ कदाचित्केनाप्यादिष्टस्तदा किं ते करिष्यति ॥ इत्यादिविविधैर्वाक्यैर्न जापं परिसंत्यजेत् ॥ मृताः पितृगणास्तत्र दूरदेशनिवासिनः ॥ बांधवास्तत्रश्चायांति देवरूपधरास्ततः ॥ स्त्रीपुत्रसेवकादींश्च गृहीत्वानीयते परैः ॥ वदंति पुत्रकास्सर्वे भ्रातरोश्चनुनास्वकाः ॥ निजकांतांगसंस्पर्शो वस्त्राद्याभरणादिकं ॥ गृहीत्वानीयते पत्रिपालकैस्तद्वयं त्यजेत् ॥ दिवसे यत्र याशंका सैव तत्र प्रजायते यदि न क्षुभ्यते तत्र तदा किं वा न लभ्यते ॥ स्त्रीरूपधारिणी देवी द्विजरूपधरः पुमान् ॥ वरं गृहाणेति शब्दं वै त्रिवारांते वरं लभेत् ॥ साधुना साधुना वापि योषिद्वै वरदायिनी ॥ तदा वीरपते तस्य किं न सिध्यति भूतले ॥ निःपापः पुरुषश्चैव कुले वैव सुसंस्कृतः ॥ असंस्कृतवरा देवी पापयुक्ता न संशयः ॥ संमुखे संमुखे वापि संस्कृतं वक्ति चापरं ॥ सैव देवी न संदेहः स देवो भैरवः स्वयं ॥ न चेद्देवं भवेद्यैव मायापुरितविग्रहात् ॥ वरं यत्र वरं तत्र न वरं प्रवदेत् क्वचित् ॥ स चेत्संस्कृतमाख्यातं वक्त्रे वक्तव्यमीदृशं ॥ न चेत्स्वयं लौकिकोन्या वरं ग्राह्यं निराकुलं ॥ अथवाऽन्यकृतं किंचिल्लभेताप्यात्मनो हितं ॥ शब्दो वा जायते सम्यग्मतस्यापि लभ्यते ॥ सर्वं विचार्य गृहीतव्यमेकं दिक्परिकीर्तितं ॥ अवश्यं तत्र भेतव्यं न तत्र प्रत्ययः क्वचित् ॥ भैरवा वडुकाश्चैव कुलशास्त्रपरायणाः ॥ एतच्छास्त्रप्रसंगेन कुत्साकुटिलविग्रहाः ॥ पुत्री भूत्वा वारयतुं नारी भूत्वा विमोहयेत् ॥ तस्मात्तत्त्वपरो वीरो विचारेयत्नमाचरेत् ॥ सत्येकृते वरं लब्धा संत्यजेद्यजपादिकं ॥ जातं फलमिति ज्ञात्वा गुटिकां मोचयेत्ततः ॥ सप्रक्षाल्य च संस्थाप्य पूर्वं धृतं मोचयेत्पदे ॥ पदचक्रं मर्जयित्वा पूजाद्रव्यं

जलेक्षिपेत्॥शवंजलेथगर्त्तेवानिःक्षिप्यस्नानमाचरेत्॥ततस्तुस्वगृहंगत्वाबलिंदत्वादिनांतरे॥अग्निमराऽन्नोवयेषांदेवानांयजमानोहं:
तेगृह्णंतुमयादत्तंइमंबलिमनुत्तमं॥अथपैर्ष्टांश्चितश्वाश्वनरकुंजरसूकरान्॥दत्वापिष्टमयान्नेवकर्त्तव्यंसरुपोपमतां॥यवक्षोदमयं
वापिशालिक्षोदमयंवचा॥चंद्रहासेनविधिवत्तन्मंत्रेणघातयेत्॥परेह्निनियमावर्यपंचगव्यंपिबेत्ततः॥ब्राह्मणान्भोजयेत्तत्रपंचविं
शतिसंख्यकान्॥पंचपंचविहीनान्वाक्रमाद्येवदशावधि॥ततःस्नात्वाचभुक्त्वाचनिवसेदुत्तमस्थले॥यदिनस्याद्विप्रभोज्यंतदानिर्द्धन
तोव्रजेत्॥तेनचेन्निर्द्धनत्वंस्यात्तदादेवःप्रकुप्यति॥त्रिरात्रंवाथषड्रात्रंशोधयेत्कुलसाधनं॥शय्यायांयदिगच्छेत्तदाव्याधिप्रजा
यते॥गीतंश्रुत्वाचबधिरोनिश्चक्षुर्नृत्यदर्शनात्॥यदितक्तिदिनेवाकांतदासमकत्तांव्रजेत्॥पंचदशादिनांताधिदेहेदेवस्यसंस्थितिः
गोब्राह्मणानांदेवानांनिंदांकुर्यान्नकुत्रचित्॥देवंगोब्राह्मणादींश्चप्रत्यहंतुस्पृशेच्छुचिः॥प्रातर्नित्यक्रियांनेतुबिल्वपत्रोदकंपिबेत्॥ततस्ता
यान्तुतीर्थदेशप्राप्तेषोडशवासरे॥स्वांतमूलमंत्रघार्थ्यंतर्प्पयामिनमश्वदं॥एवंशततयाऽर्द्धंदेवानांतर्प्यतांजलैः॥मुनितर्पणाश्वस्य
स्पनस्याद्देवस्यतर्प्पणं॥इत्यनेनविधानेनसिद्धिंप्राप्नोतिनिश्चितं॥इहभुक्त्वावरान्दिव्यानंतेयातिहरेःपदं॥आसांगमपिवादेविनि
ष्फलंसफलेचवा॥कृत्वासाधनमेवैतत्शंकरःप्रियतमोभवेत्॥शवाभावेश्मशानेवाकर्त्तव्यावीरसाधना॥योभावोयस्ययःप्रो
क्तोसेभावियेर्यदिनार्चयेत्॥ईदृशःक्रमयोगेनभ्रष्टोभवतिसाधकः॥नोपदिशेत्तत्रभावनपूजांतत्रसन्दिशेत्॥श्मशानांतंगृहीत्वा

नुयावछुद्धिः प्रजायते। ।अथवाप्रकारांतरेणवीरसाधनंकुर्यात्॥शृणुदेविवरारोहेवीरसाधनमुत्तमं॥नृणांशीघ्रफलावा
प्तंप्रकारांतरमुच्यते॥चतुष्पथेचतुर्दिक्षुपुरुषंहृदयंखनेत्॥दीपमेकंप्रबलंधृदीपान्प्रज्वालयेत्ततः॥मध्येतथाखनेदेकंतत्र
मृतासनंविशेत्॥महाकालादिदेवेभ्योवलिंदत्वायथाविधिः॥कृत्वोक्तपूजांतिर्वर्त्यंजपेन्नियतमानसः॥दंताक्षमालयावैव
राजरंतेनमेरुणा॥दिग्वासाप्रजपेन्मंत्रंअयुतंसर्वदेवतं॥जपांतेचवलिंदद्याद्दक्षिणांविभवावधि॥सर्वसिद्धीश्वरोविद्वान्सर्व
देवनमस्कृतः॥अथवाविजनेरण्येअस्थिशय्यासनेनरः॥उदयांतंमनुंजप्त्वासर्वसिद्धीश्वरोभवेत्॥ ॥निजेक्रोडेविल्वमू
लेशवमारोप्ययत्नतः॥नृसिंहमुड्यार्वीक्ष्पजपेन्मातृकयानरः॥सहस्रंतत्रजप्त्वातुसर्वसिद्धीश्वरोभवेत्॥ ॥करकांचीसमा
दायमुंडमालाविभूषितः॥तेनैवतिलकंकृत्वातद्भस्मपरिभूषितः॥श्मशानेचसकृज्जप्त्वासर्वसिद्धीश्वरोभवेत्॥कुंकुमागुरु
कस्तूरीरोचनाचैवचंदनं॥कर्पूरंसमभागंचकेसरंहस्वंदनं॥एकत्रसाधितंकृत्वाघ्यकंसाधयेत्ततः॥जिह्वाग्रेरुधिरंवीरंआ
काशेचसमाहरेत्॥तेनैववटिकांकृत्वाभद्रकालीमनुंजपेत्॥नीलांनीलपताकांचललजिह्वांकरालिकां॥ललाटेतिलकंकृत्वा
साधकोवीतभीःस्वयं॥महाष्टमीनवम्याश्चसंयोगेपुरतःस्थितः॥छागमाहिषमेषाणांचतुर्दिक्षुसेवानक्षिपेत्॥कवंधान्मुराणु
पुच्छंचदीपादिभिरलंकृतं॥मध्येकवंधमास्तीर्यतत्रगंधर्वरूपधृक्॥तांबूलपूरितास्यश्चमंजनोजिनलोचनं॥कृत्वात्मानंमत्तं

जस्यासर्वसिद्धीश्वरो भवेत्॥ वियदह्नियुतं देविनेत्रांतं चंडभूषितं॥ वीजं प्रत्येकड्व्याराणां मिलितानांच पार्वति॥ मूलमंत्रेण मंत्रज्ञो
जपेत्सायं शतत्रयं॥ जिह्वाग्रे रुधिरं गृह्य चामुंडे घोरनिस्वने वलिं गृहीत्वा वरं देहि रुधिरं गगणीर्मले॥ कालिकाकौलिप्रचरणोग्रं ततो स्त्रं कवचं ततः॥
कालिकेयं समाख्याता वीराणां हितकाम्यया॥ ॥कूर्चं युग्मं महादेवि नीलायाः कथितं तव॥ वियद्गुवलिंदेवि वल्लाक्षिवतीरतिः॥ चंद्रखं
उसमायुक्तं ततो नीलपदं वदेत्॥ पताकेकूपफडंत स्यात् पूर्वकूटमनुर्मतः॥ सेगुप्रेयं महाविद्यानवस्नेहादिहोदिता॥ उग्रचंडा महाविद्यापु
रायाकथिता प्रिये॥ सा लललज्जिह्विका प्रोक्ता संयोज्या नीलसाधने॥ यासौ विद्या महातारा सा करालेति कीर्तिता॥ ॥भूमिपुत्रसमा
युक्तायांमावास्यां शुभप्रदा॥ भद्रे पुष्करयोगेन तस्यां वीरेश्वरो नरः॥ विसृष्टां तां समानीय निःक्षिपेत्मत्रभूमिषु॥ तत्र तां साधितां कृ
त्वा तद्दिने मृतहृद्के॥ तत्र प्रसाधितं मत्स्यमेकं मूलेन दापयेत्॥ तज्जलेनाभिषेकं च पूर्ववत्स्नातो परि॥ साधितां विजयां तस्यडरेणुदे
रववर्त्मगा॥ क्षिप्त्वा तत्र खेनेत्रमत्स्यं श्रीजनांचितलोचनं॥ तीलकीपूर्वद्व्येराऽस्थाय च मनुं जपेत्॥ स्वयं चैव तत्र भगवान् भैरवोलगुडां
कितः॥ भ्रमतीतस्ततो वीरसाविलोक्य मनुं जपेत्॥ यदि भाग्यवशादेवि लगुडंस्तत्र लभ्यते॥ तदा स्वयं भैरवोसौ स्वयं वीरेश्वरो भवेत्॥
मत्स्यमानीय देवेशि निःक्षिपेन्मृतहृद्के॥ तत्रास्य सज्जपित्वा तु देवतामेलनं भवेत्॥ तत्र नत्वा महादेवं महादेवीं च भाविनि॥ तद्भस्मतिलकं
कृत्वा स्वयं वीरेश्वरो भवेत्॥ निशायां मृतहृद्देवडन्मज्ञानंद भैरवः॥ दिवासाविमली भस्मभूषणो मुक्तकेशकः॥ कपाली खट्वाङ्गहस्तश्च जपे

न्मातकयायदि॥ न दातस्य महादेवि सर्वसिद्धिकरे स्थिता॥ डाकिनी योगिनी वापि अन्या वापि कुलांगना॥ आनीय तत्र संपूज्य सर्वसिद्धि
श्वरो भवेत्॥ सर्वेषां जीवहीनानां जेतृनां नीलसाधने॥ श्मशानगां स्त्रियं त्यक्त्वा साधयेद्वीरसाधनं॥ मृतासनं विना देवि पूजयेत्या
र्वनिशिवां॥ तावत्कालं वसेद्घोरे यावद्राहूतसंप्लवं॥ महासवाः प्रशस्ताः स्युः प्रधाने साधने प्रिये॥ क्षुद्राः प्रयोगकर्मणां संस्तुताः स
र्वाः सुसिद्धिदाः॥ एवं नीलक्रमो देवि कथितश्च न वानघे॥ न कस्यचित्प्रवक्तव्यं सममप्रीत्या महेश्वरि॥ ॥ अथ वान्यप्रकारेण
साधनं कथयामि ते॥ जपस्थानं तु संशोध्य खननादिप्रयत्नतः॥ तन्मध्ये च वलिं दद्यात् लिखेद्यंत्रं त्रिकोणकं॥ तन्मध्ये च महाशंखं
निवेश्य मुंडपंचकं॥ -- परिमहाप्रेतमश्वं ऊगं सुशोभनं॥ उद्वर्तनादिकं कृत्वा स्नापयेद्विधिपूर्वकं॥ परिधाप्य रक्तवस्त्रं नेत्रांजनं स
मीरितं॥ तांबूलाद्भिर्लिखेदथा ललाटे रक्तचंदनं॥ हृदये च लिखेद्यंत्रं पद्ममध्ये त्रिकोणकं॥ पूजायंत्रं ललाटे च शस्त्रेण विलिखेत्ततः
मूर्द्ध्नि वाहौ तथा हस्ते पादे चैव तथा करौ॥ खदिरादीनि काष्ठानि कीलान्यारोपयेत्सुधीः॥ रज्जुकं वेष्टयेत्तत्र दृढवेष्टेन वेष्टयेत्॥ षट्
पात्रेषु वलिं दद्यात्कीले कीले पृथक् पृथक्॥ माषं मांसं तथा मत्स्यं पायसं त्रिविधा सुरा॥ मोदकं च तथा पूपं दुग्धेनोत्सर्गमाचरेत्॥
क्रोधीशं वह्निमारूढं तुर्यस्वरसविंदुकं॥ वर्मवीजं समुच्चार्य श्मशानकालिकेति च॥ पूर्ववीजं समालिख्य अस्त्रांतो मंत्र उत्तमः॥ ॥
मायावीजं समुच्चार्य श्मशानभैरवाय च॥ महाकालाय देवाय सर्वविघ्नहरो भवेत्॥ श्मशानवासिनो रुद्रा अस्थिमांसवलिंप्रिया॥

विघ्ननिवारयेत्तस्मकवलिंगृह्णद्विधापुनः॥ विघ्ननिवारययुग्मं वरंचैवप्रयच्छमे। द्विठांतोमंत्रइत्युक्तोवलियुग्मविधानतः॥ ॥
मायालज्जातथालक्ष्मीर्लोंगलीशत्रयंलिखेत्॥ नारायणस्तथास्त्रक्ष्मंपरंतुमधुसूदनः॥ योगिनीभ्यः पदंपश्चात्श्मशानवासिनीति।
व॥ प्रचण्डचण्डरूपायै कर्त्तृखर्प्परधारिणी॥ वलिंगृह्णापययुग्मंसर्वेविघ्नंनिवारय॥ वरंदेहियदंब्रूयाद्द्विठांतंयोगिनीवलिः॥ ॥
रौद्रवह्निसमारूढं चतुर्दशस्वरान्वितं॥ विंदुनादकलाक्रांतंक्षेत्रपालंचङेंतकं॥ श्मशानवासिनेब्रूयात्शोणितास्थिप्रियायच। द्वि
ठांतोमंत्रउच्चार्य्यक्षेत्रपालवलिंहरेत्॥ ॥ वाराहीवीजमुद्धृत्यवीजंपंचांतकंपुनः॥ वक्रतुंडायेतिपदंवर्मंचैवसमुद्धरेत्॥ वलिंगृह्ण
परंब्रूयात्विघ्नंनिवारयेतिच। सिद्धिंप्रयच्छमेचैवमस्त्रांतोमनुरुत्तमः॥ ॥ पात्रस्थासादनंकुर्य्यात्मदिरानंदविग्रहः॥ हृदयोपरि
महावीरशक्तिंचैवशवोपरि॥ विवस्त्रांमुक्तकेशींचकर्त्तृखर्प्परधारिणीं॥ प्रक्षाल्यकुलद्रव्येणकुलचक्रंप्रपूजयेत्॥ धूपदीपादि
नैवेद्यैः पंचभूतवलिंहरेत्॥ यथाशक्तिजपंकुर्य्यान्मूलमंत्रेसमर्पयेत्। विपरीतरतानारीमैथुनंकशावोपरि। अयुतंचजपेन्मंत्रस
र्वसिद्धीश्वरोभवेत्॥ यदावैभयभीतोसौभक्षयेतिचतत्क्षणात्॥ देहिदेहियदाब्रूयान्नरछागवलिंहरेत्॥ वलिदानंविनाहिंसा
नकर्त्तव्याकदाचन॥ पुरश्चरणयुङ्मंत्रः सिद्धिर्भवतिनिश्चितं॥ ॥ इतिश्रीतंत्रचिंतामणौमंत्रसिद्ध्युपायपूर्वकचितावीर
साधनभेदांतनिर्णयनामाद्वात्रिंशत्तमः प्रकाशः॥ ३२ ॥ अथैवकर्त्तुमशक्तानांवीराणांहरस्ययोगजपेनैवपुनःसिद्धिरूपा

यमाए। कालीताराछिन्नमस्तावीरसाधनमार्गतः॥ याममात्रेणसिद्धिःस्यान्नात्रकार्याविचारणा॥ साधनारहितेदेविवर्णलक्षत्रयं
जपेत्॥ कालिकासिद्धिदाप्रोक्तातारास्यात्तशैवतत्त्वकैः॥ छिन्नमस्ताचतुःषष्टिलक्षजापेनसिध्यति। चतुराशीतिलक्षैस्तुसुंदरी
सिद्धिदाक्वचित्। बालाकोटार्द्धजापेनबगलापंचसप्तति॥ श्रीमहाराज्ञमातंगीवर्णलक्षैस्तुसिध्यति॥ सिद्धविद्यामहेशानिमा
सलक्षेणसिध्यति॥ महालक्ष्मीचभुवनातथाधूमावतीप्रिये॥ मासलक्षेणैवसिद्धाभवत्येवनसंशयः॥ अथेतज्जपोपयुक्त
तयाशक्तियागनिगद्यते॥ अथाविकारसिद्ध्यर्थंनक्षरंत्वांप्रपूजयेत्। अक्षरंतौकुमारीचक्षरंतौतरुणीमता॥ कामादिविष
येव्याप्तेमायामोहैःप्रवेष्टिते॥ इंद्रियाणांनिग्रहोहिकलौकस्यभविष्यति॥ अविकारप्रसिद्ध्यर्थंकुमारींपूजयेच्छिवे।ऽत्र
रोत्तरवर्षाणांक्रमेणनवचण्डिका। मातृकाष्टक्रमेणैवदशविद्याक्रमेणच॥ अष्टकन्याजातिमार्गात्कुलाकुलक्रमेणच॥
पंचवक्त्रक्रमेणैवपंचाशत्पीठयोगतः॥ नामदध्यान्महेशानितद्भावेनप्रपूजयेत्॥ अनन्यभावतोऽशक्तोपूजयेद्विकुमारिकां॥
कुमारीपूजनाद्देवित्रैलोक्यंकरमध्यगं॥ पूजनेनकुमारीणांतत्त्वज्ञानंप्रजायते॥ तत्त्वज्ञानेसमुत्पन्नेवेश्यापूजनवान्विभुः॥
क्रीडालोलाविनोदार्त्तावृद्धानामपिमोहिनी॥ इंद्रियौघोहियोबालस्त्वोत्पन्नोयोनिर्लिंगवान्॥ ईंद्रियौघोनिग्रहीयःसकुराकुररूः
जितं। यासांदर्शनमात्रेणमुनयोमोहसंगताः। तासुतेसुविरक्तोयःसर्वशक्तिप्रपूजकः॥ अत्रचेत्लक्षणांनास्तिक्षरणांनास्तिम

नत्ये॥ ततः शक्त्येसदापूज्या कर्त्तव्या परमेश्वरि॥ नामरूपादिगंधादि यदिस्यात्परमेश्वरि। सिद्धिविद्यानुसारोक्ता नात्रकार्या विचारणा
सिद्धसोपानमेतद्धि गदितेनीलसारदे॥ शक्त्या व्याप्तमिदंसर्वंजगदेतच्चराचरं। तयायुक्तं देवेशि तदेवकारयेत्प्रिये॥ योगंकुर्वन्तिये युक्तं
तदेवसमाचरेत्॥ अन्यथाकुरुते यस्तु तस्य पातो भविष्यति॥ रूपंदृष्ट्वातुयत्नामेद्रूपंपरमदुर्लभं॥ रूपरूपंपरंरूपंरूपंबुद्ध्यसनाननो।
रूपरूपेसमुत्पन्ने तारारूपस्त्वयंभवेत्॥ रूपमध्यवसेन्नित्यं नरूपंभोगयत्त्वयं॥ भोगरूपंस्वयंचेत्स्याद्रूपभोगंसमाचरेत्॥ भोगतोनहि
कर्त्तव्यं कर्त्तव्यंनिस्पृहेच्छया॥ नानाविद्यास्वरूपाणि यथानिषेवंतिपार्वति॥ यथाशक्तिस्वरूपाणि वालतारूपेणसंस्थिता॥ रूपगंधसमा
चाराद्विधाभेदाः प्रकीर्तिताः॥ स्वयमेवशिवोदेवि मायामोहेनमोहितः॥ अमोहितः शिवः प्रोक्तः सर्वाविद्याः प्रकीर्तिताः॥ अज्ञानान्मा
नुषीयोनिः कल्प्यंतेपरमेश्वरि॥ ज्ञानमासाद्यदेवेशि कालीरूपंजगत्त्रयं॥ अहोशक्तिसमालोकः सालोकेपरिकीर्तिताः॥ चतुर्विधा
पिमुक्तिर्हिनीवीमुक्तोपतिष्ठति॥ शक्तिः शक्तिः पुनः शक्तिः शक्तिः शक्तिः पुनः पुनः॥ वेश्यावेश्यापुनर्वेश्यावेश्यावेश्यापुनश्चसा॥ कुमा
रीचकुमारीचकुमारीचकुमारिका॥ महाराज्यंमहाराज्यंमहाराज्यमितोपिक्षिं॥ हसनन्वलनप्रधावनत्वानिद्रालुः संगलोलपः॥ तया
सहप्रजप्तव्यंतारारूपाप्नुयेद्ध्रुवं॥ इतिसंक्षेपतः प्रोक्तंतद्योगः कथ्यतेशृणु॥ आलोक्यप्रजपेद्देवि दिवात्रयंमहेश्वरि। दूरदृष्टिमयी
सिद्धिस्तस्यहस्तगतासदा॥ संस्पृश्यप्रजपेल्लक्षंतन्मणित्वंप्रयच्छति॥ हसनंजपेत्त्रयानित्यंसर्वकालमतंद्रितः॥ महावाक्सिद्धिमाप्नो

तिराजराजेश्वरो भवेत्॥ वदंस्तयाजपेल्लक्षं महाकविर्वरप्रदः॥ धावन्तयाजपेद्देवि दशसाहस्रमादरात्॥ मासमात्रं वयोगेन पादुका
सिद्धिमाप्नुयात्॥ सोपानारोहणं कृत्वा तया सह महेश्वरि॥ प्रजपेन्मासषट्कं हि खेचरीसिद्धिमाप्नुयात्॥ दोलास्थितां समालोक्य स्व
रूपालिंग्य चुंबनं वा हसन्तं तं जपेद्यो हि षडैश्वर्यक्रमाद्भवेत्॥ स्नानपीठगतां वीक्ष्य जलक्रीडां समाभ्यसन्॥ जपन्महेशतुल्यः स्यात्
काव्यं भाषामयं भवेत्॥ दिवास्वपन्जपेन्नारीं विकाररहितः शिवे॥ सर्वसिद्धीश्वरो भूयान्नात्र कार्या विचारणा॥ दिवाहास्यरतां वीक्ष्य
योगिनीमेलनं भवेत्॥ तया संयोगवार्त्तां यो जपेन्निशि दिने दिने॥ लक्ष्मीयोगो भवेद्देवि नात्र कार्या विचारणा॥ तया संकेतवार्त्तां हि
कृत्वा चैव जपं चरेत्॥ महाकालसमो भूयान्नात्र कार्या विचारणा॥ प्रसुप्तां तां समालोक्य जपेद्विद्यामनन्यधीः॥ कामरूपसमो देवि
शिवरूपो भवेन्नरः॥ करौ वीक्ष्य जपेद्देवी वरदां तां प्रपश्यति॥ स्नातो वीक्ष्य जपेन्नारानखचंद्रसी नरः॥ सर्वकाले जपेद्देवि मासात्सिद्धी
श्वरो भवेत्॥ ताम्बूलपूरितमुखीं वीक्ष्य यत्नेन संजपेत्॥ सर्वैश्वर्यसमायुक्तः कामिनीकर्षको भवेत्॥ वीटिकाकरणोद्युक्तां दृष्ट्वा यत्ने
न संजपेत्॥ वीटिकादाननिरतां वीक्ष्य रात्रौ जपेच्छिवां॥ शापानुग्रहसामर्थ्याद्द्वितीयो वटुको भवेत्॥ भोजनस्थां स्व संवीक्ष्य तत्रका
लीं जपेच्छिवे॥ कालिकावरदा तस्य मासमात्रप्रयोगतः॥ अभ्यंगस्थां च संवीक्ष्य तत्रात्रिंशतमादरात्॥ जपेद्यत्नेन देवेशि सूर्यतुल्यो
नरो भवेत्॥ तांपाकस्थां च संवीक्ष्य कालीतारां च यो जपेत्॥ धनधान्यसमृद्धः स्यान्नात्र कार्या विचारणा॥ क्रीडासक्तां च संवीक्ष्य सर्व

कालमसंख्यकं। सर्वसिद्धिमवाप्नोति देवानामपिदुर्ल्लभां। नानास्थलस्थां संवीक्ष्य जपध्यानसमाचरेत्। समाधीनांकोटिसंख्या तस्यपादग
ताभवेत्। सुखंवीक्ष्यजपेल्लक्ष्मीमहानीलसरस्वती। नासांवीक्ष्यजपेन्मंत्रंकिन्नराद्धिकोभवेत्। नेत्रकर्णौचसंवीक्ष्यस्वयमन्योन्यतोपिवा
दूरश्रुतिदूरदृष्टिस्तस्यहस्तगताभवेत्। हास्यंवीक्ष्यजपेल्लक्ष्यंतारापतिसमोभवेत्। दंतान्वीक्ष्यजपेन्मंत्रंमासमात्रंनिरंतरं। महायक्षी
तस्यहस्तेसर्वदाशुच्यवस्थिता। शृंगारोयुक्तंहृदयांवीक्ष्ययत्नेनसंजपेत्। महामधुमतीसिद्धिस्तस्यहस्तेव्यवस्थिता। पर्वतौवीक्ष्यसंमर्घ्य·
जपेल्लक्षमतंद्रितः। चिंतामणिसमोभूयान्नात्रकार्याविचारणा। हृदयंवीक्ष्यचजपेत्त्रिभुवनमंडलंतथा। प्रजपेत्परमेशानित्रिशक्तिसदृशो
भवेत्। जंघांवीक्ष्यजपेद्देविकालिकावरमाप्नुयात्। गुल्फौवीक्ष्यजपेन्नित्यंदिक्सहस्रमतंद्रितः। राजराजसमोभूत्वात्रैलोक्यविजयीभवेत्
नानाविनोदसौख्येषुसंस्थितांवीक्ष्यपार्वति। जपेदसंख्यमासेनसर्वसौभाग्यमाप्नुयात्। वस्त्राच्छादनसंयुक्तांनारींछिन्नाचकालिकां। योजये
त्परमेशानिद्वितीयानारिणीभवेत्। रजस्वलांचतांज्ञात्वाविनोदेनजपंचरेत्। महाराजपदंभूयाल्लोकाग्रेनपलायते। रजस्वलांचसंवीक्ष्यज
पेद्यत्नेनपार्वति। महाकविवरोभूत्वादेवीतुल्योनरोभवेत्। तस्याश्चकंचसंवीक्ष्यजपेद्दिनचतुष्टयं। सर्वसिद्धीश्वरोभूत्वासिद्धिदातृत्वमाप्नुया
त्। नवकेतुमुखंदत्वाजपेन्नित्यंनियंत्रितं। कालीरूपोनरोभूयात्तुंदासीसेवकीन्निता। तस्याःचक्रंलिहन्देविजपेत्ध्यायंश्चयत्नतः। शतावधान
सामर्थ्येसाधकोभवतिध्रुवं। तयासहप्रभुंक्त्वैजपेद्यत्नेनवैमनुं। षष्टिसिद्धीश्वरोभूयान्नात्रकार्याविचारणा। तस्योच्छिष्टंस्वयंभुंजन्स्वस्य

तस्मै समर्प्ययेत्॥ प्रजपेत्परमेशानि महाविभुवरो भवेत्॥ तस्या मनोगतं कृत्वा जपं यत्नेन पार्वति॥ दृष्टिवेधी भवेद्देवि विपरीताय दा भवेत्· त
दाजपः प्रकर्त्तव्यः स एव कालिकास्वयम्॥ शिवं शिवामुखे दत्वा प्रमथ्य वकुवारकं॥ जपेद्यत्नेम हादेवाधिको भवेत्॥ तस्या वेषं स्वस्य कृत्वा·
स्ववेषं तस्य कारयेत्॥ संयोगीभूय जप्तव्यं सर्वकामार्थसिद्धये॥ स्वमुखे तजगां दत्वा निशि जप्या सदाशिवः॥ स्वमस्तकं च तत्पादे दत्वाय
त्वपरो भवेत्॥ जपं तत्र प्रकुर्वीत देवीध्यानपुरस्सरं॥ महाकालीसमो भूत्वा दिव्यौघसदृशो भवेत्॥ तत्स्नानया समं देवि सर्वकालं जपेच्छिवे
सिद्धानपि चाधिकं कृत्य वरदाता नरो भवेत्॥ तस्या हस्तौ करे कृत्वा दशलक्षं जपेच्छिवे॥ वरदानत्वमाप्नोति कटाक्षदर्शनादपि॥ तस्या हस्ते स्व
लिंगं च दत्वा यत्नेन संजपेत्॥ वाक्सिद्धिमवाप्नोति नात्र कार्या विचारणा॥ तस्या योनिं करे कृत्वा त्रिंशज्जप्याद्दिने दिने॥ कालं धिक्कृत्य दे
वेशि मृतसंजीविनीं लभेत्॥ योनौ नासां प्रदत्वा तु प्राणायामक्रमेण तु॥ त्रिसहस्रं जपेत्त्रित्वं मासमात्रं महेश्वरि॥ त्रिकालज्ञो नरो भूयान्ना
त्र कार्या विचारणा॥ स्वजिह्वां भगमध्ये तु दत्वा प्रतिदिनं जपेत्॥ भगयंत्रं तु संचिंत्य सांगं सावरणं यजेत्॥ तत्र ध्यात्वा क्षिपेल्लिंगं सम्यक् सम
र्प्ये पार्वति॥ नवनीतं भवेद्यावत्तावत्संमथ्य यत्नतः॥ तत्र यंत्रं विलिख्याथ जिह्वां तत्र निधापयेत्॥ तत्र संविलिहन्देवि जपेदद्भुतमादरात्॥ व
र्षमात्रप्रयोगेन त्रिकालज्ञो नरो भवेत्॥ अश्रुतानपि वेदादीन्समस्तान्पाठयेदपि॥ मूकां विंवादयेद्देवि वृक्षानपि विवादयेत्॥ सर्वज्ञः सा
धको भूत्वा कालीरूपोस्तु वर्षतः॥ श्मशानस्थो महास्वस्थो मुक्तकेशो दिगंबरः॥ अर्कपुष्पसहस्राणि स्वपुष्पाक्तानि कारयेत्॥ प्रत्येकं प्रजपेन्नाम्नि

विद्याध्यानपरः सुधीः ॥ पृथ्वीपतिसमो भूत्वा त्रैलोक्यविजयी भवेत् ॥ स्वयंभ्वावृयपक्षं तत्र ध्यात्वा महेश्वरि ॥ पुरतः स्थाप्य यत्नेन जपेन्नद्धतमा
नसः ॥ गंधर्वाधिपतिर्भूत्वा कवित्वामृतसागरः ॥ तस्य चक्रे सदा नित्यं महाकृतिधरो भवेत् ॥ नृत्यगानादिकं मद्यप जपेत्त्रैलोक्यनायकः ॥ सर्वत्र
कामिनीयोगान्महाकृतिधरो भवेत् ॥ तत्पर्वते कलौ दत्त्वा सुखवृत्तेवनतत्परः ॥ प्रजपेद्दिक्तहस्तं यः शिवतुल्यो नरो भवेत् ॥ तामालिंग्य जपेद्देवि
वज्रकायो नरो भवेत् ॥ करं धृत्वा जपेन्मंत्रं कलिकल्पद्रुमो भवेत् ॥ शिवसंघट्टनं कृत्वा तद्देहे परमेश्वरि ॥ प्रजपेल्लक्षमात्रं यः शिवतुल्यो नरो
भवेत् ॥ तां संस्थाप्य करे धृत्वा जपेल्लक्षं स भूपतिः ॥ तां स्थाप्य स्वकरे देवि सहस्रं प्रजपेत्सदा ॥ महावादीश्वरो भूयात्तया सार्द्धं प्रियंवदे ॥ तस्या
योनिं तु संवीक्ष्य वार्त्तायां प्रजपेत्सदा ॥ महाकविवरो भूयाद्दशाहेन महेश्वरि ॥ स्वतः क्रीडागतो भूत्वा तया सार्द्धं प्रियंवदे ॥ तस्या योनिं तु संवी
क्ष्य जपेल्लक्षं नराधिपः ॥ संवृत्य प्रजपेल्लक्षं साक्षात्किंनररूपधृक् ॥ लिंगं धृत्वा जपेद्यो वा वाचस्पतिसमो भवेत् ॥ तत्रालिंग्य हसं देवि जपे
ल्लक्षमतंद्रितः ॥ राजराजो नरो भूयात्तस्याः सिद्धिः प्रकीर्तिता ॥ तां च सुप्तां च संवीक्ष्य तस्याः सेवापरायणः ॥ जपेन्निरंतरं लक्षसंख्यकं परमे
श्वरि ॥ कवित्वे व्याससदृशो धने धनपतिर्भवेत् ॥ तां जपस्थां च संवीक्ष्य जपेद्ध्यानतत्परः ॥ देवीरूपो नरो भूयान्नात्र कार्या विचारणा ॥
तां संकेतस्थां संवीक्ष्य तत्संकेतपरायणः ॥ त्रिसहस्रं जपेद्देवि देवीरूपनरो भवेत् ॥ तां फलस्थां च संवीक्ष्य जपेल्लक्षं महेश्वरि ॥ सर्व
सिद्धीश्वरो भूयान्नात्र कार्या विचारणा ॥ तां गर्भस्थां समध्यगर्भं वीक्ष्य मैथुनमाचरेत् ॥ मुक्तासंवादयेद्देवि नात्र कार्या विचारणा ॥

॥ तं व विं ॥
॥ ३१८ ॥

दिक्सहस्रं जपेन्नत्र स्पर्शोक्तं फलमाप्नुयात्॥ तामाद्यमासां संमथ्य जपेद्वादीश्वरो भवेत्॥ तत्र तासां च संवीक्ष्य विपरीतं रतं चरेत्॥ जपे
दशसहस्रं यः सद्गुराद्गुरपूजितः॥ तां वह्निमासां संवीक्ष्य सर्वकामान् जपात्लभेत्॥ तावेदमासां संमथ्य जपे [redacted]
जपेद्दशसहस्रं यः सद्गुराद्गुरपूजितः तावेद्धि [redacted]॥
दिक्दिनमेव च॥ किं वर्णान्तस्पर्शोदर्य्यखेदरी सदृशी भवेत्॥ तां पंचमासां देवेशि ज्ञात्वा मैथुनमाचरेत्॥ जपेल्लक्षं महेशानि शिव
तुल्यो नरो भवेत्॥ तां षष्ठमासरतां ज्ञात्वा सम्यक् मैथुनमाचरेत्॥ तत्र त्वेन परां कालीं तर्प्पयेत् क्रोधरूपिणीं॥ प्रसन्नरूपिणी
साक्षात्सा वरप्रा स्यान्नवान्यथा॥ तां सप्तमासां संवीक्ष्य शनैर्मैथुनमाचरेत्॥ जपेद्यत्ते न देवेशि बुल्लशां वशमानयेत्॥ तत्र त्वेन परां दे
वीयध्वेन त्वेन तर्प्पयेत्॥ महाराज्यमवाप्नोति दुःखितो न भवेत् क्वचित्॥ रक्तरूपं स्वेन रूपं भ्रलक्षां परमधिष्णरां॥ तत्वं संजायते तस्याः
अंडसाराभिधं भवेत्॥ सर्वसिद्धिप्रदं राज्यप्रदं कालीप्रियंकरं॥ तद्विहस्य जपे देवि त्रिकालज्ञो कथिः शिवः॥ जिह्वां दत्वा लिहन्मंत्री जपेन्नत
स्वादनत्परः॥ कालीताराम यो भूत्वा छिन्नारूपः स्वयं भवेत्॥ स्त्रीप्रभूतां गेहं गं च जगदेतच्चराचरं॥ तथापि भुक्तं देवेशि स्त्रीयोनौ ता
लि पार्वति॥ तस्याः पुष्पं प्रशस्तं हि रेतः पुरुषलिंगगं॥ द्वयं मिलित्वा देवेशि सामरस्यगतिं शिवे॥ एकरूपं समासाद्य सरूपत्वं रजो जपे
त्॥ पिंडोभूत्वा फलं तच्च जीवरूपं परंपरं॥ स्वस्वदेहांशतो बालः पूर्णकामस्ततो भवेत्॥ अज्ञानादपि देवेशि फलमेव प्रयच्छति॥ अहो

॥ गुरुः ॥
॥ ३१८ ॥

योनिर्मलायोनिर्जगद्योनिरयोनिजा॥ ब्रह्मरूपाजगद्धात्रीरम्यांनंदराज्यदा॥ तस्याः संगमवं सौख्यं ब्रह्मानंदेतिसंजगुः॥ यत्सौख्यार्थं
महेशानिब्रह्मानंदाश्चकोटिशः॥ महानंदानामतत्वंजायतेपरमेश्वरि॥ एतावद्योगमासाद्यशक्तिसंयोगहेतवे॥ सिद्धोभवतिपुल्लिं
गरूपमासाद्यपार्वति॥ योनिलिंगभवंसौख्यंनाल्पस्यतपसः फलं॥ ध्यानंतद्योगसौख्यस्यतत्फलंयोगएवच॥ तपस्यानाधिकाक्षा
पिनसंयोगोमहत्तरः॥ सर्वरूपायेदेवेशियोगाभ्यासैरनेकशः॥ सर्वक्षांगमायेश्चतपस्यानेनकोटिभिः॥ फलमेवपरंलभ्यंस्वर्गोवामो
क्षएववा॥ निर्गुणात्वंपरत्वंचश्रवाध्यत्वंमहेश्वरि॥ एवंरूपंसमासाद्ययोगार्थ्यंयततेशिवे॥ संयोगश्चेत्करोयातिकिमहोभाग्यभाज
नं॥ संयोगस्तुपरंब्रह्मसंयोगस्तुपरंतपः॥ संयोगानंदरूपार्थंब्रह्मापियततेशिवे॥ अहोज्ञानवतांज्ञानीसंयोगार्चनपूजकः॥ राज्यंल
भ्यंधनंलभ्यंनसंयोगात्परात्परः॥ अज्ञानादपिदेवेशिफलमेवप्रयच्छति॥ पुत्रादिकंयोगमात्रात्स्फुरमेवप्रदृश्यते॥ तस्मात्संयोगसौ
ख्यस्यज्ञानीकोस्तिमहीतले॥ वेश्यास्पर्शनमात्रेणसायुज्यंसुंदरीस्वयं॥ वेश्यासंगममात्रेणभक्तसान्निध्यकालिकाः॥ वेश्यालिंगनमा
त्रेणतुतंसिद्धिकरीजया॥ रतिंचविपरीतांचकृत्वाछिन्नाविभूतिदा॥ शक्त्यासहप्रभुंजानोपर्वतस्पर्शनंचरेत्॥ मध्येमध्येजपेद्देविसर्वसि
द्धीश्वरोभवेत्॥ शक्तिलिंगोपरिस्थाप्यवधूपरिकरंदृढं॥ यश्चबुवनमासाद्यकुचौधृत्वारतंचरेत्॥ बुवनंचरतंदेविवारंवारंसमाचरे
त्॥ सुरतासनमेतद्धिकालिकाप्रीतिकारणं॥ सुरतासनमासाद्यनिशिजप्यादिनेदिने॥ महादेवसमोभूयात्किमितःसिद्धिमासनम्

निरूढंचसमासाद्ययोलक्षंप्रजपेत्सदा॥सर्ववांछामयीसिद्धिस्तगताभवेत्॥हस्ताहस्तिकयायोगोनिरूढःपरिकीर्त्तितः॥त
स्यांयोनिंचसंवक्ष्यसंजप्यपरमेश्वरि॥कीटादिमाथणाज्ञानंभवत्येवत्रिमासतः॥राज्यलक्ष्मीकीर्त्तिलक्ष्मीवल्लभःसुसंपूजि
तः॥शक्तिशब्दंतुभ्रूकृत्याचजपेन्नत्रयथाक्षरां॥त्रैलोक्यविजयीभूयानात्रकार्याविचारणा॥शतंपादेशतंनाभौशतंयोनौश
तंहृदिशतंवक्त्रकुचद्वंद्वेशतमोष्ठेचचक्षुषि॥शतंमौलौलोमहेशानिसहस्रेणपुरस्क्रिया॥एवंक्रमंसमासाद्यसर्वसिद्धीश्वरोभवे
मनोरथमयीसिद्धिःकोटिसिद्धीश्वरत्वकं॥वाकसिद्धिर्विविधादेवितस्यहस्तगताभवेत्॥कलौयुगेतुसंप्राप्तेशक्तियोगोमह
भवेत्॥शक्तियोगःपरंज्ञानंशक्तियोगपरंतपः॥शक्तियोगपराधामःशक्तियोगःपराकला॥शक्तियोगंविनादेवियःकालींप
रिपूजयेत्॥इहक्षोभमवाप्नोतिपरत्रनरकंव्रजेत्॥यावल्लक्षैर्मनोसिद्धिर्यदासंख्यापुरेरिता॥तावत्संख्यांमनोर्योगेजप्त्वासिद्धि
श्वरोभवेत्॥ ॥अथकुलवृक्षजपमाह॥ नारिकेलंसमारभ्यजंबूपर्यंतमेववा॥कदलीमंडलेसत्वाकदलीवनमेवच॥प्रजपेय
त्नतोयस्तुतारासिद्धिमवाप्नुयात्॥कुलवृक्षास्ततोदेविसर्वेषांफलमुच्यते॥नारिकेलेलभेद्राज्यंपूगेचैवमनोरथान्॥मधुकेका
मिनीप्राप्तिश्चाम्रेसर्वज्ञतामता॥वटेचैकात्म्यविज्ञानमश्वत्थेसर्वकामनां॥तालवृक्षजयावाप्तिर्खर्जूरेराजमान्यता॥पिप्पलेस
र्ववश्यंत्वलक्षेवाकर्षणांपरं॥राज्यलक्ष्मीशमीवृक्षेजंबूवृक्षेधनागमः॥दिक्सहस्रंजपेद्देविसर्ववृक्षेनिरंतरं॥समारुह्यजपेद्देवि·

नात्रकार्य्याविचारणा॥श्लेष्मांतककरंजाख्यविल्वाश्वत्थकदंबकं॥निंबोवटोडुम्बरश्चचंपकःकेशरोदश॥दशवृक्षंसमासा
द्यप्रत्येकंदिक्षुहस्तकं॥प्रजपेयत्नतोदेविश्मनिलायश्चकंतथा॥पिप्पलंचवटंचैवसपुष्पावतुवासिनी॥निंबाश्वत्थंकरं
जंचश्लेष्मांतककदंबकौ॥विल्वंवटंशालन्तालीक्षीरवोटंखर्जुरंतथा॥ताराछिन्नाविधौप्रोक्ताश्रीविद्यायांशृणुप्रिये॥पूर्व्वंवादश
येख्यातास्तयेवश्रीविधौस्मृताः॥एतेषामपिबृंदेवेशिफलंतुपूर्व्ववद्भवेत्॥ ॥इतिश्रीतंत्रचिंतामणौरहस्ययोगनिर्णयना
मत्रयस्त्रिंशत्तमःप्रकाशः॥ ३३ ॥अथनैमित्तिकमाह॥ श्रीमहाकालउवाच॥एतावान्नित्यपूजायाविधिरुक्तोम
यातव॥नैमित्तिकानिकाम्यानिसंप्रतंत्वंनिशामय॥निमित्तंकिंचिदुद्दिश्ययदायातिसुरेश्वरि॥तन्नैमित्तिकमुद्दिष्टंनित्यव
त्तदपिप्रिये॥कामनांकामपिस्वीयांविज्ञेकृत्वाप्रवर्त्तते॥तत्काम्यमितिनिर्द्दिष्टंकामनाफलसाधकं॥तत्रापिप्रथमंवक्ष्येफ
मंनैमित्तिकंशिवे॥नैमित्तिकान्यपिप्रायोविज्ञेयानित्यवद्बुधैः॥यस्तुनैमित्तिकींपूजांनिमित्तत्वेरूपस्थितां॥कुरुतेनित्य
पूजावदज्ञानपरिबृंहितः॥तस्मात्पापतरःकोवाकालिकाद्वेषभाजनं॥अंगहान्यापिनित्यस्यमहानिरुपकल्प्यते॥नैमित्तिक
स्यांगहानिःफलहानिःप्रजायते॥तस्मात्सांगंप्रकर्त्तव्यंशास्त्रदृष्टाद्गुरुक्रमैः॥अंगानिकानिविद्यास्याःपात्राधिकंशिवाबलि
पंचायतनरीतिश्चमंत्रपार्थक्यमेवच॥पूजाबलिःपशुबलिःपूजायाःक्रममेवच॥धूपदीपादिसंभारःशक्तिपूजाजपोदशाः॥नि

त्यपूजासु संस्थेव यथ्येनेष्वुकेचन॥ स्यान्नित्यनैमित्तिकयोर्भिन्नारीभिस्तथापि हि। आरब्धासंतकी पूजा तथा चैवोपरामिकी। निमित्तत्वे
नाप्युपेतातैनैमित्तिकी मता। एतयोरनुष्ठानाज्ञायते न च निस्मतं॥ नानात्ते ज्ञोदित्ताः संति पृथानन्तत्वजनन्मतां। एवं सर्वत्र वोद्धव्यं सर्वेष्वेव
निमित्तेषु॥ नित्यं नैमित्तिकं काम्यं सापेक्षं पूर्वपूर्वतः॥ अन्यथा चिंतयेदित्थं कुर्यादापत्स्वरं परं॥ नित्या वा रस्ततो मंत्री कुर्यान्नैमित्ति
कार्चनं॥ नैमित्तिकार्चने सिद्धेः कुर्यात्काम्यमखं दिने॥ श्रुत्वा नैमित्तिका पूजा प्रोक्ता विंशतिभेदिका। पर्वाणि च महापाताव्यतीपातः
स्तैवधृतिः। मन्वादयो युगाद्याश्च वेदांगं देवताभवं॥ गुर्वाश्च रविवारांश्च त्रिगुरूणां स्वकीयकं॥ जन्माहश्चापि दीक्षायादिवसं न
वरात्रकं। वंदस्यैर्यो परागौ च सुतसंस्कार एव च। तीर्थयात्राभिगमनं तथा चागमनांतरं॥ पीठपीठगमे पुण्यलाभे हेमेषु नोत्सवे
उत्पातानां दर्शनं च वं ब्रमोक्षो रिपुन्नतिः॥ रोगेष्वापत्सु देशेषु दुःसंगे दुर्निमित्तके। ग्रहपीडा राजभयं शांतिरभ्युदयं तथा। एवं ना
नाप्रकारेणानिमित्तानीरितानि ते॥ दमनारोपणं नाम पवित्रारोहणं तथा॥ अंतर्भवंति हृत्येषु तिथीनामेव पार्वति॥ तिथिपर्वाणि
कथ्यंते येषु नैमित्तिकार्चने॥ ॥अथ कुलवारादिनिर्णयः॥ कुलवारं कुलाष्टम्यां वचुर्दश्यां विशेषतः। योगिनीपूजनं तत्र प्रधानं कु
लपूजनं। रविश्चंद्रो गुरुः सौरिश्च वाराः सुकुला मताः॥ भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाकुलः॥ द्वितीया दशमी षष्ठी कुलाकुलमु
दाहृतं। कुलानि समधिष्ण्यानि तद्धेयान्यकुलानि तु॥ अष्टमी नवमी चैव तथा चैव चतुर्दशी॥ उभयोः पक्षयोरेताः पूर्णिमा दर्श एव च

संक्रमाणस्यातथाचत्वारस्तेखपीरिताः॥अयनेद्वेद्वेविषुवेषडशीतिचतुष्टयं।चतुष्कंविषुवत्याश्चनेतेपूर्वसमाप्रिये॥आद्येश्वराणांच
त्वारोद्विरूपाणांततःपरं॥ततःस्थिराणांतावंतोयेषांपुण्योदयःशुभः॥व्यतीपातोवैधृतीचतिथीनांक्षयएवच॥चतस्रोपियुगाद्या
स्तामहापुण्यफलप्रदाः॥शुक्लातृतीयाराधीयानाऽऊर्जेनवम्यपि॥भाद्रेत्रयोदशीकृष्णातापमासेदर्शएवच॥शुक्लावासप्तमीहस्ता
रविवारेणसंयुता॥सोमन्विताप्यमावास्याचतुर्थीभौमसंयुता॥अष्टमीसोमसहितादशमीगुरुणापिच॥षष्ठीभार्गवसंयुक्ताश
निनाचत्रयोदशी॥वैशाखीसप्तमीशुक्लाज्येष्ठीयाचतुर्थ्यपि॥ज्येष्ठस्यशुक्लाषष्ठीचदशमीगुरुणापिच॥श्रावणीपंचमीकृष्णांशु क्ला
[illegible]पंचम्यपिप्रिये॥द्वितीयातिथिमारभ्यतिथिस्यायावदष्टमी॥शुक्लपक्षेतुमाघस्यतिथयःसप्तपुण्यदाः॥मासान्येष्वष्टमीत्वेनप
र्वत्वेऽनुपस्थिते॥दुर्गाष्टमीविशेषेणदुर्गाप्रीतिप्रदातिथिः॥दुर्वांकुरारोपणाख्यंमोत्सेयामत्रकुर्वते॥आरभ्येवाष्टमींकृष्णांयाव
त्स्याद्दशमीसिता॥अष्टादशेमास्तिथयोदेवीप्रीतिकराःस्मृताः॥तिस्रोविशेषतःपुण्याःसप्तमाद्यावरानने॥सर्वैर्निर्वर्त्यतेयास्तुशा
रदीयोमहोत्सवः॥त्रयोदश्यादयस्तिस्रस्तिथयःकार्त्तिकस्यतु॥कृष्णपक्षेवरारोहेस्युरनंतफलप्रदाः॥फल्लत्रयोदशीनाम्नाघोरा
ख्याचचतुर्दशी॥दर्शस्तुसुखरात्र्याख्याअथवादीपमालिका॥प्रतिपद्वाकुलेयाचसितातस्यांयजेच्छिवं॥शुक्लाष्टमीतुगोष्ठाख्यासा
भूरिसुकृतप्रदा॥युगाद्यानवमीप्रोक्तातस्यांजागर्त्तिकालिका॥अतस्तुपूजाविस्तारःकार्य्यस्तस्यांविशेषतः॥अथतिथिनिर्णयः

तिथीनां निर्णयं वक्ष्ये सुक्ष्मं तं तं न तु विस्तरात् ।। नैमित्तिकी तु पूजा तु तिथयो या निरूपिताः ।। ग्राह्या निशीथव्यापिन्यः पक्षयोरुभयोरपि ।। उ
शस्तमर्द्धरात्रे हि भगवत्यर्चने सदा ।। योगो निशीथेन यदा तिथीनां नैव जायते ।। तदा विवेकः कर्त्तव्यो द्वयोरेव हि पक्षयोः ।। यास्तु दिनेऽर
कि शुक्ले तिथयो विहिताहिताः ।। कृष्णे यास्तत्तमा याति सामान्यो यस्त्विधिर्स्मृतः ।। ।। मुहूर्त्तमात्रादधिका या तिथिः शुक्लपक्षकी ।। सा
स्नानदानपूजादौ विहिता तत्वेन गृह्यते ।। न्यूना मुहूर्त्तमात्राद्वा मुहूर्त्तेन मिताऽपि वा ।। तिथिः कालमितत्वेन सा न ग्राह्या कदाचन ।।
यावती या तिथिस्तिष्ठेत्तावत्स्यात्तदुदीरिता ।। क्रियारम्भसमाप्त्या न तत्कर्मोपयोगिनी ।। कृष्णे त्वेवं यदा सा तु तिथिः कालेन युज्यते
तदा तद्विहिते कर्म्म कार्य्यं रात्रौ दिनेऽपि वा ।। ।। निशीथयोगाभावे तु पक्षयोरुभयोरपि ।। पूजादिकं तु कर्त्तव्यं पूर्वाह्णे नापराह्णतः ।
देवानामिह पूर्वाह्णे मध्याह्ने तु नराणां भवेत् ।। अपराह्णः पितॄणां स्यादेवं धर्म्मविनिर्णयः ।। ।। तिथिद्वैधविचारोऽयमधुनात्र निरूप्य
ते दिनद्वयेऽपि चेत्तत्स्या पूर्वा व्यापिनी तिथिः ।। परविद्धा पूर्वविद्धा तिथ्या नैवाप्यया क्वचित् ।। चतुर्थीसहिता कार्या तृतीया न छिता
यया चतुर्थी पूर्वविद्धैव कर्त्तव्या व्रतवासरे ।। पंचम्या सहितां कुर्वन् सद्यो नश्यति सान्वयः ।। चतुर्थ्या सहिता कार्या सर्वदा कालिका
र्चने सप्तम्या सहिता षष्ठी प्रशस्ता सर्वकर्मसु ।। षष्ठीविद्धा प्रकर्त्तव्या सप्तमी व्रतवासरे ।। न त्वाश्विने तु शारद्यां पूजायां जगदीश्वरि
पक्षद्वयेऽप्यष्टमी तु विधातव्या परान्विता ।। अष्टम्या सहिता कार्या नवमी तुल्यपरतिथिः ।। नवम्या दशमी विद्धा सर्वसौख्यकरी मता

संभ्रतिः॥ कृतनित्यक्रियादर्भःपाणिःकृतिरनन्यधीः॥ पूर्वोक्तासनमासीनो वसानो धौतवाससी॥ उत्तराभिमुखो भूत्वा आचमेद्दे-
शिकः शनैः॥ पूर्वार्चितां पूर्वमूर्त्तिं स्नापयित्वा पुनर्जलैः॥ अपनीय प्रसूनादीन् गंधाक्तैस्थापयेत्पुरः॥ पूर्ववत्सर्वपात्राणि प्रक्षाल्य
चण्डेश्वरि॥ मृद्वासने कुशवासीनो यथाविभवकल्पिते॥ ॥ प्राचुर्य्ये वकुलानां चैव वैशाखे मासि कारयेत्॥ नागकेशरपुष्पाणां ज्ये-
ष्ठे मासि समाचरेत्॥ आषाढे तु प्रकर्त्तव्यः करवीरस्य संचयः॥ चंपकोत्पलपद्मानां भूयस्त्वं नभसिष्यते॥ वाकुल्यमोकुपुष्पस्य मासि
भाद्रपदे चरेत्॥ भूरीष्टता विधातव्याः बंधुकस्याश्विने पुनः॥ अगस्त्यकुसुमानां हि भूरितामूर्जमाचरेत्॥ आधिक्ये बिल्वपत्राणां मा-
र्गशीर्षे समाचरेत्॥ पौषे दूर्वांकुराणां हि संदोहोतिफलप्रदः॥ कौन्दस्तोमो माघमासे सर्वकल्याणदायकः॥ फाल्गुने माधवीपुष्पं
सर्वसिद्धिप्रदायकं॥ चैत्रे शोकस्य कलिका कलिकालविनाशिनी॥ मालती यूथिका चैव दमनं कर्णिकारकं॥ कुरुण्टकं कुरुबक-
मम्लानं पाटलं तथा॥ नवमालिकार्कपुष्पं तथैवातिमुक्तिदं॥ एकादशैतानि सदा कुसुमानि वरानने॥ ॥ अथ विशेष्यवार्षि-
कमाह॥ आश्विनामलपक्षस्य यथा प्रतिपदि प्रिये॥ शारदीयार्चनारंभः समाप्तिर्नवमी तिथौ॥ वासंती पूजनस्यापि ज्ञेय ईदृग्विधो वि-
धिः॥ चैत्रशुक्लप्रतिपदि प्रारंभोस्या विधीयते॥ महापूजा ततोष्टम्यां समाप्तिर्नवमीदिने॥ शारदीयस्यथा पूजा वासंत्यपि तथा मता॥
तयोर्भेदन्न कुर्वीत कालिकार्चनकर्मभिः॥ माघस्य वाथ पौषस्य दर्शोर्केणायुतो यदि॥ व्यतीपातश्रवणाभयोगाद्दर्शोदयो भवेत्॥

नैकादशीदशाविद्धाकर्त्तव्याभूतिमिछता।नैकादशीद्वादशीचनचादश्यात्रयोदशी॥चतुर्दशीप्रकर्त्तव्यात्रयोदश्यासमन्विता
अमापरयुताकार्याचतुर्दश्यानयोजिता॥इतिदेवार्चनविधौतिथिकर्त्तव्यतेरिता॥ ॥अथचांद्रदिमासःपरिग्राह्योसौरोवा
देवसुरेश्वरि॥राशिक्रमेणयोमासोविवाहादौसहिस्मृतः॥क्रमादनप्रयोगेचशावनश्चाब्दजादिषु॥शांतिकेपौष्टिकेवापिना
क्षत्रोमासईष्यते॥इज्यासाराकृतिर्यत्रदीयतेसुरवंदिते॥मासःस्यादिःसविज्ञेयोव्रतारंभादिकर्मणि॥होमान्तीयोमयोयत्रमास
मध्यकऽच्यते॥पितृणामाकृपंकर्मयदानिर्वहतिप्रिये॥अंतोमासस्यविज्ञेयःप्रतिमासमियंक्रिया॥नैमित्रिकावनेकालाश्रत
र्मध्याह्नसंगवा॥प्रदोषरात्रीविप्रेशरविविम्बीशशक्तिजाः॥विहितेकालमुल्लंघ्ययथाकाचित्क्रियतेक्रिया॥तयाकिंचित्फलमपि
जायतेसुरवंदिते॥विघ्ननाशस्तथायाशोभवतीत्याहुरागमाः॥तस्मात्कालेप्रकर्त्तव्यंकर्मस्वर्गफलार्थिभिः॥ ॥नैमित्रिकमहा
हस्येभ्यःकर्त्तव्येसुरेश्वरि॥मलीमसांशकस्यागंक्षौरकर्मधरेप्सितं॥नत्रिपीठादिसंसृष्टिंतस्मामासादीपन्नेपर्व॥पत्नीपात्रादिसंशु
द्धितंततोऽद्येविशेषतः॥नैमित्रिकक्रियायांहिषडेतानिसमाचरेत्॥क्षमोऽरिदंतरक्षैभूतकेचगलत्कुशो॥पत्नीपूर्वंमैथुनंचस्त्रीद्वि
जाक्रोशनेतथा॥नैमित्रिकंनकुर्वीतकुर्वन्नैवाप्नुयात्फलं॥ ॥कौलाचारतःसर्वान्योषितप्रकुलाध्वगाः॥निमंत्रयीतयत्नेन
सर्वेषांप्रथमंगुरुं॥नैवेद्यधूपदीपानांकुर्यात्यत्नेनसंभृतिं॥विशेषतश्चपुष्पाणांमाल्यानांचवरानने॥रजन्यांदिवसेवापिविहितार्चन

युगाद्याकोटिभिस्तुल्याविज्ञेयासामहातिथि।।अनंतफलदंतत्रवलिंदत्वाविधानतः॥धनधान्ययुतान्प्राप्यदेहांतेमोक्षमाप्नुयात्॥
माघशुक्लतृतीयाचवरनाम्नाविधीयते॥अत्रार्चिताकालिकाहिकन्याभ्योवरमृच्छति॥धूपदीपौरात्रिवलिपुष्पनैवेद्यचंदनैः॥
अर्चनंकालिकादेव्याकोटिकोटिगुणांवेत्॥एतस्याअपरेशुक्लायाचतुर्थीतिथिर्भवेत्॥साशांतख्यातुधैरुक्तारत्नीयावत्फलप्रदा॥अ
स्यायद्विहितंदेव्यावलिन्यासंजपार्चनं॥भवेत्तत्कोटिगुणितंनात्रकार्याविचारणा॥तस्यातुनर्यापरेद्युःसंज्ञातातिथिरुत्तमाः॥ख्या
ताश्रीपंचमीनाम्नासर्वतिथ्युत्तमोत्तमाः॥अस्यामाराधिताकालीवहुसंभारसंचयैः ददातिचतुरोप्यर्थान्प्रसन्नापरमेश्वरि॥
तिथिश्चतुर्दशीप्रोक्तायोवैतस्याअतुप्रिये॥शिवरात्रिस्तुसाप्रोक्ताकोटिपापविनाशिनी॥एकीकृत्यैकासनेतुशिवशक्तीःप्रपूजयेत्
चतुर्युगावधिकृतापूजाभवतियावती॥तावतीसकलादेवीदिनेनैकेनलभ्यते॥उपवासोविधेयोत्रपूजाजागरणान्वितः॥वारुणी
तिभुविख्यातिचैत्रकृष्णात्रयोदशी॥क्षीरोदमथनाज्जातापूजास्यामेववारुणी॥दुहितृत्वेनजग्राहतामेवापांपतिःस्वयं॥अतएवा
त्रसंपूज्याविशेषेणमहेश्वरि॥मधुमासस्ययाशुक्लातृतीयापरिकीर्तिता॥सासौभाग्यतृतीयाख्यातस्यांपूजामहाफला॥स्त्रीभिःसौ
भाग्यकामाभिःपुंभिःसौभाग्यकामिभिः॥पूज्याभगवतीतत्रधर्मकामार्थसिद्धये॥अमावास्यांसमुत्पन्नःस्कंदश्चैत्रस्यपावकात्॥ततःष
ष्ठ्यांतुशुक्लायांचैत्रमासस्यपार्वति॥ ॥अथरहस्यारहस्यभेदेनग्रहणार्चनमाह॥ ॥श्रीदेव्युवाच॥देवेशश्रोतुमिच्छामिरहस्य

तिरहस्यकं।यत्ज्ञानयोगतोदेवित्रैलोक्यविजयीभवेत्॥ ॥शिवउवाच॥रहस्यमपिदेवेशियन्नकस्यापिकीर्त्तितं।तदेवकथ्यतेदे
वियथावदवधारय।ग्रहणंद्विविधंदेविवाह्याभ्यंतरभेदतः॥चांद्रीकुंडलिनीयोगाद्भवेदभ्यंतराभिधं।भावयोगात्क्रियायोगा
द्विधातत्रापिपार्वति।भावयोगाभवेद्दक्षोक्रियायोगोविधीस्मृतः॥नटीकापालिकावेश्यारजकीनापितांगना।मालाकारस्य
कन्याचकुंभकारस्यकन्यका।कन्याष्टकमिदंप्रोक्तंकुलाष्टकमथशृणु।राजवेश्यागुप्तवेश्यादेववेश्याविलासिनी।नित्यपात्रीती
र्थवेश्याकुट्टिनीत्वभिचारिणी।पंचलिंगहतावेश्यादशलिंगाभगेश्वरी।पंचविंशतिलिंगाचलिंगतुष्टाःप्रकीर्त्तिताः।पंचाशल्लिंग
संयुक्तोलिंगमिश्राःप्रकीर्त्तिताः।शतलिंगाभगानन्दासहस्राभगसुंदरी।असंख्यलिंगसंयुक्तोभगतुल्यपरामता॥ ॥कुलाष्ट
कमथेदानींशृणुपार्वतितत्वतः।मध्यलिंगामहेशानिभगमालामहोत्तमा।विश्वलिंगासर्वयोनिःसर्वस्मादपिचोत्तमाः।
कुलाकुलाष्टकेदेविद्विविधेपरिकीर्त्तिते।राजवेश्यादिकायुग्मंगोपयत्वयथादिकं।मातापुत्रीतथापौत्रीस्वसाचैवस्नुषानुया
शालिकाकेलिकुंचीचभ्रातृजायातथाष्टमी।कुलाष्टकमिदंप्रोक्तंसर्वसिद्धिप्रदायकं।तरुणींसुंदरींरम्यांचंचलांकामतोलुपां॥
गुरुक्तांमंत्रयुक्तांसर्वलक्षणसंयुतां।ईदृग्विधांसमानीयप्रसूनगुलिकोपरि।कुचैतुकलशौप्रोक्तौसामान्यार्घ्यस्तुनाभिका।भ
गध्वजोविशेषार्घ्योत्रिकोणंयंत्रमीरितं।गमागमावनिरुक्ताःपुष्पंप्रहसितंस्मृतं।आलापस्तुतपःप्रोक्तंनवलोकवरःस्मृतः।को

थस्तु निःग्रहः प्रोक्तः करयोर्हो भयं भवेत्॥ तस्याः पादप्रसारस्तु पृथिव्यास्तु प्रदक्षिणाः॥ चुंबनं स्तोत्रपाठोत्र कुचधारस्तु सत्क्रियाः॥
गले पादस्य निक्षेपः सिंहासननितीरितं॥ विपरीतं दोलिकाख्या पूजा प्रोक्ता महेश्वरि॥ विसर्जनं वीजपातो दृढत्वालिंगनं भवेत्॥
ओष्ठे संचुंबनं देवि खेचरीयोग ईरितः॥ कपोले चुंबनं देवि गुटिका परिकीर्तिता॥ ललाटे चुंबनं देवि पादुका परिकीर्तिता॥ नेत्रसंचुंब-
नं देवि अंजनं परिकीर्तितं॥ करसंचुंबनं देवि खड्गसिद्धिः प्रकीर्तिता॥ योनिसंचुंबनं देवि मनोरथमयी गतिः॥ जिह्वाप्रदानं देवे-
शि कालत्वं वनमीरितं॥ रससंलेहनं देवि वृक्षरूपं न संशयः॥ आलोचने पृथिव्यास्तु देवतादर्शनं भवेत्॥ तत्संगिना सदा भाव्यं ता मा-
लोकजपेत्सदा॥ कोटिब्रह्मांडदानादि एकतः परिकीर्तितं॥ तस्याश्चालोकनं देवि सर्वश्रेष्ठतरं भवेत्॥ तपः स्यात्कोटितीर्थेषु योगा-
नामपि कोटयः॥ देवालयानां मानं त्वं कृतं येन निरंतरं॥ तेनेदं प्राप्यते देवि दर्शनं विन्दुरूपिणाः॥ ब्रह्मणो दर्शनं देवि शब्दब्रह्मसहस्रं
वं द्रामृतेराकुंभीत्सात्तथा स्वर्गामृतं पिबेत्॥ राक्षसानां तु संभीत्या ओष्ठे योनौ विराजते॥ चंद्रामृतं वाधरोष्ठे योनौ स्वर्गामृतं प्रिये॥
सदा निवृत्तिर्देवेशि ज्ञानात्सिद्ध्यति नान्यथा॥ अज्ञानाद्विषरूपं स्यान्नात्र कार्या विचारणाः॥ गुरवे हालाकरे माला योनिशाला च चक्षु-
षि॥ हृस्ये स्त्रीकराल्लातु दीपमाला गृहांगणे॥ न करोति परं यस्तु स कथं मम पूजकः॥ संयोगो ग्रहणं देवि महाकल्यां नतोपि च॥ सू-
र्यग्रहो यथा योगे विपरीते निशाकरे॥ तथा यदुच्यते वाक्यं न देवकार्ये स्त्रिये॥ तदा योगे समारब्धे पूर्णायोगाय दावन॥ पुरुषस्य नजा

तोहितेनसःक्रीडतेप्रभुः।।यस्मात्तस्मात्तुविज्ञेयःसर्वतश्चोत्तमोत्तमः।।स्वयंयोगेसमारंभेस्वस्वपूर्वंतुसंस्तुतिः।।तथाकार्यंसमाचर्यंतस्माः।
स्वापोनजायते।।ग्रस्तोदयःसविज्ञेयःसर्वसिद्धिप्रदायकः।।इदंरहस्यंयत्प्रोक्तंदिवायोगंशृणुप्रिये।। ।।स्वस्थक्रमेणैवतस्यतस्या
स्तर्क्षोदयोमतः ~~।।~~ महोदयःस्वयोगेस्याद्वात्रिंशद्दशहरःस्मृतः।।तद्वार्त्ताक्षप्यरूपाख्यस्ततीयःपरिकीर्त्तितः।।इतिसंक्षेपतःप्रोक्तंविशेषं
शृणुपार्वति।।मासद्वादशकंदेविक्रमेणपरिकीर्त्तितं।।शतयोगेमहेशानिमहासाम्राज्यमीरितं।।दिव्यादीनामितिप्रोक्तंपश्चात्तांशृणु
वापरं।।वारुणंशृणुमहेशानिसूर्यचंद्रक्रमाद्विधा।।दर्शेवापूर्णिमायांवाराहुःसूर्यनिशाकरौ।।संछादयतिदेवेशिब्रह्मणोवरदानत
भूमिछायानुगश्चंद्रश्चंद्रगोऽर्कःकदाचन।।एकराशावेकभेदायदाताभ्यांनिलत्वयं।।सतियोगेसप्तमेवाराकादर्शावसानतः।।ततो
परागोभवतिकोटिगुणफलप्रदः।।सूर्यभेदत्रयंदेविचंद्रभेदत्रयंतथा।।सूर्योपरागोग्रस्तास्तथाग्रस्तोदयःस्मृतः।।चंद्रेपिभेदत्रितयं
शृणुक्तापवित्रिक्षात्रिधा।।सार्द्धद्वयंतुलोत्तरंग्रस्तत्वंपरिकीर्त्तितं।।स्नानेजपेतथाहोमेदानेश्राद्धेविकार्चने।।ममहात्रगुणकालोहिविज्ञानयः
सुरेश्वरि।।अहोरात्रोषितःपूर्वंग्रहणेचंद्रसूर्ययोः।।जपित्वाभ्यच्यतांदेवीदानंदत्वातथैवच।।कृत्वाश्राद्धंविधानेनसर्वपापैःप्रमुच्यते।।
यद्यत्करोतितत्तत्कालेतस्यस्यादक्षयंहितत्।।धनदोप्यत्रपुत्रेणमोदतेपुत्रणासह।।भास्करस्यचचंद्रस्यग्रहणेसमुपस्थिते।।स्नापःको
प्योपिदेवेशिगंगाजलसमाःस्मृताः।।तस्माच्छतगुणांतेयंसारसंसलिलंशुचि।।तस्मात्सहस्रगुणितंदातव्यमारुर्मणीषिणः।।दानात्कोटि

गुणा पूजा भगवत्या विशिष्यते॥ तत्रैनैमिन्निकी पूजा कार्या नित्या कदापि न॥ पूर्वेद्युरुपवासेन पूजा कोटिगुणा भवेत्॥ उपोषणास्या
सामर्थ्ये पूजा लक्षगुणा मता॥ वंशर्कौनमसाग्रस्तो दृष्ट्वा वा समारभेत्॥ अदृष्टेतु ग्रहे देवि सर्वं विफलमीरितं॥ ननत्रप्रत्यया स्वस्व
प्रत्ययो देवकर्मणि॥ स्नाने दाने जपे होमे श्राद्धे वा यां प्रतिग्रहे॥ दर्शनानंतरं नृणां मधिकारो न चान्यथा॥ अंतर्दृष्टे दृशा दृष्टे मध्य
ग्रासे महेश्वरि॥ मेघाछन्ने मुक्तिहीने स्नानदानादिकं चरेत्॥ जपमंत्रं विधातव्यं मध्यग्रासेतु सूर्यके॥ ॥ ग्रस्तोदयं समारभ्य॰
ग्रस्तास्ते परमेश्वरि। शास्त्रं दृष्ट्वा समालोक्य स्नानदानादिकं चरेत्॥ कदा लग्नं कदा मुक्तिः सर्वं ज्ञात्वा प्रयत्नतः॥ स्नानदानादिकं कार्यं
नान्यथा शांकरं वचः॥ ॥ स्वराशितो वा राशेर्हि त्रिषष्ठैकादशे ग्रहे॥ सदोषेपश्यतो राहुमिति नित्त्रापदोषता॥ यतः फलानां वा
हुल्यं दोषाणाम्नात्तन्नथा॥ जाप्यतेतः प्रकर्त्तव्यमवश्यं राहुदर्शनं॥ नाडीमात्र समं जादि दोषाणामपनुत्तये॥ किंचिद्दानं प्रकर्त्त
व्यं तत्र विघ्नोपशांतये॥ उद्धृता ये मया प्रोक्ताः काली मंत्राः शुचिस्मिते ते॥ तेषामेकोप्येकवारं जप्तव्यो राहुदर्शने॥ पापानि नाशयत्येवं
कोटिजन्मकृतान्यपि॥ षोडशार्णां सप्तदशी एकवारं यदा चरेत्॥ सप्तद्वीपवती पृथ्वीदानस्य फलमश्नुते॥ तस्माद्विशेषतः कार्यो ज
जपपूजासमन्वितः॥ सुरेश्वराणामन्येवे गोसां कुर्वंति केचन॥ कर्मैकं कार्यमेतस्मान्नते पूजाधिकारिणः॥ आवश्यकतयानेसु प्रक
र्त्तव्यमुपोषणं॥ पूजाकर्तुर्न मुख्यं तन्कृतेतु फलभूरिता॥ यामत्रयं न भोक्तव्यं चंद्रग्रहणपूर्वतः॥ सूर्यग्रहणतः पूर्वं प्रहराणां चतुः

ष्ठयं।।राहुनिर्मुक्तमरुणांनथैवरजनीकरं।। दृष्ट्वैवभोजनंकुर्यादन्यथानारकीभवेत्।।ग्रस्तास्तौचेदुभौस्यातामथवाचनिमील
तौ।।दिवारात्रैरुपोष्यैवनतोऽश्नीयाद्यथाक्रमं।।अत्रकेचिदपीछंतिभवशास्त्रविमोहिता।।उपवासंप्रकुर्वीतग्रस्तास्तेपरमेश्व
रि।।शास्त्रदर्शस्तुसंदर्शःप्रत्यक्षेपूर्णारूपता।।देव्यानामपिदेवेशिग्रंथुलक्ष्यतोभवेत्।।उपवासंत्रिरात्रंतुशैवानांपरिकीर्तितं
विष्णुगाणपसौराणांद्विरात्रंपरिकीर्तितं।।शाक्तानांपूर्वरात्रंतुपरश्चर्याप्रभुतोभवेत्।।पुरश्चरणहीनानांपूर्तमेतन्मयानवा।।बांडे
स्वायंभुवेदेविद्विरात्रंपरिकीर्तितं।।नोपवासंप्रकुर्वीतजीवपुत्रोहिकार्हिचित्।।निमित्तकंतुयंयत्रतत्रात्यंकाम्यवाचकं।।अवि
धायनरोयस्तुविमुक्तस्नानमीश्वरि।।भुंक्तेसकेवलमघंभुंक्तेविश्वंसकेवलं।।श्राद्धहस्तोमहत्वापिदानकृज्जपकृत्तथा।।निवर्त्ति
तप्रात्यधिकःकलाकांक्षीस्थितोभवेत्।।ग्रहंदृष्ट्वाशुचस्नात्वातत्रत्कर्मसमाचरेत्।।अशौचेजन्ममरणेऽजनितंस्वेसजायते।।
नकार्याश्राद्धदानार्चाःकेवलंस्नानमाचरेत्।।सूतकद्वययुक्तोपियोमर्त्योवास्नातिनग्रहे।।सयःसमस्तुमाप्नोतिस्नायीपापयान्न
विंदति।।जपेदानेतथाहोमेश्राद्धेचैवसुरार्चने।।अशौचदोषःसर्वत्रनतुस्नानेसुरेश्वरि।।मासयोर्भाद्रनभसोःसरितःसुरजस्व
लाः।।चंद्रसूर्यग्रहेप्राप्तेरजोदोषोनविद्यते।।स्नात्वातुपापोदकेतीर्थेशुचिःपूर्वमुपोषितः।।स्पर्शाद्विमुक्तिपर्यंतंजपेन्मंत्रमनन्य
धीः।।अनंतरंदशांशेनक्रमाद्धोमादिकंचरेत्।।अथवामहतीपूजांकुर्याद्दानंतथैवच।।मूलमंत्रस्यसिद्ध्यर्थंगुरुंयत्नेनतोषयेत्

एवं च मंत्रसिद्धिः स्यात् देवता च प्रसीदति ॥ तत्तत्तीर्थविशेषेण विशेषः स्यात् फलेष्वपि ॥ स्नानोदेतेन कर्त्तव्यं तीर्थाभिगमनं प्रिये । गंगाफलसमानि स्युः सर्वाण्यंभसि भूतले ॥ तथापि तत्तत्तीर्थानां विशेषः कोपि कथ्यते ॥ दशजन्मकृतं पापं गंगास्नानेन नश्यति ॥ त्रिंशज्जन्मकृतं पापं गंगायमुनासंगमे ॥ शतजन्मकृतं पापं गंगासागरसंगमे ॥ जन्मनां तु सहस्रेण यत्पापं समुपार्जितं कृत्वा सूर्य्ये ग्रहे स्नानं नत्तुवति महोदधौ ॥ जन्मनां नियुतैर्नैव यत्किंचिन्नभिरर्जितं ॥ वाराणस्यां ग्रहे स्नानात् तदश्चैव व्यपोहति ॥ नरेखाये कृतं यद्यज्जन्मनां कोटिकोटिभिः ॥ तत्सर्वं सन्निहत्यायां राहुग्रस्ते दिवाकरे ॥ नाशयेत् स्नानमात्रेण सत्यं सत्यं सुरेश्वरि ॥ सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहस्तथा ॥ चूडामणिरिति ख्यातस्तत्र योगो महाफलः ॥ सर्वेभ्यो देवि दानेभ्यो वेदानेति महत्फले भूमेरथ सुवर्णा स्यवर्णा भूमिः प्रशस्यते ॥ पूजायामपि देवेशि परिवारगणार्चनात् ॥ षोडशाद्दशाष्टा वृकुलपूजा प्रशस्यते ततः कोटिगुणं ज्ञेयं निश्चितं विद्धि पूजनं ॥ चंद्रसूर्यग्रहे वापि यंत्रस्थापनमाचरेत् ॥ यंत्रसंस्थापनं कुर्याच्चंद्रसूर्य्यग्रहे शिवे ॥ तद्यंत्रस्या देवता तु सहसा वरदायिनी ॥ चंद्रसूर्य्यग्रहे देवि यद्यत्कर्म करोति च ॥ तत्तदक्षयमायाति विद्याराज्ञीप्रसादतः ॥ चंद्रसूर्योपरागे तु मेरुसाधनमाचरेत् ॥ इष्टमंत्रोपि देवेशि क्रमेणासिध्यति ध्रुवं ॥ तारापिंडग्रहे प्राप्ते तथा सूर्यग्रहेपि च ॥ जपादिकं विधातव्यं शक्तिपूजां ततश्चरेत् ॥ सर्वसिद्धीश्वरो भूयात् नात्र कार्या विचारणा ॥ ऋतुस्नातां स्त्रियं ज्ञात्वा सूर्य्यचंद्रग्रहांतरे

॥ मंत्रचिं॥
॥ ३२६॥

पतिपार्वणामासाद्यपिंडंतैस्तुप्रदापयेत्। वंध्यापुत्रप्रदोयोगःसर्वसिद्धिप्रदायकः॥ सूर्य्योपरागेदेवेशिस्नात्वापूजांसमाच
रेत्॥ सांगांसावरणांपूज्यसवत्स्यंतंमहेश्वरि॥ कुमारीपूजनंकृत्वासर्वसिद्धीश्वरोभवेत्॥ चंद्रसूर्यग्रहेदेविशिनसंख्यांकुमारि
कां॥ पूज्यसिद्धीश्वरोभूयात्तत्रकार्याविचारणा। सूर्यग्रहेमहेशानिकामस्यहोमंचरन्नशिवः। तर्प्पणांकुरुतेयस्तुतस्यश्रीस
र्वतोमुखी॥ मार्जनंतुप्रकर्त्तव्यंसर्वदुःखप्रशांतये॥ सूर्यग्रहेसमायातेपारधिर्यदिवेभवेत्॥ पारतल्पाभिधोयोगःसर्वसाम्राज्य
दायकः॥ तरापिंडेपरागेतुगुरुंसंपूज्यदेवतां॥ संशोध्यतत्करोग्रासःसर्वसिद्धीश्वरोभवेत्॥ तारापिंडग्रहेप्राप्तेशवमानीयसाधकः
शवासनेजपेद्देविग्रासादुग्रासतःशिवे॥ सर्वसिद्धीश्वरोभूयादंतेशिवतांव्रजेत्॥ सूर्योपरागेदेवेशिशुद्धांतःकरणोयदि
स्नात्वायथोक्तविधिनासंपूज्यजगदंबिकां॥ शिरःशुष्कःकर्त्तयित्वादेवतायैनिवेदयेत्॥ देवतापशुपतिशिवेवरदानपराध्रुवं
सूर्योपरागेसंप्राप्तेस्नात्वाप्रोक्तेनवर्त्मना॥ शक्तिमानीयतत्राग्रेन्यासजालंप्रविन्यसेत्॥ मद्यंमांसंतथामत्स्यंभगलिंगामृतैर
पि। देवतांतत्रसंपूज्यसांगांसावरणांशिवे॥ तत्रजिह्वांप्रदत्वातुजपात्त्रैकाल्यविद्भवेत्॥ अतीतानागतज्ञानेवर्त्तमानेचपश्य
ति। सूर्यग्रहेमहेशानिवेश्यामानीयसादरं॥ भक्त्यालिंगोपरिस्थाप्यजपेद्यत्नेनपार्वति। त्रैलोक्यविजयीभूत्वातत्रकार्यावि ॥ गुरुः ॥
चारणा॥ अनुकल्पप्रदातॄणांद्विजानांश्राद्धमेववा॥ कोलानामपिसर्वेषांविमुक्तानांमहेश्वरि॥ पात्राणांग्रहणांसत्त्वंग्रहमध्येकदाच ॥ ३२६॥

इतिसंक्षेपतः प्रोक्तः ग्रहणस्य विनिर्णयः॥ ॥अथदमनारोपणं॥ दमनारोपणा चैका पवित्रारोपणी परा॥ प्रतिसंवत्सरं चैते यो न कुरुते साधकः॥ तस्य वर्षकृता पूजा व्यर्था भवति भामिनि॥ कृतामपि विलुप्यंति भूतप्रेतादयोगणाः प्रतिसंवत्सरं तस्मात् कुर्याद्यत्नेन साधकः॥ दमनारोपणं कर्म पवित्रारोपणं तथा॥ दमनेन च यो देवं वर्षमध्ये न पूजयेत्॥ तस्य वर्षकृतं पूजाफलं गृह्णाति कामराट्॥ ॥अथास्योत्पत्तिबीजमाह॥ पार्वत्युवाच॥ एकं विज्ञप्तुमिच्छामि प्राणनाथ महेश्वर॥ आख्याय परमं योगं योगीन्द्राणां त्वया प्रभो॥ आवां युयुक्षुर्मदनो ध्यानयनवह्निना॥ किमर्थं परिणीताहमथ भोगं समुद्धता॥ आवयोः किं सुखं तस्मिन्नते रतिविवर्द्धने॥ यद्यसि त्वं मया सार्द्धं चिकीर्षुः केलिमुत्तमां॥ संजीवय तदा कामं प्रीतये मम धूर्जटे॥ कृत्वेत्थं गिरिजा वाक्यं रानिलीलासुरतावहं॥ स्मितं विधाय प्रोवाच मानयन्प्रेयसीं भवः॥ ॥श्रीमहादेव उवाच॥ ईदृशी यदि ते श्रद्धा कामसंजीवने प्रिये न दास्यसि रतिं वापि तं विना चेद्गिरीन्द्रजे॥ एष संजीवयाम्येनं प्रीतये तव पार्वति॥ ख्यातिं प्रख्यापयिष्यामि तवानेन च कर्मणा॥ ॥ विधास्यामि तथा वा त्वां व्यवस्थां भुवनत्रये॥ अथोत्तरा फल्गुनी भं तिथिश्चापि त्रयोदशी॥ शुक्लः पक्षश्चैत्रमासो योगो वृद्धिस्तथैव च पूजामतमग्रेप्येनं मुदे तव ममापि च॥ पुष्पधन्वेति नामास्य पुष्पैरेवास्य विग्रहं॥ संकल्प्य रचयिष्यामि पश्यंत्यास्तव पार्वति॥ इक्षुकाणाप्यगणापानालोप्यकुसुमानि च॥ कामं संजीवयामास तत्तदंगं प्रकल्प्य सः॥ सर्वशरीरं दमनैर्वदनं कमलेन च॥ नासां चम्पककुः

ष्मेरा दृशौ कुवलयेन च॥ मल्लिकाभिः कपोलौ द्वौ यूथीभिरलकं तथा॥ द्वौ कर्णौ करवीरैश्च पाटलाभिर्हनुद्वयं॥ माधवीभिर्ज्जत्रुणी द्वे शिरीषै
र्गण्डयोर्युगं॥ नासापुटे द्वे बकुलैः कर्णिकारैर्गलस्तथा॥ चूतांकुरैर्वा कुयुगं केशपाशः कुरुण्टकैः॥ कांचनारैरंशयुगं कुंदैः कुक्षि
युगं तथा॥ वक्षःस्थलमशोकैश्च जठरं केतकीदलैः॥ पार्श्वद्वयं जातिभिश्च वक्षणं किंशुकैरपि॥ शतवर्गैरूरुयुगं द्वे जंघे जवया त
था॥ पारिजातैर्मरुवकैः कदम्बैर्बंधुजीवकैः॥ अंगोपांगानि सर्वाणि प्रत्येककुसुमैर्भवः॥ चकार कामदेवस्य समग्रं तु कलेवरं॥ दमनैः
कल्पयामास शरांश्चापि शरासनं॥ वसंतं कोकिलान् भृंगान् मलयानिलमेव च॥ रतिं च वामदिग्भागे प्रीतिं दक्षिणतस्तथा॥ प्रकल्प्य
भगवानीशो मृतसंजीवनीमनुं॥ गृणान् संजीवयामास स्वशक्त्या प्रथमाधिपः॥ संजीवितं समुत्थाय स्वसहायसमन्वितः॥ उमामहे
श्वरौ भक्त्या ननाम प्रभुविदग्धवत्॥ विज्ञापयामास तथा प्राप्तदेहः स्मरो हरं॥ किं कर्त्तव्यं मया देव तदनुज्ञातुमर्हसि॥ उवाच तमथेशानो भ
क्तिप्रणतकंधरं॥ त्रिजगन्मोजगन्मोहयन्नित्यं पौष्पेण धनुषा स्मर॥ विचरस्वेच्छयैताभिः शक्तिभिः परिवारितः॥ मित्रीभूतसहायैश्च
तथाऽमीभिरपि ध्रुवं॥ मोहयेत्युवतीपूतः शरैः पंचविधैः सदा॥ मत्तः कलेवरं लब्धं त्वया देव्याः प्रसादतः॥ इयं तिथिरनङ्गाख्या तव ना
म्ना भविष्यति॥ त्वामस्यां येऽर्चयिष्यंति गंधपुष्पादिविस्तरैः॥ नैवेद्यधूपदीपाद्यैर्गीतवाद्यादिनर्त्तनैः॥ अश्लीलवचनाक्षेपैर्मादकद्रव्यः
भोजनैः॥ योनिलिंगादिशब्दानां प्रलापैर्हास्यकारकैः॥ नानाकारवचैर्नर्मैर्महोत्सवसमन्वितैः॥ त्वं वरान्निक्षिप्तां दद्यास्तेषां मदव्वः

नान्स्मर। तत्परेहनि मत्पूजा विस्तार्यो मकरध्वजै॥ इत्युक्त्वा संविसर्ज्यैनं सर्वमंतरतिहरः॥ उमामुवाच पार्श्वस्थां विहसन्सा नयेश्वतां॥ देवि त्वद्वाक्यमाद्येरा मया संजीवितः स्मरः॥ तवापि नाम भुवने स्थापयिष्यामि सुंदरि॥ कामदेवत्राशीरात्रौ दवनैरधिवासितैः॥ पंकरोपि नमूले श्वत्वां सर्विष्यंति ये नराः॥ तेषां त्वयि कृतां पूजा वार्षिकी सफला भवेत्। दमनारोपणं कर्म न कृतं यैः प्रमादतः॥ शुभानि नाशयित्वैषाम शुभानि प्रदास्यति॥ त्वदीयाश्च गणाः सर्वे हरिष्यंत्याह्निकार्चनं॥ यथा ते शारदीयार्चा नित्या क्षेमप्रदायिनी॥ दमनारोपणं वादस्तथा भक्तु भूतले॥ दमनारोपणं कर्म ततः प्रभृति सुंदरि॥ स्थितमावश्यकतया कर्त्तव्यत्वेन च प्रिये॥ ॥दमनारोपणं वक्ष्ये साधकानां हिताय वै संवत्सरकृता पूजा पूर्णा येन भवेत्प्रिये॥ चैत्रादयस्त्रयो मासाः पक्षौ सितसितेतरौ॥ सिते लक्षणसंयुक्तं असिते च सहस्रकं॥ एतेषां पूर्वपूर्वस्तु कालस्सर्वोत्तमोत्तमः॥ कालस्तदीयोगुरुवस्तु शुक्लः पक्षो मध्यो मतः॥ मध्यमो माधवो ज्येष्ठः सुविस्त्वधम उच्यते॥ चातुर्मास्यप्रतिष्ठे तु यः कुर्याद्दमनं विधिं॥ न तस्य दुर्मते सिद्धिर्विपरीतं च जायते॥ भूपाः प्रेताः प्रनृत्यंति क्षुधासंपीडितोदराः॥ अस्माकं भागयोगेन वैकश्चित्साधकाधमः॥ सुप्ते जनार्दने कुर्याद्दमनारोपणं विधिं॥ तदा वयं विलुंपामो भक्षयामोर्चनं च तत्॥ अतो वसंते शिशिरे ग्रीष्मे कुर्यादउं विधिं नैव वर्षासु शरदि हेमंते नैव च प्रिये॥ तस्मात्तु त्रयपूर्वोदिते दमनकार्चनं॥ न परत्र तु वै कार्यं देवीप्रीतिविधित्सया॥ अष्टमी नवमी पूर्णमास्यमा च चतुर्दशी। एतन्मध्ये तु कस्याश्चित्प्राग्दिने सुप्रदोषके॥ दमनाधिवासनं चैव श्वोविकावालुपूरणं॥ एतत्क्रमं विधिं ज्ञा

दमनारोपणमाचरेत्॥ ॥कृतनित्यक्रियः शुद्धो युक्तः सामयिकैर्जनैः॥ दमनस्य समीपं तु गत्वा समुपविशेत्॥ अधिवासनकर्मांगभूतं संकल्पमाचरेत्॥ राशितिथ्यादिकं प्रोच्य वर्त्तमानतयास्थितं॥ वार्षिकार्चासमाप्त्यर्थं स्वः कर्त्तव्यस्य कर्मणः॥ दमनारोपणस्यास्याङ्गभूतमधिवासनं॥ करिष्य इति संकल्प्य पंचायतनमर्चयेत्॥ प्राणायामत्रयं कृत्वा न्यासादीन्विन्यसेत्ततः॥ ॥कामभस्मसमुद्भूत रतिबाष्पनतो भव॥ ऋषिगंधर्वदेवादिमोहनाय नमोस्तु ते॥ सांवत्सरिकपूजायाः परिपूर्णत्वसिद्धये॥ दमनत्वं समायाहि क्षमस्व च नमोस्तु ते॥ शिवप्रसादसंभूत अत्र संनिहितो भव॥ शिवकार्यं समुद्दिश्य नेतव्योसि शिवाज्ञया॥ ॥एवं दमनमामंत्र्य काममेवं तथा रतिं प्रीतिं च पूजयेत्तत्र तन्मंत्रैः साधकः॥ तारः क्लीं कामदेवाय नमश्चेति नवाक्षरः॥ ॥श्रीं श्रीं श्रीं क्रौंमिति प्रोक्ता रत्यै हृद्याष्टवर्णकः॥ रतिस्थाने प्रीतिपदादयमप्यष्टवर्णकः॥ ततः स्वगृहमागच्छेद्द्वितीयदिवसे पुनः॥ कृतनित्यक्रियः स्वेष्टैर्युक्तो दमनमाव्रजेत्॥ स्वयमुत्पाद्य दमनं समूलं पत्रवेष्टितं॥ आनीतोप्यथवान्येन मूलादानीतमीश्वरि॥ उन्माद्योच्छेदयेद्वा तन्मूलस्यास्य मंत्रतः गृहमानीय तोयेन मंत्रेणानेन सेचयेत्॥ ॐ अघोरेभ्यश्च घोरेभ्योमिति कीर्त्तयेत्॥ घोरघोरतरेभ्यश्च सर्वेभ्यः सर्वसर्वेभ्यः॥ नमस्तेस्तु रुद्ररूपेभ्यो ह्रीं श्रींमिति मनुः स्मृतः॥ चतुस्त्रिंशदक्षरात्मा दमनं तं निधापयेत्॥ पूजास्थाने च पीठादेर्नवभागान्दमनानां॥ कृत्वा चाष्टदलं पद्मं तत्र भागान्प्रविन्यसेत्॥ ततस्तत्र प्रपूर्वादिपत्रेषु प्रतिपूजयेत्॥ अष्टाशास्वष्टकामांश्च अष्टद्वययुतैः क्रमात्॥ ॥

कर्पूरं रोचनायुग्मं कस्तूरीचन्दनः प्रिये॥ अगरुं कुंकुमं धात्रीफलं चंदनमेव च॥ सुगंधिकुसुमैः कुर्यादष्टद्रव्याणि पार्वति॥ कामो भस्मशरीरश्च अनंगो मन्मथस्तथा॥ वसंतशेखनामा च स्मरश्चेक्षुधनुर्धरः॥ पुष्पबाणाभिधाद्यास्ते हृदंताः प्रकीर्त्तिताः॥ चंदनागुरुकर्पूरकुंकुमैर्लेपयेत्ततः॥ आनंदेशीबीजवर्णो विन्दुमद्भिर्नमोंतकैः॥ पृथक्पूज्यास्तु तद्बीजसहक्षमन्त्रवर्यौ॥ ॐ नमो इति मध्येर्च्य स्वस्वमंत्रेणारक्षयेत्॥ त्रिशूलमुद्रां बध्वाथ भ्रामयेद्दमनोपरि॥ संपूज्य मदनं सम्यग्गंधपुष्पाक्षतादिभिः॥ जपेदनंगगायत्रीं यथाशक्त्या प्रसन्नधीः॥ कामदेवाय इत्युक्त्वा विद्महे च वदेत्ततः॥ पुष्पबाणाय संप्रोच्य धीमहीतदनंतरं॥ भवेदनंगगायत्री तन्नोनंगः प्रचोदयात्॥ नमस्तु पुष्पबाणाय जगदानंदकारिणे॥ मन्मथाय जगन्नेत्ररतिप्रीतिप्रियाय च॥ अनेन मनुना देवि नमः कुर्यात्ततः परं॥ अथ विज्ञापनं कुर्याद्दैवे मदनपाणिशुक्॥ अस्त्रमंत्रेणाथ नववस्त्रेणाच्छादयेत्स्वतं॥ रहसि स्थापयेदेतत्संप्रोक्तमधिवासनं॥ आमंत्रितोसि देवेशि सद्यः काले मया शिवे कर्त्तव्यानुयथालाभं पूर्णां पर्वतपात्मया॥ विज्ञापनाख्यमंत्रेण त्रिशक्तिं परितोषयेत्॥ ततः संपूज्य देवेशीं गंधपुष्पाक्षतादिभिः॥ षोडशार्णो जगन्मातर्वांछितार्थफलप्रदे॥ हृद्या पूरय मे देवि कामान्कामेश्वरेश्वरि॥ अनेन प्रार्थयेद्देवीं पश्चाद्दमनमीश्वरि॥ वर्मावगुंठनं कुर्याद्दस्त्रेणापि च रक्षितं॥ ततो जागरणं कुर्यात्स यश्चेज्जागरो न हि॥ प्रथमे दिवसे कुर्याद्धिवासनमुत्तमं॥ सद्योधिवासनं वापि वर्षपूजाफलाप्तये॥ ततः प्रभातउत्थाय कृत्वा नित्यक्रियां स्वकां॥ कृतार्चासंभृतिः पूजामंडपं समुपाविशेत्॥ मूर्त्तियंत्रालयादीनि कुर्यादुज्वलितानि हि॥ संकल्पं

पुरतः कुर्यात्तदनेतरमीश्वरि ॥ दमनारोपकर्माहं करिष्य इति वोल्लिखेत् ॥ पुण्याहवाचनं कृत्वा दमनं तं समानयेत् ॥ पूजास्थाने प्रकुर्वीत
सर्वतोभद्रमंडलं ॥ तस्याष्टदिक्षु संस्थाप्या घटाः स्वर्णादिनिर्मिता ॥ मध्येऽथवा कुंभमेकमशक्तः स्थापयेन्नयः ॥ तत्रस्थासनपूजादि
योगपीठं तमर्चयेत् ॥ तस्य दक्षिणदिग्भागे सिंदूरेणाष्टपत्रकं ॥ पद्मं कुर्यात् वृत्तयुग्मवेष्टितं भूपुरेण च ॥ पंचवर्णै रजोभिश्च कर्णि
कायामशोककं ॥ लिखित्वा प्रार्थयित्वा तं पूजयेद्गंधनादिभिः ॥ ॥अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशक ः॥ शोकार्तिं हर मे नित्य
मानंदं जनयस्व मे ॥ तस्य दक्षिणतस्मात्स्वराडले पूजयेत्सुतनः ॥ वरखङ्गधरं कालं पंचरंगैर्विचित्रितं ॥ ॥स्वच्छादिप्रलयांतो यः का
लरूपो महाबलः ॥ कलयेत्त्वपि विश्वं यस्तस्मै कालात्मने नमः ॥ ॥अशोकस्य ततो धस्तात्त्रिकोणे मंडले शुभे ॥ मंडूकादिज्ञाना॥
न्तां तं पीठपूजां समाचरेत् ॥ तत्राष्टदले प्रोक्तशक्त्यष्टकं समर्चनं ॥ सौभाग्यं च ततो हर्षां तृष्णां तापिधृतिं रतिं ॥ प्रीतिं च संगमां निर्ति
रास्वां मध्ये तु कामुकां ॥ आवाह्य कामदेवं च तनायक्ष्यात उत्तरं ॥ कृत्वा प्राणप्रतिष्ठां तं ततो मुद्राः प्रदर्शयेत् ॥ पाशांकुशौ धनुर्बाणाभि
धाध्यायेन्नतःपरं ॥ ॥रक्तांबरं रक्तवर्णं रक्तगंधानुलेपनं ॥ रक्तमाल्यं च तरुणं वामदक्षिणयोर्युतं ॥ रत्याप्रीत्येक्षुकोदंडपुष्पबाणा
मयः करे ॥ ऊर्ध्वपाशांकुशौ पूज्यः पूर्वोक्तमनुनात्वयं ॥ ॥रक्तवस्त्रपरीधानां सर्वाभरणभूषितां ॥ पद्महस्तकरां गौरवर्णां ध्यायेद्र
तिं शुभां ॥ श्यामवर्णां रक्तवस्त्रां सर्वाभरणभूषितां ॥ तां तूलाख्यां भवेत्प्रीतिं घटपुष्पलसत्करां ॥ अग्रे तु कामदेवस्य वसंतं परिपूजयेत्

सुधाकुंभं वामहस्ते दक्षिणे कुसुमाकरं ॥ कदंबवनमध्यस्थं रक्तमाल्यांशुकावृतं ॥ ध्यायेद्वसंतं गौरांगं शुभरूपं त्रैलोकमोहनं ॥ वं वसंताय
हृदयं तस्य सप्ताक्षरो मनुः ॥ पूजार्थं ततोऽग्नीशरक्षोवायव्यमध्यतः ॥ चतुर्दिक्षु च षड्दीर्घं भुगतं तस्य बीजकं ॥ पठित्वा हृदयादीनि
षडंगानि प्रपूजयेत् ॥ तदग्राष्टदले देवपुरतं तस्य प्रदक्षिणां ॥ कामं भस्मशरीरं वानंगं मन्मथमेव च ॥ वसंतस्य सखायं च स्मरमिक्षुधनुर्ध
रं पुष्पबाणं तदग्रे तु लोकेशानायुधानि च ॥ ततस्तु कामगायत्र्या यथाशक्त्या जपं चरेत् ॥ वसंतं कामदेवं च भक्तो कामान्प्रार्थयेदिति ॥ ॥
वसंताय नमस्तुभ्यं वृक्षगुल्मलताप्रिये ॥ सहस्रमुखसंवाह कामरूप नमस्तुते ॥ नमोस्तु पुष्पबाणाय जगदानंदकारिणे ॥ मन्मथाय ज
गन्नेत्र रतिप्रीतिप्रियाय च ॥ ॥ अथ पाशमुद्रामाह ॥ वाममुष्टिस्थितर्जन्या तथा दक्षिणतर्जनी ॥ संयोज्यांगुष्ठिकाग्रे तु तर्जन्याग्रे स्वके
क्षिपेत् ॥ एषा पाशाख्या मुद्रा विद्वद्भिः परिकीर्त्तिता ॥ ॥ कामदेवं प्रतिमायाथ मूलेन्यासं समाचरेत् ॥ आवाहयेन्मध्यकुंभे देवं सां
गं च पूजयेत् ॥ आवाहितोसि देवेश सघः कालेमया विभो ॥ कर्त्तव्यं तु यथालाभं पूर्णपर्वं त्वदाज्ञया ॥ इति सावरणं देवं दमनैः पूजये
त्ततः ॥ धूपदीपादिकं दत्वा नित्यहोमं समाचरेत् ॥ इध्मैस्तु देवकल्पोक्तैर्होमस्तु द्विगुणो जपात् ॥ पूजाशेषं समाप्याथ प्रार्थयेद्दैवतामिति ॥
सर्वरूप जगन्नाथ वांछितार्थफलप्रद ॥ हृत्स्थान्पूरय मे देव कामान्कामेश्वरेश्वर ॥ एवं संप्रार्थ्य देवेशं विसृज्य चतुरस्ततः ॥ इष्टांश्चैस्तोष
येद्विप्रां भोजयेदिति तद्विधिः ॥ शक्तिपूजा च कर्त्तव्या दमनारोपणोत्तरां ॥ कृते पुरस्तात्सकलं विफलं जायते प्रिये ॥ अतः कार्या शक्तिपूजा

पूजादमनारोपणोत्तरं। सपुष्पदमनं चैत्रे तेन चाभ्यर्च्य कालिकां॥ सप्तजन्मकृतैः पापैर्मुच्यते नात्र संशयः॥ चैत्रशुक्लत्रयोदश्यामधिवासनपूर्वकं॥ आरोप्य दमनं दुर्गां विधिनानेन पूजयेत्॥ मयोक्तेन वरारोहे तस्य पुण्यफलं शृणु॥ अश्वमेधसहस्रेण राजसूयशतस्य च तत्फलं समवाप्नोति देववद्दिवि मोदते॥ एवं यः कुरुते पूजां दमनारोपणाभिधां॥ भवंति नापदस्तस्य कदाचिदपि सुंदरि॥ सिद्ध्यंति तस्य मंत्राश्च नारी राज्ञां वल्लभो भवेत्॥ सर्वसंपद्युतः श्रीमान्मोदते दिति देववत्॥ यास्यंति परमं स्थानं यत्र देवी महेश्वरी॥ पालयंतिलयं सर्वदामनं नाम मानवः॥ तेषां न्यूनाधिकं कर्म मायांतं नवमासिकं॥ गृहस्थो ब्रह्मचारी वा न करोति विमोहितः॥ क्रिया तस्य विनश्यंति साधकः सिद्धिवर्जितः॥ ॥ अथ पवित्रारोपणं॥ ॥ श्रीदेव्युवाच॥ कलपूजां महेशानि पवित्रारोहतां कथं॥ कस्मिन्काले कथं कार्यं किमर्थं वद मे प्रभो॥ ॥ श्रीभैरव उवाच॥ पुरा देवासुरैर्देवि क्षीरोदधिस्तु मंथितः॥ तत्र नेत्रे महाभागे कस्यपस्य सुतो वली॥ मंथाने योजितो मडे विषनिद्राविमूर्छितः॥ न शक्नोति न लस्यां ते वर्षासु वसितुं तदा॥ आराधितस्तु तेनाहं पवित्रेण महात्मना॥ दिव्यं वर्षसहस्रं तु वायुभक्षो महाव्रतः॥ तुष्टोऽहं तेन देवेशि किं कर्त्तव्यं पुरोहितं॥ ततोसौ दंडवद्भूमौ पपात मन्यदाग्रतः॥ प्रावृट्काले न शक्नोमि ततलांते वसितुं हर॥ ततः सोपि मया देवि कराभ्यां गृह्य भूतलात्॥ शिरसा धारितो देवि जटाजूटे वरानने॥ ततः सर्वैस्तु देवैश्च सिरसा धारितः पुनः॥ पवित्रतागाय वरो दत्तो मया शिवे॥ पवित्रारोपणं यैस्तु क्रियते न फलं तव॥ वज्रकोशास्तु पूजायास्तेषामेव पवित्रकं॥ तस्मात्सर्वेषु देवे

शुपवित्रारोपणंक्रमात्। प्रतिपत्पौर्णमास्यांतु यस्य यातिथिरुच्यते द्वादश्यां वैष्णवे कार्यं शुक्ले कृष्णेथवा हरेः। व्यतीपातेऽयने चैव स्वं ऽसूर्यग्रहे
शिवे॥ विषुवेस्वष्टिकाले च गुरोरागमने तथा। नित्यं पवित्रमुद्दिष्टं प्रावृट्काले त्ववश्यकं। कुर्यान्मिथुनसंक्रांते तुलासंक्रमणावधि। आषाढश्चोत्त
मोमासः श्रावणो मध्यमो भवेत्। हीनो भाद्रपदः पक्षः श्वेतः सन्मध्यमोसितः॥ पंचमी चाष्टमी चैव नवमी दशमी तिथौ। द्वादश्यां च चतुर्दश्यां पौर्णमा
स्यामथापि वा। कालेयाधीश्वः शरद्वर्षा एव मुख्यतमः प्रिये। केचिद्वसंतमिच्छंति कालं माध्यमिकं बुधाः॥ नैव हेमंतशिशिरौ प्रशस्तौ तौ कदाचन॥ एवं
विज्ञाय देवेशि कृतादिषु यथाक्रमं। सौवर्णं राजतं ताम्रं कलौ कार्पासजं शुभं। कौशेयपट्टकं राज्ञो वनस्थानां तु वाल्कलं॥ पद्मजातं सौगतानां शू
द्राणां क्षौममिष्यते॥ वडनोदर्भसंजातं वैश्यानां तु शरोद्भवं॥ कुंजजातं व्रतस्थानां माविकं समरोषरणां॥ कार्पासिकं पद्मजं च सर्वेषां शस्तमीश्वरि॥ आ
म्नायभेदाभिद्यंते सूत्रवर्णाः सुरेश्वरि। पूर्वाम्नाये सितं सूत्रं रक्तसूत्रे तथोत्तरे। पश्चिमेप्यथ पीतं हि अधोदक्षिणयोर्मतं॥ नीलेनाक्तं भवेत्सूत्रं यः
ऽम्नायेषु कर्हिचित्। आम्नायेष्वथ सर्वेषु प्रशस्तं सितमेव वा। कुमारीकर्त्तितं सूत्रमतिप्राशस्त्यकारकं॥ पतिमत्याकृतं मध्यमधमं विधवाकृतम्॥
विप्रक्षत्रार्य्यजातीनां पत्नीभिराचितं शुचि। आवर्जितं यच्छूद्राभिस्तच्छुद्ध्येव कथ्यते॥ विशेषो ह्यस्ति वामीषां विहितं पतिहीनया॥ वेश्यया कर्त्तितं सू
त्रं मेध्यमित्यपरे जगुः॥ रजस्वलावाप्यमांत्रिक्या काषायपरयाथवा॥ गोघ्नावाप्यथ मुंडिन्या पवित्रं यद्विनिर्मितं। तत्सूत्रेण पवित्रेण सान्वयो नरकं
व्रजेत्। तस्मात्सूत्रविनिर्माने यत्नः कार्य्यो विशेषतः॥ ॥ मध्यमस्त्रीग्रहीयस्तुउम्वारः श्रेष्ठ उच्यते॥ षराठरोधमकल्पः स्यान्नित्यौ रिक्ता विवर्जिता

सापि भूततिथौ ग्राह्या चतुर्थी भौमरवच्चवा। रवौ तु सप्तमी वर्ज्या रिक्ता वर्ज्या गुरावपि॥ तिथिस्याज्ञानकापीह भौमेन सहिता यदि पुष्यनक्षत्रस्य योगेन फलाधिक्यं हि जन्यते॥ तानीन्दुजीवदिनकृद्विष्णुवोनिर्ऋतिस्तथा॥ केषुचेतेषु पूर्वेषु परेषु रविवासुतः॥ पदसूत्रं विशिष्टं तु कार्पासजनितं तथा। त्रिगुणं त्रिगुणीकृत्य प्रक्षाल्यामलवारिणा॥ पश्चिमास्योजतैस्मैवै दीक्षितैः शोधयेत्ततः॥ मंत्रैरथ पवित्राणि मनोरम्याणि कारयेत्॥ वरस्तु नवसूत्राणामष्टोत्तरशतैः स्मरैः॥ पवित्रं परमं प्रोक्तं तदर्धं मध्यमं स्मृतं॥ कनिष्ठं सप्तविंशत्या तावदंगुलदीर्घकं॥ पूजावरणदेवानां तुल्यानि रचयेद्बुधः॥ षड्त्रिंशद्रूपयः प्रोक्ते चतुर्विंशश्च मध्यमे॥ द्वादशैरकनिष्ठेस्तु रथ्यामत्र पवित्रकं॥ पूजास्थानस्य विस्तारदैर्घ्यमानं पवित्रकं॥ अष्टोत्तरशते प्रोक्ते तां चतुस्त्रैश्च ग्रंथिभिः॥ वितानेवत्रिवद्ग्राह्या सूत्रज्ञास्यानोर्ध्वतस्तुतन्व॥ स्कंधाद्यनाभिपर्यंतं दशग्रंथिसमन्वितं॥ क्रमज्ञानां च शिष्याणां पवित्रं तदुदाहृतं॥ अन्येषां स्वेच्छया कुर्यात्तत्तु ग्रंथियुतानि च॥ ग्रंथीनां वेष्टनं श्रेष्ठं षड्विंशत्रिभ्यतंतुभिः॥ चतुर्विंशतिभिर्मध्यमधमं भानुभिः स्मृतं॥ उत्तमं मध्यमं चैव कनिष्ठं कथितं क्रमात्॥ उत्तमं गुष्ठमानेन मध्यमे मध्यमेन तु॥ कनीयसि कनिष्ठेन अंगुल्यग्रं तु यः स्मृताः॥ ग्रंथयो वर्ममंत्रेण कर्तव्याः प्राग्दिते ततः॥ ॥अथ विशेषमाह॥ गुणानां वेष्टने यत्तु सा वृत्तिरिति कीर्तिता॥ यदंतरांतरां तस्य सूत्रेणावेष्टनं भवेत्॥ स ग्रंथिरिति निर्दिष्टस्तदावृत्तिर्हि भंगिमा॥ यद्यद्धितन्न देवानां तद्दिशां नीवृवेतव॥ पूजागृहद्वारस्यादौ विज्ञेयं भावितांगुलं॥ शतत्रयं तथा वृत्ति॰

ग्रंथयः पंचकीर्तिताः ॥ भंगिमानस्तथा सप्त एवं सर्वत्र तु स्मृताः ॥ द्वारपालस्यांगुलानि चतुर्विंशतिकानि हि । आवृत्तिनवस्त्राणां विंशता
धिकसप्तति ॥ ग्रंथिर्नव समुद्दिष्टा भंगयः पंच च प्रिये ॥ अंगुलानि दशास्यु-रावृत्तिस्तु कलासमा ॥ ग्रंथयोऽत्र ये ज्ञेयास्तथा भंगीशरोन्मिता
एतस्य द्विगुणां ज्ञेयमर्त्यस्य वरवर्णिनि ॥ पूर्वोद्दिष्टं तु शंखस्य पीठेतं द्विगुणीकृतं ॥ अंगुलानि जिनाख्यानि तत्सार्द्धावृत्तिरिष्यते ॥ ग्रंथयोऽष्टौ च
भंग्यः सप्तसंख्यानि पार्वति ॥ यत्नस्त्र मिदं प्रोक्तं महागणपतेर्मया । रवेरष्टादशांगुल्य आवृत्तिस्तु शताधिका ॥ चतुश्चत्वारिंशसंख्या-
ग्रंथये द्वादशैव तु ॥ पंचैव भंगीस्थाप्यत्र विस्तारो द्वादशांगुलं ॥ चतुर्विंशतिरावृत्तिर्ग्रंथयोऽष्टौ समन्विताः ॥ भंगी वसप्रसंख्याका महादेव
स्यैवेरितः ॥ एकादशांगुलानि स्युस्त्रयस्त्रिंशत्तथावृत्तिः ॥ ग्रंथिर्भिङ्गी पंच पंच तुरोलंबांगुलं मतं ॥ ॥ सप्तविंशतिरावृत्तिर्ग्रंथिभंगी
वसप्तवे ॥ विंशत्यंगुलसंख्याकं वटुकस्य विधीयते ॥ सूत्रावृत्तिश्च षट्त्रिंशग्रंथिर्दश त्रिषक्रमा ॥ पंचविंशांगुलक्षेत्रपालस्य त्रिदशावृत्तिः
ग्रंथिरष्टौ पंच भंग्यस्त्रिंशद्वै भैरवांगुलं ॥ दिवसस्य चतुःषष्टिरंगुलानां निगद्यते ॥ आवृत्तिरेतद्द्विगुणा षोडशांशोस्य पर्व हि ॥ भंगीत्व
पर्वतुर्यांशआशापानां हि सप्तति ॥ आवृत्तिरर्द्धमेतस्य षोडशग्रंथयो मताः ॥ वक्रता पंचचोद्दिष्टा प्रेतानां षष्टिरंगुलं ॥ आवृत्तिस्त्रिंश
दत्रस्युः पर्वाष्टौ पंच वक्रता ॥ यन्त्राख्यषोडशदलपद्मस्य त्रिंशदंगुलं ॥ आवृत्तिरत्र पंचाशत्स्रू षिदश षोडश ॥ अत्र बालतनात्रयी चापि
तथाष्टाब्जस्य सुंदरि ॥ षोडशांगुलयः प्रोक्ता आवृत्तिर्ह्यधिका दश ॥ ग्रंथिर्नव च तत्र्यंश वक्रता परिकीर्तिताः ॥ षण्णां हि मूलपात्राणां प

वित्रे वित्र रोमिते। षट्त्रिंशदंगुलीकं तु विंशत्यभ्यधिकं शतं। आवृत्तिस्तत्र सूत्राणां षट्त्रिंशद्ग्रंथयोपि च। अवालत्ताव षट्संख्या श्रीपा
त्रस्य दर्शी स्थितिः। अंगुलाः षोडशमित्ताः कुलकुंभस्य पार्वति। तथा द्वात्रिंशदावृत्तिर्ग्रंथयो द्वादशेरिताः। वक्रतातत्रयं चैव तु धादि
त्यानिशामये। चतुर्विंशतिरंगुल्यस्तत्स्यद्विगुणावृत्तिः। पर्वाण्यष्टौ कीर्तितानि भंगयः पंच चेरिताः। पवित्रे शक्तिपात्रस्य द्वादशां
गुलसंमितं। ग्रंथयः पंचभंगस्य त्रिंशदावृत्तिरेव च। गुरोस्तु षोडशांगुल्य आवृत्तिस्तत्र विंशतिः। पर्वाण्यष्टौ वक्रताच नवैव तु। कुरेश्वरि
भोगस्य द्वादशांगुल्यः षोडशावृत्तिरेव च। पर्वषिक्लाप्तास्तथा चतस्रो वक्रता अपि। विंशांगुलं वीरपात्रे द्वाविंशद्गुणास्तथा। पर्वाणि
पंचभंगीतु सप्त वा पंच वा भवेत्। चतुर्दशांगुलं ज्ञेयं कुलपात्रपवित्रकं। एकविंशतिरावृत्तिर्नवग्रंथिस्त्रिवक्रता॥ ॥एकपंचाशदाव
त्तिः पर्वाण्यष्टौ त्रिवाक्रता। कालसंकर्षिणी सूत्रं चतुर्विंशांगुलं मतं। अगुरास्तु यतारायाश्चतुर्दशमितानि हि। आवृत्तिरेतद्द्विगुणा ग्रंथिर्द
शत्रिजिसलता॥ ॥नवांगुलं त्रिपि गुरां षपर्वाणि त्रिभंगता। पवित्रं छिन्नमस्तायास्तुदर्याश्शृणु भैरवि। सूत्रं त्रिपुरसुंदर्याः षोडशांगुलसं
मितं। आवृत्तिरुदिताशीतिः षोडशग्रंथयोपि च॥ ॥षोडशांगुलयो द्वात्रिंशतावृत्तिः पुरः स्वराः। त्रिभंगी च महालक्ष्म्यां मातंग्यास्त्रंगुलं
द्विषट्। आवृत्तिर्विंशतिरपि ग्रंथिभंगोदशत्रयः॥ ॥अष्टादशांगुलं सूत्रं गुणाश्चाप्यष्टविंशतिः। पवित्रे भुवनेश्वर्याः पर्वभंग्योनवाश्र
मः। रात्रौ सामयिकैः सार्द्धं पवित्राणि समानयेत्। पूजास्थाने थ सिंदूरकुंकुमारक्तचंदनैः। कस्तूरीविधुलाक्षाभिर्गैरिकाद्यैर्विचित्रयेत्।

पवित्रारोनदिवसात् पूर्वेद्युरधिवासनं॥ सद्याधिवासने वापि कुर्यात्तु परमेश्वरि॥ रात्रौ सामयिभिस्सार्द्धं नित्यपूजायनंतरं॥ देवस्य पु
रतः स्थाप्य प्रतिमामंडलस्य वा॥ पश्चिमे दक्षिणे चैव उत्तरे पूर्ववत्क्रमात्॥ ब्राह्मणादीश्च संस्थाप्य कलशं चाथ पूजयेत्॥ उर्द्धे सिं
हासने मंत्रैः सूत्रपात्रं तु वामतः॥ स्थापयित्वाथ वर्माभ्यां हृत्वा रक्षावगुंठने॥ दंतकाष्ठं तथा गंधं भस्म चंदनमृत्तिका॥ सिद्धार्थश्च त
था धात्री फलं वकुलसंभवं॥ पूर्वादिदिक्षु क्रमतः पवित्रस्य च भाजनात्॥ अश्वत्थपत्रपात्रेषु प्रक्षिपेत्तु सिद्धिहेतवे॥ ग्रंथिस्थाने तु संस्थ
प्यपीठे तत्र वर्ततंतु॥ देवता नवकं पूज्य मोंकारश्चंद्रमा तथा॥ वह्निर्ब्रह्मा नागस्तु हेरविश्चापि सदाशिव॥ सर्वे देवाश्चाभिपूज्या शिरो मंत्रेण
मंत्रयेत्॥ अमृतस्ये च हृन्मंत्रेणास्त्रमंत्रेणारोपयेत्॥ सूत्रेषु पूजयेद्ब्रह्मविष्ण्वीशांश्च त्रिसूत्रके॥ क्रियाच पौरुषी वीरा गायत्री चापरा
जिता॥ विजया च जया देवि मुक्तिदा च वदि शिवा मनोन्मनी च नवमी दशमी सर्वतोमुखी॥ ग्रंथिस्थदेवताः पूज्या उपचारैः समर्चयेत्
मूलमंत्रेण वा मंत्र पवित्रेषु कलायजेत्॥ नित्याः षोडश देवेशि श्रीविद्यां च स्मरेत् प्रिये॥ अष्टौ तारास्त्वष्ट वाणी कला स्थाने प्रपूजयेत्
कात्यां कात्यादि नित्याश्च पूजयेत् परमेश्वरि॥ यावत्यो देवतास्संति नित्यनैमित्तिकेपि च॥ याश्चान्यत्र परीवाराः पंचायतनसंयुताः॥ अपे
क्षितं हि सर्वेषां पवित्रमत्र कर्मणि॥ पवित्रेणातत पूज्येम्मूलमंत्रषडंगकं॥ घटे सुधिः क्षिपेत्तानि गंधपुष्पयुतानि च॥ सर्वौषधी पंचर
त्नयुतानि क्षाल्येत्ततः॥ वस्त्रयुग्मे नीलवज्रमुक्ताफलं तथा॥ पद्मरागं मरकतं सर्वौषधीः गणास्त्वयं॥ रजनीद्वयसिद्धार्थौ कुष्टं मु

स्ताप्रियंगवः। लामज्जुशैलफलिनीमुरामांसीचलोध्रकं॥ वधयष्ठवितानायपवित्रकंचमहत्तथा। अधिवास्यपवित्रंतुत्रिसूत्रेनवमे
ववा। वेदिकांवेष्ठयित्वातुआत्मानंकलशंयतं। अग्निकुंडंविमानंच ~~ंतुलाप्रियंगव लामज्जुशैलफलिनीमुरामांसीचलोध्र~~
मंडपंगृहमेवच॥ सूत्रमेकंतुसंगृह्यदद्याद्देवस्यमूर्द्धनि॥ दत्वापीठेत्विमंमंत्रंपूजयित्वागुरेश्वरि। कृतांजलिःपठमेनंमंत्ररूपमु
दीरयेत्॥ त्वंसूत्रनात्वेश्वरमस्वक्रियाणांशुप्रोक्षिकर्ष्मसजस्रसंज्ञो॥ त्वयाविनिर्मायवहूपवीतंदास्येःमरेभ्योभवसूत्रपूतं। अधि
वासइतिप्रोक्तःपश्चादाराधनंभवेत्॥ नित्यार्चनानंतरंतुनैमित्तिकमिदंभवेत्। दिवानित्यार्चनंकुर्यात्रात्रौनैमित्तिकंभवेत्॥ नैवेद्यंच
पदीपानांकर्त्तव्याभूयसीस्थिति। आकारणीयायमेनेनस्वस्ववंयाक्तदेशिके॥ कुसुमैस्तोरणंकार्यंवहिरंतर्गृहस्यच॥ कृत्वान्यासादिकं
तत्रप्रागवसूजांप्रकल्पयेत् कुंभेदेवंसमावाह्ययजेत्तत्वरतोःसह। आरोपयेत्क्रमेणैवज्येष्ठमध्यकनीयसं। स्पर्शयित्वापवित्रंतुमंत्रेणै
वाभिमंत्रयेत् प्रजप्तग्रंथिकंचैवपूजयेत्कुसुमादिभिः। गायत्र्यापूजयेद्यावदेवंसंपूज्यतर्पयेत्। आदौदत्वार्घमादित्यतत्रैवैकंपवित्रकं।
देवायमूलमंत्रेणपवित्रस्यसमर्पणं॥ ॥यस्ययस्यतुदेवस्ययोयोवाविसरोभवेत्॥ तस्यतस्यतुदेवस्यतस्मिंतस्मिंवदानने। पवित्रंत
स्यदातव्यंतन्मंत्रोच्चारपूर्वकं॥ देवतेभ्यःपवित्राणिदत्वाहोमंसमाचरेत्॥ मूलेनवह्निरूपेस्यात्पवित्रंपूजयव्रतं॥ छागाद्यावरूपकत्वेनदात
व्यावलिक्रमेणि। गुरुंसंपूजयेत्पश्चात्वस्त्रालंकारगोधनैः। संतोष्यवगुरुंपश्चाद्दक्षिणाभिःपवित्रकं॥ यथाशास्त्रानसंस्कृत्यदेवीरूपे

चिंतयेत्॥ आरोपयेत्पवित्रं च वित्तशाठ्यविवर्जितः॥ गुरुः संपूज्यते यत्र तत्र तत्कर्मफलावहं॥ स चेन्न पूज्यते यत्र क्रियास्ता निःफलाः सदा॥ गु
रोरभावे तत्सुतं पुत्राभावे तदंगनां॥ तदभावे च तत्पौत्रं दौहित्रं तदसंभवे॥ सर्वाभावे श्रयेदन्यं गुरुगोत्रसमुद्भवं॥ पूजयेद्दीक्षितं यत्र तत्रैताः स
फलाः क्रियाः॥ न पूज्यते निष्फलास्ताः भवंति परमेश्वरि॥ गुरोरनुज्ञया कुर्यात्स्वयं पवित्रधारणं॥ समं पुत्रकलत्राद्यैः स्वस्वशक्त्या तु धारयेत्
विश्वतेजोभवं रम्यं महापातकनाशनं॥ धर्मकामार्थसिद्ध्यर्थं स्वकंठे धारयाम्यहं॥ सर्वपापक्षयं देव तवाग्रे धारयाम्यहं॥ दत्वा तां मयि केभ्य
श्च ब्राह्मणान्भोजयेत्ततः॥ तेभ्यो दत्वा पवित्राणि कन्यकाभ्यः सभोजनं॥ कृत्वा पूर्णाहुतिं पश्चादग्नौ दद्यात्पवित्रकं॥ अष्टोत्तरशतेनैव द्वाद
शांगुलमानतः॥ श्रीचक्रमध्यसिद्धायै पूजयेन्नाभिवेदयेत्॥ दत्वाचम्यं यसी पश्चात्स्वयं भुंजीत वाग्यतः॥ इति स्पष्टोत्तरं प्रोक्तं पवित्रारो
पणो विधिः॥ चातुर्मासे तु कर्तव्यं वर्षे वर्षे पवित्रकं॥ पवित्रारोपणं पुण्यं ह्यभीष्टफलसाधनं॥ सप्तजन्मार्जितं पापं संहरंति मलापहा॥ लक्ष्मीसं
ततिर्दीर्घत्वसपुण्यं च पवित्रकं॥ बहुयज्ञफलं देवि बहुतीर्थफलं तथा॥ दानधर्मास्तु देवेशि कलां नार्हंति षोडशीं॥ पवित्रं परमं पुण्यं सर्वदोषवि
नाशनं॥ तेन कार्यमिदं देवि कुलजैश्च वरानने॥ लंघनं समयानां च तत्क्रमं विधिना कृतं॥ तद्दोषा नाशमायांति पवित्रेण वरानने॥ वर्षे वर्षे
प्रकर्तव्यं यथाविभवविस्तरात्॥ वित्तशाठ्यं न कर्तव्यं इहैवं वकुलागमे॥ शाठ्यं तु यत्कृतं कर्म न सिद्धिर्न फलं भवेत्॥ तद्ज्ञात्वा वरारोहे
वित्तशाठ्यं न कारयेत्॥ पवित्रं परमं पुण्यं सर्वपापं व्यपोहतु॥ ॥इति श्रीतंत्रचिंतामणौ नैमित्तिकार्चनायां तिथिनिर्णयादि पूर्वकंप्र

हणभेददमनारोपणपवित्रारोपणांतनिर्णयोनामचतुस्त्रिंशत्तमः प्रकाशः॥ ३४ ॥अथवलिदानम्॥अथातोवलिदानस्यविधिरत्रनिगद्यते॥वलिस्तुत्रिविधोज्ञेयस्तांत्रिकस्मार्त्तएवच॥वैदिकश्चेतितत्रादौतांत्रिकेष्टविधःस्मृतः॥नित्यानित्यंपशुवलिर्न्नित्योनैमित्तिकार्च्चने॥आवश्यकःपशुवलिस्तस्मान्नैमित्तिकेविधौ।पशूनांजातिभेदेनभिन्नाचप्रोक्षणक्रिया॥पूजांतेवक्ष्यतेसापिवलिदानक्षणेप्रिये॥वलित्वेनविनिर्दिष्टामहिषच्छागलादयः॥जलजास्थलजाश्चापियामजारण्यजास्तथा।पशवःपक्षिणःकीटास्तिर्य्यग्योनयएवच॥इमेविधात्राविहितावलित्वेनदिवौकसां॥नान्यैर्नैवेद्यसंभारैस्तथातुष्यंतिदेवताः॥यथापशूनांवलिभिर्विहगानांतथैवच॥अतएवहिदेवेशियज्ञादौविहितस्त्वसौ॥देवानांप्रियशब्दस्तुपशुपर्य्यायउच्यते॥एवंविज्ञायसिद्धांतंदेव्याःसंतोषहेतवे॥पशून्दद्याद्वलित्वेनमत्स्यानपिविहंगमान्॥कृमिकीटादयःसर्वेयेतिर्य्यंचःप्रकीर्त्तिताः॥नतेदत्तावलित्वेनविधात्राविहिताःप्रिये॥आलभेतवृषंश्वेतंयज्ञेगोमेधनामनि॥नरमेधेनरंवापिगजंकांतेगजेतथा॥अश्वमेधेतथैवाश्वंशंखचूडेचहस्तिनं॥ब्रुवीतियत्रवेदोपितत्रकैवविचारणा॥तस्मान्नैमित्तिकार्चायांवलिरावश्यकःप्रिये॥क्रोषेणप्रदत्तश्चेद्देवीसंतोषहेतवे॥वलिंविनानैवदेवीपूजामंगीकरोतिहि॥तत्राप्युभौप्रशस्येतेमहिषच्छागएवच॥अन्यदेवार्चितवलिविचारैःकिंप्रयोजनं॥येनसंतुष्यतेकालीतद्विचारंब्रुवेधुना॥आरण्याअथवाग्राम्याजलजानांचजातयः॥खगानांजातयश्चापितात्एवादौब्रुवीमिते॥मत्स्यामृगावराहाश्चकच्छपामहि

हिक्षास्तथा। गंधिकागोधिकाग्राहाः शार्दूला हरयोपि च। नकुलाः शलभाश्चापि गवयाश्छागलास्तथा॥ मनुष्याः पक्षिणश्चापि तेषां को
शाश्चपि प्रिये। भगवत्या बलित्वेन विधात्रा बलिकल्पिताः॥ एतेषां बलिदानेन सर्वकार्याणि साधयेत्॥ ॥अथ बलिदानफलं॥ बलि
भिर्वर्द्धते ह्यायुर्बलिभिः शाम्यते रुजाः। जयत्यरातीन् बलिभिर्बलिभिः प्राप्यते धनं बलिभिः सिद्धिमाप्नोति बलिभिस्त्रिदिवं व्रजेत्॥ नि
ष्कामानां बलौ दत्ते प्राप्यो मोक्षोपि यज्ञवते॥ ॥अथ जातिभेदाः॥ जातिभेदान् यो वक्ष्ये समासादुपधारय। अष्टादशविधा मत्स्याश्च
तुर्विंशतिधा मृगाः। वराहाः पंचधा प्रोक्तास्त्रिभेदाः कच्छपा अपि॥ द्विभेदा महिषास्तद्वत् गंडकाश्च चतुर्विधा। गोधिकाश्च त्रिभेदास्तु द्वि
विधा ग्राह एव च। त्रिविधो व्याघ्रसिंहौ च नकुलो द्विविधोपि च। शलभश्चैकजातिः स्यान्नास्य भेदो वरानने। गवयस्त्रिविधः प्रोक्तः छा
गः षड्विधो मतः। चतुर्विधा मनुष्याश्च षड्विंशजातयः खगाः॥ क्रमेण नामान्येतेषां व्याहरामि तव प्रिये॥ शंकुरो लोहितः शालपा
ठीनो राघवोपि च। प्रोष्ठी नालसिंघुखोंगमिरेटं प्रतिचास्वटं। मितिभाकुटराजीवगडकाः शस्तजातयः॥ गोकर्णकृष्णसाररायपृ
रूरुणं कुचमूरवः॥ प्रियवातप्रमीटीनशम्हसमरकषा॥ रेंकुशम्बरकदल्यः कृत्स्वरो रोहिषावटः॥ कदल्येश विशालाक्ष पटंगो
ल्वाठरोहिता॥ वराहास्तुकाकोडकुशालासीराजज्वनाः॥ कुर्मश्छत्री विचकटो वामनश्चेति ते त्रिधा॥ खर्कुरः क्षीरिलश्चापि म
हिषो द्विविधो मतः॥ स्थूलः कालिंगश्च तथा नकुलोपि द्विधेरितः॥ एकजातिं विनानेव शरभोन्यः प्रजायते॥ स्फाटिको विद्रुरः सास्त्री

गवयेपि त्रिधोच्यते॥ त्रिपिवः पारितक्षौरी वर्करो मारिषस्तथा॥ षष्ठभेदो भवेत् छागोः शिरपि त्रिविधोमतः॥ दर्भिकः पारिशो भेदो
मनुष्यानपि मेष्टराणु॥ नमनुष्यत्वं सा मान्ये चानुर्विध्यं हिवर्त्तते॥ प्रकारभेदतस्तस्या भिन्नता परिकल्पते॥ चंडिकानुग्रहीं तस्य वित्त
रमस्य भवास्तु धौ॥ तत्र त्वो कानाप्निकत्तगावणोत्कंठितस्य च॥ स्वतः प्रवृत्तिर्देष्यास्तु वत्तिरूपो भवाम्यहम्॥ आगत्य च स्वयं प्रते संव
लित्वेन योजय॥ उत्पक्षमेव सर्वेषां नृपस्य चाशेषतः॥ सरश्कडदितो देवि द्वितीयमवधारयाविऊ वित्तस्पर्त्वादेस्तेनोलोष्ठु ध्व
नस्तथा॥ निरीयपरिषन्मध्ये शाद्विपाके नकीर्त्तितः॥ शीर्षच्छेदनयादेवि द्वितीयः स निगद्यते॥ युद्धे जितो धृतः शत्रुः क्रूरयोधिभ
टक्षतिः॥ स तृतीयो विनिर्दिष्टः चतुर्थमवधारय॥ यश्चाततायीपीथानां कांतारेप्यथवा गृहे॥ विदितश्चापि निर्णीतः साक्षिभिः
सत्यवादिभिः॥ स हितुर्थः समाख्यातः पंचमो नोपपद्यते॥ वक्षेविहंगान्येदेवेवलित्वेन निरूपिताः॥ पारावतास्ताम्रचूडा हंसावा
ध्रीनसातथा॥ उलूकालोहपृष्ठाश्च दार्वाघाटाश्च सारसाः॥ कलविंकाश्च कोराश्च चक्रवाकाः शुकाश्चपि॥ शतपत्रा भरद्वाजा भृ
लिंगाश्चाटकास्तथा॥ कारंडवाश्चक्रवाकः पारुभाश्च डुलीपकाः॥ ह्लवाः डरवश्चापि वर्त्तिकाः कुक्कुटाश्चपि॥ तित्तिर्प्लुहककौ
चाश्वलत्ववाखशिखंडिनः॥ पांकुपास्सहयाक्लपेंगराजाश्च चापकाः॥ जिरीकाकुरविकालाश्च मधुहारीतवर्त्तिकाः॥ जीवंजीवा
श्चहारीतकोयष्ट्याश्च टिटिहिभाः॥ वककोकिलगृध्राश्च खरेडुश्येनखंजनाः॥ चिरीकाश्चैव हल्लिकाः सीताशुन्नम्नेकलाः॥ कशाः

सुवर्णाभाङ्गणा हामायाश्चापि पार्वति ॥ इति ते कथिताः सर्वे षड्भिर्भेदा विहायसां ॥ दैवयोग्यवलित्वेन नान्यउक्ता विहंगमाः ॥ एतेषांज्ञा
तिभेदास्तु वर्ण्णन्ते डामरादिषु ॥ वक्तव्यास्तेन कथ्यंते ग्रंथगौरवभीतितः ॥ कपोतभ्रामकाः वंकमनिश्चतुरङ्कादयः ॥ पारावतास्तु दशधा
हंसाः पंचविधा अपि ॥ राजहंसा मल्लिकाक्षा धार्त्तराष्ट्राः परिस्फुटाः ॥ माहेया एवमन्येपि ज्ञेया विहगजातयः ॥ ॥ अधुना संप्रवक्ष्यामि
वलिना येन येन हि ॥ यंयं कालमभिव्याप्य तुष्टा भवति कालिका ॥ अष्टादशविधैर्मत्स्यैः कच्छपैरपि चंडिका ॥ तृप्यते मासमात्रं हि वलिते
ननियोजितैः ॥ नाकचूडस्य वलिना हंससारसयोरपि ॥ तृप्ता भवति मासौ द्वौ त्रीन्मासान्द्वीपिनक्रयोः ॥ करविंकै रुल्लकैः स्यात्तृप्ता मास चतु
ष्टयं ॥ पंचमासान्भवेत्तृप्ता शुकैः पारावतैरपि ॥ दार्वीघातैश्चकोरैश्च षण्मासानत्तृप्तिमाप्नुयात् ॥ तृप्यते सप्तमासान्सा निहैकैश्चकलीप
कैः ॥ चतुर्विंशतिभेदैश्च कुरंगैर्गवयैरपि ॥ मासानष्टौ भवेत्तृप्ता नवमासान्पिकैरपि ॥ हारीतवलिना देवि दशमासांश्च तृप्यते ॥ तथा दात्यूह
दानेन गजराजैर्वरानने ॥ मासानेकादश शिवा तृप्तिमाप्नोति सिद्धिदा ॥ गोधिकावलिना काली तृप्तादं व्याप्य जायते ॥ अविनानकुलेनापि व्य
ब्दं तृप्ता भवेदपि ॥ अजेन वलिना चापि तुष्टा स्यात्पंचवत्सरं ॥ जीवंजीवेन पाङ्क्रेण तुष्यते ऽष्टौ च हायनान् ॥ पार्षतैणेन वलिना वराहवलिनापि
व[illegible]द्वादशाब्दमभिव्याप्य तुष्टा भवति कालिका ॥ हामायनामायः पक्षी सिंहाकृतिधरोरुगाः ॥ तद्दानात्तुष्यते देवि पंचविंशतिवत्सरं ॥ त्रिविधैर
पि शार्दूलैः महिषैर्द्विविधैरपि ॥ चतुर्विधैस्तथा खड्गैर्वलित्वेन समर्पितैः ॥ शतसंवत्सरं यावच्चंडिकातृप्तिमश्नुते ॥ एको वार्ध्रीनसोवस्थविशेषः

परिकीर्त्यते ॥ अपरः पक्षिजातीयो हिमवच्चरणस्थितः ॥ वृद्धः श्मश्रुधरः श्वेतपादस्फोटिद्वियोस्थितः ॥ त्रिपीतो रक्तरसनो निःशृंगः स्वरभंगजनः ॥ पीतवंच्रक्तशिरः शितपक्षोऽशितांघ्रिकः ॥ नीलग्रीवः पाटलाभगलो वा ध्रीनसः खगः ॥ अजपाध्रीनसैस्तुष्टा भवेत्त्रिंशतवत्सरं ॥ निरंफसामान्यशशैर्वलित्वेन निरूपितैः ॥ जायते महाकाली सा तुष्टा पंचशतं समाः ॥ शरभैरथसिंहैश्च शोणितैश्च स्वदेहजैः ॥ दत्तैः संतुष्यते कालीसहस्रं परिवत्सरान् ॥ वाध्रीनसविहंगेन दत्तेन विधिना प्रिये ॥ अब्दद्वादशसाहस्रं तुष्यते जगदम्बिका ॥ चौराततायिरूपेण नारेणावलिना तथा ॥ त्रीणि लक्षाणि वर्षाणां प्रियते शुभकालिका ॥ एतेते कथिता देवि वलयः सुप्रिहेतवे ॥ ॥ अथ पशुलक्षणं ॥ श्रेष्ठस्तत्र कलौ देवि महापीठे नरो वलिः ॥ कर्त्तव्यः साधकेंद्रेण सर्वारोगीत्वसुन्दरः ॥ धातुवद्धः क्षतव्रणैश्चीरशतादिरतलोमजः ॥ मत्योऽहृहीतः पापिष्ठैर्दैवतैः स्वयमागतः ॥ वर्षषट्पासमथवा यथेष्टाचारपालितः ॥ स भवेद्वलियोग्यस्तु नान्यथोरादिकाहृतः ॥ महिषः पंचमासूर्द्धं दशाधमाठनोद्भवः ॥ ग्रामजोऽपि महाक्रूरो नीरुक् सांडैकवर्णकः ॥ आरक्ताक्षश्चोर्ध्वशृंगो दीर्घपुच्छश्च मांसलः ॥ अभारवाहको भीतो वलियोग्यपरो नमतः ॥ वनस्थः श्वेतवर्णो यो वनएव च पालितः ॥ महाक्रूरो मांसलश्च श्मश्रुकरो योग्यउच्यते ॥ ऊर्ध्वं त्रिवर्षात्सप्ताब्दीक्रमणाद्धीनश्च मोसलः ॥ एकवर्णो देवताया वर्णरूपो गदोज्झितः ॥ सांडः सशृंगो मत्स्येशो गंधिमानौषधादिभिः ॥ विगंधीकृत्य वलये योज्यः सर्वोत्तमस्त्वयं ॥ अजस्य लक्षणं देवि कथयामि विशेषतः ॥ ऊर्ध्वशृंगोऽन्नर्ध्वलोमो लम्बकर्णश्च पीवरः ॥ साहंकारः पुष्टतनुर्वली पलितवर्जितः ॥ लम्बकर्णः पुष्ठकामः

प्रशस्तः पशुलक्षणाः।।श्वेतः कृष्णो लोहितश्च कपिलश्चित्रपांडुरौ।।षड्विधश्छागलप्रोक्तो गृहस्थानां परो बलिः।।उत्तमो शितकृष्णो च मध्य-
मो चित्रपांडुरौ।।लोहितः कपिलश्चैव कनिष्ठपरिकीर्तितः।।त्रिमासात्परतश्चैव यावद्वर्षद्वयं भवेत्।।उत्तमो सौ बलिः प्रोक्तस्तस्माद्धीनोध-
मः स्मृतः।।कृष्णवर्णो बलिर्यस्तु श्वेतखंडो यदा भवेत्।।छागलं तादृशं विद्वान्दूरतः परिवर्जयेत्।।एवं सिते कृष्णखंडे वर्जयेन्मतिमा-
न्सदा।।कृष्णवर्णो छागलस्तु पृष्ठवंशे सितो यदि।।प्रशस्तं तं विजानीयाद्विपरीतं तु वर्जयेत्।।पंचास्यं महिषं श्वेतं प्रशस्तं परिकीर्तितं।।स एव म-
हिषः कृष्णः पांडुरश्चाधमो बलिः।।पक्षिणस्तु प्रशस्ताः स्युः सर्ववर्णाः शुभो मताः।।त्रिपक्षात्परतश्चैव दिने चापि विवर्जयेत्।। ।।सर्वेषा-
मेव वर्णानां देवतानां तथैव च।।अधिकारः प्रीतिदश्च यज्ञेष्वेषो विशिष्यते।।मेषः सशृंगस्त्वत्वछंगहीनोपि जत्रवित्।।वर्षद्वयार्द्धं च गृहे-
पालितो बलवत्तरः।।मांसभाराद्यथो दानेन क्षमः सालसो वरः।।नीलकंठच्छविः कंठे कपोतः पुष्टकंधरः।।वर्षार्द्धं गृहे पुष्टो बल्यर्थे योग्यउ-
च्यते।।सर्वेषामपि तित्तिरो तित्यः शान्तवेडुवर्त्तकः।।मांसलश्चैकवर्णो वा ताम्रचूडो विशिष्यते।। ।।अथ निषिद्धानि।।कांश्चिन्निषिद्धान्वक्ष्यामि वि-
हितेषु बलिष्वपि।।ग्राम्याणामथ वन्यानां पशूनां पक्षिणां तथा।।स्त्रियं नैव प्रयुंजीत बलिकर्मणि साधकः।।ज्ञानपूर्वं बलिं दत्वा नरकं प्रतिपद्यते।।
अज्ञाने ऋषिनिर्याति किंचित्पापं समश्नुते।।अत्रिमाससमुत्पन्नं पशुं नैव नियोजयेत्।।पुनस्तद्दर्शानुगतं ज्ञात्वा देवे समर्पयेत्।।भग्नशृंगं भग्न-
दंतमच्छिन्नानालमेव च।।काणं व्यंगं रोगिणं च रोगाहतनरं तथा।।दुष्टं पालितं तो मार्गांसीरपंचगतविंशं।।पशुं नस्यादीदृशं तथावे वविहायसं।।

छिन्नश्रोरं छिन्नपक्षं रुग्नमाहारवर्जितं ॥ अनुड्डीनं तथा कोशे मातुरङ्के परिस्थितं ॥ विहिता वध्यविज्ञाने न दद्यात्पशुपक्षिणो ॥ रुग्नं
गहीनः क्षत्तो रोगी वालो वृद्धो न शस्यते ॥ न दद्यात्स्त्रीपशोर्मांसं हव्यकव्ये विशेषतः ॥ अदेयानधुना वक्ष्ये पशूनपि विहंगमान् ॥ भल्लूका
न्मर्कटान्फेरुन्सर्पानोभ्रकुनस्तथा ॥ क्रमेलकांश्च यालेया छिन्नान्विद्धरभ्रकरान् ॥ जलेष्वपि च मंडूकान्तु ग्राक्षिशिशुमारकान्
कुलीरान्दीर्घपृष्ठादिन्मीनानप्यविभर्तृशिरः ॥ खगेषु वायसान्विल्वाउर्ध्वदानकुलिकानपि ॥ एवमन्येपि विज्ञेया नानाशास्त्राग
गमादिषु ॥ स्वैरदेयाः पशुखगास्तथा कीटपतंगकाः ॥ ॥ यस्य यस्य निषिद्धोयः सहस्रानी निरूप्यते ॥ निरंके शारिरां व्याघ्रं वा खुखंजन
मेव वा ॥ स्वकीयरुधिरं मद्यं न दद्याद्ब्राह्मणाः क्वचित् ॥ तोठोरवगौ तथा सिंहं द्वीपिनं मानुषं तथा ॥ दत्वा रोगी च हीनायुर्भूत्वा नरकमश्नु
ते ॥ आत्महत्यामवाप्नोति दत्वा स्वरुधिरं द्विजः ॥ चांडालत्वमवाप्नोति सर्वकर्मविवर्जितः ॥ न क्रमसारं वितरेद्गर्हितं वनराधिपः ॥ क्व
स्मसारं ददद्दैवे द्वितीयो वर्णईश्वरि ॥ ब्रह्मघ्नत्वमवाप्नोति हीनायुरपि जायते ॥ न वार्याः शूकरं दद्युर्नैव नक्रकुलीपकौ ॥ दत्तां ततत्प्र
णादेव महापातकिता भवेत् ॥ वर्णाः परेतो वितरेद्गोधिकाभुकखड्गिनः ॥ मोहाद्ब्राह्मणाद्दत्तां सद्यो ब्रह्मघ्नता भवेत् ॥ अथानुकल्पः
देवेशानुकल्पस्य विधिमेषु हिंसत्वरं ॥ वानप्रस्थो ब्रह्मचारी गृहस्थो वा दयापरः ॥ सात्विको ब्रह्मनिष्ठश्च यश्च हिंसाविवर्जितः ॥ तेन
दद्युः पशुवलिमनुकल्पं वरं त्वपि ॥ तन्नत्यपशुप्रदानानां फलावाप्तिर्वरानने ॥ घृतगोधूमेक्षवाद्यैः फाणितैरनुजेस्तथा ॥ कृत्वा तं तं पशुं

दघुस्तत्तत्फलमवाप्नुयुः ।कूष्मांडपनसाम्लाम्रकर्कटीविल्वदाडिमाः ।द्राक्षाखर्ज्जूरलकुचरसालामलजंबुकं ।नालिकेलेक्षुदंडश्च
मोचाम्रातकतीक्ष्णराः ।वीजपूरानागरंगास्तात्तांचलफलान्यपि ।वलितुल्यानिचैतानिछागतुल्यानितत्प्रिये ।। ।माहिषत्वेनकूष्मांडं
छागत्वेनैवकर्कटी ।।वृन्ताकेकुक्कुटत्वेनमेषत्वेनतुचतुर्विकां ।रंभाउष्ट्रंवीजपूरंपिंडजीवंकलौभवेत् ।मानुषत्वेनपनपनसंमत्स्य
त्वेनेक्षुदंडकं ।श्मूरणांशवरत्वेनतथाकोशातकंमृगे ।पायसंतुगजत्वेनमार्जारत्वेकुलस्थकं ।पटोलंश्वकरत्वेनशर्करावालुकंतथा
खड्गत्वेनमहेशानिमूत्तत्वेकदलीफलं ।मरवत्वेमूलकंतैवसारंगत्वेकलिंजकं ।करित्वेनारिकेलंचकल्पयेत्परमेश्वरि ।माषाःसर्व
वलित्वेनसर्वेषांकीर्त्तिताः ।।पायसापूपसंपाताश्चडुकैःकृशरान्नकैः ।।शाकोदनैस्तथासूपैपिष्टापाकाढकपोलिका ।वटकाल्लशुनंगृंजं
कलिंजेवीजसहोदरं ।।नानोपायैःषड्सैश्चवलिरेषःप्रकीर्तितः ।।कूरविद्याविधौदेविपशुंपिष्टमयंचरेत् ।।यवक्षोदमयंवापियद्वा
धान्यसमुद्भवं ।माषपिष्टमयंदेविसर्वकर्म्मणिकारयेत् ।गुडार्द्रकेदधियुडोलवणांगुडमेवच ।कूष्मांडंनालिकेरंवाश्रीफलंचेक्षुमेव
चा ।वस्त्रसंवेष्टितंकृत्वाछेदयेच्छूरिकादिभिः ।।एषस्मार्त्तोवलिःप्रोक्तोधर्मशास्त्रानुगामिनां ।।पूर्वपूर्वोत्त्रापिचोक्तोविशिष्टोदेवतोष
कः ।।यस्ययत्राधिकाभक्तिस्तेनतुष्यतिदेवता ।।वैदिकंतुवलिंदद्यात्सोदनंस्विन्नमायमान् ।।सरोचनमतिक्रूरंदैवतेवटकान्वितं ।यथा
नुकल्पयोगेनयोजनीयंमहेश्वरि ।।यथोक्तविधिमासाद्ययथोक्तंफलमाप्नुयात् ।। ।।अथप्रोक्षणं ।।श्रीपार्वत्युवाच ।पशूनांप्रोक्ष

सांदेवप्रकाराणि कथं विभो ॥ ॥श्रीभैरव उवाच ॥ देयादेयविचारस्तु ह्यत्रावानुपवर्णितः ॥ स्थानपात्राधिकारिस्थ दानकालक्रमो पिव
इदानीमेकरूपेण सर्वेषां प्रोक्षणं शृणु ॥ वाराही यमुना गंगा करतोया सरस्वती ॥ कावेरी चंद्रभागा च सिंधुभैरवसागराः ॥ अजस्नाने मह
शानिसांनिध्यमिह कल्पयेत् ॥ अर्घपात्रोदकैः शुद्धैर्मूलेन प्रोक्षयेत्त्रिशः ॥ पशुपाशविनाशाय हेमकूटस्थिताय च ॥ पराय परमेष्ठिने हूं
काराय वम्नन्तये ॥ बिल्वपत्रोदकैरेभिः प्रोक्षणं कारयेत्तथा ॥ पश्चन्नां यत्र वा उत्थं भवेद्विज्ञानुसारतः ॥ तत्रैव प्रथमं देवि सर्वलक्षणलक्षितं
उर्जस्विन्नं सुन्दरं च बलिनं पशुमुत्सृजेत् ॥ अनन्तरं क्रमेणैव नव तत्र विचारणा ॥ अस्त्रमंत्रेण संरक्ष्य कवचेनावगुंठ्य च ॥ मूलमंत्रं समु
च्चार्य धेनुमुद्रामृतीकृतं ॥ गंधपुष्पाक्षतैः सम्यक् परिपूज्योपचारकैः ॥ ॥बलिं संपूज्य विधिवद्धूपपुष्पाक्षतादिभिः ॥ चैतन्यं कामडा
किन्येवीजत्रयमिदं स्थितं ॥ वाक्पाशानन्तरं पाशुरूपस्थश्चक्षुषी ततः ॥ पूजयेद्देवताउध्याध्राणमेन्मनसा तथा ॥ ॥अथ पशुगायत्रीय
था ॥ पशोः कर्णौ चापि पशुगायत्रीं तदनुचरेत् ॥ तत्परं तन्मनुं चापि समुच्चार्य शृणुद्वयोः ॥ योगिनीवीजतोङं तं बलिरूपं तु विमहे ॥ देवीप्रियः
र्वी च धीमहीति ततः परं ॥ तन्नः पशुरिति प्रोच्य वदेच्चाथ प्रचोदयात् ॥ ॥अथ महिषप्रोक्षणं ॥ विशेषः कश्चिदधिको महिषे तं तु वेधु
ना ॥ तदंगे देवताः सर्वाः पूजयेत्कुंकुमाक्षतैः ॥ प्रणवादिनमोन्तैश्च मध्ये ङेंतैः पदैस्तथा ॥ स्थानानि देवताश्चापि क्रमेण कथयामि ते ॥ ब्रह्म
रंध्रे च नासायां कर्णयोरसने तथा ॥ नेत्रयोर्वदने चैव ललाटे तदनंतरं ॥ दक्षगंडे वामगंडे ग्रीवायां केशएव च ॥ दक्षश्रुतितथा वामश्रुति

ल्लान्भोगा दारानपि हृद्दिस्थितान्। कात्यायन्यां दृढाभक्तिं लक्ष्मीमप्यधिकां स्थिरां॥ दत्वा राज्यं परित्यज्य शरीरात्यांच भौतिकं। देवीलोकं व्रज
च्छिवं सज्ञातिसुतबांधवैः॥ महादानैर्महायज्ञैस्तपोभिरतिदुष्करैः॥ यत्स्थानं नाप्यते लोकैस्तत्त्वं गच्छ नरर्षभ। अंगीकृतो महाकाल्या
मांसशोणितल्लिप्सया। देवीलोकं सुदुष्प्राप्यं प्राप्नुहि त्वं द्रुतं गतः॥ तत्र गत्वा शिवं ध्याहि मामकीनं जगत्पते। देवीलोकगतिः कास्मा मत्
प्रसादात्तव देहिनः। त्वत्प्रसादादहं शत्रून्जयेयं रणमूर्द्धनि। लोकानष्टाविमान्द्वे विपदेन्नरवलिक्षणे। तत्र त्वपशुवलिंछेदे तांस्तान्मंत्रानुदीरये
त्। नाम्नजातिपशुव्यांनुमन्नन्यत्रयोजयेत्। ऊक्ताः पशुशिरः पुष्पः समर्पणकराः क्रमात्॥ कलयातः परं दे संकल्पकरणे विधिं। तदस्तुन्त
यादेविश्रुष्वं सर्वेषुच्यते। प्रणवं तत्समुच्चार्य मासमासपक्षतिथीः स्मरेत्॥ संभवे सति राश्यंते ढुं तं भास्करमीरयेत्॥ सगोत्रं तन्नाम्ना मापिदत्तं
नं तदनंतरं। यस्य यस्य पशोर्योयः कालस्तस्य सचेरितः। तैं ढर्षाय वछिन्नस्तत्र देवाख्ययासह॥ पशूनां च विहंगानामन्येषामपि वस्तूनां। पुवीभि
देवताः सर्वाः क्रमेणोत्सर्गकर्मणि॥ प्राजापत्यो गजः प्रोक्तः सूरगो नैर्ऋतो मतः॥ गोवृषो रुद्रदैवत्यो छाग आग्नेय उच्यते। मेषस्तु वारुणो ज्ञेयो वराहो
वैष्णवो मतः। ~~तत्र दर्षाय वछिन्नस्तत्र देवाख्ययासह~~ गौरीदेहो व्याघ्रसिंहौ गंडको ब्रह्मदैवतः॥ यावंतो मृगभेदाः स्युः कथिता वायुदेवता॥ याव
न्तः पक्षिणः सर्वे वायव्याः परिकीर्तिताः॥ प्राजापत्यास्तथा मत्स्याः कच्छपास्ताश्चदेवताः॥ गोधा वरुणदेवत्या ग्राहाश्चपित्रतादशाः। तथाचवक्षुसरभाः
वादित्येशानदेवतो। प्रीतिकामनयाप्रोच्य मूलमंत्रं प्रकीर्त्य च। देवीरूपं पशुं ध्यात्वा तोयं तस्मिन्विनिःक्षिपेत्॥ मंत्रितं मूलमंत्रेण सपुष्पाक्षतचंदन

देववराननेे॥ ओष्ठेऽधरे च स्कंधे च हृदये पृष्ठ एव च। जठरे चरणे पुच्छे सर्वस्मिन्देह एव च। ब्रह्मेन्द्रादीन्यथाकाशे सर्वतो मुख एव च। ज्योतीषि विष्णुश्चंडेश्वशक्रो वह्निर्महेश्वरः। निर्ऋतिर्मित्रवरुणौ तथा लक्ष्मीः सरस्वती। धनेश्वरः सर्पराजश्चादित्यः साध्य एव च। गंधर्वश्चंद्रस्तथा सिद्धा चामुंडाः सर्वशेषगाः। अनेनैव प्रकारेण नरस्यापि प्रपूजयेत्। क्रमसिद्धिं पूर्वगतं मदोषिकमराहेणं। अथोभयोः शेषगतान्मंत्राणां कलय प्रिये। यमस्य वाहनत्वेन स्थानस्त्वमसि कासर। वसन्तः पुंगयोरग्रेमस्तु कालेस दातव॥ भवानेव परिद्वक्षिजवनोतुरगानपि। तवरूपं समास्थाय रे भास्करसुतः पुरा। भगवत्यासमं युद्धं कृतवान्दर्पमोहितः। देव्यास्त्वं निहतस्त्वापि तथाक्रांतं शिरस्तव। वहस्व तच्चंडिका त्वं शिरसा भंगुरेण च। त्वत्तो नान्यो बलिः कश्चिद्देव्याः प्रीतिप्रदायकः। अतो दद्यामि कालेऽस्मै त्वां भक्तियुक्तेन चेतसा। अयि कल्याणमाधाय गच्छ कासर सद्गतिं॥ ॥अथ नरबलिः प्रोक्षणं। मनुष्यबलिदाने तु विशेषं किंचिदीरये तत्सर्वदुरहताहारं संपरित्यक्तमैथुनं। स्नानं रक्ताम्बरधरं नरं मुंडितमस्तकं। रक्तचंदनदिग्धांगं कृतश्मश्रुं नखं तथा। अजाताङ्ककमुडिङ्गं नदीनं नाप्यधोमुखं। न पाखंडं सर्वांङात्तं न क्लीवं पतितं न च। चतुर्विधेभ्यो पि शिवेस्त्वयमागतमुत्तमं। प्रोक्षयेन्मधुसामान्यरूपेण प्रथमं ततः॥ महिषोक्तप्रकारेण पश्चादेतान्मनूञ्जपेत्॥ सर्वे सुप्राणिषु श्रेष्ठस्त्वं मनुष्य इति स्थितः। बलिश्रेष्ठ महाभाग देवगर्भे श्रिया वृता रक्ष मां सर्वभीतेभ्यः सिद्धिं देहि तथोत्तमां। राज्यं देहि यशो देहि देहि चानुत्तमां गतिं। आरोग्यं दीर्घमायुश्च प्रजावृद्धिं रणे जयं। कल्याणं विपुः

नं। यक्षस्मचालयेन्मात्रं गृहीतखड्गनदेशया। यावन्न चालयेन्मात्रं पशुस्तावन्न हन्यते। बहूनां पशुसंघानामथवापि विहायसां। क्रमेणानेनैव पुनश्छे
द्येत्पशुपक्षिणौ। व्यत्यये तु कृते देवि महान्दोषः प्रजायते। सहस्रायुतलक्षाणां बलीनां संभवे सति। द्वौ त्रीन्पंच तथाष्टौ वा दश वा द्वादशा
पि वा। एभ्योधिकान्नैव कुर्यादेकीभावतया स्थितान्। प्राच्याशाभिमुखान्कृत्वा युगपन्मंत्रमुच्चरन्। तंत्रेणैव बलीन्सर्वान्प्रोक्षयेद्देशिकोत्तमः
छेदकाश्चापि भूयांसः कर्त्तव्याः कमलानने। इति दीप्यजकोरभृङ्गुला पाकाशगामिनः। दद्यादेतान्वामभागे यानकानि च यानि हि। मत्स्यान्च
ग्राहां कूर्मान्खड्गान्कमठन्गोलगोधिके। यावतो मृगभेदांश्च दद्यात्संमुखस्थवहि॥ ॥अथ खड्गलक्षणम्॥ अथ वक्ष्यामि खड्गानां
लक्षणं तत्र वर्त्मना। येन संछेदनेनापि साधकः सिद्धिमालभेत्। सर्वेषामुत्तमः खड्गश्चंद्रहासः सुखावहः। पंचाशदंगुलैः कार्यः किंवा ताल
त्रयेण तु। करवीरदलाकारः किम्वा पद्मदलाकृतिः। अथवाऊन्नखड्गेन दंडखड्गेन भेदयेत्। महाबलीनां सर्वेषां दात्रमत्र प्रकीर्त्तितं। कर्त्तिक
याक्षुरेणापि छिंद्याच्छुरिकया न च। ऊर्ध्वरपशुखंडाभे श्छेदयेन्न कदाचन॥ ॥खड्गाग्रमध्ये मुष्टौ तु मिथुनानां त्रयं यजेत्। वागीशीस
हितो ब्रह्मा लक्ष्मीनारायणौ तथा। उमामहेश्वरौ चैव तत्तत्स्थावाहयेद्दसौ। कालीकृतां न सदंष्ट्री येन छेद्यो बलिप्रिये॥ मायाकूर्चः शा
किनी च स्थले हि भगवत्यपि। चामुंडे चाथ सान्निध्यं अंगरुद्रगमेत्यधिष्ठिता। भव द्वयं संधिहीनं फट्युगं हृदयं शिरः॥ खड्गस्य मूलमंत्रे
ण खड्गं समभिपूजयेत्। तारपाशत्रयाकूर्चशाकिनीभिः सडच्यते॥ ध्यायेत्ऊडुममाद्यखड्गमाशैवरानने॥ ॥कृष्णं पिनाकपाणिं

चकालरात्रिस्वरूपिणीं।उग्रंरक्तास्यनयनंरक्तमाल्यानुलेपनं रक्ताम्बरधरंचैवपाशहस्तंकुटुंबिनं।पिबमानंचरुधिरंभुंजानंक्रव्यसंहतिं
क्षोभयंतंजगत्सर्वंकंपनादिप्रचारणैः।वेष्टितंमृत्युकालाभ्यांवामदक्षिणभागतः।पूर्वोदितेनमंत्रेणप्रत्येकंकीर्तितेनहि।गंधपुष्पा
क्षतैर्धूपैर्दीपैःपायसादिभिर्यजेत्।ततोवधानलिमंत्रंपठेत्खड्गनिरीक्ष्यवै॥ ॥रसनात्वंचंडिकायाःसुरलोकप्रसाधकः।शुंक्ष्वे
तस्यपशोरक्तंक्रव्यसंहतिमेवच॥ ह्रिंधीमसिवमेशत्रुंमंगलानिप्रयच्छच।दैत्यदानवरक्षोसकुमदोन्मत्तनमोस्तुते।एतेनखड्गमामंत्र्य
तन्त्रमाष्टकमुच्चरेत्।टक्रीयात्रिशितंखड्गंयेनसद्योभवेद्वधः॥ ॥असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः। श्रीगर्भोविजयश्चै
वधर्मपालनमोस्तुते।तारंकालिद्वयंवज्रेश्वरि लोहपदंवदेत्।दंडायैनमइत्येतन्मंत्रःषोडशवर्णकः।अष्टोत्तरशतंजप्त्वाततोऽस्या
यसाधकः।प्रहाराणांचाधिकारीतेषामेवविधीयते।स्वयंवाभ्रातृपुत्रोवाभ्रातावासुहृदेववा।सपिंडंश्छेदयेद्वापिक्षुब्धांतःकरणोय
दिनरिपूर्णांगहीनोवानकाणांनापिकुब्जकं।नयोजयेच्छत्रुपक्षंवलिच्छेदनकर्मणि।उत्तराभिमुखोभूत्वावलिंपूर्वमुखंतथा।निरी
क्ष्यसाधकःपश्चादिदंमंत्रमुदीरयेत्।पशुस्त्वंबलिरूपेणममभाग्यादुपस्थितः।प्रणमामिततःसर्वरूपिणंबलिरूपिणं।चंडिका
प्रीतिदानेनदातुरापद्विनाशनं।चामुण्डाबलिरूपायबलेतुभ्यंनमस्तुते।यज्ञार्थेबलयःसृष्टाःस्वयमेवस्वयंभुवा।अतस्त्वांघातया
म्यद्यतस्माद्यज्ञेवधोवधः।शिवान्तूनमिदंपिंडंमत्तस्त्वंशिवतांगतः।उद्बुध्यस्वपशोत्वंहिनाशिवस्त्वंशिवाह्यसि।ऐंह्रींश्रीमिति

५ पश्चोर्वापक्षि गो वापि नास्याषिविशेषतः॥ अथ मस्तकपतितफलं॥ एवं दत्वा वलिं देवे वलिदानविधिर्यथा॥ शुभाशुभं स्वजानीयाद्राज्यस्य च नृपस्य च॥ यदि वायव्यदिग्भागे नैर्ऋत्य दक्षिणोपि वा॥ मस्तके पतिते चैव हानिस्तत्र विनिर्दिशेत् ५

मंत्रेणानेन वलिं मत्स्वरूपिणां॥ चिंतयित्वान्यसेत्पुष्पं कुंभकेनास्य मस्तके॥ छित्वानेन पशुं सद्यस्तदीयं रुधिरं प्रिये॥ ततः स्वर्णादिपात्रे षुगृह्णीयाद्यदपेक्षितं॥ ॥पात्राणि यथा॥ अथ पात्रादिवक्ष्येहं स्थाप्यते यत्र शोणितं॥ हेमे वा राजते ताम्रे थास्ये रक्तं महीभृतां॥ सामंतैर्मंडलीकैश्च ताम्रे वा कांस्यरैत्ययोः॥ दरिद्रैः क्षिभिश्चापि मार्त्तिके वा परावरे॥ अथवा पत्रपुटे वा नैव लोहे कदाचन॥ न रंगे सीसके वापि नारिकेलफले त्वचि॥ कौलानां सर्वपात्रेभ्यः कपालं नान्य मिष्यते॥ येषां पशूनां पललैर्यावतीस्तृप्तिरीरिता॥ भगवत्याप्रियेतत्त्रि रुधिरैरपि तावती॥ नित्यं नैमित्तिके वापि काम्यायन्याः प्रपूजने॥ विना वलिं चैव दद्याद्दामे पललशोणितं॥ शेषेषु दिक्षु सर्वासु विदिक्षु च फलं शृणु॥ पूर्वे चोत्तरदिग्भागे पतते यदि मस्तके॥ सर्वसंपत्करं विद्याद्राज्ञा राज्यं विनिर्दिशेत्॥ भ्रमित्वा दक्षिणेकर्णे यदा पतति वै शिरः तदासिद्धिं च मासान्ते वामकर्णे विपर्ययेत्॥ राज्ञामग्रे भवेद्धानिर्गृहस्थानां शुभं भवेत्॥ ऐशान्यमध्ययोश्चैव पतते यदि मस्तकं॥ तदा स्वल्पेन कालेन सर्वसिद्धिर्भवेद्ध्रुवं॥ छिन्नं शिरो निपतितं सहास्यं यदि दृश्यते॥ विमर्दितं तस्य जानीयाद्राज्ञा राज्यं विनिर्दिशेत्॥ एकवारे भवेत्सिद्धिर्द्विवारे हानिरुच्यते॥ गृहस्थानां विजानीयाद्राज्ञां तु विपरीतकं॥ यदाश्रु दृश्यते नेत्रे तदा हानिं विनिर्दिशेत्॥ यदा कटकटाशब्दो दंतानां श्रूयते क्वचित्॥ तदा तु मरणं विद्याद्धानिं सर्वत्र निर्दिशेत्॥ दद्याद्राक्षसदिग्भागे मंत्री वलिशिरः स्वयं॥ न दक्षिणे रक्तपात्रं विपरीतं न संददेत्॥ देवस्य संमुखं कृत्वा छिन्नं भागं प्रकल्पयेत्॥ ते देवशस्तं जानीयान्मध्यमं विपरीतकं॥ वली नामिति संज्ञानां शिरश्च पुरतो

दहेत्। कीलकांतेन्यसेत्सर्वं यथा कम्पो न जायते। शीर्षोपरि ज्वलद्दीपं पुरस्ताद्दं दत्वाक्षतं। घृतेन सार्वभौमः स्यान्नेन मित्रं चैवं इति। शिरश्वसंमुखं वस्याप्यं सदीपं पात्रवर्जितं। सर्वापि हविस्सिक्तः स्यादथवा तिलजोक्षितः। मार्थपत्रपुटान्तर्यंन वान्यफलसंभवं। मूर्द्धापि सिक्तो हविषा तैलेन वज्रसिद्धिभाक्। अन्यबीजोद्भवैरोगं शोकं मृत्युं च विंदति। यथा लाभानि दत्तानि यत्नात्कार्यं तथा नरैः। सूत्रवर्त्तिपुरस्ताद्ववस्त्रवर्त्तीप्रशस्यते। अंगुष्ठस्य प्रमाणां च दीर्घं चैव षडंगुलं। कार्पासस्त्रैर्वा दद्यादेकविंशति सूत्रकैः। सुगंधिद्रव्यसत्कर्यीनकर्पूरगुरुचंदनैः। ग्रहाणां कूपानां च गोधायाश्च विशेषतः। मत्स्यानामपि पक्षीणां न दीपं दापयेच्छिरे। शीर्षोपरि ज्वलद्दीपो यावत्कालं प्रवर्त्तते। तावत्कालं वसेत्स्वर्गे तस्माद्यत्नेन दापयेत्। लोमशाहोश्वगंधं घ्रात्वा देवी प्रसीदति। तस्मात्संवर्द्धयेद्दीपं तस्मात्पात्रं विवर्जयेत्। निर्वाणमृत्युमाप्नोति दीयमानेषु दीपके। ततः पात्रंतरः कृत्वा देव्याः सपशुशोणितं। शर्करामृतदुर्वाणां पुरस्यात्त्रिमहाघृतः। सैंधवं शृंगवेरं च कदलीफलमेव च। पातयेन्मधुराणां च कामसुद्दिश्यसाधकः। अष्टधा विभजे विद्वान्मध्ये चैकं कुशादिभिन्नाद्दत्वा किंचित् घृतं नवकुर्यात्तर्पणामुद्रया। तर्प्पणां भागभाजां वै देवीनां द्विर्द्विरेव च। आयंति मे तारा हार्दीमध्यश्रास्मिनोरपि। तत्तन्नामांतमपि च तर्पयामीति संयुतं। द्वितीयरूपं ङें तं च तद्वितीयपदोदितं। मध्ये नित्योदितश्चार्घ्यपात्रवत्पीठस्था क्रिया पूर्वस्यां दिशि चामुंडा दक्षिणस्यां तु योगिनी। डाकिन्युक्ता पश्चिमायामुत्तरस्यां तु भैरवी। विदारिकाग्नेयकोणे नैर्ऋत्यां पापराक्ष

सी। पूतना चापि कथ्यते ऐशाने कालिका तथा। ततस्तुतिं प्रकुर्वीत बद्धांजलिपुटोग्रतः।। जय देवि जगन्मातर्जय पापौघहारिणि। जय जन्मजराव्याधितृणापदावानलाकृति। जय सर्वविपत्तिघ्ने जय त्रिदशवंदिते।। जय नित्यानंदरूपे जय कल्याणदायिनि। जय शत्रुक्षयकरे जय रोगप्रणाशिनि।। जय भीमे जयाघोरे जय शंकटतारिणि।। जयामृतरसास्वादतुंदिलामेदविग्रहे।। त्रिनेत्रे विकरालास्ये मुण्डमालाविभूषिते।। सर्वासुरक्षयकरि खङ्गखट्वांगधारिणि।। महाघोरे महावीरे दैत्यदर्पनिसूदनि।। इमं पशुबलिं देवि गृहीत्वा कालरात्रिके। प्रीता भव महाचंडे रक्ष मां शरणागतं।। आयुर्देहि धनं देहि भाग्यं कीर्त्तिं च देहि मे। स्त्रियं देहि सुतान्देहि सर्वान्कामांश्च देहि मे।। उग्रचण्डे प्रचण्डेसि प्रचण्डकरवालिनि। महाचण्डोग्रहार्द्दण्डे विश्वेश्वरि नमोस्तु ते।। रक्ष मां शरणापन्नं त्वत्पादार्पितमानसं।। हर पापं हर क्लेशं हर शोकं हरासुखं।। हर रोगं हर क्षोभं हर दैन्यं हरप्रिये। स्तुतिमेतां पठित्वेवं दंडवत्प्रणमेद्बुधः। गुह्यकालि जगद्धात्री सर्वतर्योमिनीश्वरि।। गृहीत्वेमं पशुबलिं यथोक्तफलदा भव। कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम। अंतस्थरसि भूतानां द्रष्टी त्वं परमेश्वरि।। ।। एतस्यानंतरं यद्यत्कृत्यं तन्नु ब्रुवेधुना।। इत्थमुक्तविधानेन दत्वा पशुबलिं बुधः।। साधकान्साधिकाः शक्तीरन्यानपि च कौलिकान्। संस्थाप्य पुरतो देव्याः पात्रग्रहणमाचरेत्। पूर्वोक्तमंत्ररीत्यैव जुहुयादाहुतीर्देव्या। पाययेद्व स्वयं शक्ती शक्तयः पाययंति तं। समेवेताः कौलिकाश्च कुर्य्युरेवं परंपरां।। आपानेन परां प्रीतिं प्राप्नो

तिजगदम्बिका॥ तस्मात्प्रचयेद्धीमान् भक्ष्यैरपि चतुर्विधैः। लीलाकटाक्षहसितावीक्षयकिल्लिकिंचितान्॥ शक्तयः साधकः सा
र्द्धं साधकाश्चापि शक्तिभिः॥ आपानावसरे कुर्युः प्रीताः स्यान्नेनकालिका॥ ॥इति श्रीतंत्रचिंतामणौ नैमित्तिकार्चनायां बलि
दाननिर्णयनाम पंचत्रिंशत्तमः प्रकाशः॥ ३५ ॥अथ कुमारीयजनविधिर्लिख्यते॥ ॥देव्युवाच॥ देवदेव महादेव पृच्छाः
मि गुह्यमुत्तमं। कौमारीलक्षणं पूजां शुभाशुभपरीक्षणं॥ एतन्मे संशयो जातो निस्संदिग्धं वद प्रभो॥ ॥श्रीभैरव उवाच॥ कृप
यामिषशरीरेहृत्तव भक्ष्याद्युनाश्ररणा॥ न तथा तुष्यति शिवा बलिहोमादितर्पणैः॥ कुमारीपूजनेनात्र यथा सद्यः प्रसीदति॥ न केव
लं पूजयेन्नाभोजयेन्नाश्वयत्नतः॥ व्यंगता वाप्यकरणात् पूजायाः परिकीर्त्तिताः॥ करणात्संगतापि स्यादन्यस्मिन्न कृतेपि हि॥
कौलानां निशि पूजोक्ता स्मार्त्तानामपराह्णिकी॥ नित्या तु सारघर्वीयां काम्या नैमित्तिकी तथा॥ सुस्नातां रक्तपीतादिनानारागोज्ज्व
लांशुकां॥ सर्वालंकारविश्वांगीमज्ञातानंगवेष्टितां॥ अज्ञातपुंमनस्संगां सप्ताष्टनववार्षिकीं॥ अनीचजातीं गौरांगीं पित्तमातृस
तीमपि॥ अदंतुराम वाग्दत्तामधिकांगेन वर्जितां॥ अदीर्घकेशीमुद्रिक्तां सुस्मितास्यामलोभनां॥ श्यामां दीर्घदतीं सानुनयनां पिंग
मूर्द्धजां॥ न तुं श्वनगतिं कुचांकुन्नां खंजां च खर्वकां॥ भ्रूकेशाल्पत्वसहितां तथा चैव गलद्रुणां॥ जातस्तनरजोनंगाप्रयत्नेन विवर्जी
येत॥ एतच्छिन्नाः कुमारीस्तु वरणीयार्चनक्रमे॥ यः कुमारीयजेन्मंत्री सर्वपर्वसु सर्वदा॥ तेनार्चिता महादेवी सत्यं सत्यं न संशयः

संध्यैकवर्षा संप्रोक्ता द्विवर्षा च सरस्वती॥ त्रिधामूर्त्तिस्त्रिवर्षा च चतुरब्दा च कालिका। सुभगासयवर्षीया उमा षड्वार्षिकी भवेत्।
मालिनी सप्तवर्षा च अष्टमी कुब्जिका मता॥ नवाब्दा कालसंकर्षा दशवर्षा पराजिता। एकादशाब्दा रुद्राणी द्वादशाब्दा च भैरवी
तत्परास्यान्महालक्ष्मीस्तत्पराकुलनायिका। क्षेत्रज्ञा तत्परा प्रोक्ता षोडशाब्दा च चंडिका॥ एवं क्रमेण विज्ञेया विनापुष्पं कुमारिका
गीतवादित्रनिर्घोषैरानयेदारपूर्वकं। नीत्वा पूजागृहद्वारि कुमार्यस्ताअपुष्पिकाः। पंच वा सप्त वा वापि नवैकादश वा पुनः॥
पंचैका तासु कन्या या स्यात्सर्वांगसुंदरि। वह्नीनामप्यभावे हि भवेदेका कुमारिका॥ काम्ये नैमित्तिके चैका बहूः सारदपूजने॥
श्रेणीभूताउत्थिताश्च नम्रीभूताननाअपि। स्थापयेत्वा क्रमेणैता मुख्यामादौ नियोज्य च॥ देवीबुद्धिं विधायासां साधको विगत
ज्वरः गृहीतमदिरामत्रः कल्पितार्चनसंभृतिः। प्राणायामं विधायादौ ततो भूतापसारणं॥ गुरुं गणापतिं नत्वा वामदक्षिणयोस्तत
मध्ये कुमारीं च तथा मूलदेवीस्वरूपिणीं। छोटिकाभिस्तथा तालत्रितयैर्वंधनं दिशां। कुमार्या मूलभूताया पादौ प्रक्षालयेत्ततः॥
तज्जलं मस्तके दद्यादेवीपादोदबुद्धया। सोत्तरीयांशुकेनैव पादावुपनयेत्ततः। पुनरक्षतमादाय विघ्नानुत्सादयेत्प्रिये। उदी
र्य मानमंत्रेण तालत्रयपुरस्सरं। मालपाक्षकलाकुर्वीस्त्राणि प्रथमन्तो वदेत्। भूतान्यपसारयेच्च विघ्नान्नाशयचैसपि। हृच्छी
र्षवरमेधाद्येकाविंशाक्षरो मनुः॥ ॥कुमार्य्याः सहिताः सर्वैस्तया देवीस्वरूपया। दर्शनार्थं समायांति यावन्तो देवयोनयः। प्रेता

भूतापिशाचाश्चगंधर्वागुह्यकाश्चापि॥राक्षसादानवायक्षायेचान्येक्रूरकर्म्मिणि॥सहप्रक्षिपकौमार्यामेउपंशारदार्चनं।ग्लपं
तिवकुमार्याश्चपूजाविध्वंसयेत्त्रि॥अतोवारेद्वयेकार्य्यंविप्रस्थोत्सारणंप्रिये।ततःसवामहस्तेनकुमार्यादक्षिणंकरं॥
गृहीत्वादक्षकरेणविनिःक्षेपपुरःसरं॥पंक्तीभूताःकुमार्यस्ताःस्तोकरूपंमनुंपठन्॥पूजागृहात्ततःसनकेनैमस्तोलिःप्रवेशयेत्
त्वमस्वजगतामाद्येजगद्धाररूपिणि।कुमारीरूपमास्थायप्रविशेदंगृहंममभवत्याःकीदृशंरूपंजानेमातरहंनहि।कुमारी
रूपमेवेदंपश्यामिनरचक्षुषा॥भक्तिमदीयांविज्ञायत्वत्पादंबुजआशिवा।त्वयाप्रकटितंरूपंमीदृशंसर्वसिद्धये॥दृष्टिःकार्य्या
नमेपापेसंचारेनासतःपथः॥दृष्टायांकेवलंभक्तोदानवासुरवंदिते॥शिवाद्यात्मवरूपंहिकीदृशंत्वेतिजानते।त्रास्याम्मिकोव
राकोहंपांचभौतिकविग्रहः॥इतिपंचपठन्मंत्रोकान्स्वपृष्ठेनैवतारयेत्॥अनीक्षमानरुवेस्मिगीतवाद्यपुरस्सरं॥ ॥स्नापि
तांगंधतैलेननानाभरणभूषिताः॥आनीयदेवतापार्श्वेस्थापनीयाःसुधीमता॥ ॥मुख्यंयत्पूजनेप्रोक्तंमुख्यायास्वतन्म
तं तत्पूजयेवतास्सर्वाःपूजितास्युर्नसंशयः॥बलिंदत्वाततोदेवयोनिस्पःपरमेश्वरि॥आरभेतनिरालस्यकुमारीन्यासमुत्तमं।त्रि
मारव्यापेरवत्मलाचंडयोगेश्वरीमता।ततःसिद्धिकरालीचपुनःसिद्धिकराल्यपि॥महांतमार्यथज्ञेयावज्रकापालिनीततः॥
सुरुडमालिन्यट्टहासिन्यतोद्वेपरिकीर्त्तिते॥वराहकापालिनीकालचक्रेश्वर्य्यप्यनंतरं॥गुह्यकालीततःकात्यायिनीकामाख्ययासह

चामुण्डासिद्धिलक्ष्मीश्च कुब्जिकातदनंतरं॥ मातंगीतदनुज्ञेयोचंडेश्वर्यथकीर्त्यते॥ सर्वेशोषेजुकौमारीष्वेता अष्टादशेरिताः॥
अंगान्यतोवमि शिरोमुखं तदनुचक्षुषी॥ कर्णौनासापुटेवापिकपोलौतत्परोपुनः॥ अधरोष्ठौदंतपंक्तिस्कंधौहृदयमेवच॥ वा
हूवजठरंपृष्ठेगुह्यजानुतथैवच। जंघेपादौचसर्वांगेतावंत्येवस्थलानिच॥ ॥कलादिवकत्वांतंतताः पूजयेद्विधिनाबुधः। उपवे
श्यासनेदिव्येकुमारीसाधकोत्तमः। वक्ष्यमाणेनविधिनादेहन्यासंसमाचरेत्। कुमारीकास्यात्प्रथमाद्वितीयानायिकामता॥ तृतीया
भैरवीख्याताचतुर्थीवागीश्वरीभवेत्॥ कालिकापंचमीप्रोक्तासंवुध्यंताः कुलादिकाः॥ न्यस्याः पंचांगयोगेनकुमारीणांकलेवरे॥ वामा
वर्त्तक्रमादास्यचतुःकंपूजयेत्क्रमात्॥ ततःसिद्धाजयापूर्णाजयान्याकुब्जिकापरा। कालिकापंचमीप्रोक्ताविज्ञेयावोधिताइमाः॥
पूर्वादिवक्त्रसंयुक्ताश्चतुर्थ्यंतानमोंतकाः। तत्रस्थानेषुविन्यस्याःस्वक्रियाक्रमपूर्वकं॥ पंचप्राणवयोगेनचैतन्यमनुनासह॥ न्यासजा
लंहिपूर्वोक्तंकुर्यात्साधकसत्तमः॥ ॥ततोर्घस्थापनंकुर्यान्नित्यकेयडदाहृतं॥ पूजोपकरणास्यापिशुद्धिरुक्तापुरोक्तवान्॥ ततो
ध्यानंप्रकुर्वीतकुमार्यावक्ष्यमाणकं॥ उपचारांस्ततस्सर्वान्दीपान्स्तुतिपश्चिमान्॥ यष्टव्याः पूर्वमार्गेणवक्ष्यमाणेनवापुनः॥
स्वनामभिश्चतुर्थ्यंतैस्त्रिनाराधैर्नमोंतकैः॥ देवतापश्चिमेमंत्री यजेदेताःसुलक्षणाः॥ आद्यास्तुबावालिकास्यात्तृतीयाललितास्मृता
चतुर्थीमालिनीख्यातापंचमीस्याद्वसुंधरा॥ सरस्वतीरमागौरीदुर्गातुनवमीभवेत्॥ पंचाब्दान्नववर्षंचयजेद्बालंविचक्षणः॥ पंचाब्दोवटुकः

प्रोक्तोनववर्षोगणेश्वरः॥प्रदद्यादासनंस्वात्वा क्रियापाद्यंसमर्पयेत्॥रमयार्घ्यंनिवेद्याथह्रियावन्दनमर्पयेत्॥कुमारीशक्तिबीजेनप्रदद्या
त्कुसुमोच्चयं॥वैनत्वमनुनामंत्री धूपदीपादिकं दिशेत्॥ताराएतेसमाख्याताभृगुर्भवसमन्वितः॥विंदुतारसमाक्रांतश्चैतन्यमनुरीरितः
ककिंदैरवबीजंतुपंचमःप्रणवोमतः॥ ॥भूषणानिदुकूलानिसिन्दूरारक्तकावपि॥कज्जलादक्षविख्याता तालवृन्तानिपेटिका॥परिकर्मी:
धारचोलमंचिकापीठदोलिका॥पंचालिकाचसंज्ञेयापादुकेकुथपट्टके॥वस्त्रानपोपसंव्यानेतथोद्वर्त्तनभाजनं॥शय्योपधानपर्य्यंकं
समुद्गश्चप्रसाधनी॥प्रतिग्राहस्त्वसिंदोलातथासीमंतवर्त्तिका॥गोरोचनामृगमदौकर्पूरकुंकुमंतथा॥एवमादीनिचान्यानियावच्छ
क्यानिसुंदरि॥प्रदातव्यानिवस्तूनिकुमारीतुष्यतेयथा॥ततोयस्यापितंपात्रंकुमार्य्यैप्रतिपादयेत्॥स्वीकुर्य्यात्साचतत्रैवतथायत्नंसमा
चरेत्॥अगृहीतेतुतत्पात्रेमहान्दोषोऽभिजायते॥अतोयत्नस्तथाकार्य्यःस्वीक्रियेतयथातथा॥ततोगृहीत्वाकुसुमाक्षतेतस्याःकलेवरे॥
पंचाशत्संख्यकाःशक्तीःक्रमतःपरिपूजयेत्॥ताश्तानीप्रवक्ष्यामिसावधानानिशामय॥ ॥आद्याजयाचविजयाअक्लिमादाययान्विता
फलायसिद्धिदासूक्ष्माप्रधास्यासुप्रभाततः॥विघ्नाचविशुद्धिश्चनन्दिनीचविभूतिभुक्॥अपराजिताचललितालक्ष्मीगौरीतथैवच॥ ॥
अथमेधाचगायत्रीसावित्रीचवसुधापुनः॥स्वाहेक्षेचक्रियाविद्याप्रज्ञादीप्ताचचेतना॥भद्रारूपातथामोचाशिवाचमुदिताक्षमा॥श्रद्धाधृति
मलाकैमुद्यपिवैविशदाततः॥अशोकाज्ञानदाचैवचवरदाराज्यदापिच॥मैत्रीतदनुरुद्राणीभवानीचमृडान्यपि॥सर्वज्ञाचण्डिकाचापिकु

मारी सर्वशोभगा ।। पंचाशत्संख्यकास्ताः कुमार्य्यः शक्तयः स्मृताः ।। भैरवानष्टतदनु पूजयेदक्षतादिभिः । भैरवीभ्यस्ततो विघ्नविनायकेभ्य एव
च । वटुकक्षेत्रपालाभ्यां योगिनीभ्यस्तथैव च । भूतेभ्यः प्रेतयक्षेभ्यो डाकिनीभ्यस्तथैव च ।। कुर्वीत पूजनं देवी कुसुमाक्षतचंदनैः ।। पुनरष्टौ स
र्वशोभेडंगनास्वी यजेत्प्रिये । महामाया कालरात्रीस्ततो वै सर्वमंगला ।। पूज्या डमरुका पश्चाज्जाजराजेश्वरी तथा ।। संपत्प्रदा भगवती कुमा
री तदनंतरं । कुलांतः पूजयेद्देतां कुलकोणेष्विमा यजेत् ।। कामेश्वरी च वज्रेशी तृतीया भगमालिनी ।। उपविष्टा कुलढंवकोणे श्वेता स्सम
र्चयेत् ।। अनंगकुसुमानंगमन्मथानंगपूर्विका ।। मदनानंगशब्दाद्या चतुर्थी कुसुमातुरा ।। पंचम्यनंगमदनातुरानंदपदादिका ।। शिशिरा
कंपितास्येताः सप्तयोरससंख्यकाः ।। अनेन विधिना पूज्या कुमारी साधकोत्तमैः ।। ।। समाप्यैवं कुमार्य्यर्चां तत्परो भुवि वारिणा ।। वर्त्तुलं मं
डलं कृत्वा तन्मध्ये कुलकामिनी ।। विलिख्य जलकुसुमाक्षतचंदननागजैः ।। पूजयेन्मंडलं तत्र शुभदायै नमो वदन् ।। स्थालीगतं य
न्नत्सर्वमन्नं तत्रानिवेशप्रि ।। नानाविधांच सामग्रीं लेह्यचोष्यादिघटितां ।। मांसमीनसुरापूर्णां भक्ष्यचर्व्यादिपूरितां ।। कुमारीदक्षहस्तं
च स्थापयित्वान्नमूर्द्धनि ।। उक्तानमुक्तमानेन मनुनान्नं समुत्सजेत् ।। इतरासां कुमारीणां प्रत्येकं पूजनं चरेत् ।। गंधपुष्पैर्धूपदीपैर्नैवे
यैरत्नसंभवैः ।। अन्यानि यादृशान्यस्य मुख्यायै कल्पितानि हि ।। अन्याभ्यस्तादृशान्येव दातव्यानेयनिश्चयः ।। फलाफलं तु मुख्याया ज्ञेय
मत्र विपश्चिता ।। भुंजानाकुसुमारीषु नतुर्य्यध्वनिमाचरेत् ।। नान्यत्र चमतो दद्यात्स्वाधं नैव कल्पयेत् ।। कोलाहलं निषेधेत अमंगः

ल्पानियानिच॥हृद्दित्तापानवाम्रूढप्रयत्नेनविवर्जयेत्॥सावधानोभवेदत्रकिमादौभक्षयंतिताः॥मिथःकिंस्वाप्रजल्पंतिकुत्र
वात्वस्तुनिस्पृहा॥कुत्रदृष्टिंप्रक्षिपंतिभीताः विस्वावदंत्यमुः॥इत्यादिनानाजातीयाश्चेष्टास्तासांप्रयत्नतः॥सावधानतयाज्ञेया
भद्राभद्रसमस्त्वकाः॥भक्षयंतीमुतास्त्वेवंपठेत्तस्तोत्रमम्वर॥कृतांजलिर्नमेशिराश्वासमात्वे क्षिपन्दृशौ॥जयकालिमहाभीमे
भीमरावेभयावहे॥संसारदावाशिखरेपूजितागावनारिणि॥ब्रह्मेन्द्रोपेंद्रमूतेसप्रभृत्यमरविंदते॥सर्गपालनसंहारकारिरुपहित
मारिणि॥गुह्यकालिपरानंदरसपूरितविग्रहे॥परंब्रह्मरसास्वादकैवल्यानंददायिनि॥पुराणानीतेपिसगुरोमहाकल्पांतनर्त्तकि॥
कुमारीरूपमास्थायविज्ञापज्ञास्वरूपिणि॥आगतासिसमागारंशारदावीसमाप्तये॥सांवत्सरिककल्याणसूचनायतथैवच॥धन्या
स्मिकृतकृत्यास्मिसफलंजीवितंमम॥यस्मात्त्वमीदृशंकृत्वाकौमाररूपमुत्तमं॥गुह्यकालिसमायाताद्विकपूजाजिघृक्षया॥त्वमे
वैतेनरूपेणदेवेभ्यःप्रार्थितापुरा॥दत्तवत्यसिसाम्राज्यंवरानपिसमाहितान्॥मह्यमप्यघरेदेविशिवरंदेहिसुपूजिता॥ब्रह्मलोकपि:
सामर्थ्यंत्वंपुरादत्तवत्यसि॥विष्णुवेच्चत्वमेवादास्तथापालनशक्तिता॥महारुद्रायसंहारकर्तृत्वमददःशिवे॥देवेभ्यश्चापिदेत्यानां:
नाशयेनेक्षतामपि॥अंतर्यामिन्यसीशानित्रिलोकीवासिनामपि॥निवेदयामिकिंतेहंसर्वकर्मैकसाक्षिणि॥शत्रुनाशंराज्यलाभं
शरीरारोग्यमेवच॥त्वत्पदांबुजयोर्भक्तिंयाचेहंचतुरोवरान्॥नमस्तेभगवत्यम्बनमस्तेभक्तवत्सले॥नमस्तेजगदाधाररूपिणित्राहि

मांसस्त मातर्नैवेभिरूपंते नशारीरं न वांगुणां॥ भक्त्याहं न स्थितस्याः पूजां तव जानाम्यनन्यधीः॥ त्वं माता त्वं पिता बंधुस्त्वमेव जगदीश्वरि
त्वं गतिः शरणं त्वं च स्वर्गस्त्वं मोक्ष एव च॥ विहाय त्वां जगन्मातर्न्नान्यां जानामि देवतां॥ नमस्तेस्तु नमस्तेस्तु नमस्तेस्तु नमो नमः॥ ॥
एभिः श्लोकैस्तुतिं कुर्यात् कुमारीणां वरानने। दद्यादाचमनीयं हि भोजनांते गतज्वरः॥ ततः प्रदद्यात्ताम्बूलं मृगगंधाधिवासितं। सहः
वाद्यादिभिस्तावदनुव्रज्य विसर्जयेत्॥ शुभाशुभफलं वक्ष्ये सांप्रतं तव पार्वति॥ ॥ तत्राप्यादौ शुभं वक्ष्ये विपरीतं ततोस्य च॥ तदु
च्छिष्टं ततो दद्याज्जंबुकेभ्योथ भूतले॥ लिखने दथवा देवि समल्लोप्य विसर्जयेत्॥ आदौ मन्त्रे करे स्त्रे सुभिक्षं विलये भवेत्॥ पायसेज
यमानस्य पशुवृद्धिः प्रजायते॥ घृते स्यादायुराधिक्यं प्रजामैश्वर्यमश्नुते॥ तथा मोदकशष्कुल्योः संततिर्भूयसी भवेत्॥ मत्स्यज्ञा
तिष्वर्थलाभः कृशरे यानसंपदः॥ मांसेतुपुत्रलाभः स्यान्नेमने कामिनी भवेत्॥ फलं मांसविशेषस्य भिन्नं भिन्नं शुवेहि तत्॥ अर्थला
भस्तु वाराहे खड्गे तु विजयो रणे॥ माहिषेन तु मांसेन राज्यप्राप्तिर्भवेद्ध्रुवं॥ आरोग्यं हारिणे नाभ्युकस्म सारेण वाग्मिता॥ मांसे मेधाविता
गके ग्राम्येप्यजरतामपि॥ आजेये पलले देवि सर्वकल्याणमाप्नुयात्॥ कामठे मैदिनीलाभो वक्तृत्वं च वारांकवे॥ वार्द्धीनसे शत्रुनाशो
हासे मनुजवश्यता॥ तैत्तिरे भिष्टसिद्धिश्च वर्त्तके पापसंक्षयः॥ मनस्का घोरसालायां फलेक्षो विश्ववश्यता॥ कीर्त्तिस्तु महती दध्यो
दुग्धे संपदनुत्तमा॥ पिष्टके तन्नयावाप्तिः साके च रिपुसंक्षयः॥ शालायां [illegible] संपत्तु वाग्मिता॥ धनागमः फा

फाणिनेतु कूर्विकायां वलोन्नतिः ॥ तुम्बी वृंताक कुष्मांडकालवेल्लपटोलकैः ॥ घोषस्यैरणादी र्घां घ्रिमूलकैस्तेन ने हृते ॥ वि
यालाभो भवेद्देविन्नक्वाक्पडुतापि च ॥ गोक्षमद्वर्णां घटित्तवस्तुनि प्रतिभावनैः ॥ देव्यान्न दृष्टो भवेन्मोक्षो मरणे पे पुत्रानि भवेत्त
वामरछत्रयोस्तालवृंतपर्य्यंकयोरपि ॥ घराणादर्प्पणायो ध्वापि दग्धाने मृतिरुत्तमा ॥ अकल्यालंकरणायोस्पर्शावालनह
ष्टिषु ॥ नानाविधानि सौख्यानि भवंति महत्तुः प्रिये ॥ एवं विधानि भूयांसि चेष्टितान्यसनानि व ॥ शुभादेशी निजायंते विप
रीतान्यतः शृणु ॥ मुरत्यन्नताऊमारीस्वेतमत्तिर्द्धिचितारकं ॥ दुर्भिक्षं जायते वर्षं प्रजास्तुः पीडितास्त्रपि ॥ राज्ञा विनाशमायाति
कुमार्यारोदने कृते ॥ डवारे तु महामारी पुरीक्षेपुरस्ताद्दनं ॥ अभोजने शत्रुभयमापदो वक्रभोजने ॥ अभाषणे त्वापदः सर्वा विप
देवक्रभाषणे ॥ उपसर्गा वक्रविधाश्चेष्टयाकरपादयोः ॥ अतिलज्जाविनाशाय तथानिर्लज्जता भवेत् ॥ नानोत्पातास्तु मौनेः
स्तुः स्वापे पर्यंकोर्विनाशनं ॥ सर्वनाशस्तु भीतायां क्रुधायां मृत्युरेव च ॥ आवेशेन तत्क्षणाद्राज्ञा म्रियते नात्र संशयः ॥ संकितायां
शत्रुशंकाभ्रांतायामीतितो भयं ॥ चिंतितायां तु विज्ञेयं नराणुस्यैव पातनं ॥ मोहे विघ्नविनाशः स्याज्ज्ञातेश्च प्रजाश्च निःफला ॥ चां
चल्ये चंचलाल्लक्ष्मी पूजकस्यैव जायते ॥ विषादस्त्वपथ यदि कुमारी तत्र जायते ॥ सहजं स प्रजेराष्ट्रं तदासीदति पार्थिवः ॥ रोगेणा
म्रियते राजा यदि रुष्टा प्रजायते ॥ दुर्भिक्षमरकातंकाय ग्रहणा विमुंचति ॥ सर्वनाशो भवेन्नहिं धुनोति यदि मस्तकं ॥ चक्षातायां रिपुत

स्वामस्तस्य राज्ञः प्रदिश्यते। कल्पेसत्तिस्याद्विमुखी कालिका परमेश्वरी।। नीचैः शिरस्थितं कुरुते असंतुस्तात ईश्वरी।। हीनायुस्यान्न
वा पृथ्वीपतिस्येन्न अपस्वरा।। पूजकस्य भवेद्दैन्यं व्याकुला यदि जायते।। मोहेन व्याकुला यान्तु सर्वन्नगरमाकुलं।। पीडिता यां भये
रोगः स्वेदे दारधनक्षयः।। अधोवायुं त्यजति चेत् कुमारी दैवयोगतः।। पीडितं परचक्रेण तदा भवति पत्तनं।। गीतं गायति चेत्तत्र कु
मारी रहिताः क्रियाः।। सप्रजाराष्ट्रं नश्यत्यदारस्य नृपतेर्मन्त्रिणः।। महारागताभिरक्तात्विन्मुख्या विवत यदि।। नदा समायान्ये कस्मात्त
परचक्रं तु दारुणं।। ययाकयाविसार्द्धमन्या येन केन विदेव वा।। कुमारी भाषते वीतभयमंदा क्षमा क्षमा।। प्रजायां तेन तदा तस्य
विषयेषु षडीतयः।। व्यत्यासेज्ज दिभक्ष्यस्य कुर्वते करवालनेः।। व्यस्तं समस्तं भवति मनसो वाञ्छितं प्रिये।। उपायनीकृतं यद्यद्
स्यं देव्यै तु सं उपेत्त चेत्कराभ्यां स्पृशति क्वां दिशी का भवेन्नृप।। निर्वापयति चेद्दीपं कुमारी मुखमारुतैः।। बुद्धिभ्रंशो भवेन्नॄर्हि ज्ञान
दीपं च नश्यति। देवयोगाधित्र त्यन्ति कुमार्याः श्वेत्स्वराउल्लाः।। सराज्जकः सविषयश्मशानमिव जायते।। वासांस्युत्सृजते गात्राः
स्पुर्यदि तत्र कुमारिका।। शत्रुभिर्द्धियते तर्हि राजा समरमूर्द्धनि।। यदि पूत्कारमाकुर्द्दते करो धृत्वा भ्रमेति च।। भ्रान्ता वेशाः क्षितीशस्य
जायते नात्र संशयः।। उच्चरिष्यामि विरूपेव वदती स्यं कुमारिका।। भोजनावसरे तर्हि महामारी भयं भवेत्।। वामे वा दक्षिणे वापि
वलन्ना रकया दृशा।। रक्तोग्रपाघूर्णायते शिरः स्वस्य कुमारिका।। कुरुते वा हहा संवायेन त्रस्यंति मानवा।। भ्रान्ता वेशो भवेन्नॄर्हि प्रेत

न्तस्यंतिवा पुरे। दंतैस्तान्पीडयित्वा कुर्यात्कटकटारवं। पश्यति महन्नं मत्स्योस्स्य दारसुतबांधवः। ह्लावनिमिषे कृत्वा संदृष्टो
ष्टं रेदेन हि। संतर्जयति शीर्षं चेत्कल्पयंत कुमारिका। तदेव फलमुद्दिष्टं यस्यात्कटकटारवे। अत्यंतिकं भजेन्मौनं करेणान्यंस्पृ
शेन्न च। शिरोत्यर्थं चनमयेदंगुष्ठेन लिखेद्भुवं। विदध्याद्भूतले रेखां करजैर्निःप्रयोजनं। संहत्ताभ्यां कराभ्यां च कण्डूयेदथवा शि
र[illegible]त्तरोम्नकाराणां छिंद्यादंगुलीस्फोटमाचरेत्। पाणिभ्यां मुड्येद्वे चैवोकर्णौ पिदधाति वा। ऊर्वीनवावा कुरिकां पार्ष्णि घृष्टं
करोति वा। मत्यन्नं ग्रासमादत्ते मुखं व्यादाय तिष्ठति। अन्नोपरि क्षुतं धत्ते जृंभनं वा मुहुर्मुहुः। गृहीत्वा पाणिनावान्नं चतुर्दिक्षु
क्षिपत्यपि। उत्थाय वा प्रचलति त्यक्त्वान्नं पूजनं तथा। आयाति वमनं स्वास्याः स्यात्तां रोमांचवेपथु। निर्गच्छतो वा नमात्रात्पू
जास्ते हेतुमंतरा। अकस्मादेव कुरुते कार्कं चेत्काराणां विना। अश्लीलं वल्गति तथा स्ववक्षार्थे प्ररोदिति। आमुक्तालंकृती कुंचे
दृहं यास्यामि वा वदेत्। यस्य कस्यापि वा कुर्यान्नर्त्तनं तत्स्थले स्थिता। उपालभेत वा कंचित्सहैवास्या उपेयुषी। भिनत्ति वा निद्रा
नं सा स्वहस्तवलयानि वा। कृते मृत स्वकस्यापि वंध्योः सोचति तत्र सा। यत्किंचिद्वा प्रलपति निर्णिमित्तं कुमारिका। सर्वमेत
दमंगल्यं विज्ञेयं त्रिदशार्चिते। दुर्भिक्षं धननाशश्च रोगो मारी भयं तथा। पदे पदे च विपदः शोको व्याधी रिपुत्रातिः। परचक्रागमे
कस्मादग्निदाहः पुरे गृहे। मस्त्रासश्च दारिद्र्यं विच्छेदो बंधुभिः सह। भूतप्रेतपिशाचापि निवेशोपि गृहे गृहे। अष्टभिस्तु महा

रोगैः प्रजानां निधनं भवेत्॥ इतस्ततः प्रधावंति लोका भयनिपीडिताः॥ किम्व कुक्षेन देवेशि शिल्पश्चाकालिको भवेत्॥ इतरे श्वा
मभयस्तु भयं राज्ञा स्वरूपं वेत्॥ कुमारीवेष्टितद्वाराज्ञायते हि शुभाशुभं॥ वार्षिकं च फलं राज्ञो जयो वाप्यपराजयः॥ मृत्युर्दुःखंध
नं सौख्यं शत्रुभीतिर्वलोन्नतिः॥ राज्यवृद्धिः प्रजापीडा ख्यंगता स्नीकसंक्षयाः॥ कुमारीपूजनात्सर्वं ज्ञायते भोजनादपि॥ परीक्ष्यं य
त्नतस्तस्माद्राज्ञा स्वस्य शुभाशुभं॥ आर्ष्वातेपि विशेषेण भोजनेन सुरेश्वरि॥ ज्ञाते शुभे समीचीनं रक्षेत्तद्दिनरेत्रहि॥ कान्याश्चाव
कुसंभारैर्द्दीपं तज्जान्निवारयेत्॥ निवृत्य स्वगृहं याता यदि रुष्टा कुमारिका॥ तस्मिन्नेवाहनि भवेत्तथापि न शुभं फलं॥ इत्यादि फ
लं वा कुल्पं शुभमस्याप्यशुभमस्य वा॥ मयापि किंचित्कथितं धयस्व यदि यत्नतः॥ ततो निशीथसमये विधिवत्पूजनं ततः॥ पीठमूर्त्यो
प्रकुर्वीत धूपदीपानुलेपनैः॥ नैवेद्यैरुपहारैश्च गीतवाद्यादिभिस्तथा॥ ॥ कुमारी पूजिता हंति कलुषं सर्वसिंचनं॥ कुमारिकां विजानी
यात्साक्षात्प्रकृतिरूपिणीं॥ पत्रं पुष्पं फलं तोयं यत्किंचिद्वस्तुशोभनं॥ अनंतफलदं प्रोक्तं कुमार्यै चैव समर्पयेत्॥ भोजिता चेत्कुमारी
स्याद्भोजितं भुवनत्रयं॥ ब्राह्मणाय सुशीलाय कुमारीं यस्समर्पयेत्॥ पृथिवीदानजं पुण्यं सास्नुते नात्र संशयः॥ न कुमारीसमं भाग्यं
न कुमारीसमं तपः॥ न कुमारीसमा विद्या न कुमारीसमं धनं॥ न कुमारीसमं भाग्यं न राज्यमपि पार्वति॥ न कुमारीसमो योगो न भूतो न भ
विष्यति॥ अहो धन्यवतां मध्ये कुमारीपूजकः कलौ॥ कुमारीदेवताप्रोक्ता कुमारीप्राणरूपिणी॥ कुमारीभूषणो भूषा कुमारी स्पर्शरूपिणी

तद्रक्तसंभवंपुष्पंतद्रक्तसंभवज्जलं॥ तद्रक्तरचितंभोज्यंदेवताभ्योनिवेदयेत्॥ तासांप्रहारंद्वेषांचसर्वथापरिवर्जयेत्॥ स्वशक्त्याशिवसंपूज्यो
गाणापःसचसत्कृती॥ सयोगीसंचसन्यासीसमेधासच्चसंयुतं॥ सवेदवित्सर्ववित्स्यात्कुमारीपूजकःस्मृतः॥ अहोधन्यवतांमध्येकुमा
रीपूजकःकलौ॥ सर्वसिद्धिमवाप्नोतियःकुमारींसमर्चयेत्॥ वसंतिसततंदेहेकुमार्य्यांयोगिनीगणाः॥ अतःपूज्यानमःस्यास्याल्लालनी
यास्तदिछ्या॥ स्वशक्त्यापूजयेद्देवींकुमारींसाधकोत्तमः॥ विनाकुमारिकापूजांनपर्वपरिहापयेत्॥ योनित्यमर्चयेदेतांतस्यस्यात्सि
द्धिरुत्तमा॥ नवरात्रौसमायातेनवम्यंतंनिशीथधीः॥ नानोपचारैरभ्यर्च्यकुमारींविधिपूर्वकं॥ वृद्धिक्रमेणप्रयजेद्वांछितांसिद्धिमाप्नु
यात्॥ अथवापूजयेन्मंत्रीयुवतीन्नवसंख्यकां॥ हृल्लेखागगनारक्तामहाछुष्माकरालिका॥ इच्छाज्ञानक्रियादुर्गानवनामभिरीरिता
पूर्ववत्पूजयेन्मंत्रीजपेत्साग्रंसहस्रकं॥ यदिसाक्षोभमायातिस्वयमेवविलासिनी॥ तयासहनयेद्रात्रिंवारम्वानिशीतधीः॥ कुमारीन्न
स्पृशेदेवभावयुक्तनचेतसा॥ अन्यथामृत्युमाप्नोतिनोचेद्देवीपराङ्मुखी॥ ॥इतिश्रीतन्त्रचिन्तामणौनैमित्तिकार्चनायांकुमारीयज
ननिर्णयनामाषड्त्रिंशत्तमःप्रकाशः॥ ३६ ॥ अथसाधारणकाम्यार्चनविधिर्लिख्यते॥ ॥श्रीदेव्युवाच॥ नित्यार्चनंश्रुतंतत्वः
तथानैमित्तिकार्चनं॥ प्रभोतन्मेवदेशानीकथंकाम्यार्चनंभवेत्॥ नाथकिंतद्विधानंस्यात्काम्यार्चनविधेःशिव॥ तद्विशेषेणमेब्रूहिसुश्रू
षाबाधतेहिमां॥ ॥श्रीमहाकालउवाच॥ काम्यंननित्यवद्देविनैमित्तिकवदुच्यते॥ नित्यादप्याधिकंभिन्नंस्वल्पंनैमित्तिकादपि॥ काम्यंन

तत्रोपरागपर्वाःस्वीयतिथिक्रमः॥निमित्तापेक्षणांयद्वत्पूर्ववत्परिकीर्त्तितं।तथात्रकामनापेक्षादिष्टस्यागंतुकस्य च॥अथास्यभेद
बाहुल्यंप्रकारेपिनिगद्यते।तिथिर्भवतुयाकापिदिनंवारात्रिरेववा।कामनाद्रव्यसंपत्तिरुभयंकारणंमतं॥एकेनापिभवेत्काम्याः
ऽद्धनंत्रिदशवदिते॥क्वचिद्देवोभयंविद्यान्नभवेदेकमंतरा॥कामनाभेदतोद्रव्यभेदाभूयांसईरिताः॥पूर्वंपूर्वंवाधकंस्याद्वाद्यमे
वपरंपरं।उभयोर्वाधकंज्ञेयंसर्वार्थंजगदीश्वरि।तत्रापितंप्रथमंवक्ष्मिकामनायाभिदाःपराः॥तदनुद्रव्यसंपत्तेर्भेदान्वक्ष्याः
मिभूरिशः॥प्रागुत्तरंभवेत्सिद्धेस्तद्दिष्टमुभयंवुधैः॥कर्तुरेवमनस्तत्रप्रमाणंकालयोर्द्वयोः॥अशास्त्रमितिमोल्लेया एवमेवदिग
म्बराः॥~~[illegible] प्रागुत्तरंभवेत्सिद्धेस्तद्दिष्टमुभयंवुधैः~~ तन्मतंतुवरारोहेसमाकलयतत्वतः॥
कृतायामेवमेधायांयद्यत्त्वाभिमतंभवेत्।तत्स्मार्थ्यतमहीपालान्प्रभोर्नाप्नुयायिभिः॥ एवमात्रापिविज्ञेयंभाणिकेराअदो
जगुः॥कामनायांकालभेदाद्रव्यलाभेनतेमताः॥कालोमासर्त्तुपेक्ष्याहोनक्षत्रतिथिसंक्रमाः॥क्रमेणाकर्णयासीत्सिद्धंतविज्ञा
निशामय।गुणपापक्षयोराधेज्येष्ठेपुणापादयस्तथा॥आषाढेसंकरेत्राणंश्रावणेऽवग्रहक्षयः॥दारिद्र्यनाशोभाद्रेपिमारीनाश
इषेपिच।वंधूनांविप्रयुक्तानांमिलनंकार्त्तिकेमतं॥अस्यागमोमार्गशीर्षेपौषेराजभयक्षयः॥स्वर्गावाप्तिस्तथामाघेफाल्गुनेक
लहेजयः॥उपसर्गक्षतिश्चैत्रेमासीयाःकामनाइमाः॥वसंतेरससामर्थ्यंग्रीष्मेगोऽजाविकोन्नतिः॥प्रावृष्यरातिनिधनंसरघा

रोग्यमेव च ॥ हेमंते व्रीहिधान्यर्द्धिः शिशिरे चेति संक्षयः ॥ मूले धर्मो मतो वाप्तिः कृत्स्नकामार्थयोरपि ॥ रवौ ज्वरोपशमनं सोमे ने-
त्रामयक्षयः ॥ अनुरागविवृद्धिः स्यात्कुजे स्त्रीपुंसयोर्मिथः ॥ बुधे जाड्यापहरणं विद्यालाभो गुरौ तथा ॥ क्लीवतापहृतिः शुक्रे
शनावुत्पातसंक्षयः ॥ स्नानावाप्तिरथाश्विन्यामभिचारोपमार्जनि ॥ उद्घाटनं कृत्तिकायां रोहिण्यां वाञ्छिता तथा ॥ मृगशीर्षे त्वा पुरा-
प्तिर्मिथो द्वेषश्चारोद्भवे ॥ पुनर्वसौ धनलाभः पुष्ये च समरे जयः ॥ आश्लेषायां सर्पभयनिवारणमपीष्यते ॥ बलाधिक्यं मघायां
स्याद्योनिभे वक्ष्यत्मना ॥ भवे उत्तरफाल्गुण्यां ग्रहदोषनिवारणं ॥ तथैव हस्तनक्षत्रे परचक्रनिवारणं ॥ स्थिरा मैत्री च चित्रायां
स्वात्यां मोहनमेव च ॥ विशाखायां सम्वदनं नानासिद्धिश्च मित्रभे ॥ ज्येष्ठायां नष्टवित्ताप्तिर्गरदानं च नैऋते ॥ पूर्वाषाढासु कन्या-
पिस्न्मादोपशमो भवेत् ॥ उत्तराषाढनक्षत्रे श्रवणे मोक्ष एव च ॥ धनिष्ठायां खेचरत्वं मेधा वारुणभे भवेत् ॥ पूर्वभाद्रपदे चैव जा-
यते चिरजीविता ॥ तथा चैवोत्तराभाद्रे संपत्तिरतिभूयसी ॥ संपत्त्विद्धिर्निरपि रेवत्यां परिकीर्तिता ॥ काम्यार्चनं प्रतिपदिव ऊकल्या-
णकारकं ॥ गुर्विण्याः पुत्रकामार्थं द्वितीयायां समर्हणं ॥ राजभीत्यपनोदाय तृतीयायां सदा हितं ॥ बलग्रहापनोदाय चतुर्थ्यां का-
मपूजनं ॥ पंचम्यां शत्रुनाशार्थं षष्ठ्यामुत्पातशांतये ॥ स्त्रीपुंसयोस्तु सप्तम्यामनुरागविवर्द्धिकृत ॥ देवीप्रीतिस्तथाष्टम्यां नवम्यां
विजयो रणे ॥ एवासितपरावृत्ते दशम्यां काम्यसमर्चनं ॥ एकादश्यां धनावाप्तिर्द्वादश्यां पुष्टिवर्द्धनं ॥ सर्वसिद्धिस्त्रयोदश्यां चतुर्दश्यां मथा

मृतं।योगक्षेमपरिप्राप्त्यै पंचदशरूपं समर्च्चयेत्।। ।।पारलौकिकसिद्धिः स्यादुत्तरायणसंक्रमे।तथैहलौकिकक्षेमसिद्धिः स्याद्दक्षिणायने।संक्रमादिषु चान्येषु योगयोगादिभिस्तथा।विविधाः कामनास्तास्ता भवंति वरवर्णिनि।यामलादिषु ते प्रोक्ता भैरवीसंहितास्वपि।वाहुल्यभयतो नोक्ता मया देव्यत्र कामनाः।इति कालसमुद्देशः कश्चिदुद्दिष्ट ईश्वरि।द्रव्यलाभमथो वक्ष्ये ज्ञेयं तद्विविधं बुधैः।कालसंवलिताः केचित्तदसंवलिताः परे।नीपाशोकपलाशः श्रीफलपत्रसरोरुहां।मल्लिकाकेतकीजातीकरवीरजवाः शनाः।वंधुकान्निवपुष्पेषु फलेषु च निशामय।लकुचाम्रातकीक्षीरिकरमर्दामकंटकाः।नागरंगाम्रपनसवीजपूरकपित्थकाः।।मद्वीकादाडिमफलतालीनालिच पार्वति।वैशाखादिषु लग्नानि विशेषाद्देशकालयोः।काम्यार्थहेतुकानि सुरम्यास्वपि च मे शृणु।कपिलायाः वत्समायाः क्षीरं मलयजद्रवः।मत्तखंडविकालश्च धूपश्चाम्बरनामकः।सार्धपंसितमाध्वीकं दिव्यशङ्खैरुपागमः।लक्षांकचुकपुष्पाणि तत्रश्चेलिसवरापनैः।महामाद- कत्रीच्चहालाद्वीपांतरागता।समागमः कौलिकानां सर्वावयवसंभृतं।तांबूलोपगमश्चापि वक्त्रामोदं जनोऽक्षयः।रुषामधिगमे देवि राधादिषु च वर्द्धवत्त।तथैवारेयाधिगमानधुनाकलय प्रिये।गोधाशशडरभ्रुश्वकमठः कूर्मसारसुक।गवयः शूकरश्छागो महिषो नकुलोऽपि च।गोकर्णो मकरः श्वापिद्वीपीखङ्गश्च केशरी।।प्राद्यादिपंचदशपंततिथिद्रव्याण्ययः क्रमात्।भैरवीसंहितास्वेवं ज्ञातव्यापारतारयोः।।मासानां संक्रमा

नांवयामलादिषु पार्वति ॥ कामनाद्व्यक्ता भौह्यावेव मुक्तौ मया तव ॥ उभयोरप्यभावेपि स्वेच्छा हेतुत्वमृच्छति ॥ नान्वेति नित्यं के
नापि नैं पुनर्नित्यमन्वितः ॥ परस्परं ते वपुनर्व्यवस्थे द्विधा स्थिता ॥ उत्तरोत्तरतश्चैषां बाध्यता च निरूपिता ॥ काम्येपि नैमित्ति
कत्तां भारुडकेरः प्रकुर्वते ॥ सुन्नूयासा चाग्निरूपेति तन्त्राहमिति कीर्त्तये ॥ तदा संज्ञा घटीत्येतद्यदि पर्वसु जायते ॥ उदीरितादिभित्रे
सुयोगजे घापि पर्वसु ॥ दिने घघरिते ष्वेवं प्रकारैरपि भूरिभिः ॥ कामनाभिरवाप्ता वाथवा देवि निजेच्छया ॥ काम्यार्चा घटते इ
वरूपं दुष्टो क्रिरतस्वसा ॥ इदानीमत्र यत्प्रोक्तं कर्त्तव्यत्वेन भूरिशः ॥ हेयत्वेनोदितं यच्च तत्सर्वं कलय प्रिये ॥ कालिकानामशेषाणा
मतमत्रेदृशं स्थितं ॥ शक्त्या सहोपविश्यैकासने वामांग गतया ॥ काम्यार्चनं प्रकर्त्तव्यं न च तत्स्वजनं पृथक् ॥ कुर्वीत यस्त्वकुर्वंतु
स्मार्त्तां तां नैतदिष्यते ॥ क्रियाभेदाद्गंधपुष्पधूपदीपाभिधा पृथक् ॥ सात्विकं कामनायां तु सितो गंधः प्रशस्यते ॥ उशीरं नवश्री
कारे प्रीतये वैरिणां जये तु ॥ गंधपुष्पविशेषेण कर्त्तव्यो लोहितः सदा ॥ मोहने कामिनीलाभे पीतमेवाभयं मतं ॥ कृत्याभिचारे द्वेष
च मारणे चासितं द्वयं ॥ दीपवर्त्तय ईदृश्यस्तत्तद्वर्णाब्जतंतुभिः ॥ विधातव्याः प्रयत्नेन तत्तत्कार्यप्रसिद्धये ॥ गुग्गुलुर्मुरुधूपस्तु सा
त्विके च प्रशस्यते ॥ तथा सरलनिर्यासो राजसेषु प्रकीर्त्तितः ॥ वगलाले तथा सिद्धार्थकं तामसकर्म्मणि ॥ यन्त्रादिकर्म्मके वल्पतपस्ती
र्थादिलब्धये ॥ नैवेद्यं फाणिताज्याक्तान्नफलान्नं च भक्ष्यः ॥ इतरस्याशक्तव्या गुडमाध्वीकशक्क्रयः ॥ पूर्ववत्फलकूष्मांडेक्षुदण्ड

वत्येमताः॥ अपरस्यैवतत्यैसीपूररस्योध्यजन्मिनः॥ इत्यादिवस्तुनोभेदाज्ञानत्वास्वकयाधिया॥ नैमित्तिकवदप्यत्रपात्राणांरवनाप्रिये॥ मतानुसारतःस्वस्वव्यवस्थाश्रयणादपि॥ विधिमंत्रौवत्तावेववेदितव्यौवरानने॥ सामग्रीशोधनंचापितथैवानुक्रमावली॥ विशेषोयोधिकोऽस्तीहतन्माकलयतत्वतः॥ सर्वेषामुपचाराणांप्रदातायवरानने॥ सन्तियद्यपिमंत्रास्तेपृथक्पृथगुदीरिता॥ तत्रापितेषांचरमेमूलमंत्रंप्रकीर्त्यहि॥ भगवत्यैगुह्यकाल्यैतद्वस्तुशिरउच्चरेत्॥ एवंसर्वत्रबोद्धव्यंयावदेकप्रपूजने॥ न्यासस्ययस्यकस्यापिप्रागन्तेपिसुरेश्वरि॥ तत्रन्मनुदिकार्यंषडंगमृषिसंयुतं॥ तत्रन्यासार्पणमपिविधायविनिवेदयेत्॥ उपयोगोह्येवपूर्वंसंकल्पंपुरतश्चरेत्॥ आवश्यकतयादेविकर्तव्यत्वेननिश्चितान्॥ ॥अथप्रयोगादेःशुभाशुभविवेचनगणेशाप्रदीपमाह॥ शृणुदेविप्रवक्ष्यामिदीपस्यविधिमद्भुतं॥ आदौगणेशदीपस्तुकार्याकार्यविनिर्णये॥ कर्तव्यंसंप्रवक्ष्यामिकार्यमष्टविधंस्मृतं॥ शांतिकंपौष्टिकंचैवमारणंस्तंभनंवशं॥ मोहोच्चाटेद्वेषणंचदीपदीपंचरेत्क्रमात्॥ गोधूमयवमाषाणांमृत्तिकास्वर्णमुद्गजं॥ ताम्रायसोःक्रमात्पात्रंवर्तयश्वेतपीतके॥ कृष्णनीलारुणारक्तहरित्कापोतसूत्रकैः॥ पूर्वासायष्टकाष्ठानांक्रमात्संमुखमाचरेत्॥ उदक्प्राग्दक्षतोयेशावह्निरक्षःसमीरदिक्॥ संमुखंतुमुखंकुर्यात्साधकःस्वल्पकर्मणि॥ गव्याज्यंतिलतैलंचराजिकोत्थंचसार्षपं॥ माहिष्याज्यमुमातैलंवसातैलंकुसुंभजं॥ लिखेत्सूर्यदलंपद्मंलिप्तेगोमयमण्डले॥ दीपस्यदिशमा

रभ्यगणेशांस्तत्र पूजयेत्। सुमुखश्चैकदंतश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्नराजो गणाधिपः। धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि। विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे शंकटे चैव विघ्नस्तस्य न जायते। एतान्नत्र यजेद्विद्वान् पश्चाद्दीपं ज्वलापयेत्। दीपिकासंस्थिते पात्रे शुद्धया तु शलाकया। ऊर्द्धाधः कंपते दीपस्तदा कार्यं प्रसिध्यति। तिर्यक्कंपेन कार्यस्यात्सम्यग्न्योतिषिसत्फली। तेजो माघे विलंबेन चात्र कौतुकमुच्यते। ज्ञातादेवगणो कन्यां कुमारं वा समानयेत् स्त्रियं वा शुद्धवेषां व सम्यगानीय पूजयेत्। स्वधस्थात्स्थापयेत्तं विस्तीर्णं कांस्यभाजनं। जलं पूर्णं च तन्मध्ये सा पश्येत्स्थिरदृक्ततः। विन्नयित्वा स्वीयकार्यं तदुपर्यंकतां क्षिपेत्। कार्यानुसारं सा पश्येत्सुन्नतीनां च कौतुकं। प्रयोगकाले देवेशि ब्राह्मणान्पूजयेद्व्रती। तावत्कापि न गंतव्यं यावत्सिद्धिर्न जायते। आरंभांतं समाप्याथ प्रायश्चित्तं न तच्चरेत्। अंगांगीभावमासाद्य सर्वं संसाधयेद्व्रती। कार्यमध्ये पुनः कार्यमंगांगित्वा भवेच्छिवे। पूर्वपाटीउराज्ञात्वा विघ्नानुत्सार्य यत्नतः। कार्याणि साधयेद्देवि चान्यथा नरकी भवेत्। कार्यांतरे समालब्धे तत्र कार्यं न वै भवेत्। न्यायाधिकरणं ज्ञात्वा पीठिकाज्ञानपूर्वकं। अंगांगित्वं उराज्ञात्वा सर्वकार्याणि साधयेत्। न हि कर्माणि कर्मणामारंभस्तु क्वचिद्भवेत्।। कर्मणामपि चारंभस्त्वंगांगित्वाद्भविष्यति। कार्ये ज्ञानेपि देवेशि संध्यामूर्त्तिं समाचरेत्। संकल्पवाधकी भूयाद्न्यथा परमेश्वरि।। ।। अथ विशेषकाम्यमाह। काम्यकर्माणि वक्ष्यामि तत्रादौ शांतिरुच्यते। शांतिर्नाम मनुष्याणां रोगकृत्यादिनाशनं। षट्कर्मा विभज्याहोरात्रं पंचस्वंसेनु शांति

कं। हेमंतेचप्रकर्त्तव्यंनाशायच्छलतेयदा। वायुस्तदातोयतत्वतस्मिन्शांतिकमाचरेत्। श्वेतवर्णेननिर्मायचतुरस्रंतुमंडलं। पूजयेद्व
जलेवादैवंबीजेनात्रशांतिके। उत्तराभिमुखोभूत्वाशांतिकंतुसमाचरेत्। शांतिकादौरतिः पूज्यापद्ममुद्रांप्रदर्शयेत्। तथापद्मास
नस्थोयंनमोंतः शांतिकंमनुः॥ शांतौकुशासनंग्राह्यंहोमयेन्मगमुड्या॥ मुक्ताकनिष्ठिकांयत्ररूयतेसामतीभवेत्। त्रिषुत्तरा
सुपूर्वासुशांतिकंस्यात्त्रिजन्मसु॥ ॥अथवश्यंप्रवक्ष्यामिस्वायतीकरणंतुतत्। देवरक्षोराजलोकसर्पस्त्रीहयहस्तिनां॥ प्रथमांशे
वश्यकर्म्मवसंतेचप्रसिध्यति॥ नाशोर्ध्वेवहतेवायुरग्नितत्वंवहेत्तदा। वश्यंकुर्यात्त्रिकोणेतुरंबीजेनाग्निपूजनं॥ रक्तवर्णेननिर्माय
वश्यंपूर्वमुखश्चरेत्॥ वाणींसंपूजयेद्वश्येपाशमुद्रांप्रदर्शयेत्॥ स्वस्तिकासनमारुह्यस्वाहांतंमंत्रमुच्चरन्॥ छागंलंचमेवश्येसाजे
मयेन्मगमुड्या। रक्तद्रव्यैरत्रहोमोध्यानमारक्तकंमतं॥ मृगांत्यचित्रामित्रर्क्षेविशाखाकृत्तिकात्रतु॥ ॥अथस्तंभंप्रवक्ष्यामि
नदुयोगनिवारणं॥ गजराज्ञोरगव्याघ्रादिककोपनिवारणं॥ शिशिरेस्तंभनंप्रोक्तंपश्चांशेतुदिनस्यतत्॥ अग्नेरपांचसैन्यस्यक्रुद्धस्य
विषदंष्ट्रिणां॥ जानुभ्यामवनींगत्वास्तंभनस्यक्रियांचरेत्॥ जारचोररुजांस्तंभोधर्म्मः भूतादिरक्षसां॥ नासादंडेनसंलग्नोवायुश्चेत्
दयोभवेत्॥ स्तंभकर्मतदाकुर्यात्लंबीजेनवसुंधरां॥ अष्टवज्रयुतेपीतेमंडलेतांसमर्चयेत्॥ प्राङ्मुखस्तंभनंकुर्यादुमांतत्रप्रपूजयेत्॥
विकटासनगोदेवीगदामुद्रांप्रदर्शयेत्॥ स्तंभनेवषडंतश्चहोममंत्रःप्रकीर्तितः॥ गजचर्मासनंस्तंभेमृगीमुद्राकृतेतथा॥ पीतद्रव्यैश्चा

त्र होमैः पीतवस्त्रादिकस्त्वयं॥ स्तंभने भरणी चित्रा रोहिणी चात्र रात्रयं॥ ॥अथ विद्वेषणं वक्ष्ये प्रीतिनाशः स तु द्वयोः॥ ग्रीष्मे विद्वेषणे घस्त्रषष्ठांशे तु द्वितीयके॥ नासायां मध्यगे वायोवोदये द्वेषणं मतं॥ वर्तुले धूम्रवर्णे तु मण्डले खं समर्चयेत्॥ हं वीजं नाथ विद्वेषं नैर्ऋत्याभिमुखं चरेत्॥ पूज्या धूमावती देवी मुद्रा तु मुशला भवेत्॥ होमे मंत्रः फडंतोग्रविशेषुत्कटुकासने॥ विद्वेषजांबुकचर्म • लोहासनमथापि वा॥ धूम्रवर्णोश्च होतव्याः ताम्रवस्त्रादिसाधकः॥ आद्राचतुष्ठयं मूलं ज्येष्ठा विद्वेषणे मता॥ उच्चाटनमथो वक्ष्ये तरीणां प्रवासनं॥ प्रावृडुच्चाटने शस्ता त्रिषष्ठांशे दिनस्य च॥ तिर्यग्याने समीरे तु वायुर्वहति तत्र तु॥ शत्रोरुच्चाटनं कुर्यात् यं वीजेनतमर्चयेत्॥ षट्कोणमंडलं वायोः कृष्णषड्बिंदुलांछितं॥ मृगचर्मासनं तत्र वायव्यास्यं च कर्मणि॥ दुर्गां संपूजयेत् मुद्रामशनिं नाम दर्शयेत्॥ वज्रासनसमारूढः फडंतश्चक्रतो मनुः॥ तर्पणार्थं मेषरक्तं मिश्रितं तोयमावहेत्॥ धूम्रमुच्चाटने ध्यानं कृष्णद्रव्येस्तथाकुनेत्॥ उच्चाटनं क्षिप्रभेषु चरभेषु प्रशस्यते॥ ॥मारणं प्राणहननं शत्रूणामीरितं तु तत्॥ मारणे वर्जयेद्विप्रान् त्यांश्चापि सुधार्मिकान् स्त्रीबालव्यतिरिक्तेषु राजवैरिषु योजयेत्॥ स्वदोषतो वालकानां रक्षार्थं वा तदाचरेत्॥ न तु लाभभयाद्वापि कुर्यान्मंत्री तु मारणं॥ प्रायश्चित्तं च कर्तव्यं देवि तद्दोषशांतये॥ अयुतं प्रजपेन्मंत्रं जुहुयाज्ञावदेवहि॥ स घृतैः पायसैः कृष्णतिलैर्वा घृतसंस्नुतैः॥ आत्मरक्षा प्रकर्तव्या कर्म्मकाले सदा बुधैः॥ अह्नश्चतुर्थषष्ठांशः शरन्मारणकर्म्मणि॥ वश्यवन्मारणे कार्य्यं पूजाद्यं वह्निमंडले॥ दक्षिणा

भिमुखः कुर्यान्मद्रकाली समर्चयेत् ॥ दर्शयेत् खड्गमुद्रां च क्रोभञ्जसने कुनेत् ॥ ऊँकारां तेन मंत्रेण माहिषं वाथ लोहितं ॥ आ
सनं सूकरीमुद्राकारसंकोचतो भवेत् ॥ ध्यानं कुर्यात्तत्र स्मवर्णां कृष्णमड येष्टपूजनं ॥ उग्रतीक्ष्णोग्रबुद्धिस्तेषु स्वस्य वंचनादिके ॥
शत्रो श्वेतवलाभावे चैकपादो परिस्थितः ॥ उन्मोदकं समर्पितं तर्पणार्थं तु मारणे ॥ तिष्ठन् कुर्यान्मारणं वा भूमौ पादं निवेदयेत् ॥ वा
मपादनिविष्टः सन् स्वरेत्तत्र तु तर्पणं ॥ आकर्षणे वह्निकोणसंमुखस्तु समाचरेत् ॥ वश्योक्तमखिलं ज्ञेयं माकर्षे कार्यसिद्धये ॥
प्रकीर्णान्यपवश्यं नेत्यभिचारांश्च तत्र च ॥ दक्षिणाभिमुखः कुर्यान्मेषीचर्मणि संस्थितः ॥ लोहासनगतो वापि सत्कार्यमुद्याकु
नेत् ॥ धनसिद्धिकरं कर्म सति माभिमुखं चरेत् ॥ मृगांत्यचित्राभित्रेषु देध्यानं तु राजसं ॥ गोचर्मणासनं मोहस्वाहांतं मंत्रमुच्चरेत् ॥
हरिद्राभिश्रितं तोयं तर्पणार्थं प्रयोजयेत् ॥ स्वाती वरोहिणीतत्र श्लेष्वा वापि सुखासनं ॥ अथर्वाणि कर्माणि रोउमेतु प्रसाधयेत्
नानाविधेषु कार्येषु व्याघ्रचर्म समीरितं ॥ सर्वरत्ननिभाकारं ध्यायेन्निश्चलमानसः ॥ पीयूषवर्षसंयुक्तं पूर्णचंद्रसमप्रभं ॥ ध्याये
देवं विधं वापि सर्वकार्यप्रसाधने ॥ आयुःकरं श्रावरोपि देवं ध्याय स्वराजसं ॥ स्वपमं स्तुजयं शोक्तं पूर्वी चैवान्नरात्रयं ॥ वषडंतो हो
ममंत्रो ध्याये द्राजसं देवतं ॥ सर्वज्ञानप्रसिद्ध्यर्थमीशानाभिमुखो भवेत् ॥ सर्वविज्ञानकार्येषु श्वेतकंवलमासनं ॥ पुष्यादि साध
नेमंत्रो वौषट्पल्लवसंयुतः ॥ हंसी स्यात्तर्जनी युक्ता मुद्रा होमेतु पौष्टिके ॥ यथोक्तं देवता ध्यानं कुर्यात्पौष्टिककर्मणि ॥ सर्वत्र भय

नाशाय वैषडंतोक्तोमनुः॥ महाशोकसमायुक्तं ध्यानेवैरिभयंभवेत्॥ मित्रभजनकार्येषुवषडंतोक्तोमनुः॥ खंडनेतुफ
डंतः स्याद्यो मोध्यानेतुतामसं॥ सोख्यायोदस्युखः कुर्याज्जयंवक्तुरुच्चमशि॥ कल्पांताग्निसमंयुद्धे ध्यायेद्देवंचतामसं॥ ॥
अथवक्ष्यामिकाम्यादौसंपूज्यायाश्चदेवताः॥ नित्यंसमर्चयेद्विघ्नंवारेशंचतितीश्वरं॥ नक्षत्रेशंततःपूज्यास्तत्तत्कर्माणिदेवताः
ततोर्चयेदिष्टदेवंततोहोमंसमाचरेत्॥ क्रमाद्वारेश्वरौसूर्यशिवौसोमांविकेतथा॥ गुहांगारौज्ञविष्णुचचतुर्वक्त्रबृहस्पती॥
शुक्रेंद्रौशनिकालौचसूर्यादौपूज्यतामनुः॥ ब्रह्माविधाताविष्णुस्त्वयमसीतकरोगुहः॥ इंदुश्चवसवोनागाधर्मःशिवदिवा
करौ॥ कंदर्पश्चकलिविश्वेदेवास्त्वपितरस्तथा॥ अश्विनौचयमोवह्निब्रह्माचंद्रःशिवोदितिः॥ गुरुःसर्पाश्चपितरोभगोर्यमा
दिवाकरौत्वष्टावायुरथेंद्राग्नीवौमित्रश्चशुरेश्वरः॥ निर्ऋतिश्चजलंविश्वेदेवाश्चापिविधिर्हरेः॥ वसवोवरुणोजैकपादोहि
र्बुध्न्यपूषकौ॥ नक्षत्रेशाइमेसाभिजिकाश्चष्टौचविंशतिः॥ प्रणवादिचतुर्थ्यंतानमसाचसमन्विताः॥ एतेषांनाममंत्रास्तुग्राह्याः
पूजादिसाधने॥ ॥सिद्धःमंत्रःप्रकुर्वीतकाम्यकर्माणिनान्यथा॥ कृतानिविपरीतानिभूत्वानिरयमाप्नुयात्॥ गुरुभक्तःशु
चिःस्नातःकाम्यकर्मविधानवित्॥ आत्मनश्चपरस्यापिकाम्यकर्माणिवाचरेत्॥ षट्कर्माणिपरार्थेवैनकुर्यान्मंत्रवित्तमः॥ ए
तेषामेतत्कुर्वीतनान्येषांतुकदाचन॥ राज्ञोवाराजपुत्रस्यधनाढ्यस्येतरस्यवा॥ आस्तिकस्यातिभक्तस्यन्यायार्जितधनस्यवा॥ स्त

तत्त्वस्य वदान्यस्य गुरुर्देवार्चनस्य च ॥ सुशीलस्य सुभक्तस्य कार्य्यं कुर्याच्च देशिकः ॥ राज्ञा कामयितान्यो वा साधकं प्राप्तिपत्य वा ॥ स्वात्याल्कर्मकर्त्तारं दीक्षोक्तविधिना ततः ॥ साधकः प्रयतो भूयात्तस्य कर्त्ता तोषयान्शुचिः ॥ जितेन्द्रियो जितक्रोधो मानक्षोभविवर्जितः ॥ नित्यनैमित्तिकरतः कुर्यात्काम्यान्यनेकथा ॥ क्रूरकर्म्म यथोक्तं तु कृत्वा भंगं समाचरेत् ॥ स्नात्वा साधारणां सांगां पूजयेदिष्टदेवतां ॥ अष्टोत्तरसहस्रं च रक्षार्थं प्रजपेन्मनुः ॥ मां रक्षयेत्युक्त्वा च नत्वा देवं समुत्सृजेत् ॥ अन्यैः सुहृद्भिः सन्निध्यैः रात्मरक्षां तु कारयेत् ॥ मृत्युंजयादिभिर्मन्त्रैः सूर्य्यसेवार्घ्यदानकैः ॥ जपहोमार्चनाद्यैश्च ब्राह्मणाराधनादिभिः ॥ प्रयोगकरणं सम्यग्गुरुतः शास्त्रतस्तथा ॥ ज्ञात्वा प्रयोगान्कुर्वीत नान्यथा दुःखमाप्नुयात् ॥ सिद्धमंत्रस्य सिध्यंति षट्कर्माणि न संशयः ॥ नैव सिद्धं त्वसिद्धस्य देवताशापमाप्नुयात् ॥ देवताकालमुद्रादीन्सम्यक् ज्ञात्वा विचक्षणः ॥ षट्कर्माणि प्रयुंजीत यथोक्तफलसिद्धये ॥ लग्नं तिथिसमायुक्तं नक्षत्रेण समन्वितं ॥ पंचाभिस्तु हरेद्भागं तच्छेषं भूतउच्यते ॥ त्रिंशद्दिनावधिः पृथ्वी सलिलं पक्षउच्यते ॥ त्रिंशद्दिनावधिः पृथ्वी सलिलं पक्षउच्यते ॥ अनलानिलयोः सप्ताहमाकाशो दिवसत्रयात् ॥ शांतिकर्म भवेद्गेहे श्मशाने क्रूरकर्म च ॥ अथवा सर्वकर्माणि भवेयुर्देवतागृहे ॥ ॥ अथासनलक्षणानि ॥ वामोरूपरि दक्षिणं तु चरणं संस्थाप्य वामं तथा ॥ याम्योरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढं ॥ अंगुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेदेतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते ॥ ॥

जानूर्वोरंतरे सम्यक्कृत्वा पादतले उभे ॥ ऋजुकायस्समासीनः स्वस्तिकं तदुदीरितं ॥ एकं पादमथैकस्मिन्विन्यस्योरुणि संस्थितः
इतरस्मिंस्तथा चोरुं विकटासनमीरितं ॥ पद्मासनं तु संयोज्य जानूर्वोरंतरे करौ ॥ निवेश्य पद्मौ संस्थाप्य व्योमस्थं कुक्कुटासनम्
मेढ्रादुपरि विन्यस्य सव्यं गुल्फं ततोपरि ॥ गुल्फांतरं च निःक्षिप्य वज्रासनमिहेरितं ॥ गुल्फे च वृषणस्याधः सीवन्याः पार्श्वयोः क्षि-
पेच पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चलः ॥ भद्रासनं भवेदेतत्सर्वव्याधिविनाशनं ॥ ॥ आसनाधारमधुना वक्ष्ये तंत्रानु-
सारतः ॥ चतुरस्रार्द्धचंद्रं च त्रिकोणं च षडंगकं ॥ वर्तुलं च पृथिव्यादिमण्डलाकृतयः क्रमात् ॥ वं लिखेत्स्तंभनं कुंभे हर्यक्षे वृश्चिकोद-
ये वृषे घटादिकं तत्र कुलीरजतुलोदये ॥ यमकन्याधनुर्मीने वश्यं शांतिकपौष्टिकं ॥ मारणोच्चाटने राशौ रिपोर्भेदादिनिग्रहं
तथा ॥ वश्यादौ लेखनी दूर्वा कर्षणे शिखिपिच्छजा ॥ विद्वेषोच्चाटने काकपक्षेणापि च मारणं ॥ ॥ यंत्राणां लेखने द्रव्यं चंदनं रो-
चनानिशा ॥ गृहधूमतांगारो मारणे ष्टविषाणि च ॥ रेपनाम्नि लोणपिंडानि धुस्तूरकरसः पुनः ॥ गृहधूमस्त्रिकटुकं विषाष्टकमु-
दीरितं ॥ पीतं श्वेतं तथा रक्तं कृष्णं धूम्रमिति क्रमात् ॥ नाभौ स्मरेन्मण्डलं तु वायोस्तद्बीजसंयुतं ॥ त्रिकोणं पिंगलं वह्निमण्डलं हृदि
चिंतयेत् ॥ चतुरस्रं गले पीतं पृथिवीमंडलं स्मरेत् ॥ अर्द्धचंद्रं ललाटे तु श्वेतं पद्मद्वयांकितं ॥ मस्तके धूम्रवर्णाभं वर्तुलं व्योममण्डलं
स्वस्वबीजयुते ध्येयं चेतन्यं परिचिंतयेत् ॥ ॥ धरादिपंचभूतानां निवृत्त्याद्याः कलाः स्मृताः ॥ निवृत्तिः स्वप्रतिष्ठास्या विद्याशांतिरनं-

विदर्भितं तु तत्प्रोक्तं दुष्टघ्नं वश्यरक्षणं ॥ मंत्रेणांतरितं साध्यं समस्तं तिष्ठति प्रिये ॥ आक्रांतं तेन हि जानीयात्सद्यः सर्वार्थसिद्धिदं गर्भ-
स्थं तु समानेन वश्योच्चाटनकर्मसु ॥ सकृत्सर्वं वदेन्मंत्रं मंत्रं चैव तथा पुनः ॥ मध्ये चास्य भवेत्साध्या मायन्तमिति तद्विदुः ॥ अन्योन्यः
प्रीतियुक्तानां विद्वेषणाकरं परं ॥ आदौ वांते तथा मंत्रं द्विवारं संप्रयोजयेत् ॥ साध्यं नाम सकृन्मध्ये गर्भस्थं तु तदुच्यते ॥ मार-
णोच्चाटने वश्ये प्रयुक्तं कारयेन्नरणां ॥ हेतिनो सेन्यधी गर्भस्तंभने च गतस्तथा ॥ त्रिधा मंत्रं वदेत्सर्वं तथैवांते पुनस्त्रिधा ॥ सकृ-
त्साध्यं भवेन्मध्यं तद्विधात्सर्वतो वृत्तं ॥ सर्वोपसर्गशमनं महामृत्युनिवारणं ॥ सर्वसौभाजननं मृतानाममृतं परं ॥ आदौ मंत्रं
ततो नाम पुनर्मंत्रं समालिखेत् ॥ एवमेव त्रिधा कृत्वा भवेद्युक्तिविदर्भितं ॥ सर्वव्याधिहरं प्रोक्तं भूतापस्मारमर्द्दनं ॥ एकैकं सा-
ध्यवर्णं तु कृत्वा मंत्रं च विदर्भितं ॥ पूर्ववत्कथितं वानंतस्माद्यन्ते प्रकल्पयेत् ॥ विदर्भग्रथितं नाम मंत्रलक्षणमुत्तमं ॥ सर्वकर्म-
करं प्रोक्तं सर्वैश्वर्यफलप्रदम् ॥ एवमेव प्रयोगाश्च सिद्धमंत्रस्य सिद्धिदाः ॥ संप्रदायास्तु सिद्धश्च गुरुतः सिद्ध एव वा ॥ स्वसि-
द्धश्चेति सर्वेपि मंत्रास्तु त्रिविधा मताः ॥ ॥ मानसस्सिद्धिकामैस्तु उच्चिकामैरुपांशुकः ॥ वाचिको मारणे चैव प्रशस्तो जप
ईरितः ॥ ॥ ऊर्द्ध्वदृष्टिर्जपेच्छांतावधोदृष्टिस्तु मोहने ॥ समदृष्टिः स्तंभने च पार्श्वतो दर्शनक्रमात् ॥ विद्वेषे च समुच्चाटे मारणे
सूर्यदर्शनः ॥ विद्यार्थे जलमध्यस्थो भानुमंडलदर्शनात् ॥ भूमध्यदर्शनाद्देवि मोक्षणांतो भ्रुभे विले ॥ नाशाग्रदशतो देवि ॥

नरांशां स्यतीति तिता ज्ञेयास्सं पूज्या मन्त्रतत्त्ववत्ताः॥ ॥षण्मुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयाः॥ मुशलाशनिखड्गाख्याः शांतिकादिषु दर्शयेत्॥ हस्तौ तु संमुखौ कृत्वा सन्नतानुन्नतांगुली:॥ तलांतर्मिलितांगुष्ठौ मुद्रैषा पद्मसंज्ञिका॥ वाममुष्टिस्थितर्ज्जन्या दक्षमुष्टिस्थतर्ज्जनी॥ संयोज्यांगुष्ठकाग्राभ्यां तर्ज्जन्यग्रे स्वके क्षिपेत्॥ एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्त्तिता:॥ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथितांगुली॥ अंगुल्यौ मध्यमे भूयः संलग्ने सुप्रसारिते॥ गदामुद्रेयमाख्याता विष्णोस्संतोषवर्द्धनी॥ मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणां॥ कुर्यान्मुशलमुद्रेयं सर्वविघ्नविनाशिनी॥ कनिष्ठांगुष्ठसंयोगात्त्रिकोणाशनिसंज्ञित॥ कनिष्ठानामिके बध्वा स्वांगुष्ठेनैव दक्षतः॥ शिष्टांगुलीव प्रसृते संसक्ते खड्गमुद्रिका॥ ॥ग्रथितादिप्रभेदश्च मंत्राणां वक्ष्यतेधुना॥ ग्रथितं संपुटं ग्रस्तं समस्तं च विदर्भितं॥ तथा चाक्रांतमाद्यंतगर्भस्थं सर्वतो वृतं॥ तथा युक्तिविदर्भं च विदर्भग्रथितं तथा॥ इत्येकादशधा मंत्राः प्रयुक्ताः कार्यसिद्धयः॥ साध्यनामार्णमेकैकं मंत्रार्णैः संप्रयोजितं॥ ग्रथितं तत्समाख्यातं वश्याकृष्टिकरं परं॥ मंत्रमादौ वदेत्सर्वं साध्यसंज्ञामनंतरं॥ विपरीतं पुनश्चांते मंत्रं तत्संपुटं स्मृतं॥ शांतिपुष्टिकरं ज्ञेयं त्रैलोक्यैश्वर्यदायकं॥ मध्येमध्ये तथाद्यंते मंत्रं कुर्याद्विचक्षणः॥ मध्यात्तु संभवेत्साध्यं ग्रस्तमित्यभिधीयते॥ अभिचारेषु सर्वेषु योजयेन्मारणेषु च॥ अभिधानं वदेत्पूर्वं पश्चान्मंत्रं तथा भवेत्॥ एतत्समस्तमित्युक्तं शत्रूच्चाटनकारकं॥ द्वौ द्वौ मंत्राक्षरौ यत्र एकैकं साध्यवर्णकम्॥

सर्वत्रशुभकर्मणि॥ ॥नित्यंजपंकरेऊर्यान्नप्रयोगेकदाचन॥प्रयोगेविहितामालातत्तत्कर्मानुरूपतः॥ ॥वश्येपद्माक्षमालास्या
च्छांतौशंखमयीभवेत्॥निम्बारिष्टात्मिकास्तंभेद्वेषणोप्रेतदंतजा॥अश्वदंतोद्भवोच्चाटेमारणोखरदंतजा॥ ॥उच्चाटनेअश्वदंतामाला
प्रोक्ताश्ववालकैः॥खरदंतैरधोदंतैर्मनुष्यास्नायुतंतुना॥ग्रथितानिर्मितामालाशत्रूणांनाशिनीमता॥प्रेतदंतैरधोभूतैःकर्त्तव्याज
पमालिकाः॥साध्यदेहभवैःकेशैःप्रोतव्याद्वेषकर्मणि॥ ॥संतंवाथतदर्धंस्यात्सर्वसाधारणोजपो॥पंचाशद्भिःकाम्यकर्मसिद्धिःस्या
च्चतुरुत्तरैः॥अष्टोत्तरशतैःसर्वसिद्धिरुक्ताकृतस्त्वजा॥मोक्षार्थीपंचविंशत्यापंचदश्याभिचारके॥ ॥मध्यमांगुष्ठकाभ्यांतुजपे
दाकर्षणोन्वहं॥अंगुष्ठतर्जनीभ्यांतुविद्वेषोच्चाटयोर्जपेत्॥जपेज्ज्येष्ठकनिष्ठाभ्यांशत्रुमारणकर्मणि॥अंगुष्ठानामिकाभ्यांतुजपेदन्ये
षुकर्मसु॥सर्वंसंपादयेद्विद्वान्मालाग्रथनहेतवे॥सितरक्तपीतमिश्रकृष्णधूम्राःप्रकीर्तिता॥वर्णातोमंत्रतःप्रोक्तादेवताःषट्सुकर्म
सु॥क्वचित्कल्पविशेषेणप्रयोगेध्यानमीरितं॥तत्सर्वंसम्यगालोच्यप्रयोगेविधिमाचरेत्॥आकर्षणाद्वश्यवत्स्यात्क्षुभेशांतिवदीरितं॥
उग्रंमारणविज्ञेयंकर्मसर्वत्रसाधकैः॥ ॥होमप्रयोगेकुंडानितत्तत्कर्मानुरूपतः॥दर्शितानिबुधैःसम्यगीर्यंतेविधिवन्मया॥सर्वसि
द्धिकरंकुंडंचतुरस्त्रमुदाहृतं॥पुत्रप्रदंयोनिकुंडमर्द्धचंद्राभंशुभप्रदं॥शत्रुक्षयकरंत्र्यस्रंवर्तुलंशांतिकर्मणि॥छेदमारणयोःकुंडंषडस्त्रं
पद्मसन्निभं॥वृष्टिदंरोगशमनंकुंडमष्टास्त्रमीरितं॥कुंडभेदफलंप्राज्ञैरन्येचमनयोस्तथा॥सेत्युंस्तंभेचतुष्कोणमग्नौभोगेभगाकृतिः

चस्वार्द्धमारणे याम्ये अस्तं द्वेषे तु नैर्ऋते। वारुणं शांतिके वृक्षं धरस्तोच्चाटने निले। उदीच्यां पौष्टिके पद्मौशाम स्त्रास्त्रमुक्तिदं। पंचास्त्रकुं
डं वायव्यां भूतादिग्रहनिग्रहे। अभिचारे पि शांत्यर्थमीशे सद्मास्त्रकं न्यसेत्। कुण्डमध्ये त्रिकोणांतः कर्णिकायां लिखेद्बुधः। शक्तिबीजं च प
रितस्तन्न भूतार्णमालिखेत्। मूलमंत्रस्य वर्णैर्न ग्रथितास्वाविदर्भितम्। संपुटस्वात तथा मंत्री तत्तत्कर्मानुरूपतः। साध्यनामाक्षरं मं
त्री लिखेन्नियतमानसः। अघोरीजिह्वास्तथा प्रोक्ता गुणभेदेन कर्मसु। अष्टाभिराज्याहुतिभिः प्रणवेन पृथक्पृथक्। गर्भाधानं पुंसव
नं सीमंतोन्नयनं तथा। अनंतरं जातकर्म स्यान्नामकरणं तथा। वर्हिर्निःक्रमणं पश्चादन्नप्राशनमीरितम्। चूडोपनयने भूयो महा
नाम्ना महाव्रतं तयोक्षुपनिषत्पाठो गोदानो द्वाहको मतिः। शुभेष्वपि विवाहांताः क्रियास्ताः क्रूरकर्मसु। मरणांताः समुद्दिष्टा वहूरागमवेदिभिः
प्रोक्षणपादीनि पात्राणि स्वर्णरूप्यमयानि च। ताम्राणि शांतिकादौ च द्वेषणोच्चाटनादिषु। आज्ञादिकल्पनावहूराख्याता तंत्रवेदिभिः।
मुखं मध्ये शिरो दक्षे पादस्तूत्तरदिग्गतो। इंद्रेशयोर्मुखं शांतौ दिश्यग्नेः काम्यकर्मणि। रक्षसां मारणे वायो राकर्षे न्यस्त्रमध्यतः। होमे मुद्रा
त्रयं प्रोक्तं मृगी हंसी च सूकरी। सूकरी करसंगोची मृगी मुक्तकनिष्ठिका। हंसी स्यात्तर्जनीमुक्ता त्रिधा मुद्रा प्रकीर्तिता। शांतिके च मृगी ज्ञेया
हंसी पौष्टिककर्मणि। अभिचारे सूकरी स्याद्विद्वेषोच्चाटनादिषु। नदेवाः प्रतिगृह्णन्ति मुद्राहीनां तथाहुतिं। मुद्राहीनं तु यो मोहाद्
जुमिच्छति मन्दधीः। यजमानं तथात्मानं पातयत्येव निश्चितं। सौम्यग्रहस्तु वेयस्मिन् दिने विंशति चाहुतिः। आरंभः सौम्यहोमस्य

दिनेतस्मिन्विधीयते॥क्रूरहोमस्तथादेविक्रूरग्रहसुखेभवेत्॥इतिज्ञात्वामहेशानिकाम्यंहोमंसमाचरेत्॥सौवर्णौस्रुक्स्रुवौस्यातांसौम्यकर्म्मणिसर्वतः॥भवेतामायसावेतौस्तंभनादिषुकर्मसु॥लौकिकाग्नौशान्तिकंस्यात्स्वरूपंलौकिकपावकः॥स्तंभनाख्यंभवेत्कर्म्मवरजेजातवेदसि॥विद्वेषोक्षस्तुवोज्ञेयःश्मशानोग्निर्बुधैस्मृतः॥उच्चाटमारणेप्रोक्ताःषट्कर्म्मज्वलनाइमे॥वश्यदाडिमपुष्पाणिशान्तौस्तुदूर्वयासह॥समिधोघृतस्नानास्तंभनेराजवृक्षजाः॥मेषा।घृतेनसंयुक्ताद्वेषेक्षतरुजामताः॥उच्चाटनेरसालोत्थाःकटुतैलेनसंयुताः॥मारणेखदिराप्रोक्ताःकटुतैलेनसंयुताः॥होमद्रव्यमिदंप्रोक्तंषट्सुकर्मसुमंत्रिभिः॥ ॥घृतहोमेधनावाप्तिःसिद्धार्थैःकीर्त्तिरुत्तमा॥किंशुकैःसर्वकामाप्तिःफलहोमेसुखंभवेत्॥गुडेनप्रियताप्रोक्ताचम्पकैःपाटलैरसा॥पत्रहोमसुतावाप्तिःकरवीरैःस्त्रियोवशाः॥आयुष्करीभवेद्दूर्वागुडूचीरोगशांतिदा॥तिलाश्चपितथाप्रोक्तासौभाग्यंगंधहोमतः॥श्रीफलैर्विल्वपत्रैश्चतथाजलरुहैरपि॥राज्यभ्रष्टस्यराज्याप्तिर्मल्लिकाकीर्त्तिदामता॥कर्णिकारैःकिंशुकैश्चभवेद्दुर्विदुधावशाः॥काशपद्मैर्नृपावश्याःकृतमालैर्विशोवशाः॥भृङ्गाःस्त्रःपाटलैर्वश्यानीलपद्मैर्भवेन्नाः॥जातिपुष्पैर्भवेद्वाणीमधुरैरिष्टसंपदः॥अश्वत्थोदुंबरप्लक्षस्यसमिद्भिर्वांछिताप्तये॥दुष्टद्रव्यैर्भवेद्दिष्टंयवैश्चव्रीहिभिस्तथा॥माषैरिपूणांमूकत्वंकोद्रवैर्व्याधिसंभवेः॥कलायहोमतोऽरीणांभीतिःस्यान्महतीध्रुवं॥विभीतकसमिद्भिःस्यादुन्मत्तंद्विषतांकुलं॥शाल्मलेसमिधाशत्रोःपक्षानाशोभवेद्ध्रुवं॥ ॥अथद्रव्याणिवक्ष्यामित

तत्तत्कर्मानुरूपतः शांतिकेतु पयः सर्पिस्तिलक्षीरद्रुमाधिकाः अमृताख्यालताचैवपापसन्तत्रकीर्त्तितं पौष्टिके विल्वपत्रैश्च जातीपु
ष्पैर्नृपो भवेत् कन्यार्थीजुहुयाल्लाजैःश्रीकामः कमलैस्तथा दध्नाच श्रियमाप्नोति अन्नैरन्नंघृतप्लुतैः क्षीरेणासर्पिषावापि कमलै
र्मधुराप्लुतैः समृद्धेन जुहुयान्मंत्री महादैन्यशांतये लक्षहोमाल्लभेच्छांतिंघृतैर्विल्वतिलैर्निधिं आकर्षणेतुलवणं प्रियंगुविल्व
कं फलं जातीपलाशकुसुमैस्सैवैरकैकसैर्वा राज़ीलवणकैर्वश्यं वश्यं वा पौष्टिकेदिते वश्यार्थीजातिकुसुमैराकृष्टौ करवीरजैः क
र्पासवीजैश्शुक्राक्तैर्नरकेशैस्तथापिवा एकीकृत्य हुनेन्मंत्रीशत्रुमारणकांक्षया जुहुयात्सार्षपैस्तैलैरथवाशत्रुमारणे राहवीजैस्तिले
पेतैरुक्षैर्जुहुयान्नरः भूषकंठकसंयुक्तैर्वीजैःकार्पासिकैरपि सर्षपैस्तिलसंमिश्रैर्हुनेत्सर्वाभिचारके काकोलूकछदैः क्रूरैः कारस्क
रबिभीतकैः मरीचैः सर्षपैश्शुक्रैस्स्नुक्क्षीरैः कटुत्रये कटुतैलैः स्नुहीक्षीरैः कुर्यान्मारणकर्मणि वह्नेः शिरसिनासायांश्रोत्रेष्वक्षिषुवा
तथा जुहुयाच्चेत्तदाक्षिप्रंतत्तदंगानि नाशयेत्॥ आयुःकामोघृततिलैर्दूर्वाभिश्चाम्रपल्लवैः मयोक्तैराम्रपत्रैश्च ज्वरंसद्यो विना
शयेत् गुडूचीमृत्युंजयनेतथाशांतो गजाश्वयोः गौरैस्तु सर्षपैर्हुत्वासद्यो रोगंहरेज्ज्वरी वृष्टिकामोवेतसीभिः समिद्भिर्वञ्जकैस्तथा
हुत्वापुष्टिमवाप्नोतिपुत्रंजीवैस्सुपुत्रकं घृतगुग्गुलुहोमेनवाक्पतित्वंप्रजायते मल्लिकाजातिकुसुमैर्नागपुन्नागसंभवैः पुष्पैःसरस्व
तीसिद्धिस्तथासर्वार्थसाधनं पयसालवणौर्वापि हुनेद्दृष्टिनिवारणे रक्तपुष्पैरपामार्गैरंकोलैश्चाम्रुभण्डकैः समिभिर्मधुरसंयुक्तैः

मैत्रीकुर्याज्जुक्तपकं॥ वातोद्धतैःशुष्कमंत्रैकाष्टैरक्षनिपातितैः॥ उष्ट्रास्थितावत्वांगारैःशत्रोरुच्चाटनंभवेत्॥ दुर्वागुडूचीगव्येनसर्पिषातिलतण्डुलैः
अन्यैस्समिद्भिःपालाशैःशांतिंकुर्याद्विचक्षणः॥ सौम्यकर्मणिसंप्रोक्ताहरिद्राजलसंयुता॥ उग्मोदकंसमाख्यंमारणास्तेभयोर्भवेत्॥ द्वेषोच्चाट
नयोःप्रोक्तंजलंमेषासृजायुतं॥ तर्पणांद्यमाख्यातमिदमागमपारगे॥ सौम्यकर्मणिमंत्रज्ञःसुखासीनंप्रतर्पयेत्॥ जानुभ्यांमवनींगत्वातर्प
णांस्तंभनेभवेत्॥ वेषाद्वैवान्वरणास्तर्पयेत्साधकाग्रणीः॥ वश्यशांत्योःस्वर्णपात्रंमत्स्यात्रंस्तंभनेमतं॥ विद्वेषेत्वादिरंपात्रंमुच्चाटेलोहनि
र्मितं॥ मारणेकुक्कुराण्डस्यापात्राणीमानितर्पणे॥ अथहोमद्रव्यमाह॥ दिव्यवर्णोहोमयेद्यस्तहस्त्रंवसुसंमितं॥ दिव्यरूपोनरोभू
यादेवीरूपोनसंशयः॥ वर्णोत्तमेनदेवेशिसर्वदाहोमयेद्विवां॥ पक्षमात्रंमहेशानिशिवतुल्योनरोभवेत्॥ सुरयाहोमयेद्देविशिवतुल्योनरो
भवेत्॥ मांसहोमेनदेवेशिकिंतयत्रकरेस्थितं॥ रोचनाहोममात्रेणसर्वसिद्धिंसविंदति॥ लोहयाणस्यहोमेनदिव्यकायोनरोभवेत्॥ सौ
गंधिकमुकंहुत्वाकामतुल्योनरोभवेत्॥ एलाहोमेनराज्यंस्यात्सवगेर्वरदानता॥ सर्पिर्होमेनदेवेशिकिंनयन्नकरेस्थितं॥ घुसृणेनमहेशानि
वांछासिद्धिमवाप्नुयात्॥ मार्जारमेदहोमेनकिन्नरीमेलनंभवेत्॥ एकपुष्पफलेपत्रेफलंपंचककंभवेत्॥ सेकल्पोक्तफलंदेविउक्तमानंद
भैरवः॥ उक्तकार्यार्थसिद्ध्यर्थंदक्षिणामूर्त्तिसंमतं॥ देवताप्रीतयेमुक्तेकार्य्यमात्राणिसाधयेत्॥ सर्वकार्यार्थसिद्ध्यर्थेकाश्मीरेहोम
कर्मच॥ मंत्रमात्रेमहेशानिभूतमंडलभेदतः॥ होमेपूजाविधौदेविफलपुष्पाणिपार्वति॥ नमंडलमत्तनांचनीयमानोस्तिपार्वति॥ सिंदू

।। तंत्रचिं ।।
।। ३५८ ।।

रैर्मोहनं देवि नखेनाकृष्येत्स्त्रियं ।। चंदनेन भवेत्क्षोभः कर्पूरै राजसाधनं ।। विषेण सर्वसंहारः स्वल्हिकेन निराकृतिः ।। शिलाजतुप्रहोमेन सर्वसिद्धिं
प्रयच्छति । हरिताले स्तंभनं च तुलादीनां महेश्वरि । अभ्रकेन कीर्तिलक्ष्मीः गंधकेन धनागमः ।। पनस्कदली हुत्वा नारीरूपो नरो भवेत् ।। ।।
अथ होमद्रव्यसंख्यामाह ।। अथात्र होमद्रव्याणां प्रमाणमभिधीयते । कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं । उक्तानि पंचगव्यानि तत्समा
नि मनीषिभिः ।। तत्समं मधुदुग्धान्नमक्षमात्रमुदाहृतं । दधिप्रसृतिमात्रं स्याल्लाजाः स्युर्मुष्टिसम्मिताः ।। पृथुकास्तत्प्रमाणाः स्युः सक्तवोपि त
थोदिताः ।। गुडं पलार्धमानं स्याच्छर्करापि तथा मता । ग्रासार्धं चरुमानं स्यादिक्षुः पर्वावधिः स्मृतः ।। एकैकं पत्रपुष्पाणि तथापूपानि कल्पयेत्
कदलीफलनारंगफलान्येकैकशो विदुः । मातुलुंगं चतुःखंडं पनसं दशधा कृतं । अष्टधा नारिकेलानि खंडितानि विदुर्बुधाः ।। त्रिधा कृतं फलं बेल्वं
कपित्थं खंडितं द्विधा । उर्वारुकफलं होमे कथितं खंडितं त्रिधा ।। फलान्यन्यानि खंडानि समिधः स्युर्दशांगुलाः ।। दूर्वात्रयं समुद्दिष्टं गुडूची चतुरं
गुला ।। व्रीहयो मुष्टिमात्राः स्युर्मुद्गा माषाथवाऽपि । तंडुलास्तु तदर्धांशाः कोद्रवा मुष्टिसंमिताः ।। गोधूमरक्तकमला विहिता मुष्टिमान
ता । तिक्ष्णाश्रुकमात्रास्तु सर्षपास्तत्प्रमाणकाः । शुक्तिप्रमाणं लवणं मरीचान्यपि विंशतिः ।। उदुंबरमानं स्याद्रामठं तत्समं स्मृतं । चंदना
गुरुकर्पूरकस्तूरीकुंकुमानि च । तिंत्रिणीबीजमानानि समुद्दिष्टानि केशवे ।। कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं ।। ।। इति श्रीतंत्रचिं
तामणौ काम्यार्चनायां साधारणषट्कर्मनिर्णयो नाम सप्तविंशतमः प्रकाशः ।। ३७ ।। अथ प्रत्येकविद्यायाः विशेषप्रयोगमाह ।

।। गुरुः ।।
।। ३५८ ।।

त्वादोरपामायाः ॥ ततः प्रयोगान्कुर्वीत काम्यानिष्टफलाप्तये । नागयज्ञोपवीतां च वेणार्द्धकृतशेखरां । जटाजूटां च संचिंत्य महाकालसमीप
गां ॥ ह्रूं ह्रूं क्रीं वत पा क्रीं क्रीं पंचबीजानि योजयेत् । अंते तु मूलमंत्रस्य जपपूजादिकं चरेत् । वश्यकामः साधकश्चेद्रक्तपुष्पैः प्रपूजयेत् । कामवा
णसमाविद्धा निर्लज्जा विकलाः स्त्रियः । स्वं स्वं संत्यज्य भर्त्तारमालिंगंति सदैव तं । एवमाकर्षणे योज्य मादौ ह्रूं क्रीं तयांततः । जपपूजाविधाने
न नूनमाकर्षणं भवेत् । लोहितां शूलहस्तां च महाकालाग्रतः स्थितां । ध्यात्वा संपूजयेत्पुष्पैः पीतैराकर्षणं भवेत् ॥ कपिलां द्विभुजां कृ
ष्टिं सव्ये दक्षे कपालकं । ध्यात्वैवं सर्वमंत्रांते ठद्वयं परिकीर्तयेत् । एवं प्रजप्य पुष्पेण कृष्णेन प्रपूजयेत् । मारणं तु भवेत्तस्य यमुद्दिश्य कृता क्रिया
उच्चाटयति पिंगाक्षी संत्रासयति केकरा । विद्रावयति शुक्लास्या प्रोन्मत्तयति घूर्णिता । विक्षोभयति संक्रुद्धा संपादयति संमता । संकोचय
ति संरुष्टा विरुष्टा च विरोधयेत् । यो यो भावो यजेनेयः तत्तावस्थां स्मरेदिति । अत्र सर्वत्र कर्त्तव्यं भावमात्रस्य चिंतनं । उच्चाटने विनान्यत्र सर्वत्र सुर
तस्मृतं । स्नातः शुक्लाम्बरधरः कृतनित्यक्रियो दिवा । रात्रौ नग्नः शयानश्च मैथुनेत्वव्यवस्थितः । अवाक्यो मुक्तकेशश्चेत्तेन स्युः सर्वसिद्धयः ॥
नग्नां परस्त्रियं पश्यन्प्रजपेदयुतं नरः । स भवेत्सर्वसिद्धीनां पारगः सर्वदैव हि । तस्य दर्शनमात्रेण वादिनो निष्प्रभा मताः ॥ गद्यपद्यमयी वाणी
तस्य सर्वविधा भवेत् । अवाक्यो मुक्तकेशश्च हविष्यं भक्षयन्नरः । प्रजपेदयुतं तावद्देवप्रतिनिधिः स्मृतः । ऋतुमत्या भगं पश्यन्नयुतं प्रजपेन्नरः ।
अनर्घ्यकविता तस्य गद्यपद्यमयी भवेत् । अष्टोत्तरशतं जप्त्वा भगमालोचनान्ततः । प्रयाति मैथुने यासौ धनधान्यसुतान्वितः । सुरते शुचवजप्तव्यं

सदापापविशुद्धये। यदि योषित्प्रसंगेन रेतः पतति यत्नतः॥ समुत्पाद्य ततो जप्यं सर्वकामार्थसिद्धये॥ श्मशानागारमासाद्य मुक्तकेशो दि
गंबरः॥ जपेदयुतसंख्यं तु सर्वकामार्थसिद्धये॥ प्रेतमारुह्य तत्रैव यो जपेन्मंत्रवित्तमः॥ अयुतं वाग्यतो भूत्वा विभीः सत्यपरायणः॥ स
याति परमां सिद्धिं देवैरपि सुदुर्लभां॥ स्वदेहरुधिराक्तैश्च बिल्वपत्रैः सहस्रशः॥ श्मशानेभ्यर्च्चयेद्देवीं वागीशसमतां व्रजेत्॥ स्वरेतोभ्यक्त
पत्रेणार्कस्य वै सहस्रशः॥ श्मशानेभ्यर्च्चयेद्देवीं सर्वसिद्धिं स विंदति॥ धनधान्यलवान्वाग्मी सर्वयोषित्प्रियो भवेत्॥ सुखी स्यान्नात्र सं
देहो महाकालवचो यथा॥ श्मशाने योषितं नीत्वा मंत्रैरर्घ्यसहस्रकं॥ रक्तचंदनदिग्धांगीं रक्तपुष्पैरलंकृतां॥ तावत्पुष्पैर्मनुं प्रार्च्य ततो ध्या
येच्च चण्डिकां॥ ततो गत्वा लभेद्राज्यं यद्यसौ न भयायते॥ श्मशानशयने चैव वशवाशनगतः पुनः॥ अष्टसहस्रं तु जपेन्मंत्रं सर्वसिद्धिप्रदं भवेत्॥
तर्पयेद्यश्च वास्यं तु रक्तमांसादिभिस्त्रिधा॥ त्रिस्त्रिर्मंत्रमुदीर्य्यैवं सर्वसिद्धिर्भवेत्ततः॥ तर्प्पयेच्च पयोभिश्च रक्तधाराघृतैस्तथा॥ रेतोभिश्च
तथा तद्वत्स्वकीयेन कचेनखा। मैथुनायितयोपाया भगप्रक्षालनेन च॥ मेषमाहिषरक्तेन नररक्तेन चैव हि॥ मूषमार्ज्जाररक्तेन वा
ग्मित्वं तस्य जायते॥ धनित्वं जायते तस्य सर्वसिद्धिः प्रजायते॥ वचसा स भवेज्जीवो धनेन च धनाधिपः॥ आज्ञया देवराज्ञोसौ रू
पेण च मनो भवः॥ बलेन पवनो ह्येषः सर्वतत्वार्थसाधकः॥ साधितासाधितं मांसं सास्थि दद्यात्सदा बलिं॥ मूषमांसं मेषमांसं छागं
माहिषमेव च॥ सर्वं सास्थिप्रदातव्यं सचर्मलोमसमन्वितं॥ अजीवं स्वनखं छिन्नकेशं संमार्ज्जनीगतं॥ निवेदयेत्तु श्मशानेन तत्सर्वसिद्धि

प्रदंभवेत् ॥ नारीरजोयुतंकृत्वापर्णानांशतमुत्तमं प्रत्येकंप्रजपेन्मंत्रंततस्तद्धोमयेद्बुधः ॥ युगानामयुतंतेनपूजितादक्षिणाभवेत् ॥ सर्वसि
द्धिर्भवेत्तस्य वाग्मीधीरश्चजायते ॥ नतस्यदुर्लभंकिंचित्पृथिव्यांजातुजायते ॥ योनिरूपंहिकुंडंतुकृत्वावितस्तिरन्ध्रितः ॥ हस्तविस्तारितोवा
पिकृत्वाचैवयथाविधिः ॥ तत्रकार्य्याभिमंत्रेणवह्निस्थापनकाः क्रियाः ॥ महाकालायदेवायदद्यात्प्रथममाहुतिं ॥ स्रुवेणाज्येनमां
सेनमत्स्येनरुधिरेणच ॥ कृष्णपुष्पेणसाज्येनसरक्तेनविशेषतः ॥ आमिषादिभिरप्येवंजुहुयात्स्मशानालये ॥ स्नातःशुक्लांबरधरः
शुचिःप्रयतमानसः ॥ दिवासर्वप्रकर्त्तव्यंसर्वकामार्थसिद्धये ॥ रात्रौनग्नोमुक्तकेशोमेथुनेनापितत्वतः ॥ प्रकर्त्तव्यंप्रयत्नेनसर्वकामा
र्थसिद्धये ॥ त्रिधाविभज्यमंत्राद्यैर्यत्नात्साधकसत्तमः ॥ मांसंरक्तंतिलंकेशंनखंभक्तंचपायसं ॥ आज्यंचेतिप्रयत्नेनहोतव्यंसर्वसि
द्धये ॥ एवंकृत्वाविधानेनभजतेसिद्धिमुत्तमां ॥ यद्यत्प्रार्थयतेजंतुस्तत्तत्प्राप्नोतिनिस्पृशः ॥ देवत्वंदानवत्वंचसिद्धचारणतांतथा ॥ स
गुत्वासमाप्नोतितत्स्यमेवमतंद्रितः ॥ एकचित्तोजपेन्मंत्रीचत्वारिंशत्सहस्रकं ॥ होमस्तुरक्तपुष्पेणकुंडेकुर्याद्यथाविधिः ॥ एतन्मं
त्रजपान्मंत्रीमुच्यतेब्रह्महत्यया ॥ पितृमातृवधाद्यैश्चकिल्बिषैःक्षुद्रपातकैः ॥ कपिलारत्नसंपूर्णपृथ्वीदानस्ययत्फलं ॥ कोटिहोमस
हस्रैश्चदेव्याध्यानेनतत्फलं ॥ स्पृष्ट्वास्पृष्ट्वाजपेन्मंत्रंयंयंतंतंवशंनयेत् ॥ शतमष्टोत्तरंजप्त्वारक्तपुष्पेणहोमतः ॥ कुर्यान्नृपवशंमंत्री
नासाध्यंभुवनत्रये ॥ शून्यागारेदेवगृहेस्वयंभूस्थानएवच ॥ हविष्याशीब्रह्मचारीभवेदिंद्रसमोजपात् ॥ कुंडेत्रिकोणसंज्ञेतुशांतौपूष्टेन

ध्येवं वा ॥ अयुतं जपान्मंत्री सहस्रस्य च यं पुनः ॥ काम्ये सहस्रमारक्तैः पुष्पैः कृत्वा दशांशतः ॥ तर्प्पणं च पुनस्तद्वद्देवीं ध्यात्वा हुताशने ॥ संपू
ज्य मूलमंत्रेण बिल्वपत्रैर्घृतान्वितैः ॥ सहस्रं प्रत्यहं हुत्वा प्राप्नोति परमां गतिं ॥ घृताक्तमालतीपुष्पैर्होमाद्द्रुतकविर्भवेत् ॥ नासाध्यं विद्यते
किंचिदेतन्मंत्रविदः सदा ॥ देव्याराधनसक्तस्य गुरुभक्तस्य नान्यथा ॥ ध्यानप्रयोगं वक्ष्यामि शृणुयत्नेन सांप्रतं ॥ षट्कर्मसाधनं येन भवे
त्येव न संशयः ॥ अष्टम्यां च चतुर्दश्यां कृष्णपक्षे विशेषतः ॥ कालीकल्पोक्तविधिना यजेद्देवीं तु कालिकां ॥ पश्चाद्रूपप्रयोगार्थं ध्याये
न्मार्त्तंडमंडले ॥ रक्तवर्णां महादेवीं लोचनत्रयसंयुतां ॥ चतुर्भुजां महाभीमां मुंडमालाविभूषितां ॥ खड्गचर्म्मधरां कालीं वराभयकरां
परां ॥ एवं ध्यात्वा महाकालीं यं यं पादगतं स्मरेत् ॥ सप्ताहाभ्यंतरे तं तं वशयेत्साधकोत्तमः ॥ करालवदनां घोरां द्विभुजां मुंडभूषणां ॥
दक्षे दंडं कपालं च वामे संबिभ्रतीं स्मरेत् ॥ दुष्यमानं रिपुं ध्यायेद्दुष्टोपरि भयार्द्दितं ॥ पलायमानं तत्पश्चाद्धावमानां तु चंडिकां ॥ ॥
सप्ताहाभ्यंतरे तस्य महदुच्चाटनं भवेत् ॥ अत्यंतघोरवदनां दंष्ट्राकिटिकिटिं स्मरेत् ॥ कंपमानो महारौद्रीं कोपाद्रक्तालोचनां ॥ बिभ्रतीं
दक्षिणे खड्गं शत्रुमुंडं च वामके ॥ सद्यः छिन्नं ततः शत्रुकबंधोपरि संस्थितां ॥ ग्रस्तरुधिरधाराभिरभिषिक्तां स्मरेत्तु यः ॥ सप्ताहाभ्यंतरे त
स्य रिपुगणो नष्टो भवेत् ॥ कल्पोक्तां कालिकां ध्यायेत्साध्यं वदास्सिरो स्मरेत् ॥ कृत्वा तु मानसीं पूजां शत्रुजिकां निवेदयेत् ॥ पश्चात्स्तकं
रिपुं ध्यायेदेवं वाक्स्तंभनं भवेत् ॥ यद्यदंगं महादेव्यै निवेदयति साधकः ॥ तत्रदंगस्तंभनं च भवत्येव न चान्यथा ॥ पूर्वोक्तां कालिकां ध्या

त्वा वामदक्षिणाभेदतः ॥ तावुभौ संस्मरेन्मंत्री महाकालहकारकौ ॥ तायमानौ ततो ध्यायेद्देवं विद्वेषणं मतं ॥ आत्मानं कालिकारूपं ध्यायेत्त्रिशूलमानसः ॥ पश्चात्पश्यति यं साध्यं तस्य संमोहनं भवेत् ॥ मुहूर्त्तमात्रं देवेशि मुहूर्त्तद्वयमेव वा ॥ मुहूर्त्तत्रययोगेन सिद्धिर्भवति सुंदरि ॥ अथ ताराया ॥ आदौ सिद्धमनुर्मंत्री प्रयोगान्कर्त्तुमर्हति ॥ जातमात्रस्य बालस्य दिवसत्रितयादधः ॥ जिह्वायां विलिखेन्मंत्री मध्वाज्याभ्यां शलाकया ॥ सुवर्णकृतमायां मंत्री धवलदूर्वया ॥ गतेऽष्टमेऽह्नि बालोऽसौ जायते कविराड् ध्रुवं ॥ सूर्यग्रहे भवेत्काष्ठं पद्मयुक्तसरोवरे ॥ नरं तं जलमध्यस्थं तत्समानीय तद्देपुनः ॥ दंतैर्धृत्वा ततः कुर्यात्खनित्वा दशांगुलं ॥ मध्ये तत्सुराभिश्च विलिखेत्पद्मिनीदले ॥ मूलमंत्रं मातृकार्णैः सम्यक्तत्र प्रवेष्टयेत् ॥ विधाय तद्दलं कुंडे चतुरस्रे समे स्थले ॥ संस्थाप्य पावकं तत्र ऊनेन्मूलाणुना ततः ॥ गोदुग्धमदिराक्तं तु रक्तपद्मसहस्रकं ॥ होमांते तेन मनुना पूर्वदिग्बलिं हरेत् ॥ पद्मे पद्मे महापद्मे पद्मावती पद्मपि स्वाहांतः प्रणवादिश्च मंत्रोऽयं षोडशाक्षरः ॥ ततो निशीथेऽपि बलिं पूर्वोक्तमनुना हरेत् ॥ एवं कृते पणितानामजेयः कोपराड्भवेत् ॥ निवासो भारतीलक्ष्म्योर्जनतारंजनक्षमः ॥ गोरोचनामनेनैव मनुनानुशतं जपेत् ॥ ललाटे तिलकं कृत्वा यं पश्येत्स तु दासवत् ॥ श्मशानांगारमाहृत्य शर्व्वर्यां भौमवासरे ॥ कृत्वां वैरेरासंवेष्ट्य निवहं रक्ततंतुभिः ॥ शताभिजप्तं मूलेन निक्षिपेद्वैरिवेश्मनि ॥ उच्चाटयति सप्ताहात्सकुटुंबं न संशयः ॥ क्षाराब्धयानिशामंत्रं लिखित्वा पोरुषेष्विति ॥ रविवारे निशीथिन्यां सहस्रमभिमंत्रयेत् ॥ ततक्षिप्तं

शत्रुभवने मंडलाअंशकं भवेत्॥ क्षेत्रे क्षिप्तं शस्यहान्यै नवहन्तुरगालये॥ ॥अथ छिन्नायाः॥ श्रीपुष्पैर्लभते लक्ष्मीं तत्फलैः स्वसमीहितं॥ वाक्सिद्धिं मालतीपुष्पैश्चंपकैर्हवनात्सुखं॥ घृताक्तछागमांसं योजुऊयात्सहस्रशतं॥ मासमेकं उ वशगाः स्तस्य स्युः सर्व्वपार्थिवाः हयारिकुसुमैश्चैव लक्षसंख्यं जुहोति यः॥ रोगजालं पराभूय सुखी जीवेच्छ समाः॥ रक्तैस्तत्संख्यया ऊत्वा वशयेत्संस्त्रियो नृपान् फलैर्ऊत्वा उयाल्लक्ष्मीमुदुंवरपलाशजैः॥ गोमायुमांसैस्तामेकविंवां पायसांधसा॥ वंधूककुसुमैर्भाग्यं कर्णिकारैः समीहितं॥ तिलतंउलहोमेन वशयेत्त्रिदिविलांजनान्॥ नारीरजोभिराकृष्टिर्मृगमांसैः समीहितं॥ स्तंभनं माहिषैर्मांसैः पंकजैः सघृतैरपि॥ विताग्नौ परभृत्पक्षैर्जुऊयादरिमृत्यवे॥ उन्मत्तकाष्ठक्षिप्तैस्तत्फलैर्वा यमच्छदैः॥ श्रुतेवने नृपद्वारे समरे वैरिसंकटे॥ विजयं लभते मंत्री ध्यायन्देवीं जपेन्मनुं॥ मुक्तौ मुक्ते सितां ध्याये उच्चाटे नीलरोचिषं॥ रक्तां वश्ये मतो धूम्रां स्तंभने कनकप्रभां॥ निशिदग्धादलितस्यैमिरुध्येमदिरादिना॥ गोपनीयः प्रयोगोयं प्रोच्यते सर्वसिद्धिदः॥ भूताहे कृष्णपक्षस्य मध्यरात्रे नमोद्यते॥ स्नात्वा रक्तांवरधरो रक्तमाल्यानुलेपनः॥ आनीय पूजयेत्तां श्रीछिन्नमस्तास्वरूपिणीं॥ सुंदरीयौवनाक्रांतां नरपंचकगामिनीं॥ सस्मितां मुक्तकवरीभूषासनप्रतोषितां॥ विवस्त्रां पूजयित्वैनां मद्युतं प्रजपेन्मनुं॥ वलिं दत्वा निशां नीत्वा संप्रेष्य धनतोषितां॥ भोजयेद्विविधैरत्नैर्ब्राह्मणान्देवताधिया॥ अनेन विधिना लक्ष्मीपुत्रान्पौत्रान्यशः सुखं॥ नारीमायुश्चिरं धर्म्ममिष्टमन्यद्वाप्नुयान्नात्र

स्यंः शैत्रोव्रतं कार्य्यं विद्याकामेन मंत्रिणा ॥ मनोरथे सुचान्ये सुगच्छेत्तां प्रजपेत्मनुं ॥ किंवऊक्तेन विद्यायास्त्रस्या विज्ञानमात्रतः ॥
शास्त्रज्ञानं पापनाशः सर्वसौख्यं लभेद्ध्रुवं ॥ ऽषस्मुस्थायत्रा व्यायामुपविष्टो जपेच्छतं ॥ षण्मासाभ्यंतरे मंत्री कवित्वेन जपेत्कविं·
शिवेन कीलिता विद्या तदुत्कीलनमुच्यते ॥ मायांतारपुटं मंत्री जप्यादष्टोत्तरं शतं ॥ मंत्रस्यादौ तथैवांते भवेत्सिद्धिप्रदा तु सा ॥ एषतत्रं
विधिं गोप्यः सिद्धिकामेन मंत्रिणा ॥ ऽदित्ताद्धिन्नमस्तेयं ग्रामगैति सिद्धिदा ॥ ॥ अथ त्रिपुरसुंदर्याः ॥ जवाउष्ट्रैर्महेशानि पू
र्ववत्सृजयेछिवां ॥ मासमात्रेण हन्यंतपातकं शतजन्मजं ॥ सौभाग्यवान्भवेन्मंत्री त्रिपुरायाः प्रसादतः ॥ श्वेतउष्ट्रैर्महेशानि सप्त
त्या पूजयेन्नरः ॥ नाशयेत्पातकं सर्वं त्रिंशज्जन्मभवं प्रिये ॥ मासमात्रेण सकलं मोक्षं तस्य करे स्थितं ॥ वंधूककुसुमैर्देवी मास
मंत्रं प्रपूजयेत् ॥ त्रिलोकं वशगं तस्य सर्वपापं दहेद्बुधः ॥ विल्वपत्रैश्च जलजैः सत्पैश्च परिपूजयेत् ॥ पूर्ववत्परमेशानि मासमात्रं
प्रसन्नधीः ॥ समृद्धिमान्भवेन्मंत्री सर्वपापं हरेत्सदा ॥ मल्लिकामालतीजातीकुंदैश्च शतपत्रकैः ॥ शतोत्पलसुशीतैश्च पूजयेन्मा
समात्रकं ॥ कुलावारक्तमेणैव पातकं शतजन्मजं ॥ तुलन्यादिजनितं नाशयेन्नात्र संशयः ॥ मुक्तिस्तस्य करे देवि वाचाजीवस
मो भवेत् ॥ अगस्त्यप्राणावंधूकजवारक्तोत्पलैः प्रिये ॥ पूर्वक्रमेण संपूज्य मासमेकं प्रसन्नधीः ॥ पातकं नाशयेन्मंत्री साक्षात्काम
समो भवेत् ॥ चम्पकैः पातलैर्द्दिव्य दिजन्मसहस्रकं ॥ मंदारपारिजातं च तत्वरूपसौभाग्यदायकं ॥ पीतजातीसर्वकामं विशेषसंतभने

हितं ॥ खर्जूरपुष्पं जाती च कुंदश्रीवृद्धिदायकं ॥ वंधूकं मोक्षसौभाग्यं जवा च त्रिपुरा प्रिया ॥ उत्पले धनवृद्धिं च पद्मं पौष्टिकमेव च
पुन्नागं सर्वसंपत्तिं बकुलं धनहानिकं ॥ कल्हारो ज्ञानवृद्धिं च केतकिं च विवर्जयेत् ॥ मरुश्चतिष्फलं ज्ञेयं मल्लिका दुःखदा
यिका ॥ चंपको पुत्रकामस्तु त्रिसंध्या दुःखमोचकाः ॥ द्रोणां मोक्षमवाप्नोति सेवंती सर्वसिद्धिदा ॥ सेफालिका जयकरी कर्णि
कावृद्धिदायिका ॥ कुमुदं प्रीतिदं चैव सुदर्शनधनप्रदं ॥ कुरंटसिद्धिसौभाग्यं नीलद्रव्यं तु हानिकं ॥ दमनं सर्वसंपत्तिं बिल्वप
त्रं पराप्रियं ॥ निर्गंधोत्कटगंधं तु वर्जयेच्चक्रपूजने ॥ कस्मापराजिता नस्तु पूतमालीनथैव च ॥ मल्लिका नामसंज्ञाया दुर्घंदाम
सुदामदा ॥ छिन्नि व्याधिप्रदाश्चैव केशयुक्तश्च हानिकं ॥ क्रिमियुक्तमहाभीति राजदराणमहद्भयं ॥ इत्येतत्पुष्पमाहात्म्यं ज्ञात्वा
श्रीत्रिपुरां यजेत् ॥ / ॥ अथातः संप्रवक्ष्यामि चक्रराजस्य साधनं ॥ एवं संसिद्धिविद्याया विनियोगक्रमं शृणु ॥ कृत्वा सिंदू
रजसा चक्रं तत्र विचिंतयेत् ॥ साध्यप्रतिकृतिं नामलेखनांकांभुभांततः ॥ ज्वलंतीं तु तथा साध्यं तदा सौभाग्यसुन्दरः ॥ अरु
णोरुप्यवीरैस्तु पूजयेत्सुइयाउतः ॥ यस्य चात्मा युतः सम्यक् स भवेद्दास एव हि ॥ अदृष्ट स्त्रीनामवर्णांश्चक्रमध्ये विलिख्य तु ॥
योनिमुद्राधरो भूत्वा वेगादाकर्षणं भवेत् ॥ देवकन्यां राजकन्यां नागकन्यामथापि वा ॥ ॥ गोरोचनाकुंकुमाभ्यां समभागं च चं
दनं ॥ अष्टोत्तरशतावृत्या तिलकं सर्वमाहनं ॥ ॥ पुष्पफलं च वादित्रं गंधवस्त्रं च भूषणां ॥ तांबूलं जपपूर्वं च यस्मै संप्रेक्षते स तु

अंगनावीक्षणाद्देवा दासी वास्य भवेत्प्रिये॥ करवीरैः रक्तवर्णैस्त्रिमध्वक्तैश्च पूजयेत्॥ चिंतयेन्मासमात्रं तु साध्याख्यां ललनां ततः॥
रतिं कृत्वा महेशानि पूजयेद्दरुणाप्रभां॥ सिंदूररचिते चक्रराजे संमोहयेत्क्षणात्॥ त्रैलोक्यदुर्लभां वापि रंभां वा कर्षयेद्धठात्॥
चितांगारेण चक्रं तु लिखेड्डक्कड्वेणाहि॥ वध्यामावाहयेद्देवि देशे चक्रस्य संलिखेत्॥ गोमूत्रे स्थापयेत्तत्र भवेद्विद्वेषणां क्षणात्॥
धूपयेद्वंदनं रात्रौ एवं तु धारयेत्ततः॥ अष्टोत्तरं जपात्कृत्वा होमयेद्भुवनत्रयम्॥ लिप्ते गोमयभूमौ तु लिखेद्योवनया ततः॥
सुरूपां प्रतिमां रम्यभूषाढ्यां परिचिंतयेत्॥ नखालगलहृन्नाभिजन्मसरगुलयोनितां॥ जन्मनाममहाविद्यामंकुशांतर्विदर्भितां॥
सर्वांगसंधिसंलीनं कामकूटं समालिखेत्॥ साध्याशाभिमुखो भूत्वा श्रीविद्यान्यासविग्रहः॥ क्षोभिणीमुद्रया मुद्रया विद्यां सम्यगष्टश-
तं जपेत्॥ योजयेत्तां कामगेहेन्दुसूर्यकलात्मके॥ सानुगा सा तु विकला कामसायकपीडिता॥ त्रैलोक्यसुंदरी वापि क्षणात्सा याति
मोहिता॥ अथ वामांतकाचक्रं वाऽथ संवेष्ट्य मंत्रवित्॥ तच्चक्रं पूजयेत्सम्यग्विद्यापूर्णां च धारयेत्॥ अवध्यः सर्वभूतानां
व्याघ्रादीनां न संशयः॥ श्रीखण्डागुरुकस्तूरीकर्पूरश्च सकुंकुमैः॥ स्वनामकर्मतो लेख्यं पूर्ववत्स्मातृकां लिखेत्॥ तेनाजरामर-
त्वं च साधकस्य न संशयः॥ अनेनैव प्रकारेण रोचनागुरुकुंकुमैः॥ चक्रं विलिख्य साध्याणां साधकांतर्विदर्भितं॥ त्रैलोक्यमोह-
नो मंत्री भवत्येव न संशयः॥ कामकूटेन दंवाथ संदर्भ्य पृथगक्षरैः॥ साध्यनाम्नास्त्रिकोणांतं मातृकां वेष्टयेद्वहिः॥ स्वर्णमध्या

गतं धार्य्यं शिखायां यत्रकुत्रवित्। लोकपालाश्च राजानो दुष्टास्त्रैलोक्यसंस्थिताः। ते सर्वे वशमायांति सन्निपातास्तथा ज्वराः। अ-
नेन विधिना नामउरासंभ्यर्च्य संक्षिपेत्। चतुष्पथे मध्यदेशे दिक्षु पूर्वादिषु क्रमात्॥ तस्य सौभाग्यमायाति राजानः किंकराः सदा
स्फुरत्तेजोमयीं पृथ्वीं प्रज्वलंतीं चराचरां। चक्रांतस्थितं तथैत्रित्यं मासषट्कं ततो नरः॥ तेन कंदर्पसुभगो लोके भवति निश्चयात्॥
दृष्ट्वा वा कर्षते लोकं विषं नाशयति ज्वरात्। तथा विषं च हरति दृष्ट्वा वश्यं करोति वा॥ रात्रौ सिंदूरलिखितं पूजयेदेकचित्ततः॥ या-
दात्तदेवलोको यं वश्यो भवति नान्यथा॥ करोत्याकर्षणं दूराद्योजनानां शतादपि॥ अखण्डं दिक्षु कोणेषु क्रमेण परिपूजयेत्।
यदा तद्देवलोको यं वश्यो भवति नान्यथा। भूर्जपत्रे लिखेद्यंत्रं रोचनागुरुकुंकुमैः। स्वनामदर्भितं कुर्याद्देशं वा पुटभेदनमा
मराउलं विषमस्थानं भूमौ चक्रं निधापयेत्। धारयेद्वा ततो मंत्री उरक्षो भयति क्षणात्। उन्मत्तरसलाक्षार्कक्षीरकुंकुमलोच-
नाः। कस्तूर्या लक्तसहिता एकीकृत्य तु संलिखेत्। यन्नाम्ना कुंकुमाभ्यां तु मध्यगां संलिखेद्बुधः। त्रिकोणोभयगां चैव साध्यनामांकि-
तामथः। तच्चक्रं धारयेत्तस्मात्तत्र हा किंकरो भवेत्। पीतद्रवेण चक्रांते लिखेद्विद्वान्धनस्ततः॥ साध्यनाम विलिखेत्तत्पूर्वस्यां दिशि
संक्षिपेत्। तस्माद्वृत्मापि ज्ञोवाधि सर्वज्ञो मूकतां व्रजेत्। अनेन विधिना नीलीरसेन विलिखेद्यततः। दक्षिणाभिमुखो मंत्री वह्नौ दग्ध्वा
रिपुं दहेत्। ॥ माहिषाश्वपुरीषेण गोमूत्रेण च संलिखेत्। आरनालस्थितं कुर्याद्द्वेषं विद्वेषणं तु-- ॥ ॥ साध्यनाम लिखेन्म

धे काकपक्षेण लेपयेत् ॥ संलिख्य रोचनाशत्रौ राकाशे दृष्टिगं तथा ॥ शत्रुतुघाट्ये शस्तु हठोच्चाटोयमीरितः ॥ ॥ महानीलीरसे
भिन्न रोचना दुग्धमिश्रितैः ॥ लाक्षारसे लिखेच्चक्रं चतुर्वर्णान्वशं नयेत् ॥ ॥ अनेन विधिना नीरे स्थापयेन्न जलेन तु ॥ सौभाग्यं महदा
प्नोति स्नानपानन्न संशयः ॥ / ॥ पीतं चक्रं यजेत्सर्वं स्तंभयेत्सर्ववादिनः ॥ सिंदूरलिखितं चक्रमन्तरैलोकवश्यकृत् ॥ पश्चिमे
पूजितं चक्रं गैरिकालिखितं ततः ॥ मंत्रिशो देवता वश्या किं पुनः योषितं प्रिये ॥ तथैव दक्षिणास्यस्तु कृष्णं चक्रं समर्चयेत् ॥ साध्य
स्य मंत्रहानिः स्यान्मरणं च विशेषतः ॥ कमाद्दिगंतरास्यस्तु वह्निकोणादिषु क्रमात् ॥ स्तंभं विद्वेषणं व्याधिमुच्चाटं कुरुते नरः ॥
दुग्धवश्यकरं क्षिप्रं रोचनालिखितं हठात् ॥ दग्धं तद्वह्निमध्यस्थं सर्वशत्रून्विनाशयेत् ॥ गोमूत्रमध्यगं चैतद्भवेदुच्चाटनं रिपोः ॥ विद्वेष
णं भवेच्चक्रे तेनैव परमेश्वरि ॥ ॥ सिंदूरेण लिखेच्चक्रं निर्जनेन चतुष्पथे ॥ सर्ववास्यांतमारभ्य मध्यांतं मातृकां लिखेत् ॥ कुला
वक्रमेणैव रात्रौ संपूजयेत्क्रमं ॥ साधकः खेचरो देवि जायते नात्र संशयः ॥ ॥ चतुर्दश्यां निशीथस्थो रुद्रमंत्रेण प्रपूजयेत्
षण्मास संख्यया तेन साक्षाद्रुद्र इवापरः ॥ अंजनं विवरं सिद्धि घुटिकां पदुकां जपं ॥ खड्गवेतालसौभाग्यं पक्षिणी चेटिकादिकं
सकलं सिद्धिसमयं मंत्री प्राप्नोति नान्यथा ॥ ॥ चतुर्दश्यां चतुर्दश्यां प्रत्याष्टम्यां समाहितः ॥ एकविंशतिरात्रे तु निशि पुते तक्षमात
ले श्रीचक्रपूजनान्नद्रत्स्युरपूज्यस्तु साधकः ॥ ॥ अयात्रेतुरभैरवीप्रयोगः ॥ एवं सिद्धमनुर्मंत्री साधयेदिष्टमात्मनः ॥ गुरूया

दरुणांभोजैरदोषैर्मधुराक्तैः॥ लक्षसंख्यं तदर्द्धं वा प्रत्यहं भोजयेद्द्विजान्॥ वनितां युवतीं रम्यां पूजयेद्देवताधिया॥ होमांते धन
धान्याद्यैस्तोषयेद्गुरुमात्मनः॥ एवं कृते जगद्वश्यो रमाया भवनं भवेत्॥ ॥रक्तोत्पलैस्त्रिमध्वक्तैरहुरोलीह्यारिजैः॥ पुष्पैः प
योत्रैः सयुतैर्होमाद्विश्वं वशं नयेत्॥ वाक्सिद्धिं लभते मंत्री पलाशकुसुमैर्हुनात्॥ कर्पूरागुरुसंयुक्तं गुग्गुलं जुहुयात्सुधीः।
ज्ञानं दिव्यमवाप्नोति तेनैव सम्भवेत्कविः॥ क्षीराक्तैरमृताखंडैर्होमः सर्वोपमृत्युजित्॥ दूर्वाभिरायुषे होमः क्षीराक्ताभिर्दिनत्रयं।
गिरिकर्णीभवैः पुष्पैर्बालरागान्वशयेद्धुतान्॥ कह्लारैः पार्थिवान्पुष्पैस्तद्वद्यक्षणिकारंजैः॥ मल्लिकाकुसुमैर्हुत्वा मंत्री मधुरलो
लितैः॥ सर्षपैस्त्रवर्णोर्मिश्रैर्वशयेत्पार्थिवान्क्षणात्॥ अनेनैव विधानेन तत्पत्नीस्तत्सुतानपि॥ जातीबिल्वभवैः पुष्पैर्मधुर
त्रयलोचनैः॥ नरनारीनरपतीन् होमतो वशयेद्ध्रुवम्॥ मालतीवकुलोद्भूतैः पुष्पैश्चन्दनलोलितैः॥ जुहुयात्कवितां मंत्री लभते व
त्सरांतरे॥ मधुरत्रयसंयुक्तैः बिल्वैर्बिल्वसमुद्भवैः॥ जुहुयाद्वशयेल्लोकं श्रियमाप्नोति वांछितां॥ पाटलैः कुमुदैः कुंदैः रुत्पलैर्नाग
चम्पकैः॥ नन्द्यावर्त्तैर्विकसितैः कृतमालैर्जुहोति यः॥ जायते वत्सरादर्वाक् श्रिया विजितपार्थिवः॥ साज्यमन्नं प्रजुहुयाद्भवेद
न्नसमृद्धिमान्॥ कस्तूरीकुंकुमोपेतं कर्पूरं जुहुयाद्वशी॥ कन्दर्पादधिकं सद्यः सौन्दर्यमधिगच्छति॥ लाजान्प्रजुहुयान्मंत्री द
धिक्षीरमधुप्लुतान्॥ विजित्य रोगानखिलान्सजीवेच्छरदां शतं॥ पादद्वयमलयजं पादं कुंकुमकेशरं॥ पादं गोरोचनायाश्च तानि

पिष्ट्वा हिमांबुना। विदध्यात्तिलकं भाले यान्यशेषैर्विलोक्यते। यान्स्पृशेत्स्पृशते यैर्वा वश्याः स्युस्तस्य ते चिरात्। कर्पूरक्तपिच्चोरा
शिसमभागानि कल्पयेत्। चतुर्भागा जटामांसी तावती रोचना मता। कुंकुमं सप्तभागं स्याद्दिग्भागं चन्दनं मतं। अगरुर्नवभागं स्या
दिति भागक्रमेण तु। हिमाद्रिकन्यपापिष्टमेतत्सर्वं सुसाधितं। आदाय तिलकं भाले कुर्याद्भूमिपतीन्नरान्। वनिताश्च गर्वी
व्यामदोन्मत्तान्मत्तगजान्। सिंहव्याघ्रान्महासर्पान्भूतवेतालराक्षसान्। दर्शनादेव वशयेत्तिलकं धारयेन्नरः॥ ॥अथ म
हालक्ष्मीप्रयोगः॥ एवं सिद्धमनुर्मंत्री गुरुभक्तो दृढव्रतः। कुर्यात्काम्यानि कर्माणि स्वाभीष्टानि च मंत्रवित्। आज्यप्लुताभिर्दूर्वा
भिरायुःकामो जुहेन्नरः। सहस्रं दशसाहस्रं वा समिद्धे हव्यवाहने। घृताक्ताभिश्च दूर्वाभिरष्टोत्तरसहस्रकं। सप्ताहं जुहुयाज्जीवे
द्वत्सरान्शतं सुधीः। दूर्वायुक्तघृताभ्यक्तैस्तिलैः प्रजुहुयाद्बुधः। आरोग्यकामो जुहुयादारभ्यार्कदिने सुधीः। दशाहं प्रत्यहं वा
पि सर्पिषाक्तास्समिद्वरात्। कंठमात्रे जले स्थित्वा महालक्ष्मीमनुं स्मरेत्। अष्टाधिकसहस्रं च प्रोर्ध्वा जुजपेन्मनं। सर्वां छि
तार्थं लभते तथा रोगं च साधकः। अन्वहं जुहुयादष्टसहस्रं शालिभिर्ध्रुवं। सो चिराल्लभते लक्ष्मीं महतीं साधकोत्तमः। र
मालताप्रसूनैर्वा नंद्यावर्त्तसमुद्भवैः। श्वेतसर्षपकै राज्यप्लुतैर्वा जुहुयाद्बुधः। प्रथीयसीं रमामाप्नोत्यचिरात्साधको ध्रुवम्।
नान्यते च तथा सर्वैर्जुहुभिर्नान्यथा त्वच। नालिकेररजोयुक्तैर्नारिकेलीरसान्वितैः। मधुयुक्तैर्घृतैः पद्मैरष्टैर्जुहुयात्सुधीः। सं

यतःप्रत्यहंचाष्टशतंपायसयुग्द्विजः ॥ मण्डलाद्वशंसाक्षाद्भवेद्वैश्रवणस्तथा ॥ गुडमिश्रहविष्यस्यहोमादन्नसमृद्धिमान् ॥
अष्टोत्तरसहस्रंचजपात्तानिसंकुनेत् ॥ संग्रह्यत्तद्भस्ममंत्री नागवल्लीरसेनवा ॥ सहितंतिलकंकुर्यात्सर्ववश्यंभवेद्ध्रुवम् ॥ प
लाशोत्थसमिद्भिश्चकुसुमैर्जुहुयात्तथा ॥ वश्याभवेयुसुखरावशिनस्तस्यमंत्रिणः ॥ जातिकाकुसुमैर्मंत्रीराजानंवशमान
येत् ॥ जुहुयादरुणांभोजैः वेश्यास्तस्यवश्यगाः ॥ नीलोत्पलानांहोमेनवश्याश्चरणसंभवाः ॥ वशयेत्प्रमदाविद्वान्सबू
ककुसुमैर्हुतैः ॥ ॥ नवकोष्ठात्मकंसम्यक्मंडलंरचयेत्सुधीः ॥ मध्येयंत्रंवक्ष्यमाणंकल्पयेद्वयथाविधिः ॥ तेष्वकोष्ठेषु
नवसुविन्यसेत्कलशान्नव ॥ शुभान्वंदनकाश्मीरलिप्तसर्वांगकान्नवान् ॥ कूर्चतंडुलसंयुक्तान्सर्वहृष्टमनोहरान् ॥ पू
रयेद्ययथावत्तान्वासितैस्तीर्थपुष्करैः ॥ कर्षस्वर्णेनरचितंनवरत्नसमन्वितं ॥ कर्णिकामध्यविलसद्यंत्रपद्मंतुकारयेत् ॥
मध्यस्थकलशेरम्यंयथावत्तद्विनिःक्षिपेत् ॥ वादोरोशीरकाश्मीरवचागुरुतमालकं ॥ जातीकंकोलसंयुक्तंसंपीष्येतानि
भागशः ॥ कलशेषुचसर्वेषुयथाविधिविलोडयेत् ॥ सहाभद्राचदूर्वाचदेवीश्रीवमधुव्रता ॥ अपामार्गस्यपञ्चाशिखुशलीव
ज्रवल्लरी ॥ चक्रप्रियंगुव्रीहिश्चमुद्गगोधूमतंडुलान् ॥ शालिमाषांश्चसतिलान्यवान्प्रक्षाल्यनिःक्षिपेत् ॥ कदलीनारिकेला
चश्रीधात्रीकुचभूरुहान् ॥ फलानिपञ्चवकुलाजातीसोगंधकानिच ॥ मल्लिकाचंपकाशोकपुन्नागोत्थानिनिक्षिपेत् ॥ पु

पुष्पाणि कनकं तद्वत्तुलसीपल्लवांस्तथा ॥ न्यग्रोधोदुंबराप्लक्षचैत्यानां त्वल्कवल्कं ॥ प्रक्षिप्य घटवक्ष्यातिच्छादयेज्जपकैः शुभैः साक्षतैः सफलैस्तांश्च वेष्टयेत्क्षौमवाससा ॥ तेषमध्यस्थकलशे समावाह्य महेश्वरीं ॥ महालक्ष्मीं वन्दनाद्यैरुपचारैश्च संयजेत् ॥ शिष्टेष्टय सुकुंभेषु ह्यमाद्यः क्रमतो यजेत् ॥ सुगंधैश्चंदनैः पुष्पैर्मनोज्ञैर्धूपदीपकैः ॥ भक्ष्यभोज्यनिवेद्यैश्च यथाविधि यजेत्सुधीः ॥ संस्पृश्य तान्घटान्मंत्री त्रिसहस्त्रं मनुं जपेत् ॥ ततः साध्यं समानीय संयुतं स्थंडिले शुभे ॥ पीठे तं विवेशयस्वं तस्मिन्साध्यं तु योजयेत् ॥ मनोहरैरलंकारैः विविधैर्वसनैरपि ॥ स्त्रादरोत्तमस्लंकृत्य सुस्नुप्रसुमनोवृत्तं ॥ सुवासिनीभिर्योयाभिरर्चितानां द्विजन्मनां ॥ समश्रीवचनैः सर्ववाद्यानां निनदैः सह ॥ वेदघोषैरावसमहलग्नैर्वेवक्त्रशोभने ॥ तेषमध्यस्थितं कुंभं समुद्धृत्य गुरुः स्वयं ॥ मूलमंत्रं जपेत्सिंचेत्साध्यशीर्षं ततो परैः ॥ कलशैः पूर्ववत्सिक्त्वा हस्तेनास्य शिशोः शिरः ॥ संस्पृशन्वेदगदिताभाशिषं संप्रयच्छति ॥ कल्याणमस्तु च सदा संपदश्च निराकुलाः ॥ प्रसीदतु महालक्ष्मीः सकला देवताश्चापि ॥ ईक्षंतुलां सर्वदेवविजयोस्तु सुखी भव ॥ इत्थं दत्वाशिखं पश्चाद्वाससी परिधाय च ॥ स्नावाततः प्रणमेत्सम्यग्यथाविधि गुरुं शिशुः ॥ नानाविधैश्च वसनैर्नानालंकरणैरपि ॥ ननैर्धान्यैरत्नगाभिर्महिषीभिश्च वासकैः ॥ दासीभिर्देवतां पूज्य गुरुं संतोषयेत्सुधीः ॥ नानाविधैर्भक्ष्यभोज्यैर्लेह्यैश्चोष्यैस्तथान्नैः ॥ दीनांधकृपणोः सार्धं भोजयेच्च द्विजन्मनः ॥ ततः स्वमंदिरे कुर्यादुत्सवं बंधुभिः सह ॥ मह

त्रिलोकरम्यंवततःमनूवरःस्वयं। कृतार्थंमन्यतेसम्यगात्मानंनान्यथात्रहि।। राजाशत्रून्विजयतेभिषिक्तश्चयथाविधि। राजपुत्रश्चराज्येप्सुरचिरादाप्नुयात्पदं। वध्याभिषिक्तारमणीस्वचिराद्वांछितंसुतं।। महामतिवल्लभतेनात्रकार्याविचारणा।। महासमयेषुभूतादिनिमित्तोत्थभयेषुच। कृत्याद्रोहादिदोषेषुप्रकुर्यादभिषेचनं। अभिषेकेनामुनाचनृणांभवतिनिश्चितं। सर्वसंपत्तसौभाग्यंसर्वामयशमस्तथा।। सर्वापद्वारणंचैवसर्वसौख्यानिनिश्चितं।। ।।अथमातंगीप्रयोगः।। मंत्रेस्मिन्साधितेमंत्रीसाधयेदिष्टमानसः। मल्लिकाजातिपुन्नागैर्होमाद्योगात्त्वयोभवेत्। फलैर्बिल्वसमुद्भूतैस्तन्मंत्रैर्वाकृताभवेत्। राजपुत्रस्यराज्याप्तिः पंकजैः श्रियमाप्नुयात्। उत्पलैर्वशयेद्विल्वंलक्ष्मींतुव्यस्तथापुनः। विधूकपुष्पैर्वकुलैः जयोत्थैः किंशुकोद्भवैः। वश्यायजुहुयान्मंत्रीमनुनासर्वसिद्धये। लवणैर्मधुरोपेतैर्हुत्वाकर्षतिसुंदरीं।। वंजुलस्यसमिद्धोमोवृष्टिंवितनुतेचिरात्। क्षीराक्तैरमृताखंडैर्होमोनाशयतिज्वरं।। दूर्वाभिरायुराप्नोतिकरवीरैर्वशमाप्नुयात्। अन्नवानन्नहोमेनतंडुलैर्धनवान्भवेत्। सर्वैस्त्रिमधुरोपेतंहोमद्रव्यमुदाहृतम्। नंद्यावर्त्तभवैः पुष्पैः होमोवाक्सिद्धिदायकः। निंवप्रसूनैर्जुहुयात्इप्सितांश्रियमश्नुते।। पलाशकुसुमैर्होमात्तेजस्वीजायतेनरः। चन्दनागुरुकर्पूररोचनाकुंकुमादिभिः। वश्यायजुहुयान्मंत्रीवशयेदखिलंजगत्। एतानिजप्त्वातिलकंकुर्यात्लोकप्रियोभवेत्।। निगुरडीमूलहोमेननिगडान्मुच्यतेनरः।। निम्बतैलान्विते

ल्लैरौः होमः शत्रुविनाशनः ॥ हरिद्राचूर्णसंमिश्रैर्लवणैस्तंभयेत्परान् ॥ रसवर्तिः फलैः पत्रैः पुष्पैः परिमलान्वितैः ॥ कृत्वासम्यग
वाप्नोतिसाधकः सर्वमीप्सितं ॥ ॥ अथभुवनेश्वरीप्रयोगः ॥ मंत्रीत्रिमधुरोपेतैः कृत्वाश्वत्थसमिद्वरैः ॥ ब्राह्मणान्वशयेद्धी
घ्रं पार्थिवान्यमहोमतः ॥ पलाशपुष्पैस्तत्पत्रीन्मंत्रिणः कुमुदैरपि ॥ पंचविंशतिसंजप्तैर्जलैः स्नानं दिने दिने ॥ आत्मानमभि
षिंचेद्यः सर्वसौभाग्यवान्भवेत् ॥ पंचविंशतिसंजप्तं जलं प्रातः पिबेन्नरः ॥ आवाप्य महतीं प्रज्ञां कवीनामग्रणीर्भवेत् ॥ कृत्वापल
शकुसुमैर्होमं श्रियं लभते ध्रुवं ॥ ब्राह्मीघृतं पिबेद्यस्तु मूलमंत्राभिमंत्रितं ॥ कवित्वं लभते मंत्री वत्सरान्नात्रसंशयः ॥ सिद्धार्थान्
लवणोपेतान्कृत्वा मंत्री वशं नयेत् ॥ नरनारीनरपतीन्नात्रकार्याविचारणा ॥ ॥ अथधूमावतीविद्यायाः ॥ पूर्वोक्तेप्रजये
त्पीठे ज्येष्ठां शत्रुनिवृत्तये ॥ केशरेषु षडंगानि पत्रस्था अष्टशक्तयः ॥ क्षुधातृष्णारतिनिद्रानिर्ऋतिर्दुर्गतीरुषा ॥ अक्षमेतिनते
देवाद्यस्त्राद्या आयुधान्विताः ॥ एवं ज्येष्ठां समाराध्य सिद्धमंत्रः प्रजायते ॥ उपोष्य कृष्णभूताहे नग्नो मुक्तशिरोरुहः ॥ शून्यागारे
श्मशाने वा कांतारे भूधरेथवा ॥ प्रत्यहं प्रजपेन्निर्भी ध्यायन्देवीं शवासनः ॥ एवं लक्षं जपेन्मंत्रं नाशयेद्दिवादरीन् ॥ जुहुतो लव
णोपेतां राजिकां निशि तत्फलं ॥ आख्यापर्यंतमालिख्य तस्मिन्स्याप्य शिवं जपेत् ॥ अवष्टभ्य शिवं शत्रुनाम्नाथ प्रजपेन्मनुं ॥ सहस्र
दूर्ध्वतः शत्रुर्ज्वरेणापरिगृह्यते ॥ पंचगव्येन संयांतिः साज्वरमपयमपि वा ॥ मंत्राद्यक्षरमालिख्य शत्रुनाम ततः परं ॥ द्वितीयांतंम

॥तंत्रवि॰॥
॥३६७॥

नोशत्रोर्नामेवंमनुमालिखेत्॥ रणोयुतजयाछ्वेर्निश्चितंमरणंभवेत्॥ लित्वायंत्रेरिपोराख्यामरणेपयामिनीदले॥ उन्मादो
जायतेशत्रोर्मनोरयुतजायतः॥ दग्धाकंकंश्मशानाग्नौतद्भस्मादायमंत्रितं॥ विरोधिनाम्नाष्टाशासुसप्यउच्चाटनेरिपोः॥ श्मशा
नभस्मनाकृत्वाशिवंतस्योपरिन्यसेत्॥ विरोधिनामसंरुद्धंकृत्स्नपक्षेसमर्चयेत्॥ महिषीक्षीरधूपंचदद्यात्कुत्रुविपत्करं॥
महिषीरूपेणागत्यस्वप्नेशत्रुंनिपातयेत्॥ मंत्रेणानेननिखनेत्तद्भस्मरिपुमंदिरे॥ शत्रुमुच्चाटयेत्तूर्णंनात्रकार्याविचारणा॥
न्यस्यपाणितलेशत्रोराख्यानंचितिभस्मना॥ वह्नावधोमुखंकृत्वास्थापयेद्युतंजपन्॥ धूमावतीमनुंमंत्रीशत्रुंयमपुरंनयेत्॥
प्राग्वत्करतलेनामाधद्वयंतुरिपोर्न्यसेत्॥ जलस्थःप्रजपेन्मंत्रीकुंकारान्नाशयेदरीन्॥ श्मशानभस्मनालिंगंकृत्वापुष्पादिना
र्चयेत् भस्मवन्निति संभाव्य मनसा कर्म चिंतयेत्॥ निंबकाकच्छदानेकीकृत्वाकाष्ठशतंजपेत्॥ दद्याद्धूपंसाध्यनाम्नासद्योविद्वेषयेद
रीन् चिताकाष्ठानलेक्षीरहोमाच्छांतीःप्रजायते॥ रजोधूपप्रदानेनगृध्ररूपेणकारिका॥ मारयेत्यारिमागत्यशांतिर्निर्माल्यधूपतः
वाराहवालधूपेनहन्यात्सकररूपिणी॥ अश्वत्थपत्रधूपेनशांतिर्भवतिनान्यथा॥ शांतिःसर्वाभिचारस्यपंचगव्येनजायते॥
क्षीरेणशांतिर्भवतिमधुरत्रितयेनवा॥ कीलेक्षेडतरोश्चापिशत्रोर्नामसमालिखेत्॥ विदर्भ्यमूलमंत्रेणसाध्यनामाक्षराणिवै॥
जप्त्वापदद्वयेमंत्रीखनेदुच्चाटनेरिपोः॥ शत्रुपादद्वयाद्धूलिंघृताक्तांभक्तिमिश्रतां॥ काकायमेध्योवलिंदत्वाशत्रोरुच्चाटनंभवेत्॥

॥गुरुः॥
॥३६७॥

शत्रुपादद्वयाद्धूलिंचिताभस्मयुतांक्षिपेत्।शत्रुगेहेतुसंजप्तांशत्रोरुच्चाटनंभवेत्।ज्येष्ठावासेश्मशानेवानिर्माल्येपादगोचरे
गर्दभावासभूमौवाप्रेतस्याचतुष्पथे।ङुखरेमेहन्तक्ष्मायांपुष्पितांयांममेध्यको।आनीयशर्करामंत्रीदिग्वासादक्षिणामुखः
श्मशानलोष्ठेनिःक्षिप्यचिताग्नौभर्जयेत्तथा।मंत्रंतंतुजपेल्लक्षंनिःक्षिपेच्छत्रुवेश्मनि।सेनमध्येपिसर्वेषांक्षणादुच्चाटनंभवेत्
गर्तेपिपीलिकानांतुपादधूलीयुतान्कणान्।सघृतास्तप्तवारंतुजुहुयान्मंत्रवित्त्रिशि॥भ्रमतेकाकवत्सर्वांमहीमावरणादिषु
कृत्वाप्रतिकृतिंशत्रोर्जन्मवृक्षेणमंत्रवित्।कृत्वाप्रतिष्ठांप्राणस्यविध्वामर्मसुकंटकैः॥आयसैर्मंत्रमावर्त्यवक्ष्यमाणैःप्रवेष्ट
येत् पूर्वोक्तशर्कराभिस्तुजप्त्वानित्यंप्रतापयेत्॥सप्तरात्रेणतस्यापिभवेदुच्चाटनंध्रुवं।मुखेशल्यद्वयेल्लेख्योसारमेयंवराहयोः।
मंत्रेणादमितोसाध्योभौमवारोदयोदये।धत्तूररससंयुक्तंचितांगारेणमंत्रिणा॥व्यस्तस्यपृष्ठतोवध्वाकेशपाशेनतंजपेत्त्व।
श्मशानेशत्रुमार्गेवातद्गृहेलिखनेत्त्रिशि।विद्वेषणंभवेत्सद्योगोरीशंकरयोरवि।अश्वत्थत्वचिमंत्रार्णैर्दर्भितंसाध्यमालिखेत्॥
अन्यद्विषतोरास्त्रहृज्जघाऽङ्घ्रत्यविन्यसेत्।पूर्वोक्तंकंटकैर्विध्वाजपेत्स्पृष्ट्वाशतंशतं।विद्विष्टोभवतेष्टोवनाम्नामपिवतत्क्षणात्
एतेप्रयोगाःकथिताधूमावत्यायथागुराः॥ ॥अथवगलामुखीप्रयोगः॥विन्दुत्रिकोणवृत्तंचअष्टकोणंततोपरि।ततोप
रिलिखेत्तुचषट्कोणंपत्रमादरात्।ततोपरिलिखेत्सूत्रभूपुरद्वयमादरात्।विन्दुमध्येलिखेद्बीजंवगलायाश्चपुत्रक।साध्यंतद्

॥ तंत्रवि॥
॥ ३६८॥

जगर्भस्थंकुर्यात्सम्यकसुबुद्धिमान॥ तद्बीजंविलिखेत्कोणत्रितयेत्रितयंत्रिधा॥ स्वरषट्कोणेषुविलिखेद्गायत्रीवगत्ताद्क्यां॥ षट्
कोणेषुवसंलिख्यविद्याषड्विंशदक्षरी॥ वृत्तेषुविलिखेत्सुत्रपंचाशद्वर्णमाद्रात्॥ भूपुरेषुवसंलिख्यप्राणस्थापनगंमनुं॥ रज
तेस्वर्णपट्टेवाप्रादेशंचतुरस्रकं॥ लिखन्मास्वर्णयावात्रलिखेद्गार्गववासरे॥ पूजायंत्रमिदंपुत्रपूजनात्सर्वसिद्धिदं॥ पूजावि
धिंप्रवक्ष्यामिस्नानंमुस्त्येसुपावनं॥ मूलमंत्रेणसंपूज्यउपचारैश्चषोडशैः॥ शुद्धप्रदेशजांदूर्वांनिर्मलंचसुकोमलां॥ संगृह्येत्
क्षालयेत्सम्यकमंत्रराजेनपुत्रकं॥ मंत्रांतेरेनमःपूर्वंनिक्षिपेत्पूर्वमादरात्॥ एवंभूतसहस्रंतुपूजयेच्चदिनेदिने॥ मण्डलाव
धेयःसर्वाःमुच्यंतेकीर्तिमाप्नुयात्॥ भूतप्रेतपिशाचाद्याःक्रूराःखेचरभूचराः॥ पूजानांमुक्तिमाप्नोतिशिवस्पवचनंयथा॥ अ
र्च्चयेत्पूर्ववन्मंत्रंउपचारैश्चषोडशैः॥ संगृह्यउन्नकुसुमंहयारिवसुनिर्मलं॥ तेनपूजाप्रकर्त्तव्यापूर्ववन्मण्डलंसुधीः॥ संमोहनं
ववशगद्वंनामभवेध्रुवं॥ विभीतकोद्भवंपुष्पंमाहावधौमवासरे॥ पूजयेत्पूर्ववत्तत्रनानास्तंभनकर्मणि॥ निंवार्ककुसुमं
दिवयंत्रेवाथकुमारकः॥ पूर्ववत्पूजयेन्मंत्रीसद्यस्तस्तंभनंभवेत्॥ धुस्तूरकुसुमेचैवपूर्ववत्पूजयेत्सुत॥ उच्चाटनंभवेत्तेनस्तेना
न्यथाशिवभाषितं॥ विंशतिकुकपुष्पेणपूर्ववत्समुपाचरेत्॥ सद्योविनाशमाप्नोतिमृहशुसहशोरिपु॥ समस्तकुसुमैर्वापू
र्ववत्पूजयेत्सुतं॥ पुत्रश्चजायतेलोकेवेदशास्त्रार्थकोविदः॥ पलाशकुसुमैर्वापूर्ववत्पूजयेन्नरः॥ सद्योमन्त्रोभवेद्यीलभे

॥ गुरुः॥
॥ ३६८॥

त्संवसत्तांस्तु त्। पूर्ववत्संजयेत्तत्र अशोककुसुमेन च। इप्सितां लभते कन्यां सा तु पुत्रवती भवेत्। तुलसीमंजरीभिश्च पूर्ववत्संज
येन्नरः। ज्ञानभक्तिश्च वैराग्यं लभते तरलैरपि। नंद्यावर्त्तेन संपूज्य बलेरोगं व्यपोहति। मल्लिकाकुसुमेनैव पूजयेत् वज्रशांत
ये। कुसुमेश्चंपकैस्त्वा शीतज्वरनिवारिणी। अर्चयेज्जातिकुसुमैर्महारो विनश्यति। वनेश्च मल्लिकापुष्पैर्निवेद्यं लभते ध्रुवं
केतकीकुसुमेनार्चीत दुःखं ज्ञायते ध्रुवम्। एवं च पूजयेन्मंत्रं न जयेनैव होमयेत्। प्रयोगसिद्धिर्भवति बगलायाः प्रसादतः।
अथातः संप्रवक्ष्यामि बगलायंत्रमद्भुतम्। भूर्जपत्रे समालिख्य तारोन्मत्ता निशारसा। षट्कोणं तस्य मध्ये तु वसयाकारतो लि
खेत्। षट्त्रिंशदक्षरं मंत्रं बगलायास्तदुच्यते। तारं लज्जां च बगलामुखि सर्वपदं वदेत्। दुष्टानामति चोच्चार्य वाचं मुखं पदं तथा
हं भय जिह्वां कीलय बुद्धिं विनाशय ॐ ह्लीं स्वाहांतो यं मनुः प्रोक्तः साध्यनाम्नस्तु वेष्टकः। वेष्टयेत्पीतसूत्रेण कुलालस्य गृहं व्रजे
त्। चक्रं मृदं समारोप्य भ्रामयेद्वास्तमेव च। वृषभं कारयेत्तत्र हरितालेन लेपयेत्। तन्मध्ये निःक्षिपेद्यंत्रमारूढं वृषभोपरि।।
नासायां निःक्षिपेद्रज्जुं पीतवस्त्रेण वेष्टयेत्। वाद्योपचारपूजाभिः स्वगृहे तं प्रपूजयेत्। अर्चयेत्तं चतुःकालं साध्यनाम्नात्र साधकः।। दु
ष्टानां स्तंभयेदन्नं साक्षाद्वाचस्पतेरपि।। ।।अथ प्रयोग होमजपयोः संख्यामाह।। अयुतं होमसंख्यास्यात् जपस्तावत्प्रकी
र्तितः। तर्पणादि तथैवोक्तं संख्यातु क्रमनीषिभिः। प्रयोगं नैव कर्त्तव्यं साधकैः सिद्धिकांक्षिभिः। प्रयोगांतारकःप्राप्तिः परलोकै

न विद्यते ॥ प्रयोगं शापमाप्नोति प्रायश्चित्ती तु साधकः ॥ प्रयोगदोषशांत्यर्थं लक्षमात्रं जपेन्मनुं ॥ मारणोच्चाटने द्वेषे लक्षमात्रास्तु
विर्भवेत् ॥ क्रपाकरणात्स्तंभादौ लक्षं वाप्ययुतं जपेत् ॥ ॥ अथ प्रसंगात् विविधप्रायश्चित्तमाह ॥ शृणु देवि प्रवक्ष्यामि प्रायश्चि
त्तविधिं नव ॥ गुरुत्यागकरः शिष्यः प्रायश्चित्ती भवेद्ध्रुवं ॥ लक्षं श्रीपादुकां जप्यात्तस्मात्पापाद्विशुध्यति ॥ मंत्रत्यागकरो यस्तु तत्त्वं
गवर्जये स्त्रिये ॥ लक्षमेकं जपेन्मंत्रं होमतर्प्पणातः शुचिः ॥ सर्वेषामेव पापानां संकरे समुपस्थिते ॥ प्रायश्चित्तं विजानीयाः
दस्तु तं मंत्रजापतः ॥ नित्यादिक्रमदोषाणां शांत्यै विद्याशतं जपेत् ॥ नैमित्तिकातिक्रमणे सहस्रं प्रजपेन्मनुं ॥ यदि देवान्यशो वि
द्या लभ्यते कुलजैर्नरैः ॥ द्विजं तु कौलिकं प्राप्य पुनर्विद्यामुपालभेत् ॥ शाकलो वीकहीनस्तु सन्दिग्धो निन्दितस्तथा ॥ मनव
स्तु न सिध्यंति गुरुः स्याद्ब्रह्मघातकः ॥ तदा तं सहसा ज्ञात्वा मंत्रं देवं गुरुं त्यजेत् ॥ लक्षत्रयं जपेत्स्तोपां लक्षं वाप्यजपां जपेत् ॥ हो
मयेद्वा विधानेन तिष्यायः स्यात्तथा ध्रुवं ॥ एकपात्रे पिवे द्रव्यं वीरो माहेश्वरो यदि ॥ ध्यानोच्छिष्टं भवेत्पानं प्रायश्चित्ती स कौलिक
गायत्र्यास्तु सहस्रेणाउपवासत्रयेन वा ॥ सम्यक् शोधितविन्नस्तु सुवर्णं गुरवे ददेत् ॥ बलात्कारसतो वापि यो रमेन्मंत्रमातरं ॥
दशलक्षं मनुं जप्त्वा तुषानः समाचरेत् ॥ मंत्रपुत्र्याः स्वपुत्र्याश्च भगिन्याश्च कुलस्त्रियः ॥ रमणाल्लक्षजापेन पूतो भवति कौलिकः ॥
कृत्वा वीरवधं मंत्री वृथापानं गुरोः स्नुषां ॥ मंत्रपुत्रीं वीरपत्नीं रमित्वात्तमाजपेत् ॥ अनस्थिप्राणिसंघाते हत्वा च नरकं व्रजेत् ॥ ह

त्वा वपक्षिणः सर्वान् स्त्रियं वैकादशं जपेत्॥ ॥सर्प्पमार्ज्जारनकुलमूखमुण्डखरं हयं। गजं वाथ मृगान्सर्वान् हत्वा वाष्टश-
तं जपेत्॥ जपेदष्टसहस्रं तु क्षुद्रजंतुवधे कृते॥ बलिदानं विना मंत्री पातयेन पशून्क्वचित्। अन्यथा स्मार्त्तमुदितं प्रायश्चित्तं म-
नीषिभिः॥ ॥गोवधे दशभिर्लक्षैर्मुच्यते नरकार्णवात्॥ लक्षैर्वा दशभिर्मंत्री नृपं हत्वा विमुच्यते॥ गुरुं हत्वा प्रमादेन पंचल-
क्षैर्भवेच्छुचिः॥ ॥दशभिः कोटिभिर्मंत्री स्त्रीवधात्तु विमुच्यते॥ प्रमादात्पतिते विप्रे लक्षैर्विंशतिभिः शुचिः॥ छत्रादयो यथो-
क्ते न मुच्यंते किल्बिषादितः॥ ॥ब्राह्मणस्य वधे लक्षं क्षत्रिये द्विगुणं स्मृतं। वैश्ये त्रिगुणमुद्दिष्टं पादजे च चतुर्गुणं। अर्हद्बौद्ध-
वधे मंत्री स्वाष्टलक्षं मनुं जपेत्। वधोश्वभूकराणां च वध्रे पंचसहस्रकं। पक्षिणो हनने मंत्री द्विसहस्रेण शुध्यति॥ सर्प्पमा-
र्ज्जारमत्स्यानां वधे दससहस्रकं। देवद्रोहाद्गुरुद्रोहात् त्रिंशत्कोटि मनुं जपेत्॥ ॥देवद्रव्यं गुरुद्रव्यं भुक्त्वा तावन्मनुं जपेत्
निन्दने समयानां च योगिनीवीरयोशिव। शास्त्राणां मंत्रिणां स्त्रीणां सहस्रं जपमाचरेत्॥ ॥देवद्रव्यं गुरुद्रव्यं भुक्त्वा ता-
वन्मनुं जपेत्। निन्दने समयानां च योगिनीवीरयोशिव। शास्त्राणां मंत्रिणां स्त्रीणां सहस्रं जपमाचरेत्॥ वामदक्षिणसिद्धांते
शैवव्रतधरे हते। चतुःकोटिमितं मंत्री जपञ्छुध्यति किल्बिषात्॥ आर्घादिनिन्दने मंत्री दशावर्त्तेन शुध्यति। अर्घामृतं पिबेत्स्व-
र्घ्यं देवीमुख्यापयेन्नतः। पशुपानं भवेन्नस्य तत्क्षयो लक्षतो भवेत्। अनिवेद्य तु यो भुंक्ते प्रजपेत्सततताष्टकं॥ ॥वीरपत्नीं वृथाप

नंवीरपुत्रीस्नुषींतथा। प्रायश्चित्तंचरेन्मंत्रीदिव्यवीरार्चनादिकं। दीपनाशेपात्रनाशेपात्रप्रस्खलनेतथा। मूलंजपित्वामहादेवीजपेदष्टोत्तरंशतं। अज्ञानादेतदुच्छिष्टंजानतोद्विगुणंभवेत्। दग्धंचस्फुटितंयंत्रंहृतंचौरेणवाप्रिये। विदीर्णंघृष्टरेखंवडपायंचभ्रष्टंप्रिये, लक्षमात्रंजपेद्विद्यांहोमतर्प्पणपूर्वकं। सभक्त्याचगुरुंतोष्यब्राह्मणानपिभोजयेत्। शाक्तिपूजांततःकार्य्यात्कूपांदृष्टाष्टकेवुधः। पंचपंचककेवापिकालीतारानुसारतः। कदाचित्पुस्तविंदूवास्फुटितोदिविभ्रष्टां। भग्नंनष्टंकरोमर्त्यीमृत्युस्तस्यभवेद्ध्रुवं। तस्मात्सतीर्थराजेवागंगादिसरितास्वरे। सम्मुडचाछिपेद्देविअन्यथादुःखमाप्नुयात्। विद्यामात्रेत्विदंकार्यंविशेषंशृणुसादरं। लिंगेवाणेनभेदोस्यंपवयुग्मनदुष्यति। शालेकायदिनोभेनातदालिंगेनदुष्यति। शालग्रामशिलामात्रंभंगेमृत्युकराभवेत्। भ्रमोपादकराघातेनेत्रादिमस्तकेशिवे। हृदयाद्यंतमायत्रेसर्वेनश्यतिपार्वति। नाम्नत्रिर्विसृजेद्देविपुनर्मूर्त्तिंसमाचरेत्। महाविद्याविशेषोदेविविशेषंशृणुसादरं। यत्रदेवोगतोदेविनदृशंतत्स्थलंत्यजेत्। प्रायश्चित्तंततःकृत्वासुखमाप्नोतिसाधकः। वालामातीयकौमारीवार्वगीवारुववर्जितां। प्रसन्नमेवसंस्थाप्यसांगांसावरणांयजेत्। देव्याःस्वरूपंदेवेशितत्वंतस्याःस्वरूपकं। विभाव्यप्रजपेद्देविसंप्रदायानुसारतः। उपवासंप्रकुर्वीतदिनेमेकमतंद्रितः। लक्षमात्रंजपेन्मंत्रंजपतर्प्पणभेदतः। कुमारीमेवसंपूज्यतत्रदीपान्समाचरेत्। त्रिशक्तिचलविद्यादे

दीपराजं समाचरेत्। अष्टगंधेन गंधेन केनापि दोषहीनो तदा भवेत्॥ सिंदूरेणाकृतं यंत्रं मूलेनावेष्टितं ततः। तत्कोणे कुल्लु
कां लिखित्वा तत्र दीपं समाचरेत्। अष्टगंधेन केनापि गंधेन घस्रोनच॥ दिव्यवर्णेन देवेशि तेन सिद्धीश्वरो भवेत्। अयं च नित्य
दीपो हि त्रिशक्तिविषये मतः प्रायश्चित्तप्रसंगेन कीर्तितः परमेश्वरि। दीपस्य देवी संपूज्य सांगोसावरणां शिवे पश्चिमाभि
मुखं दीपं पात्रं त्रिपलमात्रकं। सौवर्णं राजतं ताम्रं मार्त्तिकं धातुजं भवेत्। दीपं कृत्वा प्रयत्नेन एकविंशतितंतुभिः त्रिपंचन
वह्नेश्च वितस्तिवर्त्तिकां चरेत्। गोघृतेन पलाष्टेन आज्यपात्रं समाचरेत्। चतुरंगुलमुच्छ्रायं सार्द्धांगुलसमन्वितं वद्धंगुलो
गुलशोभितं कवचं सप्तधा चरेत्। एवं क्रमेण देवेशि सिद्धिमाप्नोति साधकः॥ बलिदानं ततः कुर्यात्सात्विकादिप्रभेदतः॥ आप
दुद्धारकं जप्त्वा दोषहीनो नरो भवेत्॥ महाविद्याविधौ प्रोक्तं कवचं सप्तधा चरेत्। एवं क्रमेण देवेशि सिद्धिमाप्नोति साधकः।
बलिदानं ततः कुर्यात्सात्विकादिप्रभेदतः आपदुद्धारकं जप्त्वा दोषहीनो नरो भवेत्॥ महाविद्याविधौ प्रोक्तं शैववैष्णवयोः शृणु
डपोष्य रजिनीमेकामघोरं लक्षमात्रकं। तद्दशांशहोमकर्म्मदोषहीनस्ततो भवेत्। सुदर्शनं वैष्णवे तु सोरं हंसे जपेच्छिवे। गा
णपे श्रीहरिद्राख्यं जप्त्वा सिद्धीश्वरो भवेत्। अन्यथा कुरुते यस्तु तस्य पातो भविष्यति। अयुतत्रयमिच्छंति दिव्यौघाश्चात्र पार्व:
ति॥ ॥ शिवोवाच। यंत्रं नष्टं च स्फुरितं तस्योपायः कथ्यते शृणु॥ कुमारीं च समानीय चार्वंगीं चारुहासिनीं। प्रसन्नपीठसंस्था

ण्म्या सजालं प्रविन्यसेत्। पात्रासादनमासाद्य तांवालांपूजयेत्ततः। निवीतकं समारभ्य कामवर्षान्तके शिवे। तावद्वाले निग
दितां तारां कालीसमः सकलो। तांसंपूज्य महेशानि दोषयुक्तो नरो भवेत्॥ मूलाधारान्मस्तकांतं समालोक्य विभाव्य च॥
ध्यानोक्तदेवतां ध्यात्वा सांगां सपरिवारकं। नविनी भोगयेद्विसांगां सावरणां शिवे। संपूजयेन्महेशानि देवतां भावतत्परः
नयायद्युक्तं देवेशि तद्देववरदानकं। सा तत्र वरदा चेत्स्याद्देवता वरदा ध्रुवं। तस्यादेहे वसेद्देवी नान्यकार्यविचारणा। अविकारेण
मनसा पूजयेन्निजदेववत्। सर्वांश्चैव महाविद्यास्तद्दानेशक्तिदेहगाः। सा चेत्कुत्रायदा भूया देवताक्षोभमाप्नुयात्। एवं
क्रमेण देवेशि संपूज्य निजदेवतां। यंत्रदोषविनिर्मुक्तः पुनर्यंत्रं च संग्रहेत्। उक्तसंस्कारमासाद्य स्वगुरूक्तेन वर्त्मना। कौलि
कः पशुनामीच परशक्तिं रमेद्वली। गोष्ठीमध्ये च यत्नेन स्पर्शं तस्य कारयेत्॥ ॥अभिषेके विनाभूतेश्चाचार्यत्वं करोति य
योनिकोटिगतां यांति रौरवं नरकं व्रजेत्। मातृरूपं परित्यज्य स्त्रीरूपं शक्तिमादरेत्। स याति नरकं घोरं जन्मकोटिशतानि च
परं लक्षत्रयं जप्त्वा अजपां लक्षमेव च। तुर्यावीजं पंचलक्षं ततः शुद्धिं समाचरेत्॥ ॥अथ मालापतनादेः प्रायश्चित्तमा
ह। प्रमादान्मालिकाभंगे प्रायश्चित्तं समाचरेत्। रहस्यमालाभंगे तु दद्याच्छागवलिं नरः। अग्निदग्धेपि लक्षं च नष्टे भग्ने
द्विलक्षकं। चौरानीते षट्सहस्रं पतिते त्रिशतं जपेत्। कराङ्गुष्ठेशाच्च्युते प्रजपेद्द्विशतं शतं। जीर्णसूत्रे पुनः सूत्रं ग्रथयित्वा

शतंजपेत्॥ ॥इतिश्रीतन्त्रचिन्तामणौकाम्यार्च्चनायांश्यामादिप्रत्येकविद्याविशेषप्रयोगकथनपूर्वकशायश्चित्तांतनिर्णयनामाष्टत्रिंशत्तमः प्रकाशः॥ ३८ ॥अथश्यामायास्तारायाश्चसर्वफलप्रदसाम्राज्यमुद्रिकादिधारणमेकयंत्रमप्याह॥ ॥श्रीदेव्युवाच॥सौभाग्याभरणंदेवममाग्रेकथयप्रभो॥ ॥श्रीशिवउवाच॥रहस्यंकथ्यतेदेविगोप्याजोप्यतरंकुलेपुरुषस्यतथास्त्रीणांबालकानांविशेषतः॥धारणात्सिद्धिदंदेवियंत्रंचभूषणंवरे॥कर्णयुग्मेचमुकुटेवाकोष्ठमणिबंधके॥करांगुलिषुपादाभ्यांधारणात्फलदंशिवे॥कूर्म्मपृष्ठसमासाद्यकोष्ठानांनवकंलिखेत्॥मध्यकोष्ठेभवेज्जीवोवह्नेश्चैवमुखंभवेत्॥वाऊहृदयंवपरितःकुक्षियुग्ममधःशिवे॥तदधःपादयुग्मंस्यात्पुच्छंतस्मादनन्तरम्॥विन्यासःकथ्यतेदेविसाम्राज्यमुद्रिकामनोः॥साम्राज्यमुद्रिकानामताराकालीमयीपरा॥एतस्यधारणाद्देवित्रैलोक्यविजयीभवेत्॥यद्यद्वांछतिकामानान्तत्तदाप्नोतिमानवः॥वामबाहौविशेषेणपुरुषस्यमहेश्वरि॥स्त्रीणांदक्षकरेधार्य्यंबालानांहृदयेशिवे॥करांगुलिषुसंधार्यसर्वंजयतिमानवः॥वाजिगत्याहस्तिगत्यामृगगत्यामहेश्वरि॥सर्पगत्याभेकगत्यामंत्रिगत्या[redacted]पिभृत्यता॥एतद्गत्यामहेशानिलिखेद्यंत्रमनन्यधीः॥गजगत्याजयार्थेचवाजिगत्यापराक्रमे॥मृगगत्याशत्रुनाशेसर्पगत्यातुमारणे॥भेकगत्यातुविद्वेषेमंत्रगत्याचमोहने॥भृत्यगत्यासर्वकार्येगतिरेषासनातनी॥मध्यकोष्ठेसमारभ्यविन्यासःकथ्यतेशृणु॥आदौपरातत्पराचतदतीयातृतीयका

चित्परातुचतुर्थीचतत्परापंचमीस्मृता।नदतीतारसंख्यातुसर्वातीतातुसप्तमी।कलासप्तकसंयुक्तःप्रणवःपरिकीर्त्तितः।ब्रह्मा
विष्णुश्चरुद्रश्चईश्वरश्चसदाशिवः।शांतिश्चतदतीताचअकारोकारमेवच।मकारोनादविंदुश्चतदतीतातदुत्तरा।विंद्वती
तासप्तमीस्यात्मध्यकोष्ठेसमास्थिता।चंडोमुखेमहेशानिटंकास्त्रंतत्प्रकीर्त्तितं।दक्षवाहोमहेशानिरुद्रसंख्याप्रकीर्त्तिता
हकारश्चरकारश्चइकारश्चंद्रविंदुमान्।विंद्वतीतातुष्टिःस्यात्षट्केचशाक्तक्रमेणच।गुह्यभागेमहेशानिस्त्रीवीजांन्वितरूपिणी
उग्रोग्रचण्डाचामुण्डाचण्डोग्राचंडघंटिका।महोग्रताराउग्रेणीविजटैकजटास्मृता।कुरुह्वचण्डाघोरचण्डावीरोग्रीवीरतारिणी
सर्व्वोपद्मारिणीतीव्रावीनततारा~~शवेश्वरी~~॥सिद्धितारा ऋषितारा घोरतारापरास्मृता॥उग्रोग्रतारादेवेशिरणोग्रासांशगोचरा
त्रिकोणकोष्ठमालंब्यस्त्रीवीजंचव्यवस्थितं॥वामपादसमारभ्यवामवाहंतगंशिवे॥वीजंद्विपंचसंव्याप्यसदातिष्ठतिपार्वति
चंडघंटाचंडघण्टावीरघंटासुघंटिका॥राजघंटामोहघंटाघोरघंटारणाभिधा॥शवघंटावीनघंटासिद्धिघंटातथापरा॥
घण्टोग्रघण्टामुण्डाख्यघण्टाविद्याभिधानतः॥सैन्यघण्टाजयाख्याचमोहक्षेपतथैवच॥आकर्षणाख्याघंटातुविंशसंख्या
भिधानतः॥सार्द्धपंचाक्षरंव्याप्ययंत्रमेतत्सदास्थितं।पंचावरणदेवाश्चसर्वेचात्रवसंतिच॥एतद्यंत्रंतुसंधार्य्यत्रैलोक्यविः
जयीभवेत्॥ ॥त्रिपंक्तिक्रमयोगेनसर्वाख्यागतिमार्गतः॥मायायुग्मंकूर्च्चयुग्मंकालीवीजत्रयंतथा।दक्षिणेकालिकेमा

यावीजयुग्मेवक्रूर्येसुकः॥कालीरूपामामहाविद्याविंशाड्णाभिधामता॥कल्लामारभ्यदेवेशिकुटिलान्तकदेवता॥यावत्स्याद्व
देवेशितावद्याप्यप्रतिष्ठति॥तृतीयंहितयंदेवित्रितयंतुक्रमेणतु॥व्याप्यश्रीकालिकाविद्यासर्व्वावरणसंगता॥साम्राज्यमुद्रिः
कांव्याप्यसदातिष्ठतिपार्वति॥अधिष्ठात्रीभवेत्ताराकालीप्रत्यधिदेवता॥आकर्षदेवताघण्टात्रैलोक्यविजयाभिधा॥प्रयोग
विद्यादेवेशिगदितापरमेश्वरि॥एतस्याधारणादेविकिन्नरयन्त्रकेस्थितं॥एतस्यावर्त्तनादेविपृथ्वीपतिपदंलभेत॥स्फटिक
र्त्तोभवेद्देविपंचलक्षक्रमेणच॥कोघावर्त्तेनमात्रेणकालिरूपोनसंशयः॥अष्टवंध्यानाशनंचधारणाज्जायतेध्रुवं॥ब्रह्माण्ड
गोलकेयावयाकाविज्जगतीतले॥समस्ताःसिद्धयोदेवितस्यहस्तेव्यवस्थिता॥अधोमुखस्तथाह्यधोमध्येयद्यपितिष्ठति॥इ
दृग्विधोपिदेवेशिगर्भेतिष्ठतिनिश्चितं॥वालकोमरणासन्नःतस्ययंत्रंतुवंधयेत॥मृत्युवाधाविनिर्मुक्तश्चिरजीवीभवेद्ध्रुवम्॥ने
दंप्रकाशयेद्धीमान्यत्रकुत्रापिपार्वति॥घण्टारूपंशृंखलीकृत्वामणिंवंधेकरद्वये॥गलेपादद्वयेदेविवंध्ययंत्रेणकामकृत
प्रतिमांवंधयेद्वापिशृंखलींकेवलांचवा॥मुद्रिकांशृंखलांवापिमुद्रिकांकेवलांचवा॥वामपंचांगुलौधार्य्यंदक्षपंचांगुलौतथा॥म
स्तकेतुतथावाहौधारयेन्मुद्रिकामियं॥त्रैलोक्यविजयीभूयान्नात्रकार्य्याविचारणा॥शृंखलाधारणादेविकिंनरयन्त्रकेस्थितं
शृंखलाउर्गसंयुक्तेपुरुषेयःकार्पणीचरेत॥तस्यसर्वगतंदेविकार्पण्यंभवतिध्रुवं॥तद्वैविपरीतंचनात्रकार्य्याविचारणा॥क

॥तंत्रचिं॥ कर्णाभरणमथ्येतु रत्नवक्त्राणि धारयेत्। मुद्रिकां वा लिखेद्देवि देवीरूपा तु सा भवेत्॥ दुर्भगा सुभगा भूयात्सुभगा देवता भवेत्
॥३७२॥ त्रिवेणा हृदये देवि तत्र भूषणरूपतः॥ पूर्वसिद्धानि यंत्राणि धारयेत्परमेश्वरि। सिद्धरूपा भवेत्सा हि नात्र कार्या विचार-
णा॥ यंत्रसिद्धीनि रत्नानि धारयेद्यानि पार्वति। सर्वसंभोगसंयुक्ता लक्ष्मीरूपा भवेच्छिवे। हृदये सर्वदा धार्य्या यंत्रप्र-
तिकृतिर्वरा। तेन सिद्धा जगन्माता सर्वकार्य्यार्थसाधिनी॥ वाजूमूले यंत्रमेतत् कृत्वा तास्युतं यदि। यो धारयति देवेशि तत्
स्य श्री सर्वतो मुखी॥ राज्यलक्ष्मीः कीर्त्तिलक्ष्मीर्वल्लभः साधको भवेत्। स्त्रीणां दीक्षा प्रदेया स्याद्यथायोगेन पार्वति। दीक्षां द-
त्वा महेशानि तस्यै यंत्रं भवेच्छिवे। तद्देवयंत्रसिद्धिः स्यान्नात्र कार्य्या विचारणा॥ ॥पंचावर्त्तनमात्रेण सर्वदुःखविनाश-
कः। रसावर्त्तनमात्रेण सर्वजगति वश्यकृत्। वसुमावर्त्तये यंत्रं क्षत्रपालसमो भवेत्॥ नवावर्त्तनमात्रेण नवनाथस-
मो भवेत्। दशावर्त्तनमात्रेण पूर्वं दशमुखो यथा॥ एकादशावर्त्तनात्तु सर्वभूतविनाशनं॥ पक्षावर्त्तनमात्रेण व्याघ्रभी-
ति विनाशनं। अष्टादशावर्त्तनात्तु सर्वबाधाविनाशनं॥ विंशवारं समावर्त्य सर्वं पश्यति चक्षुषा। पंचविंशावर्त्तनात्तु ग्रह-
भीतिविनाशनं। चत्वारिंशावर्त्तनाद्धि क्षयरोगविनाशनं। मंडलावर्त्तनात्सत्यं मंडलेशो नरो भवेत्। षष्ठिमावर्त्तयेद्यस्तु त- ॥गुरुः॥
स्य सिद्धिर्भवेद्ध्रुवं। सप्तत्यावर्त्तनाद्देवि सप्तसप्तासरूपधृक्। अशीत्यावर्त्तनेनैव सर्वदुःखानि नाशयेत्॥ नवत्यावर्त्तनेनैव- ॥३७२॥

वांछयाकर्मसाधनं॥शतावर्त्तनमात्रेणशासनंपरिकीर्त्तितः॥द्विशतावर्त्तनादेविशुभगस्तुनरोभवेत्॥दुःखंनयन्तिदेवेशि
शतपंचकयोगतः॥सहस्रावर्त्तनाद्देविसहस्रंलभतेध्रुवं॥त्रिसहस्रंलिखेद्यंत्रंराजपत्नीवशंभवेत्॥सहस्रपंचकेनैवपृ
थिव्यांजयमाप्नुयात्॥दिक्सहस्रावर्त्तनाद्विशक्तिपातप्रियोगभ्रक॥पठेत्त्रिंशत्सहस्रंतुयोमुद्रामवयेन्नरः॥नारायणसमोपि
स्याद्दशरूपोनसंशयः॥सहस्राणांतुपंचाशद्यंत्रमावर्त्तयेद्यदि॥अनिमाद्यष्टसिद्धीनामधीशोजायतेनरः॥लक्षावर्त्तनमा
त्रेणत्रैलोक्यविजयीभवेत्॥लक्षद्वयावर्त्तनात्तुचतुर्विंशतिसिद्धियुक्॥पंचलक्षप्रयोगेणप्रेतप्रेतेश्वरोभवेत्॥दशलक्षंलिखे
द्यंत्रंसाम्राज्येज्ञानरोभवेत्॥पंचलक्षंलिखेद्यंत्रंसर्वंपश्यतिचक्षुषा॥पंचविंशतिलक्षेश्चवरदानमवाप्नुयात्॥अन्यस्यवरदान
त्वंतस्यहस्तेव्यवस्थितं॥शिरोदेवंगृहंदेयंराज्यंदेयंपदेपदे॥नदेयंयंत्रपर्यंचकस्मैचिदपिपार्वति॥एतस्यज्ञानमात्रेणत्रै
लोक्यंजयतिप्रिये॥अहोयंत्रस्यमाहात्म्यंमयावक्तुंनशक्यते॥अहोधन्यमहोधन्योयत्रज्ञानान्निरंतरं॥पुरश्चर्यायुतानांचफलमे
तन्मयेरितं॥दशसाहस्रकंदेविपुरश्चर्याप्रकीर्त्तिता॥ ॥उग्रायत्तारिणीयस्मादुर्गताराप्रकीर्त्तिता॥तस्यप्रत्यक्षरूपत्वात्तारा
मुग्राप्रकीर्त्तिता॥साम्राज्यमुग्रानाम्नातुकालीतारामयीपरा॥ ॥भूर्जेवाकागततलेतांबूलेकदलीदले॥प्रत्यहंविलिखेन्न
मस्यादशयंत्राणिपार्वति॥सर्वशत्रुविनाशंतंकुर्यादेतदुपासकः॥शत्रुसेनाविनाशश्चनानारूपेणजायते॥शिरःकंपोज्वरो

दाहोकलहश्चपरस्परं।अग्निवायुभवापीडातथामारीभयंप्रिये।चतुर्द्दशदिनेनैवकुर्य्यादेतउपासकः॥राज्यंजयतिदे-
वेशिप्रत्यहंशतमात्रकः॥सहस्रंप्रत्यहंलेख्यंराज्यादाताभवेन्नरः।नवधाविलिखेद्देविचतुर्दीपेश्वरोभवेत्॥ ॥भूमौदश-
सहस्रंचयंत्रंलिख्यप्रयत्नतः।प्रतिवारंमार्जयेद्धिदीक्षासिद्धिमवाप्नुयात्॥भूमौविलिख्यदेवेशियन्त्रान्मन्त्रामार्जयेत्कृती।
तमेवाकर्षयेद्देविमार्गमार्गस्थितोपिवेत्।विशेषणालिखेद्भूमौदाहयेद्देविचाप्यतत्॥अष्टोत्तरसहस्रंचकृत्वारामांवशंनयेत्
सिंदूरेणालिखेद्भूमौतर्जन्यामार्जयेत्कृती।तर्जनीधारणाद्देवियत्फलंपाठकीर्त्तितं।तत्फलंसमवाप्नोतिनात्रकार्याविचार-
णा।तत्रस्थानेषुदेवेशिधारणाल्लेखनादपि।मार्जनादपिदेवेशितदेवफलमाप्नुयात्॥फलपत्रादिपुष्पाणांहोमेयत्फ-
लमीरितं।तत्फलंपूजनेनापिफलंनैवयतोपिच।स्वस्याशक्तौप्रतिनिधिद्वारावाकारयेत्कृती॥भ्रातापुत्रःपितामातास्नुषावा
रमणीतथा।पोत्रोगुरुस्तत्सुतश्चप्रोक्ताःप्रतिनिधिर्नवा।भ्रात्रादिपौत्रपर्य्यन्तंदेयादाभरणानिच।सर्वस्वदानंगुर्वादिष्वन्येष-
तविशेषतः॥उपासनायांदेवेशिनवप्रतिनिधिःस्मृतः॥साम्राज्यहोमेदेवेशितथापोषणकर्म्मणि।प्रोक्तःप्रतिनिधिर्द्देविस्वय-
कृतंस्वयंचरेत्।यथाथर्वणविद्यादौसूक्तेसूक्तंचहोमयेत्।अकवेदेऽकसमाख्याताताजपहोमविधोयथा।यथाप्रतिनि-
धिःप्रोक्तस्तथानृपकीर्त्तितः॥ ॥यंत्रंसंसाधयेद्देविसर्वसिद्धिप्रदायकं।स्वर्णेरौप्येशिरोवस्त्रेकटिवस्त्रेतथाहृगो।गरुडे

पद्मरागे च पुष्परागे विशेषतः। गोमेदे हीरके नीले वैदूर्य्ये परिसेपि च। चतुर्विधे हीरके तु तथा स्पर्शे चतुर्विधे॥ प्रवाले धारये
देवि यथोक्तफलमाप्नुयात्॥ स्वर्णे सर्वार्थसिद्धिः स्यात्तारौप्यसुतसमृद्धिमान्॥ वस्त्रे संधारणाद्देवि दिव्यकायो नरो भवेत्। शिरोव
स्त्रे तु संधार्य्य त्रैलोक्यरक्षणाय च। त्रैलोक्यमोहनायापि वैरिनिर्दलनाय च। वटिवस्त्रे लिखेद्देवि वायुतुल्यबली भवेत्। तथा
वरणवस्त्रेषु कामतुल्यः स्वरूपधृक्। त्रैलोक्यविजयत्वं च भवेद्धारणेन शिवे। पद्मरागे शत्रुहन्ता जयकर्त्ता महामतिः। महे
न्द्रसदृशो भूयान्नात्र कार्या विचारणा। पुष्परागे लिखेन्मुद्रां धारयेत्सर्वदा प्रिये। सूर्य्यकोटिप्रतीकाशप्रतापं कीर्त्तिमान्भवेत्॥
गोमेदे विलिखेद्यन्त्रं धारयेद्दक्षिणे करे। सिद्धगंधर्वतुल्यः स्यात् काव्ये वाचस्पतिर्यथा। हीरके धारयेद्यस्तु मुद्रां परमदुर्लभाम्।
त्रैलोक्यधारको भूयाद्विद्यामधुमतीजपात्। जंगमं स्थावरादींश्च समुद्राकर्षणं चरेत्। नदीपुष्करलानि हेमश्रीशैलभूरुहान्
अलभ्यानि च वस्तूनि दूराद्भूमिस्थलादपि॥ त्रैलोक्याकर्षणकरो वज्रमुद्रापि धारणात्। इंद्रनीले लिखेन्मुद्रां धारयेत्करपंकजे॥
महेन्द्रसदृशो भूयाच्छक्रकर्त्ता नरो भवेत्॥ एभिस्मराजराजेशो प्रतापे भास्करो यथा। बुध्यानीलासमो लोके भवत्येव न संशयः॥
वैदूर्य्यं धारयेद्यस्तु किं न यं न करं स्थितं। परिसे धारणाद्देवि कालीतारामयो भवेत्। कालीतारास्पर्शमणेर्ज्ञेयात्स्पर्शमणीलभेन्न
इतोपि सिद्धिवाहुल्यं मया वक्तुं न शक्यते॥ ॥प्रवाले च परा सिद्धिः स्यात्स्फटिके कीर्त्तिरुत्तमा। धारणाय फलं प्रोक्तं दुर्गमुद्रास

वीजका॥ चतुर्विधेपियंत्रेपिफलमेतत्प्रकीर्त्तितं॥ वीजयंत्रादावपिशिवेधारयेदेवमेवतु॥ तवप्रीत्यामहेशानिस्त्रस्थमपिकथ्यते
रवौ॥ वर्षार्द्धमात्रेणफलंभवतिनिश्चितं॥ रौप्येवर्षान्तरेदेविशिरोवस्त्रेद्विपक्षतः॥ कटिवस्त्रेत्रिपक्षेचफलंयच्छतिमुद्रिका॥
तथावरणवस्त्रेणफलमत्रप्रकीर्त्तितं॥ गारुत्मतेपक्षमात्रेसिद्धिर्भवतिनिश्चितं॥ पद्मरागेसप्तदिनंव्याप्यसिद्धिःप्रवर्त्तते॥ पु
ष्परागेषट्दिनान्तंयावत्सिद्धिर्भवेद्ध्रुवं॥ पंचरात्रेणगोमेदेमनोवांछितकामदा॥ हीरकेत्रिदिनेनैववैडूर्येदिनसप्तमः॥ परि
सितत्क्षणादेवसिद्धिर्भवतिनिश्चितं॥ इन्द्रनीलवेददिनेसिद्धिर्भवतिनिश्चितं॥ प्रवालेमासदशकेमौक्तिकेवसुमासतः॥ सि
द्धिर्भवतिदेवेशिनात्रकार्याविचारणा॥ सुरालाभस्तथादुर्गमात्यस्यतपसःफलं॥ उत्तमयोगोदेवशिकस्त्रीहस्तात्सुजायते॥ अ
न्ययोगंप्रवक्ष्यामिकामताद्रवभेदतः॥ हारितवत्सनाभेचदशपत्राणिलेखयेत्॥ त्रैलोक्यनिग्रहेशक्तिईशाहेनभवेद्ध्रुवं॥ व
त्सनाभंसमानीयंदीपाग्रेतुप्रदर्शयेत्॥ तैलंपततियत्नैमोतदन्याघ्राणाहोमतः॥ वत्सनाभंकुसुमवर्णतैलाक्तंपरमेश्वरि॥ तेनसु
द्रात्रिकंलेखयेद्दीपेप्रज्वालयेन्नरः॥ त्रैलोक्याकर्षणंकुर्यान्मारणोच्चाटनेवतत्॥ पुनर्लिख्यप्रतापाख्यपुनराकर्षयेद्ध्रुवं॥ पु
नर्भाज्यमहेशानित्रैलोक्याकर्षणेवरेत्॥ विषेणपलिखेन्मंत्रीसंपुटीकृत्यदीपके॥ प्रसहेदापयेदेवित्रैलोक्यनिग्रहीभवेत्॥
विषाख्येनसंलिख्यदाहयेदभिचारयेत्॥ ऊँ ईं रेवाचवादेवितथापातालरेखिका॥ वीरकेपरिसेनीलेयथैवविलिखेत्तथा॥ कार

येयत्नतो देवि तल्लेयद्दपि पार्वति ॥ रत्नेपि विहिते देवि यथाकामं तया प्रिये ॥ पुनर्ह्रैत्वमनुमीर्ज्यं तदेवफलमश्नुते ॥ अन्य
पीठादपि शिवे फलमत्राधिकं भवेत् ॥ परिसिहीरके देविक निष्ठादी चपर्वगाः ॥ मानं प्रोक्तं महेशानि गोमेदस्यादनामिका ॥
गाम्र्नमने मध्यमाया मध्यपर्वार्द्धमुद्रिका ॥ कारयेत्परमेशानि त्रैलोक्यविजयाय च ॥ तर्जनीव पूर्वार्द्धं च पीठे वैदूर्य्यसंभवं ॥
इंद्रनीले मध्यमाया मध्यमार्द्धं महेश्वरि ॥ पद्मरागस्तु तर्जन्या मध्यमेन्यूनमेव तु ॥ पुष्परागेऽनामाया मध्ये हेशस्समो भवेत् ॥
दृढाया मध्यमानामास्मृताप्रस्त्रवराजा ॥ तदन्याद्वौ सुवर्णेस्या ड्रत्नवल्लार्द्धरूपके ॥ वर्तुरं चतुरस्रं वा वस्वस्रं च षडस्रकम् ॥
नवा संध्वजरूपं वा पीठं प्रोक्तं मया तव ॥ नरत्नसदृशं पीठं नभूतं न भविष्यति ॥ अन्यत्र वर्णायः सिद्धिः सा रत्ने क्षणमात्रतः ॥
डुतसिद्धिकरं पीठं रत्नपीठं महेश्वरि ॥ विंशत्यंकेशतांके तु सहस्रे दिक्सहस्रके ॥ सम्मीकमात्रे देवेशि कोट्यंके नवकोष्ठगे
मद्रत्नामशिवः प्रोक्तः सस्वाद्दृश्यशांती व्रजेत् ॥ अहोज्ञानवतीज्ञानी मुद्रादुर्गपरायणाः ॥ शिवएव महेशानि नात्र कार्या विचारणा
एतत्सिद्धं महेशानि क्षणाद्दिंद्रत्वकारकः ॥ नवीजविष्णुनिर्माणं विधीनां दक्षपंचव ॥ कर्तुं शक्नोति देवेशि नात्र कार्या विचार
णा ॥ शिवत्तांडवतंत्रं तु यंत्रसिध्यभिधेपरे ॥ स्वंकार्णवेकसर्वेषु तथास्त्रंकंपनावपि ॥ अक्षोभ्यंकक्षपुद्यां तु वेवरीसिद्धिनाम
नि ॥ संक्षेपेण मया प्रोक्तं विस्तरोत्र प्रदर्शितः ॥ नवकोस्मसीकालो यंत्राणि सिद्धिरत्निव ॥ पूर्वं सिद्धानि कार्याणि ततश्च प्रत्ययं च

रेत्॥ कोष्ठकयंत्रं देवेशि लिख्य घर्मे प्रतापयेत्॥ यन्त्रास्त्रातापयेद्देवि समेवाकर्षयध्रुवं॥ पद्मीके नैव संलिख्य स्थापनीयमधोमुखं॥ तत्र स्थित्वा जपेच्छक्तिं सर्वाकर्षणात्मकं नरः॥ पंचाशत्पद्मपर्णानं समीके फलमेककं॥ सर्वहस्तगतं भूयान्नात्र कार्यविचारणा॥ जलं स्थलगतं नौका यत् किं विज्ञगतीगतं॥ स्त्रीरत्नहेमरत्नादि स्वर्गपातालमप्यहं॥ सर्वमाकर्षयेन्मन्त्री कालीतारप्रसादतः॥ कालीताराप्रसादेन महामधुमतीभवेत्॥ कालीतारा मया प्रोक्ता तारा काली तथा परा॥ काली कालो कालकालीना राक्षोभ्यस्तथैव च॥ अक्षोभ्यतारा देवेशि प्रत्येकं योजयेद्द्विवे॥ यस्योच्चारं शिवे दीनस्तोठंमारि संमतं॥ कालीपीठे जपेद्द्वारीं तारापीठे तु कालिका॥ कालीपीठे जपेत्कालं तथैवाक्षोभ्यतारिणी॥ मेधानाकमलाक्षस्या वामाधं वक्रपकर्मणि॥ हत्यं प्रोक्तमाकर्षभगाय शक्तिपूजने॥ पीठमेतन्मया प्रोक्तं रहस्यातिरहस्यकं॥ गोपनीयं गोपनीयं गोपनीयं महेश्वरि॥ अवश्यं कुरु देवेशि स्वयोनिपरमा यथा॥ ॥अथ धारणायंत्रं॥ श्रीदेव्युवाच॥ राज्ञां भाग्यवतां देव येश्वरक्षाभिजायते॥ उर्ग्रहाश्च तथा दुःखं दातुं नेच्छंति नद्विषः॥ कथं स्यात्स्थिरसंपत्तिः संततिश्चकथं क्रिया॥ साधकैस्तत्र कर्त्तव्या सिद्धिः केषां प्रजायते श्रीईश्वर उवाच॥ अथ यंत्रविधिं वक्ष्ये सर्वतंत्रेषु गोपितं॥ सिद्धस्य लिखनाद्देव यंत्रासिद्धिः प्रजायते॥ नभावियंत्रकार्यं तु सिद्धस्थापितदा भवेत्॥ दुःखप्रदर्शनं पूर्वं तदा यंत्रं न कारयेत्॥ साधकस्य शुभे घस्ते समाराध्येष्टदेवतां॥ स्वपेत्त्रिदिवसं भूमौ

हविष्याशीजपेत्ततः॥ एतद्यंत्रंकरिष्यामिममतत्कीदृशंप्रभो॥ स्वप्नेवदेतद्देवेशितदेगत्वेनपूजनं॥ प्रदोषसमयेकृत्वास्वपेत्त्रि
दिवसंभुवि॥ तृतीयेदिवसेरात्रौयथास्वप्नंप्रजायते॥ तत्पैवाज्ञांगृहीत्वानुसमस्वप्नेवालिखेद्बुधः॥ उः स्वप्नेवाप्यसुस्वप्नेनैवकुर्यात्त्रिरे:
छिनत्र॥ विलिखेद्धेमलेखिन्यागोधाष्टकसमन्वितं॥ दूर्वाकाण्डेनवालिख्यंकुशमूलेनवापुनः॥ सुवर्णपट्टेभूर्जेवारूप्येवाप्यथसुव
ते॥ स्थलाउक्रौभूर्जपत्रेक्षौमेवातालपत्रके॥ जीवसंस्थापनेयंत्रेकुर्याद्येनफलंलभेत्॥ एकान्तेसाधकपदंमध्येवीजोर्ध्वतोलिखे
त्॥ द्वितीयांतंसाध्यमधः ऊरुद्वंद्वंचपार्श्वयोः॥ हंसोयंत्रस्यजीवःस्यान्मध्यभागस्थोलिखेत्॥ हंसःसोहंमनोरस्यलिखेद्दैकमध्य
रं॥ ईशानादिषुकोणेषुरक्षपार्श्वेवरद्वयं॥ ऊर्ध्वयेतामपार्श्वेचपूर्वाशादौलिखेत्क्रमात्॥ लंरंमंक्षंतथावंयंसंहंपूर्वादिकेलिखे
त्॥ ईशानपूर्वयोर्मध्येश्रींक्रींवायव्यसौम्ययोः॥ एवंदिक्पालवीजानिदशदिक्षुन्यसेत्क्रमात्॥ यंत्रराजायविद्महेवरप्रदायधीमहि
तन्नोयंत्रःप्रचोदयायंत्रगायत्रिकास्त्वियं॥ एतस्याःप्रतिकाष्ठायांलिखेद्वर्णत्रयंत्रयं॥ वहिःप्राणप्रतिष्ठायांमंत्रंसर्वत्रवेष्टयेत्
स्वेनुलिखितेयंत्रंभवेत्सिद्धिप्रदायकं॥ यंत्रंविलिख्यगुटिकांवध्वासूत्रेणवेष्टयेत्॥ लाक्षयाच्छादितेस्वर्णेरूप्येताम्रेथवाक्षि
पेत्॥ यद्देवतंतुयंत्रंस्यात्तद्वीजेनचपूजयेत्॥ तदभावेमातृकार्णैर्यंत्रपूजांसमाचरेत्॥ अष्टोत्तरसहस्रंतुमूलंजप्त्वाऽनेनघृतं
तत्संपातेनसंसिक्तंकृत्वामंत्रंनियोजयेत्॥ मूर्ध्निवाहोगलेवापितद्धार्यदिष्टार्थसिद्धये॥ ऽपास्यामृतलिपिः यंत्रसिद्धिविधायिनि

अल्केशेनैव सर्वेषां मंत्राणां सिद्धिमाप्नुयात् ॥ ॥ मंत्रोद्धारं प्रवक्ष्यामि तत्रोद्धारः सबिंदुकः ॥ अनुस्वारसमुद्धार्य्य ऋंहेंओंऔं ततो वदेत् ॥ हं यं रं वं ततो लं डं कं खं गं घं इति क्रमात् । वर्णात्मा माद्यं द्विचतुस्त्रिवर्णाश्चाद्विचतुष्टये । वर्गे भ प्रोद्धारे षं समेवं व्यविपरीकः ॥ ऋषिः स्याद्दक्षिणामूर्त्तिर्गायत्री छन्द ईरितं ॥ वर्णेश्वरी देवतास्य षडंगानि समाचरेत् । स्वरहीनैर्ह्याद्यैश्च मंत्रार्णैः पंचपंचभिः ॥ गुदे लिंगे हृदे नाभौ कंठे भ्रूमध्यके त्रयोः ॥ शिरसि त्रस्वरं ध्रुवं क्रमान्न्यसेत्तत्र स्वरान् । ऊर्द्ध्वप्राग्दक्षिणोदिक्पश्चिमेषु सुखेषु च ॥ हं यं रं वं लमिति च बीजान्न्यस्येत्ततः परं ॥ तथा करांगे मूले च कूर्प्परांगुलिसंधिषु ॥ दक्षवामक्रमेणैव ङ्णाद्विवर्गं च आदिकं ॥ वर्णान्न्यसेत्तथा पादाग्रके मूले च जानुनोः ॥ तथा संधावंगुलीनां गुल्फे सर्पदिनादिकान् ॥ उदरे पार्श्वयुग्मे च नाभौ पृष्ठे च मन ॥ गुह्ये हृत्कुंदीमध्ये णाद्यसान्विन्यसेत्क्रमात् । ततो भूततलिपिं ध्यायेत् त्रिनेत्रां चंद्रशेखरां । वराक्षमालामस्त्राणि कपालं च दधत्करैः ॥ लक्षं श्रजप्याद्युतं लिलैर्हुत्वा च तर्प्पयेत् ॥ एवं भूतलिपिः सेव्या यंत्रसिद्धिः प्रजायते ॥ ॥ अथ कालीताराछिन्नमस्तकसर्वसिद्धिप्रदधारणयंत्रमाह ॥ काली तारा छिन्नमस्ता विद्यात्रितयके पुनः ॥ सर्वरक्षाकरं यंत्रं धारणार्थं वदाम्यहं ॥ योनियुग्मे लिखेन्मूलमंत्रं हेमशलाकया ॥ क्लीं वह्नीनां दीर्घवर्णान् षट्कोणे विलिखेत्ततः ॥ अष्टपत्रे च अष्टवर्गान् ततो बहिः भूरद्वयं ॥ अष्टवर्गान् भूपुरे च विलिखेत्साधकोत्तमः ॥ सुवर्णपट्टे भूर्जे वा रूप्ये वा ताम्रपत्रके ॥ वेष्टितं पीतवस्त्रेण यत्नेनापरिवेष्टयेत्

जयमाप्नुयात्॥ चत्वारिंशत्समारभ्य शतांतं परमेश्वरि। अयुतं च पुरश्चर्या यंत्रमात्र महेश्वरि॥ पुरश्चरणसंपन्नो प्रयोगानथ कारयेन्॥ रजस्वलाभगं स्पृष्ट्वा नत्वा स्तुत्वा महेश्वरि॥ योनिक्षतेरजो येन संलिखेद्यंत्रमुत्तमं॥ शिखायां धारयेन्नित्यं लिंगे वाहो हृदिस्थले॥ त्रैलोक्याकर्षणं यंत्रं धारयेद्गुरुराज्ञया॥ विंशत्पंकात्मकं यंत्रं त्रिकोणांतर्गतेन्न [illegible]॥ धारणात्सर्वसिद्धिः स्यात्कालिकादर्शनं भवेत्॥ खेचरीकालिकासिद्धिः निर्वाणेशो भवेत्क्षणात्॥ ब्रह्मा सृष्टिं वितनुते विष्णुः स्थितिकरो मतः॥ रुद्रः प्रकुरुते ध्वंसी यंत्रराजप्रभावतः॥ किंपुनर्वकुनोक्तेन कालिकाहृदिसर्वस्वं॥ यंत्रं त्रैलोक्यमोहनं। त्रैलोक्यमोहनं लब्ध्वा त्रैलोक्यं क्षोभयेत्क्षणात्॥ त्रैलोक्यविजयी भूत्वा यंत्रपूजां समाचरेत्॥ एतद्यंत्रं विहायाथ यः कश्चित्सिद्धिमिच्छति। स चक्षुषा विना रूपं दर्शनेद्रष्टुमिच्छति॥ तस्मात्सर्वप्रयत्नेन कालीयंत्रं च धारयेत्॥

॥अथातः संप्रवक्ष्यामि तारायंत्रं तु सिद्धिदं। भूर्जपत्रे लिखेद्यंत्रमलक्तकरसेन तु॥ षट्कोणमध्ये ॐ ह्रीं त्रीं हुं फट् वर्णान्ससाध्यकान्॥ तद्बहिश्चाष्टपत्रस्य केशरेषु द्विशः स्वरान्॥ पत्रेषु काद्यष्टवर्गान्बहिर्भूपुरमालिखेत्॥ पीतांबरेण संवेष्ट्य बध्नीयात्पट्टसूत्रतः। शिशूनां कंठतो बद्धं रक्षाकृत्भूतभीतितः॥ वामबाहौ तु नारीणां पुत्रदं गतिदं भवेत्॥ दक्षबाहौ नराणां च निर्द्धनानां धनप्रदं॥ ज्ञानदं ज्ञानभिक्षूणां राज्ञां तु विजयप्रदं॥

॥अथात उग्रतारायाः संग्रामजयदं शृणु॥ लज्जां श्रीकूर्चं चास्त्रं तारः पंचार्णकैः पुटं॥ साध्यनाम लिखेन्मध्ये षट्कोणस्य भूर्जके। लाक्षारसेन तं कृत्वा स्वैरैरावेष्टयेत्ततः॥ वहिरष्टदलं

वध्नीयात्पीनवस्त्रेण शिश्नूनां कंठभूषणं ॥ स्त्रीणां वामभुजे चैव पुंसां वै दक्षिणे भुजे । वंध्यापि लभते पुत्रं निर्धनो धनवान्भवे
त् ॥ इयं रक्षा पुरा बद्धा ज्ञानार्थं गोतमादिभिः ॥ कीत्यर्थं पार्थिवैश्चान्यै संग्रामे जयकांक्षिभिः ॥ वाग्भवं कुलदेवीश्च तारकं वा
ग्भवं पुनः ॥ हृल्लेखा चास्त्रमंत्रान्ते वह्निजायावधिर्मतः ॥ अष्टाक्षरोष्टवर्गो मंत्राणां सार ईरितः ॥ ॥ रपा मायाविंशाने यंत्रे
त्रिकोणावमिसुंदरि ॥ चल श्चासर्वदुःखेभ्यो मुक्तो भवति सर्वथा ॥ कुर्यात्रिकोणं विधिवन्मध्ये रेखाद्वयं लिखेत् । पूर्वप
श्चिमतः कांते कोणे रेखाद्वयं पुनः ॥ उत्तरे रेखाद्वयं दद्याद्देवकोणं भवेत्ततः ॥ पंक्तिधामध्यकोष्ठे तु लिखेदेकं च कोशतः ॥
तृतीये तु द्वयं तस्याधः स्थले देवसंज्ञकं ॥ द्वितीये कोणे तृतीये वाणांत द्रुहुणां त्वधः ॥ कोणे ष्टो च तथा न्यस्य द्वितीये कोण
के शिवे ॥ रूप्ये सरासिसंस्थाप्य तदधः सूर्यसंख्यकं ॥ तस्य यंत्रफलं वक्ष्ये शृणु सुंदरि मत्मुखात् ॥ कस्याग्रेपि न वक्तव्यं
परं सिद्धिप्रदायकं ॥ एकांते पर्वते रम्ये नदीतीरेथवा वने ॥ स्थित्वा एकमना भूत्वा यवाशी विजितेंद्रियः ॥ सत्यवाक्पुण्य
चरितः सर्वसंगविवर्जितः ॥ निर्भयः स्त्रीयंत्रक निद्रावर्जित शोकमोहजित् ॥ सितानुसाडिमीलेख्य भूर्वके नियतो लिखे
त् । यावल्लक्षद्वयं देवि हीनं विंशतिभिर्मशं ॥ जपेत्षडक्षरं मंत्रं महाकाल्याः कुलेश्वरि । कुलमार्गेण संपूज्य कुलपीठे लि
खेत्सदा ॥ दशवारं तु सम्यस्य लोकेशमोहनं चरेत् ॥ वारविंशतिकं कृत्वा सर्वाकर्षणकृद्भवेत् । वारत्रिंशतिकं कृत्वा पृथिव्यां

किंकरास्तस्य राजानः सन्तु साक्षान्महेश्वरः॥ वातस्तंभं जलस्तंभं वह्नेः शैत्यं तथैव च॥ षट्कर्मसाधनं देवि हेलयैव प्रजायते॥ कुष्मांड भूत
वेतालयक्षगंधर्वराक्षसाः॥ दूरादेव पलायंते तं तं दृष्ट्वा साधकोत्तमं॥ मृतवत्सा तथा वंध्या रोगशोकभयार्द्दिता॥ धारणाद्यंत्रराजस्य
सर्वसौख्यवती भवेत्॥ प्रचंडचंडिकायंत्रं धारयेद्यस्तु भक्तितः॥ तस्य सर्वार्थसिद्धिः स्यान्नान्यथा कुलसुंदरि॥ ॥अथ श्रीविद्याधा
तथा
रणायंत्रं। हिरण्ये रजते ताम्रे मरौ भूर्जे च पट्टके॥ अंकित्वा धारयेद्यस्तु शिरःकंठभुजेपि वा॥ यानि कानि च पापानि ब्रह्महत्यासमानि च
मुच्यते सर्वपापेभ्यो श्रीचक्रस्य च धारणात्॥ पापानि विलयं यांति ज्ञानाज्ञानकृतानि च॥ सर्वं संदह्यते श्रीघ्रं चक्रराजस्य धारणात्॥
भूतप्रेतपिशाचैश्चाप्यपैर्ब्रह्मराक्षसैः॥ डाकिनी शाकिनी भिर्वापि वीक्षितुं नैव शक्यते॥ महाक्रूरग्रहैर्वापि सर्वः शुभग्रहो भवेत्॥ अका
लमृत्युं हरति सततं संनिहिता परा॥ परा सन्निहिता यत्र किं कुर्वंत्यन्यदेवताः॥ श्रीचक्रं धारयित्वा तु यस्तु प्राणान्परित्यजेत्॥ कीकटे वांत
रिक्षे वा निषिद्धे कस्मले पि वा॥ कृत्वा चेंद्रियलौल्येन पापानि तु बहून्यपि॥ स कैवल्यं लभेन्नूनं न पुनर्जन्मभाग्भवेत्॥ यमदूताः पलायं
ते दृष्ट्वा श्रीचक्रधारिणां॥ ब्रह्मज्ञानेन वा मोक्षः काश्यां वा यस्तनुं त्यजेत्॥ श्रीचक्रधारणाद्वापि त्रयो मोक्षस्य कारणं॥ सर्वदेवगणास्तत्र
सर्वधर्मास्थितत्र वै॥ गंगाद्याः सरितः सर्वे पुष्कराद्या जलाश्रयाः॥ पुरुषोत्तममुख्याश्च क्षेत्रानन्दवनादयः॥ वाजिमेधादियज्ञस्य फलं तत्र ॥ गुरुः ॥
विकलं भवेत्॥ अथान्यत्रैपुरं वक्ष्ये भूर्जे च पट्टके वा समालिखेत्॥ मध्यमांतं समध्ये तु कामबीजं समालिखेत्॥ कोणे चापि लिखेत्कामं वह्नि: ॥ ३७९ ॥

कृत्वा कवर्गाद्यष्टकं दले ॥ वेष्टितं पीतवस्त्रेण जतुना परिवेष्टयेत् । वध्नीयात्पीतसूत्रेण पश्चान्नीलकंठभूषणं । स्त्रीणां वामभुजे वध्वं नराणां दक्षिणे भुजे ॥ वंध्या पिलभते पुत्रं निर्धनो धनवान्भवेत् । इयं रक्षा पुरा वद्धा रक्षार्थं गौतमादिभिः ॥ कार्त्तवीर्येण पार्थिवेश्चान्यैः संग्रामजयकांक्षिभिः ॥ इति नीलसरस्वत्या यंत्रमेतदुदीरितं ॥ ॥ अथ छिन्नाया धारणयंत्रं । अतः परं सुरेशानि यंत्रं ते कथयामि च ॥ आदौ त्रिकोणं विन्यस्य वारत्रयसुशोभितं ॥ षट्कोणं विलिखेत्पश्चात्ततो वृत्तत्रयं लिखेत् । वस्वर्कदलविन्यासं तद्वाह्ये षोडशाक्षरं ॥ भूलाष्टकसमायुक्तं भूपुरत्रितयं पुनः । योनिमध्ये लिखेन्मंत्री लज्जागर्भं तु कूर्चकं ॥ वाह्ये तु मायां विलिखेत् षट्सु कोणेषु वाग्भवं ॥ अनुलोमविलोमेन वृत्तमध्ये च मातृकां ॥ कूर्चद्वंद्वक्रमेणैव अष्टपत्रं प्रपूरयेत् । लक्ष्मीं कूर्चं ततो मायां वाग्भवं च ततो हरेत् । वज्रवैरोचनीयेति होमित्यंते न पार्वति ॥ लिखेत्सा विक्रमेणैव दलेषु द्वादशक्रमात् । रमा कूर्चं तथा लज्जा वाग्भवं वज्रवैपदं ॥ रोचनीयत्र पाठं च मस्त्रमंत्रेऽग्निवल्लभा ॥ इयं या षोडशी प्रोक्ता सर्वतंत्रेषु गोपिता तथैव पूरयेद्दे विक्रमेण षोडशाक्षरं । शक्तिचितत्वमस्त्रं च लिखेद्वारेषु मंत्रवित् ॥ पश्चाद्यंत्रं महेशानि निजवीजेन वेष्टयेत् ॥ निक्षिपेद्भूर्जपत्रे च लिखेद्यंत्रं मनोहरं । अष्टम्यां वा चतुर्दश्यां शनिभौमेऽह्नि अथवा संक्रांत्यां वज्रयोगे वा पुष्यार्के च विशेषतः ॥ पूजयित्वा महादेवीं पश्चाद्यंत्रं प्रपूजयेत् । काश्मीरागुरुकस्तूरीकुंकुमेन स्वयंभूकुसुमेन वा । लिखित्वा यंत्रराजोयं गोलमध्ये निधापयेत् । स्वर्णे रौप्येऽथवा ताम्रे दैवस्त्रे तथैव वा । स्थापयित्वा यंत्रमेनं धारयेद्यस्तु मानवः ॥

षोडशपत्रकं ।। कुर्यात्पत्रेषु विलिखेत्कामबीजानि तद्बहिः कृत्वा वृत्तद्वयं वीथ्यां हं बीजेन प्रवेष्टयेत् ।। तद्बहिश्चतुरस्रं तु कुर्या-
द्यंत्रं विलेखयेत् ।। गोरोचनाकुंकुमाभ्यां संपत्सौभाग्यकारकं करोति कवितां कांतिं साधकस्यानसंशयः ।। ।।अथ भैरव्याधारणा
यंत्रं ।। मध्याद्ये नैयोनिषु प्रविलिखेद्बीजानि क्लीं त्रिषु गायत्र्याः पुनरष्टपत्रविवरेष्वालिख्य लिप्यावृतम् ।। भूबिंबान्वितयेन मन्मथ
भुजाकोणेषु संवेष्टितं यंत्रं त्रैपुरमीरितं त्रिभुवनप्रक्षोभनं श्रीप्रदम् ।। ।।गायत्री यथा ।। क्लीं त्रिपुरे विद्महे कामेश्वरी धीमहि तन्नः
क्लिन्ने प्रचोदयात् ।। ।।अथातः संप्रवक्ष्यामि लक्ष्मीयंत्रं रमाप्रदं ।। भूर्जपत्रे लिखेत्पद्मं कर्णिकायां कुवं न्यसेत् ।। तस्योदरे लिखे-
त्क्लीं ह्रीं कामं साध्यस्य नाम तत् ।। तत्केशरेषु संलेख्यं श्रीं ह्रीं क्लीं च दिगष्टके ।। लिखेद्द्वादशपत्रेषु क्रमादेकैकमक्षरं ।। वाचं मायां रमां
कामं ह्स्रौं इति क्रमकं ।। जगत्प्रसूत्यै हृदयं द्वादशार्णो मनुस्त्वयं ।। तद्बाह्ये षोडशदलं केशरेषु द्वयं द्वयं ।। ककारादि सकारांतं द्वात्रिंशद्व-
र्णकान्लिखेत् ।। तारं श्रीं कमलं चैव ह्रैं क्षैं ह्रीं हूं ततः परं ।। क्षं फ्रौं फडिति सूर्यार्णः त्वरितामंत्र ईरितः ।। यंत्रमेतत्सदा लक्ष्म्याः प्रोक्तं संपत्क-
रं परं ।। सर्वसौभाग्यदं चापि सर्वदुःखविमोचनं ।। ।।अथातो राजमातंग्या यंत्रं वक्ष्ये सुसिद्धिदम् ।। सुवर्णरचिते पट्टे लेखन्या स्वर्णरूप्य-
योः ।। राजते फलके वापि भूर्जे वा सुमनोहरे ।। काश्मीररोचनारक्तश्वेतचंदनकस्तुरैः ।। लिखेद्यंत्रं तु तत्रादौ त्रिकोणं सम्यगालिखेत् ।। सा-
ध्यनामान्वितं तत्र श्रीं क्लीं बीजद्वयं लिखेत् ।। तेष्वंत्रिकोणकोणेषु ऐं क्लीं सौंश्च क्रमेण च ।। तद्बाह्ये तु षट्कोणं तद्दलेषु लिखेत्क्रमात्

स्वापादि प्रादक्षिण्येन ऐं क्लीं सौं ऐं ततो लिखेत्। ह्रीं श्रीं तस्य बहिः कुर्यात्पंचयत्रसरोरुहं। ॐ नमः प्रथमे पत्रे भगवती ति द्वितीयके। मातंगेश्वरि तृतीये सर्वजनमनोहरे। चतुर्थं स्यात्पंचमर्थं स्यात्सर्वसुखरंजिनी॥ वहिश्चाष्टदलं कृत्वा क्लीं ह्रीं श्रीं प्रथमे लिखेत्। एतानपि लिखेन्मंत्र सर्वराजवशंकरं। द्वितीये तु दले सर्वस्त्रीपुरुषवशंकरी। तृतीये सर्वदुष्टेति लिखेन्मृगवशंकरी। चतुर्थे सर्वसत्वेति लिखेद्वापि वशंकरी॥ पंचमे सर्वलोकेति लिखेत्पत्रे वशंकरी॥ लिखेत्षष्ठे तथा पत्रे अमुकं मे वशमानय। स्वाहा सप्तमपत्रे भ्रैं श्रीं ह्रीं ऐं सौं श्वं क्लीं चैं। वृत्तद्वयं तु तद्बाह्ये वीथ्यां तत्र प्रवेष्टयेत्। बीजैः षट्कोणकप्रोक्तैः ष्टपत्रे द्विपत्रजैः। ङक्काद्यैस्तत्रस्थादिपत्रसंस्थैश्च वर्णकैः॥ ततोष्टपत्रजैर्वर्णैरिवं पुनश्शताक्षरैः। वृद्द्वयं तु तद्बाह्ये तत्र वीथ्यां तु संलिखेत्। साध्यनामायुतानेकान्मत्कार्णान्क्रमोत्क्रमात्। तद्बहिश्चतुरस्रं च तत्कोणे भुसमा लिखेत्। साध्यनाममयुतं कामबीजं योत्यंतसुद्धिमान्। तेन लेख्यमिदं यंत्रं साधुः सर्वभुजंतुष्ठ॥ एतद्यंत्रं लिखेत्त्वेवं ततः संपातपूर्वकं। कृत्वा प्रजप्य संपूज्य गुटिकां कृत्य साधकः॥ साभिषेकः स्वयं वा हे दक्षिणे तद्विधारयेत्। पूज्यते त्रिदशाद्यैश्च किं पुनर्मानवोत्तमैः॥ आयुरारोग्यमैश्वर्यमन्यद्यद्यत्सुवांछितं। पुत्रपुत्रादिकं चापि लभेत्तेनात्र संशयः॥ ॥अथातो भुवनेश्वर्या यंत्रं सर्वार्थसिद्धिदं। इंदुरक्षोवा पुटिक्ककोणां अस्त्रं समालिखेत्। ह्रींकारं तस्य मध्ये तु रेकस्तारूनमालिखेत्। साध्यनामाथ ह्रीकारस्यान्ते साधकनाम च। तयोर्मध्ये कर्णे लेखं ह्रींकारं वेष्टयेन्नतः। त्रिकोणस्य तु को

णेषुरंवीजं त्रिषुसं लिखेत्॥ त्रिकोणाग्रे लिखेत् क्रीँ च क्रीँ कार स्थित रेफकैः॥ अन्योन्यं वेष्टयेद्वीजं ईकाराग्रं परस्परं॥ वह्नीयाद्यथ को
णस्य पार्श्वयो विलिखेद्दिति॥ हरिहरेति वेदार्णान्नेतोवृत्तत्रयं वहिः॥ आद्यवीथ्यां हरिहर वर्णायंत्रे प्रवेष्टयेत्॥ द्वितीयवीथ्यां मात्रा
र्णैः सविन्द्विकार संयुतैः॥ विष्टयेत्ततोवाह्ये भूपुरं सिद्धिदं त्विदं॥ यस्य कस्यापि मंत्रस्य भाग्यकृत्परमं मतं॥ अत्रापि संपदे देवी पूज
येत्साधकोयदि॥ तदा भास्वो परिप्राज्ञो विदध्याद्दष्टपत्रकं॥ तस्यापरिवृदास्यादि विलिखिंत वापि मंडलं॥ तत्रावाह्य यजेद्देवी यथाविधि
समाहितं॥ हृल्लेखाद्याः समभ्यर्च्य पूर्ववत्साधकस्तथा॥ अंगानि पूजयेत्पश्चाद पत्राद्याः प्रपूजयेत्॥ प्रागग्रवीजे गायत्री सावित्री
दक्षिणाग्निके॥ सरस्वती मारुतस्य ब्रह्माणी वह्निगे तथा॥ वारुणे विष्णुमीशां च यजेदीशानतोवहिः॥ ब्रह्माण्याद्या लोकपालास्तद्वाह्ये
ऽलिशासतः॥ एवं त्रिगुणितं यंत्रे पूजयेत्साधकोत्तमः॥ देवीतस्याः प्रसादेन संपत्तिवहुलं भवेत्॥ ॥ अथातः संप्रवक्ष्यामि मह
यंत्रं घटार्गलं॥ चतुरस्रद्वयेनादौ लिखेदष्टास्रमद्भुतं॥ साधकवंगुलं मध्ये यथा स्यात्तन्नाश्चविस्मृतं॥ प्रसादयस्ततोष्टास्त्ररेखाग्राणि तु
षोडश॥ प्रसारयेदंगुलानां चतुष्कप्रमितानि वा॥ चतुरंगुलविस्तारकर्पाटे न तु मध्यतः॥ आरभ्य वृत्तं संलेख्यं पुनः सप्तांगुलेन वा॥ ए
वं वीथीद्वयं तत्र जायते समतोहरः॥ तत्राभ्यंतर वीथ्यां तु केशराणि भवंति हि॥ त्रिकोणपंचकोणानि रेखासंपात योगतः॥ भवंति षोडशैव
हि ततो वाह्ये प्रजायते॥ दिक्षु विद्धो रसकोणानि भ्रूमतो दलिभानि च॥ एतेषां मध्यभागे तु स्वतो डमरुकाष्टकोरेखासंपातयंत्रस्या रेखा षट्कोणा

कस्यतु वृत्ताद्बहिर्वर्द्धनीयाः समाग्यांगुलमानतः। तयोरूर्ध्वे तु वलिभी तुल्यमेकांगुलांतरा। रेखाग्र यज्ञेत्रस्या यथा पद्मदलाकृति।
दलानामूर्द्ध्वसंलग्नं सम्यग्वृत्तं समालिखेत्। एकांगुलांतरेणैव ततश्चाहे च वृत्तयुग्मकं। कुर्यात्समाकृतस्य वाह्ये घट्येगांगुलांतरं। आ
स्तानीभूरवसंयुक्तं सकरां सुमनोहरं। डर्धास्यं तदधो लेख्यं पंकजं नलसंयुतं। अधोमुखं तस्य मुखेन लोष्ठांगुलसंमितः। स्वयं यंत्रश
रीरस्यादथ वर्णाञ्जुवीम्यहं। श्रीं ह्रीं क्रौं च लिखेत्तन्मध्ये व्यवधानेन संयुतं। साध्यं साधककर्माणि शक्तिवीजस्य मध्यतः। वायव्यकोणा
ग्निदले क्रौं लिखेदीशपत्रके। ह्रींकारं राक्षसे हुं च फें वायव्ये समालिखेत्। अष्टास्त्रमध्ये ह्रींकाराधस्तात् ह्रौं इति संलिखेत्। फः पूर्वा
दिकपत्रेषु चतुःस्वपि च संलिखेत्। अष्टास्त्रस्यांतरा तेन तु पंचकोणाष्टकं चयेत्। तत्रैशानी समारभ्य वीजान्येतानि संलिखेत्। ह्रां श्रीं ह्रीं
क्लीं श्रीं च ह्रीं श्रीं क्लीं मेतत्क्रमेण तु। पंचकोणांतरालेतु त्रिकोणानां यदष्टकं। ह्रींकाराधस्त्रिकोणानु लिखेद्वर्णान्त्रदक्षिणान्। का
मिनिरंजिनिस्वाहा एककोणे तथैककं। ततो लेख्यं डमरुकाष्टकस्य तु पश्चिमे दले। ईशानादि समारभ्य क्रमादेकैकमक्षरं। ह्रीं गोरिरु
द्रदयिते दमरूर्ध्वदले लिखेत्। योगेश्वरि हुं फट् स्वाहा ईशा- देकमक्षरं। ह्रींकारस्य तले भूम्यगेहे पार्श्वद्वयक्रमात्। डमरुणामेव सं
लिख्यमंतवृत्तात्परं परं। डमरुदक्षिणाशाखाया प्रवेशमगमत्क्रमात्। ह्लं ह्लां ह्लिं ह्लीं ह्लुं च ह्लूं च ततः पश्चिमपत्रके। ह्लें ह्लैं ह्लों ह्लौं ह्लं च
ह्लश्च ततो वह्निसमीरयोः। प्रवेशनिर्गमाभ्यां च यथा सामित्याधिकं लिखेत्। एवं लिख्यं दक्षिणोदक्क ह्रौं हयमुखान्विका। ईशानेन्द्र

मुक्तिं च लभते मध्ये नात्र कार्या विचारणा॥ यंत्रं कुंभे समालिख्य पूजयेत्पुरोक्तवत्॥ तं द्रष्टुं नैव शक्ताः स्युर्भूतप्रेतपिशाचकाः
समलिचत यंत्रं सम्यक्पूजादिसाधितं धृतं भजेन मुकुटे कुरुते रिपुसंकटे॥ रिपून्महाभटान्हत्वा जयलक्ष्मीयुते भवान्॥
॥ ॥ इति श्रीतंत्रचिंतामणौ काम्यार्चनायां साम्राज्यमुद्रिकापूर्वकधारणायंत्रनिर्णयनामोनचत्वारिंशत्तमः प्र
काशः॥ ३९ ॥ अथ सर्वोपयुक्ततया मातृकावर्णानां प्रत्येकं ध्यानादिकमाह॥ ॥श्रीभैरवोवाच॥ शृणु देवि प्रवक्ष्या
मि पंचाशद्वर्णनिर्णयं॥ येभ्यः प्रभवितं देवि त्रैलोक्यं सचराचरं॥ एकैकस्य तु वर्णस्य ध्यानधारणरूपकं॥ आयुधान्यास
नं मुद्राः कर्म्म तेषां पृथक्पृथक्॥ एतत्सर्वं समासेन शृणुष्व कथयामि ते॥ वऊशो मंत्रको यस्तु संसारे संभवंति च॥ सत्त्वाद्या
पशवः प्रोक्ता ईशानान्ताः सुमध्यमे॥ ब्रह्मा ते षीश्वरदत्तो मोचनायात्मकं प्रति॥ पंचाशदक्षरा एते कलाः पंच तथैव च॥ पृथिव्या
यानि भूतानि पंचैतानि पृथक्पृथक्॥ द्विसप्तभुवनं सर्वं ब्रह्मव्याप्तिसमंततः॥ एभ्यो मंत्राः समुद्भूता नानाकर्मकराश्च ये॥ मंत्रा
णां चैव रूपं च प्रमाणं दैवतं तथा॥ वक्त्राणि च भुजौंश्चैव वर्णान्वर्णायुधानि च॥ साधका ये न जानंति न तेषां सिद्धिदाः क्वचित्॥
यानि कर्माणि कुर्वंति यत्र यत्रापि योजिताः॥ तस्मात्सर्वप्रयत्नेन ज्ञातव्या मातृका बुधैः॥ ककारं कनकाभासं सौवर्णकलशासनं
सुवर्णकवचं हैमं महापुरुषविग्रहम्॥ खड्गहस्तं चतुर्वक्त्रं महारौद्रं चतुर्भुजं॥ क्षोभयेत्पृथिवीं सर्वां सशैलवनकाननां॥ पुरुषेण

नुस्मरेन्नित्यं विषनाशायकाकथा॥ खकारं क्षुभ्रवर्णाभं चापपाणि खरासनं॥ त्रिशीर्षं त्रिभुजं रौद्रं त्रिपादं नवलोचनं॥ सर्वग्रहहरं ह
न्तमंत्रणयहरन्तथा॥ सर्वज्वरहरञ्चैव ग्रहसैन्यविमर्द्दनं॥ गकारं गगनारूढमष्टबाहुं चतुर्मुखं॥ त्रिशूलपाणिरौद्रं च हिमकुन्देंदु
सन्निभं॥ विषंनाशयते ह्येष मार्जास्वगस्थिगं तथा॥ गजवक्त्रं स्वयं ह्यन्त्रं सर्वविघ्नविनाशनं॥ घकारं वृषभारूढं दशबाहुं महाबलं॥ पञ्चवक्त्रं त्रि
नेत्रं च शूलपाणिं महाभुजं॥ गजचर्म्मोत्तरासंगं घण्टाटंकविभूषितं॥ इंदीवरदलश्यामं मेघगंभीरनिस्वनं॥ ब्रह्मराक्षसवेतालान्नाशयन्नात्रसं
शयः॥ ङकारं नागमारूढं द्विभुजं पिंगलोचनं॥ हरहासं सितं सौम्यं वीणाखड्गरसं सदा॥ स्मरनां चैव सर्वेषां बालग्रहविमर्द्दनं॥ नाशयेहृ
रणादेष विषं स्थावरजंगमं॥ चकारं तु हिनाभासं शशांकांकितशेखरं॥ चतुर्वक्त्रं चाष्टभुजं पाशपट्टिशधारिणं॥ पद्मासनरतं नित्यं सर्व्वाभ
रिउतमेखलं॥ ध्यानधारणसंयुक्तं येषाचांदिसमन्वितं॥ दुष्टरोगैश्चनेकैर्विद्याधिकाज्वरव्याधिभिः॥ सर्वैर्न्नेमुक्तरोगाश्च स्मरणादस्य जायते॥
गोनासाजगरैर्द्दष्टाडुंडुभारैश्च मारिताः॥ विषाणां नाशनं ह्येष करोत्येव न संशयः॥ नद्विषं नाशमायाति नमः सूर्योदये यथा॥ छकारं श्वेतव
र्णाभं वृक्षगलस्थं महाबलं॥ भुजैः षोडशभिर्द्दिव्यैराक्रमानं यथा रविं॥ पट्टिसं परशुं शूलं मुद्गरं कलशं तथा॥ अन्यानि धारयेत्यंतमायुधानि
विशेषतः॥ यस्मिन्स्थानं विषं घोरं स्थितं स्थावरजंगमं॥ नाशयेत्त्वरितं ह्येष स्मरितो नात्र संशयः॥ जकारं हरिणारूढं द्विभुजं नवशीर्षकम्॥
शृंखलाचायुधं तस्य शशांकांकितशेखरं॥ यस्यानुस्मरणादेवि विषं स्थावरजंगमं॥ नाशयेत्सुस्थितो ह्येष पयोदामिव भास्करः॥ झकारः

रु॰१

कृष्णमेघाभं षड्भुजं नवलोचनं। त्रिशीर्षं च महाकायं दंष्ट्रालीढं बलीयसं। सर्वग्रहमहारौद्रा ज्वरश्चाभूतदोषजं। विषं हालाहलं रौ
द्रं यागानां कृत्रिमं तथा। मुष्टिना ग्राहयित्वा तु ड स्थापयति तत्क्षणात्। णकारं घनवर्णाभं भिन्नांजननिभोपमं। मकरस्थं चतुर्वक्त्रं
भुजाष्टकविभूषितं। असिमुद्गरहस्तं च वज्रहस्तं महाबलं। बालग्रहाणां सर्वेषां पठनादेव नाशनं। ढकारमग्निवर्णाभं दहन्तमिव पा
वकं। भुजैः षोडशभिर्दिव्यैर्दिव्यमाल्यकृतं वपुः। मेषारूढं महाकायं सर्प्पमेखलमारितं। त्रिशीर्षं च बृहद्रूपं सिंदूराभं महाद्युती
ज्वलंतं मुद्गरं शक्तिं ज्वालाजटिलभूषितं। ग्रहाणां निग्रहो ह्येष भूतानां डाकिनीषु च। निमज्जन्मो जपेदेनं नंनये द्विषदूषितः। ठकारं कुं
दपुष्पाभं वृषारूढं महाबलं। चतुर्भुजं महाकायमेकशीर्षं त्रिलोचनं। गोक्षीरधवलं नित्यं विषसैन्यविमर्द्दनं। आत्मरक्षा परस्यैव पथि
वा निर्जने वने। गजसिंहवराहेषु व्यालव्याघ्रभयेषु च। विषबंधे प्रमोक्तव्यं जीवरक्षासु चिंतयेत्। सुवर्णममतं जपेनं कालदंष्ट्रो भवेद्य
दि। अहीनां स्तंभने प्रोक्तं सर्वसत्वेषु शीतलं। डकारं हरितं ध्यायेद्दंष्ट्राभीषणविग्रहं। चतुर्वक्त्रं महाकायं चतुर्विंशार्द्धलोचनं। धर्मास
नसमारूढं दंडपाशिं जटाधरं। यक्षराक्षसभूतादिडाकिनीसिद्धयोगिनी। स्कंदादीन्सरोगांश्च पिशाचोरगकिन्नरान्। कुभांडरा
क्षसांश्चैव स्मरणादेव नाशयेत्। ढकारं भुजगारूढं फणिलक्षणभूषितं। ज्वलनार्कप्रतीकाशमारक्तायतलोचनं। दंष्ट्राकरालिनं
घोरं मेघगंभीरनिःस्वनं। चतुःषष्टिभुजैर्दिव्यैर्नानाप्रहरणायुधैः। दंष्ट्रारं काक्षमालांश्च शूलपट्टिशधारिणं। गदामुद्गरपाशांश्च ख

अंवक्रंचविभ्रतं।क्षोभयेत्पृथिवीसर्वांसशैलवनकाननां॥सुरकिन्नरसिद्धानांदैत्यदानवराक्षसां।नागानांदमनोहोय
पातालतलवासिनी॥ड ढिमाकर्षणोयोज्वंमेघानांचनिवारणो।लूठागर्दभविस्फोटलोहलिंगादिचर्चिका।डाकिनीभू
तदोषांश्चनाशयेन्नात्रसंशयः॥णाकारंगौरवर्णाभंनामसीकुसुमप्रभं।चतुर्भुजंचतुर्वक्त्रंकृत्मंदस्त्राकरालिनं॥राजवर्ण
निभंरूपामंजरभासुरलोचनं।मेरुशृंगयुतंभीमंचापहस्तविभूषितं॥त्रासयंतंमहानादंक्षोभयंतंरसातलं॥विषांश्चवि
विधाकारान्नश्यंतेनात्रसंशयः॥तकारंरक्तवर्णाभंपूर्णाकुंभोपरिस्थितं।शशांककृतमूर्द्धानंद्विभुजंमीनवाहनं॥एकशीर्ष
नतसूक्ष्मैनेत्रत्रयविभूषितं॥निःशेषविषनागानामंतरायंविशेषतः॥स्मरणान्नाशयेच्छूलंघनवाताहतायथा॥थका
रंहिमवर्णाभंशंखकुंदेंदुनिर्मलं॥मकारापृष्ठमारूढमारक्तायितलोचनं।दीर्घस्कंधंसुरूपच्चशरचापंचविभ्रतं।सन्म
पंचस्वयंदेविकंदर्पग्रहनाशनं।दीपैरगरुपुष्पैश्चसुगंधैश्चानुलेपनैः॥अकारमरणंत्वेषनाशयेत्पचिरात्स्वयं॥दकारंश्वेत
वर्णाभंकंबुवाहनसंस्थितं।क्षीरोदकलशावर्त्तमध्यगंचिंतयेत्सदा॥त्रित्रिशीर्षंमहाकायंशोभमानंत्रिलोचनं॥त्रिनेत्राणि
वसर्वाणिवक्त्राणिसुस्थितानिच॥ज्वरंनाशयतेघोरंतृतीयकचतुर्थकं।साध्यंरात्रिज्वरंचैवशीतदाहज्वरंतथा॥धकारंपाट
लाभासंधनुष्पाणिंचतुर्भुजं।एकशीर्षंमहाकायंसिंहारूढंमहाबलं॥घोराट्टहासनिनदंग्रहसैन्यविमर्द्दनं॥दृष्ट्वानुहरतेदोष

क्षयादोषंचनाशयेत्॥ परदोषकृतंचैवबल्मीनांलंघनंतथा॥ अनिरष्टप्रहारैश्चरक्षतेनात्रसंशयः॥ नकारंनीलवर्णाभं
कृष्णसारकृतायनं॥ चतुर्वक्त्रंवाष्टवाकुंज्वालावंशधरंशुभं॥ तोमरास्त्रधरंनित्यंचक्रपाणिंसुभूषितं॥ विविधानिचयंत्राणि
धारयेत्तुविशेषतः॥ आकाशगमनंचैवगुलिकांगनसंनिभं॥ वेतालास्थापनंचैवस्वस्थानेसर्वकर्मणि॥ पकारंरक्तपद्माभं
पद्मस्थंपद्मधारिणं॥ शंखचक्रगदापाणिंपीतकाषायवासनं॥ चतुर्भुजंचतुर्वक्त्रंपद्मेशस्योपरिस्थितं॥ यक्षराक्षसभूतानि
पिशाचान्ब्रह्मराक्षसान्॥ कूष्मांडडाकिनीश्चैवभूतवेतालराक्षसान्॥ अपस्मारग्रहांश्चैवतथावालग्रहामपि॥स्मरणान्नाशयत्येव
विषंस्थावरजंगमं॥ कायिकंवाचिकंचैवमानसंत्रिविधंतथा॥ जन्मांतरकृतंपापंनाशयेत्स्मरणाद्दसौ॥ फकारंपश्यतेयोगी
योगिनीहृदयेनतथा॥ चतुर्भुजंचतुर्वक्त्रंहंसारूढंविचिंतयेत्॥ कपालीचाक्षमालीचखड्गिभेखलवानपि॥ सृष्टिकर्त्ताजगत्येव
त्रैलोक्यप्रभुरव्ययं॥ अमृताकर्षणाद्येषजीवदानेविशेषतः॥ भयनाशंसदाकुर्यात्सत्वानंदविशेषतः॥ वकारंकृष्णवर्णाभं
साक्षाद्वरुणदैवतं॥ नागासनसमारूढंफणि व्यालत्नोचनं॥ हिमकुंदेंदुसंकाशंशंखगोक्षीरसन्निभं॥ षड्विंशाद्विभुजंसौम्यं
मणिरत्नविभूषितं॥ गदापाणिंचदेवेशंराशिचक्रसमाकुलं॥ खड्गपाशधरंसौम्यंदाहज्वरविनाशनं॥ वातिकंपैत्तिकंचैवः
श्लेष्मकंसान्निपातिकं॥ वारिधारान्निपानेननिर्विषंकुरुतेक्षणात्॥ भकारंकृष्णवर्णाभंपीतकौशेयवाससं॥ दंडहस्तंमहाकायं·

महिषासुरवाहनं।कालपाशधरंरौद्रमारक्तायतलोचनं।तस्मात्सर्वप्रयत्नेनकालदष्टास्ययोजयेत्॥मकारंवृषमारूढंभस्मोद्धूलि
तधूसरां।नीलकण्ठध्वजटिलंसर्वनीतिकरंशिवां।पंचवक्त्रंदशभुजंत्रिशार्द्धपिंगलोचनं।कपालासिधरंतीक्ष्णांत्रिशूलांकुशधारिणां।
यकारंसंप्रवक्ष्यामिस्वयंवायुव्यवस्थितं।षड्भुजंशतवक्त्रंचमहावलपराक्रमं।कुरंगासनमारूढंशुभ्रांवरधरंतथा।सर्वदोषाःसमंयां
तिसिंहंदष्ट्वायथामृगाः॥रफारमग्निवर्णंतुरक्तकौशेयवाससं॥रक्ताक्षंरक्तदंष्ट्रंचरसनासप्रव्याकुलं।चतुर्भुजंचतुर्वक्त्रंकालाग्नि
रुद्रतेजसं।दुष्टानांप्रसमास्थाय्यविषसुप्तप्रबोधयेत्॥लकारंपीतवर्णाभंवज्रहस्तंमहावलं॥ऐरावतसमारूढंमहस्ताक्षंसुरेश्वरं॥
चामरैरासुवर्णैर्वीज्यमानेसुरासुरैः॥मेरुपृष्ठेसुखासीनमप्सरोभिःसुसेवितं॥वकारंतुहिनाभासंमूषकपरिसंस्थितं।प्राबु
धंतस्यपाशंतुचतुर्वक्त्रंचतुर्भुजं।शुक्लवस्त्रधरंनित्यंसोमरूपंसुलोचनं।आप्यायनंचसर्वेषांविषाणांवैवनाशनं।शकारंसितप
द्मस्थंसितचंदनशोभितं॥षड्भुजंशक्तिहस्तंचशिखिवाहनसंस्थितं॥षड्वक्त्रंस्वयमेवेशतन्निजंशिखिवल्लभं।दर्शनात्तस्यनश्यं
तिमहापातकनाशयः।षकारंषड्भुजंरौद्रंत्रिशीर्षंनवलोचनं॥त्रिपादंरक्तनेत्रंचज्वलंतमिवपावकं।भूतपृष्ठेसमारूढंपाश
तोमरमुद्गरैः।शोभितंभुजदण्डैश्चसोमरूपंमहाप्रभुं।सकारंसर्वभूतेषुसर्वभूतेष्ववस्थितं।कृमिकीटपतंगेषुचिंतयेदमृतोप
मं।हकारंसंप्रवक्ष्यामिशब्दरूपंपरात्परां।सूक्ष्मंनीरंजनंनित्यंशब्दातीतंपरात्परं।भिन्नेंद्रनीलसंकाशंकालिंदीजलसन्निभं॥ध्या

त्वावनाशयेत्येव विषं स्थावरजंगमं ॥ क्षकारं पठ्यते यस्तु स्वयंभुवरुणायकं ॥ पद्मासनसमारूढं शशांकाङ्कितशेखरं ॥ जटामु
कुटसंयुक्तं पंचवक्त्रं त्रिलोचनं ॥ अणिमाद्यष्टकं प्रोक्तं सर्वायुधविभूषितं ॥ दराउकं ठारवमालां च गदावक्रत्रिशूलिनं ॥ अंकुशं
रत्नपात्रं च सर्वतो परिवारितं ॥ सर्वसिद्धिकरो ह्येष क्षकारः परिपठ्यतां ॥ ब्रह्माविष्णुमहेशाद्या नित्यं ध्यायंति योगिन ॥ एतं संत्रव
रं प्राप्य त्यजेदन्यत्र लालवत् ॥ नवतत्वसमायुक्तं क्षकारं परिपठ्यतां ॥ ब्रह्माविष्णुमहेशाद्या नित्यं ध्यायंति योगिनः ॥ ॥ जपन्
स्मरं तं ध्यायेयं त्रभयं विंदते क्वचित् ॥ अधुनासं प्रवक्ष्यामि कलानाञ्च यथार्थतः ॥ पूर्वतं चैव वर्णानां तथैव मनु पूर्वशः ॥ अका
रं विष्णुदैवत्यं वैरसव्याघापराजितं ॥ शंखचक्रगदापाणिं चतुर्वक्त्रं चतुर्भुजं ॥ गरुडासनमारूढं सर्वदुष्टनिकृंतनं ॥ आकारं
ब्रह्मदैवत्यं हंसारूढं चतुर्भुजं ॥ चतुर्वक्त्रं सरूपं च पुरक्तायितलोचनं ॥ दण्डं कमण्डलुं चैव मुंज मेखलधारिणं ॥ ब्रह्मसूत्रधरा देवी
ब्रह्माणी परिपठ्यतां ॥ इकारं पार्वतीदेवी सोम्यरूपा त्रिलोचना ॥ सुभ्रु ललाट विम्बोष्ठा वलित्रितयशालिनी ॥ कुटिलाकुंजिताकेशी
पीनोन्नतपयोधरा ॥ ईकारमीश्वरं विद्याजटामुकुटधारिणं ॥ शशांकशेखरं देवं पंचवक्त्रं त्रिलोचनं ॥ कपालमालिनं देवं जटामुकु
टधारिणं ॥ शिवशक्त्यासहैकोयं त्रिदशेरपि दुर्लभं ॥ स्मरणात्सर्वपापानि नाशयेन्नात्र संशयः ॥ ऋऋऌॡः ऋग्वेदं च यजुः साम
प्रकीर्त्तितः ॥ वेदमाथर्वणं चैव प्रजाकाले तु चिंतयेत् ॥ ऐकारं षण्मुखं विद्याच्चतुर्विंशार्द्धलोचनं ॥ शिखिवाहनमारूढं शक्तिहस्तं

महावलं॥स्मरणान्नाशयेद्देवकौमारग्रहपीडनं।ऐकारं सुरराजेन्द्रमैरावतरथस्थितं।तेजस्विनं सहस्राक्षं वज्रहस्तं महावलं॥द्विभुजं सौम्यवदनं मेवत्रयविभूषितं।ओकारं सिंहमारूढं त्रिनेत्रं च महावलं॥द्विभुजं सौम्यवदनं शोभमानं महाभुजं।शिवदूती च सा देवी श्मशाननिलया प्रिया।औकारे भैरवः साक्षाज्ज्वालाकपिललोचनं॥दंष्ट्राकरालिनं भीमं लेलिहानं सुभीषणं॥त्रिपादं त्रिकरं ज्ञेयं त्रिशीर्षकरशेखरं।स्वधारमहमातॄणां योगिनीनां सदालयं॥मूलमुत्तरवीराणां सिवीराणां कुशधरं तथा॥गजचर्मनिवद्धांगं सर्वमेखलमंडितं।सर्वाभरणसंयुक्तं मणिकुंडलभूषिते।नृत्यमानं श्मशाने च वेतालैः सह क्रीडते॥अंकारं विंदुसंयुक्तं शुष्का देवी तु भीषणा॥अंत्रांत्रपिशिताहारा चास्थिभिः कृतमेखला॥अस्थिशेषा च निर्मांसा प्रेतवाहनसंस्थिता।दंष्ट्राकरालिनी चाग्रा मेघगंभीरनिःस्वना॥शुष्का शुष्कमुखी भीमा वोईकेशी भयानका॥समांसरुधिराहारा श्मशाने नित्यवासिनी॥गजचर्मोत्तरीया तु नानाभरणभूषिता॥चामुंडा मुण्डवेगा च रक्तेश्वरी हृदयंगमा॥अः षोडशं चैव वीजं शीतं तुहिनशीतलं॥मूर्तीन्दुवदनं सौम्यं करो[illegible] षोडशवत्सरा।सिध्यमानं सदा ध्यायेद मृतं स्रवते सदा॥एतद्वा ध्यायनं जीवो विषमज्वरनाशनं॥एकाह्निकं सुह्न्नं च द्वितीयकचतुर्थकं॥शीतज्वरे महाघोरे पित्तोन्मादज्वरं तथा॥मासे षण्मासिके चैव तथा संवत्सरादिके॥नाशनं सर्वरोगाणामायुरारोग्यवर्द्धनं॥एतद्देवि मया ख्यातं धर्मसर्वस्वमात्मनः।न कस्यचिन्मया ख्यातं त्वां विना वरवर्णिनि॥यो न जानाति मूढात्मा मातृकाज्ञानमुत्तमं[illegible]॥

वर्थः परिश्रमस्तेषां सिद्धिमार्गस्तु इरग ।। क्षेमशंभुः स्वयं देवे पंचास्यश्चंडशेखरः ।। स्फद्दांगांकुशाभूताक्षमालाटंकमनीगतां ।। दंडमुन्दरवकां वरदशपाणिं हलायुधं ।। धर्माधर्मवेदयुगो धर्मासननरोईगः ।। वर्णाक्षत्रेश्वरा मंत्रानष्थल्केन संस्थिताः ।। सिद्धिदाः पूजिता नित्यं जपध्यानप्रतर्पणैः ।। तस्मात्सर्वप्रयत्नेन वर्णाध्यानं सुजायुवा ।। कार्य्यसिद्ध्यै चिंतनीया नियोज्यास्तवदर्शनाः ।। उमातिलकनितेत्ताः प्रेक्ष वाक्यागमानुरूतन ।। ।। अथ क्रमेण दशविद्याया मंत्रभेदानाह तत्रादौ श्यामा मायाः ।। ।। क्लीमित्येकाक्षरो मंत्रः कालिकायाः प्रकीर्त्तितः जपपूजादिकं प्राग्वद्विशेषाद्योगमोक्षदः ।। कालीहृदयविद्यां च सिद्धविद्यां महोदयां ।। पुरा येन तथा सिद्धिमरापुस्त्रिदिवौकसः ।। मंत्रराजमिदं ख्यातं दुर्लभं पापचेतसां ।। सुलतां सुलभं भक्त्या साधकानां महात्मनां ।। अनया सदृशी विद्या नहि सारस्वतप्रदा ।। ।। वलासरस्वती प्रोक्तो देवतामुखसंस्थितः ।। विद्याशक्तिसमायुक्तः कीली मंत्र उदाहृतः ।। एकं वा द्विगुणं वापि त्रिगुणं वापि भैरव ।। जप्त्वाकर्षयेत्सर्वं जगत्स्थावरजंगमं ।। एषा विद्या महाविद्या गुह्याद्गुह्यतरा स्मृता ।। पूर्वबीजं परं शक्तिबीजेन मूर्त्तिकल्पना ।। षड्दीर्घभाजाबीजेन कुर्याद्दंगादिकल्पना ।। ।। अक्षरीया महाविद्या नामयकथयामि ते ।। मूलबीजं तथा मायालज्जाबीजं ततः परं ।। एषा विद्यानमात्रेण भवेद्गंगाधरः स्वयं ।। आदौ वाग्भवबीजं तु वह्न्यारूढः प्रजापतिः ।। श्रियायुक्तो विन्दुनाद बीजमेतत्त्रिधा पठेत् ।। कथितेयं महाविद्या कौलिकीकुलसुन्दरी ।। सर्वसौभाग्यनिलया सर्वसौख्यप्रदायिनी ।। सर्वगपदायिनी श्यामाकवित्त्ववित्तवर्द्धिनी ।। सुप्तादिदोषरहिताः

स्मरणात्सर्वसिद्धिदा।नापेक्षाजपहोमस्यन्यासस्यविशेषतः।ग्रहणात्सिद्धिदाविद्यानंदिकेश्वरपूजिता।भैरवोस्यऋषिःप्रोक्तउष्णिक
छंदउदाहृतः।देवतादक्षिणाकालीसमस्तफलसिद्धिदा॥कालीवीजंवकूंमायांकुंफट्एवंवाक्षरोमनु॥न्यासध्यानादिकंप्राग्वच्छिरो
षाम्रतनाशनं॥ ॥क्रींशुक्लकालिकेस्वाहाषडर्णोमंत्रईरितः॥न्यासपूजादिकंप्राग्वच्छिरोषाङ्गोगदामतः॥कामबीजसमालिख्यका
लिकायैपदंलिखेत्।नमोंतेनचवेदवेशिसप्तार्णोमनुरुत्तमः।सर्वाङ्कंकालिकादेवीन्यासंतुपूर्ववत्॥ ॥अथातःसंप्रवक्ष्या
मिमंत्रमष्टाक्षरंपरं॥दक्षिणेकालिकेस्वाहामंत्रोष्टाक्षरईरितः॥न्यासःप्राग्वद्ध्यानमत्रशवरूपशिवस्थितां॥महाकालरतासक्तां
शिवाभिर्दिक्षुवेष्टितां॥नवशक्तियुतेपीठेताजयाविजयाजिता।तथापराजितानित्याविलासिन्यपिकीर्तिता॥दोग्ध्रीघोरामङ्गलेतिप्री
ठमंत्रोकवर्णकः॥ह्रींकालिकायोगपीठात्मनेनमउदाहृतः॥अंगानिपूर्ववाराध्यषट्पत्रेषुसमर्चयेत्॥कालीकपालिनीकुल्लां
कुरुकुल्लांविरोधिनीं॥विप्रचित्तांचसंपूज्यनवकोणेषुपूजयेत्॥उग्रामुग्रप्रभांदीप्तांनीलीघनांवलाकिकां॥मात्रांमुद्रांतथामित्रांष्टपा
पत्रेषुमातरः॥पूर्वोक्ताभ्रपरेप्रोक्ताभैरवाष्टौचभैरवी॥ततोमहाभैरवीचात्ततीयासिंहभैरवी॥धूम्राख्याभैरवीतुर्यापंचमीभीमभैरवी
उन्मत्तभैरवीषष्ठीवशीकरणभैरवी॥सप्तमीस्याद्दष्टमीतुप्रोक्तामोहनभैरवी॥दिक्पतीश्चततस्त्राणिपूजेवंपरिकीर्तिता॥चुरस्थर्या
दिकंप्राग्वन्नयोगानाचरेत्तथा॥स्त्रीणांप्रहारंनिंदांचकौटिल्यंचाप्रियंवचः॥आत्मनोहितमन्विच्छन्कालीभक्तोविवर्जयेत्॥स्रसमः

जामहिषादीनां कालिकावस्तुतर्पयेत् ॥ तस्य सुरविशदेव कारस्या सर्वसिद्धयः ॥ ॥ अथापरां प्रवक्ष्यामि विद्यां तां चनवाक्षरीमू
लवीजं समुद्धृत्य सेवुद्धेन्तपदद्वयं । स्वाहान्ता कथिता विद्या सर्वशत्रुक्षयंकरी ॥ स्ववीजं पूर्वमुद्धृत्य दक्षिणे कालिके ततः । स्ववीजं
चैव स्वाहान्तं च कालिका षोडशाक्षरी ॥ ॥ एकादशाक्षरी विद्या कथ्यते शृणु पार्वति ॥ वाग्भवं हृदयं चाद्य द्वयारूढं प्रजापति । चतुर्थं
स्वरसंयुक्तं नादविंदुविभूषितं ॥ त्रिगुणं च ततः कृत्वा ङें तं च कालिकापदं । स्वाहा च कथिता विद्या प्रिये एकादशाक्षरी ॥ ऋषिः स्या
द्दक्षिणामूर्त्तिश्छंदः पंक्तिरुदाहृतं ॥ परात्परतरा शक्तिः कालिका देवता स्मृता ॥ एकादशाक्षरी विद्या कालिकायाः सुदुर्लभा ॥ भा
गेन लभते चैषा चतुर्वर्गफलप्रदा ॥ लक्षत्रयं जपेद्विद्यां पुरश्चरणकर्मणि ॥ अन्यासां वर्णलक्षं स्यात् कथितं तन्मयो निना ॥ आसां
ध्यानमहं वक्ष्ये शृणु पंकमलानने ॥ ऋषिणा यत्पुरा प्रोक्तं दक्षिणामूर्त्तिसंज्ञिना ॥ चतुर्भुजां कृष्णवर्णां मुंडमालाविभूषितां ॥ खड्
गं च दक्षिणे पाणौ विभ्रतीं दीवरद्वयं ॥ कर्त्रिकां खर्परं चैव वक्रमाद्वामेन विभ्रतीं ॥ द्यां लिखंतीं जटामेकां विभ्रतीं शिरसा स्वयं ॥ मुंडमाला
धरां शीर्षे ग्रीवायामपि सर्वदा ॥ वक्षसा रणां नागहारेण विभ्रतीं रक्तलोचनां ॥ एवं संचिंतयेत्कालीं कलीकल्मषनाशिनी ॥ सततं भक्तिः
नम्रेसु भागैश्वर्यसुखेप्सुभिः ॥ गुरुं नत्वा विधानेन चिंतयेत्परदेवतां ॥ ॥ मायावीजद्वयं देवि दक्षिणे कालिके पदं ॥ कूर्च्चवीजं तथा
मायातदंते वह्निवल्लभा ॥ एषा काली महाविद्या सर्वसारस्वतप्रदा ॥ ॥ अथातः संप्रवक्ष्यामि शाक्तवर्णमनुत्तमं ॥ क्रीं हूं ह्रीं दक्षि

णेकालिके क्रीं हूँ ह्रीं दहप्रिया॥ यजनं पूर्ववत्प्रोक्तं न्यासध्यानजपादिकं॥ विशेषान्नृसुरादीनामयमाकर्षणाक्षमः॥ क्रीं क्रीं क्रीं
हूँ समाचार्य हूँ लज्जाद्वयमुद्धरेत्॥ दक्षिणेकालिके स्वाहा तिथिवर्णाः प्रकीर्तितः॥ मंत्रराजोयमाख्यातः पूर्ववत्स्यादुपासना॥
विशेषान्तराज्यानां मध्ये राज्यप्रदो भवेत्॥ ॥ अथ वक्ष्ये महेशानि कालीकल्मषनाशिनी॥ यस्योक्तराक्षमात्रेणा भवेद्वागीश्वरो
परः॥ धनं धान्यसुतं जायां हयं हस्तिनमेव च॥ यद्यन्मनसि वांछंति तत्सर्वं लभते ध्रुवं॥ स्नातः परतराविद्यातीर्थस्नातः परंतरां स्नातः पर
तरं कार्यं मुनीनां मोक्षदायनी॥ गृहस्थांच यतीनां च सर्ववांछाफलप्रदा॥ नार्चनं पूजनं तस्य मंत्रमात्रं जपेन्नरः॥ करस्थाः सिद्धयः स
र्वा भवंत्यस्य कलौ युगे॥ ॥ ब्रलत्रयं समुद्धृत्य रतिवह्निसमन्वितं॥ नादबिंदुसमायुक्तं लज्जाकूर्चद्वयं परं॥ पुनःक्रमेणोद्धृत्य वह्निजा
यावधिस्ततः॥ षोडशीयं समाख्याता विद्याकल्पद्रुमोपमा॥ पूर्ववत्पूजनं तस्याः सर्वं न्यासादिकं प्रिये॥ चतुर्दशी षोडशी च त्रिंशदर्णा
त्मिका च या॥ तासां लक्षप्रमाणेन स्यात्पुरश्चरणाकर्मणि॥ अन्यासां सर्वविद्यानां सर्वलक्षं प्रकीर्तितं॥ सर्वासां तु महापूजा दक्षिणावत्प्रकीर्तितां
अथापरां प्रवक्ष्यामि विद्यां विंशतिवर्णिकां॥ यस्याः प्रसादमात्रेण भवेद्भूमिपुरंदरः॥ मूलवीजं द्वयं भूयात्ततः कूर्चद्वयं वदेत्॥ लज्जायुग्मं
समुद्धृत्य सम्बोधनपदद्वयं॥ पूर्ववत्स्यात्तथा बीजान्यंते च वह्निसुंदरी॥ ऋषिः स्याद्दक्षिणामूर्तिः पंक्तिछंद उदाहृतं॥ देवता कथिता सद्धि
कालीदक्षिणापूर्विका॥ ॥ अथान्यं संप्रवक्ष्यामि मेकविंशतिवर्णकं॥ ॐ ह्रीं ह्रीं ह्रीं हुं हुं [illegible] क्रीं दक्षिणेकालिके वरदे त॥ त्रिः क्रीं हूँ हूँ शक्ति

युग्ममस्य न्यासादि पूर्ववत्।। बिल्वमूले शवारूढो वटमूले तथैव वा। लक्षं मनुमिमं जप्त्वा सर्वसिद्धीश्वरो भवेत्।। पंचमप्रतिनिध्यायं
दक्षिणाम्नायसिद्धिदः।। ।। मायाद्वंद्वं कूर्चयुग्मं मेंडांतं मादनत्रयं।। मायाविंद्वीश्वरयुतं दक्षिणे कालिके पदं।। संहारक्रमयो
गेन वीजमन्त्रकमुद्धरेत्।। एकविंशत्यक्षरो मंत्रः ताराद्यः कालिकामनुः।। स्वाहांतश्च त्रयोविंशत्यक्षरो मंत्रराजकः।। विना प्रणव
देवेशि द्वाविंशत्यक्षरो मनुः।। स्वाहां विनेत्येकविंशत्यक्षरः कामनो मनुः।। विंशत्यर्णा महाविद्या स्वाहाप्रणववर्जिता।। ध्यानपू
जादिकं सर्वदक्षिणावदुपाचरेत्।। ।। अथ ताराभेदाः।। मायावीजं समुद्धृत्य तकारं वह्निसंयुतं।। मायाविन्द्वीश्वरयुतं द्विती
यं वीजमुत्तमं।। कूर्चवीजं द्वितीयं तु फट्कारं तदनंतरं।। संपूर्णा सिद्धिमंत्रं तु रश्मिपंचकसंयुतं।। ताराद्याः पंचवर्णाद्यं श्रीमन्नी
लसरस्वती।। सर्वभावामयी शुद्धा सर्वाम्नायेनमस्कृता।। श्रीवीजाद्या यदा विद्यास्तदा श्रीः सर्वतोमुखी।। एषे वह्निमहाविद्या-
मायाद्या सकलेष्टदा।। वाग्भवाद्या महाक्रिया वाग्रूपा सर्ववाङ्मयी।। एवाक्रमगता प्राण्णा मतभेदाज्जगन्मयी।। तारास्तु रहिताद्य
र्णा महानीलसरस्वती।। कुल्लुकेयं समाख्याता केचिदिच्छंति तांत्रिकाः।। ।। अत्र यद्यपि वधूवीजं चन्द्रहीनमुपान्तं तत्तु शाप
दाना द्याक्रशापोत्तरं तु सर्वत्र मम च त्रंवध्वीजमिति ज्ञेयं।। ।। तथा च।। वसिष्ठशापिता चोग्रा न तु शीघ्रफलप्रदा।। अतस्ते नापि
मुनिना शापोदंतः सुदारुणाः।। ततः प्रभृति विद्येयं फलदात्री न कस्यचित्।। वंद्रवीजं त्रपां तस्यं वीजोपरि नियोजितं।। ततः प्रभृ

त्तिविधेयंत्वदूरिवयशस्विनी॥फलिनीसर्वविद्यानांजयिनीजयकांक्षिणां॥विपक्षयकरीविद्याश्रमतत्वंप्रदायिनी॥ ॥
अथातःसंप्रवक्ष्यामिदैत्यानांवरसिद्धये॥ब्रह्मणोपासितांतारांवल्यादिभिरुपासितां॥ॐत्रींह्रींहूंसप्तश्वार्ण्यह्रींहूंफट्न
गवर्णकः॥सुनिर्दिष्टाचगायत्रीछंदस्ताराचदेवता॥न्यासांस्तुपूर्ववत्कुर्याद्ध्यानमस्यानिरूप्यते॥ ॥श्वेतांबराचंद्रकां
तिंवंशार्धकृतशेखरां॥कर्त्रीचकपालंचकराभ्यांदधतींभजे॥नानालंकारशोभाढ्यांत्रीक्षणांपद्मसंस्थितां॥उच्चाटनेधूम्र
वर्णांशांतौश्वेतांस्मरेद्दमी॥ ॥अथातःसंप्रवक्ष्यामितारकस्यवरायतु॥ब्रह्मणोपासितांतारांद्वादशार्णांसुदुर्लभां॥वाचे
लज्जारमाकामहंसराश्रीस्वरान्विताः॥विसर्गाद्यःपंचमंतुड्टमेतदुदीरितं॥उग्रतारेॐफट्मंत्रःप्रोक्तोजपादिकं॥सर्वंपूर्व
वदेवास्यकलौप्रत्ययकारिणी॥ ॥अथातःसंप्रवक्ष्यामिब्रह्मणासमुपासितां॥हिरण्यकशिपोर्दैत्युवरंसप्तार्णांसंमिता॥प्रणवं
कवचंमायांह्रींप्राक्हूंटंचपंचमं॥ॐफडंततःसर्वमस्यन्यासाद्यंपूर्ववद्भवेत्॥ ॥अथातःसंप्रवक्ष्यामिसप्तार्णांवासवसेवितां॥ल
क्ष्मीप्रभृतिनासार्धंजिनमंतःसदाहली॥ब्रह्मोपासितसप्तार्णामध्येहूंटंतुपंचमं॥तस्यास्त्वासोस्तत्रचोक्त्वाबलरामेणसेविताम्
शत्रुक्षयकरीचेयंतथावाक्सिद्धिकारिणी॥ध्यानपूजादिकंप्राग्वत्सयोगादिकमेवच॥ ॥अथातःसंप्रवक्ष्यामिनाराय
णासुसेवितां॥पंचार्णांयत्प्रभावेनदैत्यानांकदनंकृतं॥ह्रींॐफट्स्त्रींवा[illegible]चपंचार्णामनोर्वेसिद्धिदा॥आसांत्रयाणांतुमुनिर्विष्णु

॥ तंत्रविं ॥
॥३८९॥

निर्विस्तु प्राग्वज्जपादिकं॥ ॥अथातः संप्रवक्ष्यामि मायाया समुपासित्तां॥ दक्षान्वरविराादित्यस्साविया तु षडक्षरी॥ ॐ क्रों हूं
क्रीं ऊं फडिति मुनीशोऽहं च पूर्ववत्॥ ज्ञेयं न्यासादिकं सर्वप्रयोगादिं च पूर्ववत्॥ ॥अथातं संप्रवक्ष्यामि चास्याः पंचाक्षरं मनुम्
जलेधरेव धार्यं तु मया सिद्धं कृतं सुराः॥ त्रीं हूं मायां हूं फडिति मनुः पंचाक्षरो मतः॥ मया पंचमुखेज्ञो दक्षमार्गेणाभो सुराः॥
देवांशेषु च विप्रेषु तथा धर्मपरेषु च॥ यमानां नियमानां च तत्र स्थानानि देवताः॥ वाममार्गाराधितास्तु कार्य्यं साधयितुं क्षमा।
दक्षिणाराधिता देवा राणसाहाय्यकारका॥ तेजोनिधीन्रिपून्हत्वा नयंति कुस्थाश्वतं॥ क्षत्रियाणां क्षयार्थं तु मया रामा
य चार्पिता॥ पंचामृतं सुरास्थाने मांसस्थाने च सूरणं॥ मत्स्यस्थाने रवं उवघो धर्मपल्या रतेरतं॥ अन्यत्सर्वं च देवस्या कुत्समेत्त
प्रकाशितं तु क्षस्तारां न सेवेत लोकद्वयपरिक्षयात्॥ अस्याः पूजादिकं प्राग्वत्क्लिष्टोषोच निरूपितः॥ तारायाः स्फुरो सिद्धीः
स्थिरते भ्रांतता भवेत्॥ ॥अथातः संप्रवक्ष्यामि महातारामनुं सुराः॥ सिद्धिमार्गे द्वये नापि वर्णावर्णाविकारता॥ त्रीं क्रों:
क्रों हूं नमस्तारायै महापद्मस्वरेत्त्वा तारायेसकलेस्फत्काऽस्वरान्तारयद्वयं॥ तरद्वयं वह्निजाया द्वाविंशार्णो मनुर्मतः॥ न्यास
पूजाजपाद्यं तु प्राग्वत्सर्वं समाचरेत्॥ ॥अथ छिन्नमस्ताया भेदाः॥ अथ वक्ष्ये षोडशार्णां चतुर्भेदमनुत्तमं॥ श्रीं क्रीं हूं ऐं
वज्रवैरोचनीये क्रीं वहूं प्रीया॥ दहनस्यैतितिथ्यार्णा लक्ष्मीवीजादिके धनं॥ लज्जावीजादिके वश्यं हूं [illegible]द्येनाघनाशनं॥ वाग्वी

॥ गुरुः ॥
॥३८२॥

जाप्येनमोक्षःस्याच्चत्वारःप्रणवादिकाः॥भवंतिषोडशार्णाश्चचतुर्मुखमुखेरिताः॥उपास्याश्चतुराम्नायेमुनिवृन्दसमीरितः॥
न्यासपूजादिकंप्राग्वत्किंचित्काम्यमिहोच्यते॥गुरवेदक्षिणांदद्याद्वस्त्राणिविविधानिच॥धर्मार्थकाममोक्षाणांपुरुषैरेवस
मश्रयः॥साधितोयंमहामंत्रःसर्वसिद्धिप्रदायकः॥ददात्यष्टौमहासिद्धीःकिंपुनःक्षुल्लकाःक्रियाः॥भुक्तौमुक्तौचशांतौचश्वे
तपुष्पंविनिर्दिशेत्॥आकृष्टौचवशीकारेरक्तमेवविनिर्दिशेत्॥स्तंभनेमोहनेचैवपीतपुष्पंविनिर्दिशेत्॥काम्यकर्मणिसर्वत्र
ध्यानेस्यात्पुष्पवर्णकं॥जाग्रच्छयानउत्तिष्ठभुञ्जानोमैथुनेपिवा॥सदाकालंजपेन्मंत्रंमातस्यनविद्यते॥लिखित्वास्वकरेमं
त्रंमुष्टिंवधसमाचरेत्॥स्तंभयत्याशुशस्त्राणियावन्मुष्टिंनमुंचति॥लिखित्वास्वकरेमंत्रंमुष्टिंवध्वसमाचरेत्॥स्तंभयत्याशु
शस्त्राणिमुक्तरोगःसुखीभवेत्॥ ॥अथातःसंप्रवक्ष्यामिविघ्नवर्णंमहामनुं॥वज्रवैरोचनीयेहूंह्रींफट्स्वाहाङ्कवादिकः॥
न्यासपूजादिकंप्राग्वत्किंचित्काम्यमुदीर्यते शुक्लेनध्यानमात्रेणमंत्रमेनंजपेद्बुधः।सर्पोरगाशतैर्दष्टंसतमुत्थापयेन्नरः॥मा
रयेदप्ययत्नेनकृत्स्नध्यानात्रसंशयः॥तर्पणंचप्रकुर्वीतपयसापायसेनच॥घृतेनमधुनावापिशुद्धयात्तत्रसाधकः॥ब्राह्मणा
क्षत्रियोवैश्यःशूद्रश्चेतियथाक्रमं॥तर्पणस्यविधानेनहठात्सिद्धिःप्रवर्त्तते॥ततोहोमंप्रकुर्वीतसमिद्भिःकुसुमैस्तथा॥श्रीफ
लानांफलानांचतथैवोदुंवरस्यच॥सर्वसिद्धिप्रदोहोमोविधातव्यःप्रयत्नतः॥शतमष्टोत्तरंकृत्वाजुहुयात्तर्पणोत्तरं॥पुष्पहो

मविधिंवक्ष्येसर्वकामफलप्रदं॥नित्यमष्टोत्तरशतंमासषट्कंसमाचरेत्॥अथवालक्षमात्रंतुकुर्यात्सिद्धिर्भवेध्रुवं॥आज्ययुक्तैःसा
मिषस्यहोमात्तेप्रत्यहंवशि॥श्वेताश्वमारकुसुमैःजीवयेत्कालदंशितं॥मध्वक्ततिलपुष्पैस्तुभवेत्संपत्तिरद्भुता॥कर्णिकारैश्चसति
लैःसहस्रैःसुंदरीलभेत्॥साज्यैर्वधूककुसुमैरयुतैःशुभगोभवेत्॥वंधकपुष्पसतिलतंडुलेमित्रतोरिवैस्तैः॥रक्तचंदनरक्ताश्व
मारपुष्पैर्नृपोवशः॥ ॥अथश्रीविद्याभेदमाह॥सकलाभुवनेशानीकामेशीवीजमुद्धृतं॥अनेनसकलाविद्याःकथयामिवरा
नने॥शक्त्यन्तंभृर्यवर्णाद्यंकलमध्येसुलोचने॥वाग्भवंषट्वर्णाढ्यंकामराजमथोच्यते॥मादनंशिववन्ह्याद्यंशितांतंमीनलोचने
कामराजमिदंभद्रेषड्वर्णंसर्वमोहनं॥शक्तिवीजंवरारोहेचन्द्राद्यंसर्वमोहनं॥एतांसुपास्यदेवेशिकामःसर्वाङ्गसुन्दरः॥कामराजो
भवेद्देविविद्येयंब्रह्मरूपिणी॥ ॥कामराजाख्यविद्यायास्त्रितयंसुरवंदिते॥महाद्यंशक्तिवीजंस्याकामराजेततःपरं॥हित्वाचं
द्रंमुखेकुर्याद्विद्येयंनंदिपूजिता॥ ॥कामराजाख्यविद्यायाःशक्तिंभृर्यंचसुंदरि॥हित्वामुखेशिवेन्द्वाद्यालोपामुद्राप्रकाशिता
कामराजाख्यविद्यायावाग्भवेनवरानने॥विद्योद्धारंप्रवक्ष्यामिशक्तिमादनमध्यगं॥मादनंकामराजेतुविद्येयंवंद्राधिता॥ ॥
हसाननंवाग्भवंतुशिवाद्यंसहमध्यगं॥मादनंकामिनीराजंनात्रीयंशृणुपार्वति॥हसाद्यंशक्तिशक्तिवीजंतुकुवेरेणप्रपूजिता॥ ॥
श्रीवीजमायाविशयोनिशक्तिस्तारंचमायाकमलाथविद्या॥शक्त्यादिवीजेश्चविलोमतोन्त्याश्रीषोडशीपंचशिवप्रदिष्टा॥ ॥श्रीमाया

मदनोवाणीपरानारंशिवड्रिया। हरिप्रियात्रिकूटासापरावाणीमनोभवा॥मायालक्ष्मीमहाविद्याश्रीवीजषोडशीपरा॥ ॥अथत्रिपुरभैर
व्याभेदाः॥संपत्प्रदानामतस्याःशृणुनिर्मलमानसे॥शिवश्चंद्रौवह्निसंस्थौवाग्भवंतदनंतरं॥कामवीजंतथादेविशिवचंद्रस्थितंततः॥पृ
थ्वीवीजंतुवह्न्याढ्यंतार्त्तीयंशृणुवल्लभे॥शक्तिवीजेमहेशानिशिववह्नीनियोजयेत्॥कुमार्यापरमेशानिहत्वासर्गंतुवैदद्यं॥त्रिपुरा
भैरवीदेविमहासंपत्प्रदाभवेत्॥आतीप्रार्कसहस्राभांस्फुरच्चंद्रकलायुतं॥किरीटरत्नविलसन्नासाविधृतमौक्तिकां। स्रवद्रुधिरपंका
ढ्यांमुंडमालाविराजितां॥नयनत्रयशोभाढ्यांपूर्णेंदुवदनान्वितां॥मुक्ताहारलताराजिपीनोन्नतघनस्तनीं॥रक्तांवरपरीधानांयौव
नोन्मत्तरूपिणीं॥पुस्तकंचाभयंवामेदक्षिणेचाक्षमालिकां॥वरदानरतांनित्यांमहासंपत्प्रदांस्मरेत्॥ न्यासपूजादिकंसर्वंकुमार्या
इवकुरुते॥ ॥अन्यासंपत्प्रदांवक्ष्येदेवींत्रिपुरभैरवीं॥हकारंचसकारंचखंकारंचफरेतथा॥एकारस्वरसंयुक्ताविंदुनादविभूषि
ता॥पंचवर्णात्मकंकूटंप्रथमंपरिकीर्तितं॥द्वितीयंवीजमैकारंसौंस्यात्तृतीयकं॥एवंमंत्रःसमाख्यातोद्विरावृत्त्याषडंगकं॥प्राग्वद्
न्यान्वदेन्यासाध्यानमस्यानिरूप्यते॥उद्यत्सूर्यसहस्राभांचंद्रचूडांत्रिलोचनां॥नानालंकारसुभगांसर्ववैरिनिकृंतनीं॥स्रवद्रुधिरमुं
डालीललितांसुसुवाससां॥डमरुंचत्रिशूलंचखड्गंखेटकमेवच॥पिनाकंचशरान्पाशानंकुशंपुस्तकंतथा॥अक्षमालांदधद्धस्तैःशव
सिंहासनस्थितां॥एवंध्यात्वाजपेत्पीठंप्रथमंपीठमंत्रतः॥अघोरेऐंअंघोरेमायांघोरठयंतरे॥श्रीसर्वतःसर्वसर्वेभ्योनमस्तेपदंवदेत्

रुद्ररूपेभ्यो ह्रीं श्रीं च देवार्णः पीठमंत्रस्ततः ॥ ततः पूज्यास्तु पीठस्य शक्तयः स्युष्टदेशतः ॥ वामां ज्येष्ठां च रौद्रीं च कालीं च वरतो वनां
कालाख्यां च वलाख्यां च यजे द्विकरणीं ततः ॥ वलप्रमथिनी चापि सर्वभूतदमां तथा ॥ द्वादशैताः क्रमाद्देव्यो महतीं च मनोन्मनं
पूजापीठे समुद्धृत्य प्राग्वदंगानि पूजयेत् ॥ रम्यादित्रयमभ्यर्च्य तथानंगानिकान्यजेत् ॥ ब्राह्म्यादि युग्मं संपूज्य वसुपत्रेषु मातृ
काः ॥ भूविम्वं लोकपालांश्च सायुधान्परमेश्वरि ॥ अन्यत्सर्वप्रयोगाय त्रिपुराभैरवीसमं ॥ ॥ चैतन्यभैरवीमंत्रं त्र्यक्षरः कथ्यतेधु
ना ॥ सहावेकारसंयुक्तो प्रथमं वीजमीरितं ॥ सहैंक्लीं समायुक्ता द्वितीयं वीजमुच्यते ॥ सहरा क्षौं समायुक्ता विसर्गांतास्तृतीय
कं ॥ उद्यद्भानुसहस्राभां नानालंकारभूषितां ॥ मुकुटोल्लसखंडरेखां रक्तांवराचितां ॥ पाशांकुशधरां नित्यां वामहस्तकपालिनीं
वरदाभयशोभाढ्यां पीनोन्नतघनस्तनीं ॥ एवं ध्यात्वा यजेद्देविं सर्वसिंहासनास्थितां ॥ द्विरावृत्या षडंगानि न्यसेत्सर्वांगलक्षणं
त्रिकोणं चैव षट्कोणं वसुपत्रं ततः परं ॥ चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् ॥ प्रथमावरणं चात्र षडंगैः परिकल्पयेत्
रत्यादिकास्ततः पूज्या त्रिकोणाग्रेषु संस्थिताः ॥ वामे कामं विधुं दक्षे यजेद्वाणांश्च पूर्ववत् ॥ डाकिनी राकिनी चैव लाकिनी काकिनी ततः
साकिनी हाकिनी चापि पश्चिमादिक्रमाद्यजेत् ॥ अनंगकुसुमाद्याश्च वसुपत्रेषु पूर्ववत् ॥ परमत्तारसास्थ्यो च अधुकमेघाकृयेयुतः
अपांगभूविलासैश्च मावहावीच पूजयेत् ॥ पुरश्चर्यादिकं प्राग्वत्प्रयोगांश्चापि साधयेत् ॥ तद्वदेव त्रयं त्वादिशो न्यासादिकं तथा ॥

अथातः संप्रवक्ष्यामि भुवनेश्वरभैरवीं॥ हसौवेकारसंयुक्तौ प्रथमं वीजमीरितं॥ हसकलाह्रीं समेता द्वितीयं वीजमुच्यते॥ हसौवे
कारसंयुक्तौ विसर्गान्तं तृतीयकं॥ षड्दीर्घान्वितमध्येन वीजेनोक्तं षडंगकं॥ जवाकुसुमसंकाशां डाकिनीकुलमप्रभां चन्द्र
रेखाजटाजूटां त्रिनेत्रां रक्तवाससं॥ नानालंकारसुभगां पीनोन्नतघनस्तनीं॥ पाशांकुशवराभीतिदधानां वशिवांश्रये॥ चैतन्यभै
रवीवत्स्याद्यद्यत्रोक्तमिहाथ तत्॥ षडंगावरतां चात्र पूर्ववत्परितो यजेत्॥ रत्याद्याः पूजयेद्देवि त्रिकोणे तदनंतरं॥ ब्रह्मविष्णुमहे
शाद्यास्तत्र पूजा वहिः पुनः॥ डाकिन्याद्या वसुदले षड्दले डाकिनीमुखा॥ अनंगकुसुमाद्याश्च ब्राह्म्यादिद्विगलं ततः॥ भूविम्बे
लोकपालांश्च वटुकाद्यांश्च पूजयेत्॥ चतुःषष्टियोगिनीभ्यो हृदंतोयं दशाक्षरः॥ अष्टपत्रेषु भूविंवे त्वेकोद्धारेण पूजयेत्॥ अ
ष्टादशकोटिमहायोगिनीभ्यो नमोर्चयेत्॥ जपादिकप्रयोगाश्च ज्ञेयाः प्राग्वत्तु देवहि॥ ॥ अथातः संप्रवक्ष्यामि भैरवीं कमले
श्वरि॥ हसस्यानेस हेसुक्तासर्वमंत्रादि पूर्ववत्॥ राज्ञा ज्ञाता ततः शप्तां तु हिमागे भवानदी॥ त्यक्तस्तया वाममार्गी राज्ञभीत्या तु म
ल्ते॥ यतो लक्षं तया दुःखं कलौ ख्यातिं गमिष्यति॥ द्वापरे भुवदेवेषु प्रत्यक्षेयं भविष्यति॥ अवर्णाश्चापि वर्णाश्च भजिष्यंति व
रप्रदां॥ त्यक्त्वा मपञ्चकं पूजां कृत्वा ये जपतत्पराः॥ अस्यातीरे पुरश्चर्यानवकास्तं प्रसीदति॥ भुवनेशीभैरवी तु कृत्वा रूपांतरं मम
कार्यार्थे वहवः शिष्याः कोतिकावामिनः कृताः॥ तस्मात्यातो यर्चनादि प्राग्वद्दक्षिणमार्गतः॥ ॥ अथातः संप्रवक्ष्यामि हसरा

यांवभैरवी॥भुवनेश्वरभैरव्याबीजादौहसरान्यठेत्॥त्रयाणामपिबीजानांप्रथमंव्यंजनात्मकान्॥हत्वाण्यांतथाविद्याप्रावर्त्तजा
दिकंमतं॥ ॥अथातःसंप्रवक्ष्यामिसिद्धकोलेशभैरवीं॥आद्यंतबीजयोरेफरहिताहसरादिका॥कोलेश्वरीभवेद्विद्याकोलि
कानांसुसिद्धिदा॥संपत्प्रदाभैरवीवत्सर्वंध्यानजपादिकं॥ ॥अथमहालक्ष्मीभेदाः॥अथातःसंप्रवक्ष्यामिसप्तविंशाक्षरंमनुं॥ता
तारमाशक्तिलक्ष्मीकमलेकमलालये॥प्रसीदद्वितयंह्रींश्रींश्रीमहालक्ष्मीस्तथा॥गायत्रीछंदउद्दिष्टंमुनिर्दक्षप्रजापतिः॥ल
क्ष्मीदेव्यथपंचांगंत्रिबीजपुटितैर्मनोः॥वर्णैस्त्रिरामरामास्त्रिवेदैर्ध्यानमथब्रुवे॥सिंदूराभांचपद्मस्थांपद्मंपद्मेचदर्पणं॥अर्थपात्रं
चदधतींसव्यरंमुकुरान्वितां॥नानादासीपरिवृतांकांचिकुंडलमंडितां॥लावण्यपद्मिकांवंदेसुंदरीगदवाकुकां॥पूर्वोदितेयजेत्पीठे
वक्ष्यमाणेनवर्त्मना॥पुरंगानियेत्पश्चाच्छ्रीधरादीन्ततःसुधीः॥श्रीधरश्चहृषीकेशोवैकुंठोविश्वरूपकः॥वासुदेवश्चसंकर्षणः॥प
द्युम्नानिरुद्धकौ॥तदग्रेष्टदलेपूज्याभारतीपार्वतीतथा॥ब्राह्मीसतीदिक्षुचैताआग्नेयादिविदिक्षुच॥दमकःसलिलश्चापिगुग्गु
लश्चकुरंटकः॥एवंचत्वारस्तुगजास्तृतीयेष्टदलेचयेत्॥अनुरागोविसंवादोविजयावल्लभोमदः॥हर्षोबलश्चतेजश्चयजेल्लोके
श्वरान्बहिः॥शक्रादायुधानित्वाचेपूजयेच्चंदनादिभिः॥एवंसंपूजयेल्लक्ष्मींयोमर्त्यःसधनीभवेत्॥लक्षंजपेत्फलैर्बिल्वैर्जुहुयान्मधु
रासिक्तैः॥दशांशंसंस्कृतेवह्नौप्राक्प्रोक्तेनैववर्त्मना॥एवंसिद्धमनुर्मंत्रीसाधयेदिष्टमात्मनः॥चंदनाक्तैःसरसिजैर्लक्षंप्रजुहु

नेत्सुधीः॥ लभतेवैरिणीराज्यंतथैवसमरंविना। राज्यलक्ष्मीमतुंचैवप्राप्यराजसभांव्रजेत्॥ तथासम्मान्यतेनित्यंनात्रकार्याविचारणा॥ सहस्त्रीश्रीलतात्वभ्येतसर्वापराजिता॥ भगामधुवुताशक्रवल्लीनांजलिमृणाली॥ हरिचंदनकालीयकर्द्दररक्तचंदनं। कुष्टकंकोलकाश्मीरहरिद्राशिखरीसमं॥ पिष्ट्वासम्यक्वसंजप्त्वमष्टोत्तरसहस्त्रके॥ अनेनतिलकंकुर्यात्सर्ववश्यंभवेद्ध्रुवं॥ पूर्वोक्ताश्चात्रसिध्यंतिप्रयोगावांछितार्थदाः॥ ॥ॐश्रुक्वाससेप्रोक्तानमोमहाश्रियेचहृत्॥ चतुर्दशाक्षरोमंत्रोलक्ष्मीहृदयनामकः॥ मनोःपदेश्चपंचांगपूर्वेतुध्यानपूजनं॥ जपस्त्रिलक्षमेतस्यपयेर्होमोदशांशतः॥ मुनिछंदादिकंप्राग्वप्रयोगाःपूर्ववन्मताः॥ एतस्योपासकानांतुनवंशेस्याद्दरिद्रता॥ योतोमोतभयेप्रोक्ताश्रीधेश्रीनमइत्यपि॥ एकादशार्णोमंत्रोयंजमदग्निर्मतोमुनिः॥ त्रिष्टुप्छंदोरमादेवीषडंगविधिरुच्यते॥ योतोमोतभयेनमोहृदयायनमस्तुहृत्॥ योतोमोनभयेस्वाहाशिरसेह्निवधूःशिरः॥ योतोमातभयेवषट्शिखायैचवषट्शिखा॥ योतोमोतभयेहुंस्यात्कवचंकवचायहुं॥ श्रियैनेत्रत्रयायवौषट्प्रोक्तानेत्रंतुविन्यसेत्॥ श्रीनमोस्त्रायफट्चेतिचस्त्रेगुल्फादिकेतथा। ध्यानपूजादिकंसर्वंमहालक्ष्मीवदाचरेत्॥ नित्यंद्वादशसाहस्त्रंसमारात्रंमनुंजपेत्॥ तेनसिद्धोभवेन्मंत्रःसाधकस्यनसंशयः॥ होमःपूर्वादितेद्रव्यैर्दशांशंतर्पणादिकं। कृत्वाप्राप्नुयाभीष्टंतंमंत्रसिद्धिःप्रजायते॥ लक्ष्मीसुवर्णांबुकरांध्यात्वामंत्रमिमंजपेत्॥ अष्टोत्तरसहस्त्रंचसलभेद्वांछितांश्रियं॥ [illegible]साधयेद्ध्रुवम्॥ मासत्रयंतथाजप्त्वाग्रामंमंत्रीम

वाप्नुयात्॥ ॥अथमातंगीभेदाः॥अथातः संप्रवक्ष्यामि वश्यमातंगिकामनुं॥ॐ राजमुखि राजाभिमुखि वश्यमुखीति च॥मायां
श्रीं क्लीं देवदेवि महादेवि ततो वदेत्॥ देवाधिदेवि सर्वेति जनस्य मुखमुच्चरेत्॥ मम वशं कुरु द्वंद्वं स्वाहांतो गजतारकः॥ दिक्तमह
तवेदेषु मंत्रार्णैः रंगकल्पनं॥ विज्ञेयं राजमातंगी तुल्यं पूजाजपादिकं॥ प्रयोगांश्च विजानीयाद्विशेषाद्वशकृत्त्रियं॥ ॥माया
नमो हस्तिहिलि चंडमातंगिनीति च॥ स्वाहेति तिथिवर्णोस्य न्यासपूजादिकं भवेत्॥ राजमातंगिकातुल्यजपध्यायुतसेव्यकः॥
घृतपायसहोमश्च प्रयोगाद्यं च पूर्ववत्॥ ॥अथातः संप्रवक्ष्यामि कर्णमातंगिकामनुं॥ वाग्भवं हृदयं चाथ श्रीमातंगिपदं वदेत्
अमोघे सत्यवादीनि मम कर्णे पदं ततः॥ अवतर पदं द्वेधा सत्यं कथय युग्मकं॥ एह्येहि श्री व मातंग्यै नमस्त्र्यचर्णको मनुः॥ स्वंगा
निवाग्भवेनात्र पूजा प्रवक्तृता कृतं॥ लक्षं जपः पायसाज्यैः होमः सिद्धो भवेन्मनुः॥ कर्णेतु कथयेद्देवि पृच्छकस्य शुभाशुभम्॥
अथातः संप्रवक्ष्यामि सर्वमंत्रोत्तमोत्तमं॥ ऐं ह्रीं श्रीं श्रां समुद्धार्य्य ह्रौं क्लौं क्लीं ह्रां रमां वदेत्॥ श्रीमातंगेश्वरि सर्ववशंकार्य्यग्निगेहि
नी॥ त्रयोविंशाक्षरो मंत्रो नाम्ना मंत्रप्रसाधकः॥ निवृद्गायत्रिकाछन्दो दक्षिणामूर्त्तिको मुनिः॥ मातंगी देवता प्रोक्ता श्रां ड्रीं क्लौं बीजके
भवेत्॥ द्विरुक्तैश्च षडंगस्य विधिः पूजाजपादिकं॥ अष्टनवत्यर्णमंत्रसमं कार्य्यं तथाखिलं॥ लक्षत्रयं जपेन्मंत्रं मधुरत्रयलोलितैः॥
मधूकपुष्पैर्होमः स्यात् सितया पायसेन वा॥ हुनेत्तु दत्वाश्चफले मंत्रसिद्धिः प्रजायते॥ समस्तमंत्रदानादौ सिद्धिः स्यात्साधकोत्तम

अथान्यं संप्रवक्ष्यामि मातंगीमंत्रमद्भुतं ॥ कामिनिरंजिनि स्वाहाष्टाक्षरोयमुदीरितं ॥ ऋषिसंमोहनः छंदोनिवृत्प्रोक्तास्य देवता
सर्वसंमोहनी वागंधिरा च त्रिपदैर्भवेत् ॥ श्यामांगीवल्लकीं दोर्भ्यां वादयंतीं सुभूषणां ॥ वंशावतंसां विविधैर्गायेनेर्मोहनीजगत् ॥
पूजामातंगिनीपीठे स्याद्यास्तु त्रिकोणके ॥ पंचबाणास्ततः पूज्याः केसरे चांगपूजनं ॥ अनंगकुसुमाद्यास्तु पत्रेष्वष्टसु मातरः ।
लोकपालैश्चवज्राद्यैः संप्राप्तसिद्धिरियंमता ॥ प्रजपेदयुतद्वंद्वंदशांशं जुहुयात्ततः ॥ मधूकजैस्त्रिमध्वक्तैः सर्वसंमोहयेज्जगत् ॥
अत्रैवक्रममातंगी कौतुकं शृणु पार्वति ॥ प्रणवं पूर्वमुद्धृत्य नमो भगवती वेति ॥ कृष्णमातंगिनि शिरो वल्कलधारि चोद्धरेत् ॥ नम सर्वजन
मोहकारिमायावह्नीदीर्घयुक्ततः ॥ अमुकं पदमुद्धृत्य मेवश्यमाकृष्टिमुद्धरेत् ॥ ठरुस्वाहान्वितो मंत्रः सर्वेषां सुरपादपः ॥ ऋषिः कूर्म इति ख्या
तः सर्वदेवोत्तमोत्तमः ॥ विराट्छंद इति ख्यातं मायया तु षडंगकं ॥ ॐ बीजं भुवनाशक्तिः स्वाहा कीलकमीरितं ॥ त्रैलोक्यवश्यार्थमथ
विनियोगः प्रकीर्तितः ॥ वीणावादनकोविदांतु दघटा लावण्यलीलांबरां विंबोष्ठीवनजाक्षिमुंचतनुं ॥ व्याकीर्णकेशस्रजा ॥ लीलालो
लसुवर्णकुंडलधराधर्मांशुकामोदयां चंडीचंडपराक्रमा भवतु नः सर्वार्थसंसाधिका ॥ एवंध्यात्वाजपेल्लक्षं ततः सिद्धो भवेन्मनुः ॥ उच्छि
ष्टस्तः प्रजपेदुच्छिष्टेन वलिं चरेत् ॥ एवं प्रजपतस्तस्य सिद्धयोजनवश्यता ॥ ज्ञापयेतेदेवेशि किंपुनः श्रोतुमिच्छसि ॥ अथ भुव
नेश्वरीभेदाः ॥ वाग्भवंशंभुवनितारमाबीजत्रयात्मकं ॥ मंत्रं समुद्धरेन्मंत्री त्रिवर्गफलसाधनं ॥ षड्दीर्घभाजाबीजेन वाग्भवाद्येन कल्पयेत्

षडंगानिविधेयानिजातियुक्तानिदेशिकः॥ सिंदूरारुणाविग्रहांत्रिनयनांमाणिक्यमौलिस्फुरत्तारानायकशेखरांस्मितमुखी
मापीनवक्षोरुहां।पाणिभ्यांपरिपूर्णरत्नचषकंरक्तोत्पलंविभ्रतीसौम्यांरत्नघटस्थसव्यचरणांध्यायेत्परामम्बिकां॥ ॥रवि
लक्षजपेन्मंत्रंपायसैर्मधुरान्वितैः।तद्दशांशेनजुहुयात्तद्दशांशेनतर्पणं॥ ॥वाग्बीजपुटितामायाविधेयंत्र्यक्षरीमता
मध्येनदीर्घयुक्तेनवाग्भवेनप्रकल्पयेत्॥अंगानिजातियुक्तानिक्रमेणामनुवित्तमः॥यथापुरासमुद्दिष्टान्न्यासान्कुर्वीत
मंत्रवित्॥ ॥श्यामांगींशशिशेखरांनिजकरैर्दानंचरक्तोत्पलंरत्नाढ्यंचषकंपरंभयहरंसंविभ्रतींशाश्वतीं।मुक्ताहार
लसत्पयोधरनतांनेत्रत्रयोल्लासिनींवंदेहंसुरपूजितांहरवधूंरक्तारविंदस्थितं॥तत्त्वलक्षंजपेन्मंत्रंजुहुयात्तद्दशांशतः॥प
लासपुष्पैस्वाद्वक्तैःपुष्पैःवाराजवृक्षजैः॥इत्थंवाविहितेपीठेपूजयेत्परमेश्वरीं॥मध्यादिपूजयेन्मंत्रीहृल्लेखाद्याःपुरो
दिताः॥मिथुनादियजेन्मंत्रीषट्कोणेषुयथापुरा॥अंगपूजाकेशरेषुपूज्याःपत्रेषुमातरः॥भैरवांकसमारूढास्मेरवक्त्रा
मदारसा॥असितांगोरुरुश्चंडःक्रोधउन्मत्तसंज्ञकः॥कपालीभीषणःपश्चात्संहारश्चाष्टभैरवाः॥शूलंकपालंप्रेतंच
विभ्राणाक्षुद्रडुंडुभिः॥गजत्त्वचावराभीमाः॥कुटिलालकशोभिनः॥दीर्घाद्यामातरःप्रोक्ताःकृत्याद्याभैरवाःस्मृताः॥पू
ज्याद्दशपत्रेषुकरालाद्याःपुरोदिताः॥नवात्मानंगरूपाद्यालोकेशास्त्राणितद्बहिः॥एवमाराधयेद्देवींशास्त्रोक्तेनैववर्त्मना

वशयतिराजानंवनिताभ्रमदालसाः॥ श्रींभसाज्येनजुहुयात्लभतेचसुवांछितं॥ सुगंधैःकुसुमैर्हुत्वाप्रियमाप्नोतिवांछितं॥ मंत्रेणानेनसंजप्तमश्नीयादथमन्वहं॥ भवेदरोगोनियतंदीर्घमायुरवाप्नुयात्॥ ॥आनंतोबिंदुसंयुक्तोमायाभूम्याग्नितारवान्॥ पाशादित्र्यक्षरोमंत्रः सर्ववश्यफलप्रदः॥ ऋष्याद्याःपूर्वमुक्ताःस्युर्बीजेनांगक्रियामता॥ ॥वरांकुशौपाशमभीतिमुद्रांकरैर्वहंतींकमलासनस्थां॥ बालार्ककोटिप्रतिमांत्रिनेत्रांभजेहमाद्यांभुवनेश्वरींतां॥ हविष्यभुग्भजेन्मंत्रंतत्वलक्षंजितेंद्रियः॥ तत्सहस्रंप्रजुहुयात्जपांतेमंत्रवित्तमः॥ दधिक्षीरघृताक्ताभिःसमिद्भिःक्षीरभूरुहां॥ तत्संख्यातिलैःशुद्धैःजुहुयान्मंत्रवित्तमः॥ हृल्लेखाविहितेपीठेनवशक्तिसमन्विते॥ अर्चयेत्परमेशानिंवक्ष्यमाणक्रमेणतां॥ हृल्लेखाद्यायजेदादौकर्णिकायांयथाविधिः॥ अंगानिकेशरेषुस्युःपत्रस्थामातरःक्रमात्॥ इंद्रादयःक्रमात्पूज्यास्तेषामस्त्राणितद्बहिः॥ एवंसंपूजयेद्देवींसाक्षाद्वैश्रवणोभवेत्॥ रज्यतेसकलेलोकेस्तेजसाभास्करोपमः॥ अनेनाधिष्ठितंगेहंनिशिदीपशिखाकुलं॥ दृश्यतेपापिभिःसर्वैस्तस्याःस्वप्रभावतः॥ सर्षपैर्लोणसंमिश्रैराज्याक्तैर्जुहुयान्निशि॥ राजानंवशयेत्सयस्तत्पत्नीमपिसाधकः॥ अन्नवानत्रहोमेणश्रीसात्यमहुताभवेत्॥ राजवृक्षसमुद्भूतैःपुष्पैर्हुत्वाकविर्भवेत्॥ अरोगीलहोमेनघृतेनायुरवाप्नुयात्॥ प्रोक्तप्रोक्तानपिकर्माणिसाधयेत्साधकोत्तमः॥ ॥अथधूमावतीभेदाः॥ धूंबीजंचितयेत्प्रे

वधुरुद्युग्मंसमुच्चरेत्॥धूमावतिपदंप्रोच्यस्वाहाफट्समन्वितः॥मंत्रःप्राथमिकःप्रोक्तोद्वितीयंशृणुसादरं॥ ॥प्रणवंधूम्र
बीजंचधूमावतिपदंवदेत्॥देवदत्तोधावतीतिस्वाहांतोमनुराडयं॥ऋषिःक्षपणकःख्यातोगायत्रीछन्दईरितः॥धूमावती
देवताचधूंबीजंबीजमीरितं॥स्वाहाशक्तिःसमुद्दिष्टाविनियोगःप्रकीर्तितः॥धांधैंस्तुषडंगानिध्यानंशृणुवरानने॥काका
रूढातिकृष्णाभाभिन्नदंताविरागिणी॥मुक्तकेशीधूम्राक्षीक्षुत्तृषार्त्ताभयातुरा॥चंचलाचातिकामार्त्ताक्षिप्ताउद्धात
संगिका॥मलिनाश्रमनीरक्ताव्यक्तागर्भविरोधिनी॥धृतसर्पाग्रहस्ताचध्येयाधूमावतीपरा॥लक्षंजपेन्महेशानिव्र
गदुष्टाटनंचरेत्॥ ॥अथबगलामुखीभेदाः॥वह्निहीनेतुसुम्भाख्याबगलामुखितिसर्वयुक्॥दुष्टानांवाचमित्युक्त्वामु
खंस्तंभयकीलयेत्॥जिह्वांकीलयबुद्धिंतुविनाशयपदंवदेत्॥पुनर्बीजंततस्तारंवह्निजायाविधिंहरेत्॥तारादिकाचतु
स्त्रिंशदक्षराबगलामुखी॥गंभीरांचमदोन्मत्तांस्वर्णकांतिसमप्रभां॥चतुर्भुजांत्रिनयनांकमलासनसंस्थितां॥मुद्गरंदक्षि
णेपाशंवामेजिह्वांचवज्रकं॥पीतांबरधरांदेवींदृढपीनपयोधरां॥हेमकुंडलभूषांचचंद्रार्द्धकृतशेखरां॥पीतभूषणभू
षांगींस्वर्णसिंहासनेस्थितां॥न्यासपूजादिकंसर्वपूर्ववत्समुपार्जितं॥तारंचशक्रमायांचप्रासादंचततःपरं॥बगलामुखिविय
वोक्त्वासर्वदुष्टपदंवदेत्॥नकारंदीर्घसंयुक्तंबिंदुनाभूषितंतथा॥बीजंपंचकमुच्चार्यवाचामुखपदंवदेत्॥स्तंभयद्वयमुः

ञार्यपंचवीजानि चोच्चरेत्॥ वुद्धिंविनाशययुग्मं पंचवीजानि वोच्चरेत्॥ जातवेदमुखीमंत्रो जगदैश्वर्यकारकः॥ स्वर्कपंचकक
र्णिनवंघोयंमंत्रनायकः॥ ऋषिरत्राग्निरुद्रस्तु पंक्तिछंदमुदाहृतं॥ जातवेदमुखीमंत्रः देवतासमुदाहृता॥ ॐवीजं क्रौंस्वश
क्तिंवह्नींकीलकमुदाहृतं॥ पूर्ववन्यासविधिंचैव ध्यानंवक्ष्यामि सुव्रक॥ जातवेदमुखीमंत्रः देवताप्राणरूपिणी॥ भजेहंस्तंभ
नार्थंच स्तंभिनीं विश्वरूपिणीं॥ एवंध्यात्वाजपेन्मंत्रं क्लेशलक्षमुपावनं॥ यमेवैकमनाभूत्वा चिंतितार्थप्रदं ध्रुवं॥ गंधर्व
श्चैवयक्षांश्चगरुडारगपन्नगान्॥ वेतालडाकिनीमेत्यशाकिनीब्रह्मराक्षसान्॥ भूतांस्तंभयेत्सेतत्सत्यं शंकरभूत्वामु
खात्॥ तावप्रस्तंभमायावद्वह्निवीजंचपंचकं॥ प्रस्फुरद्वितयंचैव वीजंचैवत्रयोदश॥ ज्वालामुखीपदंचोक्त्वा वदेद्वीजत्र
योदश॥ सर्वशब्दं ततोधार्य दुष्टानांपदमुच्चरेत्॥ वीजत्रयोदशं चोक्त्वा वाचामुखपदं वदेत्॥ स्तंभयद्वितयं चोक्त्वा पुन
र्वीजंत्रयोदश॥ जिह्वांकीलयमुच्चार्य्य पुनर्वीजत्रयोदश॥ वुद्धिंविनाशययुगं पुनर्वीजत्रयोदश॥ वह्निजायासमायुक्तः
ज्वालामुख्यमयंमनुः॥ शतोत्तरंभवेद्विंशद्वीजवर्णमनुस्त्वयं॥ अत्रिश्चऋषिरेवात्र गायत्रीछंदउच्यते॥ ज्वालामुखीदेवताव
स्तंभनाय विनियुक्तिभिः॥ ध्यानंयत्नात्प्रवक्ष्यामि न्यासंपूर्ववदाचरेत्॥ ध्यानंविनाभवेन्मूकः सिद्धमंत्रोपि सुव्रक॥ ज्वलत्सुज
जपेन्मुक्तां कालानलसमप्रभां॥ चिन्मयंस्तंभिनीदेवीं भजेहंविधिपूर्वकं॥ एवंध्यात्वाजपेन्मंत्रं मर्कलक्षं सुवुद्धिमान्॥ तर्प्पणं

वगलाक्षीरैस्तालकेन कुनेत्सदा॥ तर्प्पणं च चतुर्लक्षं लक्षमेकं कुनेत्सदा॥ सहस्रविजयं चैव ब्राह्मणान् भोजयेत्ततः॥ त्रिम्
न्निस्तंभयेन्मंत्री पंचतत्त्वा न पिक्षणात्॥ आश्चर्य्यं दंसहा मंत्रं नराणां भुवि दुर्लभं॥ इदानीं मंत्रराजं च वक्ष्यनुमुखाक्षयं
मायास्तंभयवाणं च आश्चर्य्यं च कलौ युगे॥ तारं ल्क्रीं ह्रीं वडवाग्न्यं ह्लूं ह्लैं ह्लौं च ततः परं॥ ह्लः इस्तुषरेमुत्र क्रौं ल्क्रीं ल्क्रें च न
तःपरं॥ क्रैं ल्हौं ल्हैं स्वनतश्चो क्रौं वगलामुखिपदं वदेत्॥ सर्वशत्रुं ततो वाच्यं दुष्टानां पदमुच्चरेत्॥ वाचामुखं पदं चोक्त्वा स्तंभ
यद्वयमुच्चरेत्॥ आद्यं बीजं मनोः संख्या ऽक्षरैस्तु नराधिप॥ जिह्वां कीलय चोच्चार्य्य पूर्ववद्बीजमुद्धरेत्॥ वह्निजायासमाप्तु
क्तो शुद्धज्ञानमुखो मनुः॥ सविता चात्र विख्यातो गायत्री छंद एव च॥ देवतास्तंभनास्त्रं च शुद्धज्ञानुमुखी तथा॥ बीजं च वगलाबी
जं शक्तिर्माया कुमारक॥ कीलकं प्रणवं चैव विनियोगस्ततः परं॥ पूर्ववन्न्यासविद्यां च सर्वं पूर्ववदाचरेत्॥ ध्यानं यत्तस्य व
क्ष्यामि मंत्रभेदेन पुत्रक॥ कालानलनिभां देवीं ज्वलत्पुंजसरोरुहां॥ कोटिचंद्रसमायुक्तां वैरिजिह्वासमन्वितां॥ स्तंभना
नन्दमयीं देवीं दृढपीनपयोधरां॥ मदिरामदसंयुक्तां शुद्धज्ञानुमुखीं भजेत्॥ एवं ध्यात्वा जपेन्मंत्रमर्कलक्षं कुमारक॥ तर्प्पये
न्न दशांशं च गुडोदकसमन्वितं॥ तालकेन कुनेत्सर्वं दशांशं संस्कृताग्निना॥ ब्राह्मणान्भोजयेत्पश्चात्तु दशांशे कुमारक॥ मंत्रांते
च प्रकर्त्तव्यं सोभाग्यार्चनमादरात्॥ सोभाग्यार्चं विना पुत्र मंत्रसिद्धिर्न्न जायते॥ पंचास्त्रमंत्रसिद्धिस्तु दिवि देवेषु दुर्लभा॥ गोपये

त्सर्वदापुत्रगुप्तवीर्यवतीभवेत्॥नकर्त्तव्यंप्रयोगोस्यशापथादिकदाचन।यःकरोतिप्रयोगंचदेवताशापमाप्नुयात्॥ ॥अथसंतति
प्रदादिनामाविधप्रयोगमंत्रनाह॥ क्लीं ह्रूं ह्रौं अक्षरात्मायंमंत्रः कात्याप्रकीर्त्तिता॥प्रागज्जपादिकंचास्यविशेषात्संततिप्रदः
अथवंध्यात्वप्रशमनप्रयोगमाह॥ अथेदानींप्रवक्ष्यामिकुब्जिकामंत्रमुत्तमं॥रक्तमाडीचषष्ठीचडांकुरोजलकुमारकः
चतुर्विधोबाधकःस्यान्मुनिभिःपरिकीर्त्तितः॥तेषांस्वभावंवक्ष्यामियथाशास्त्रंनिशामय॥एतेषांफलदंकार्यंनरैःसं
ततिकांक्षया॥निःसारणंस्थापनंचबलिदानंविशेषतः॥कर्त्तव्यंगुरुवाक्येनज्ञात्वाशास्त्रस्यलक्षणं॥चतुर्विधोबाधकः॥
स्याज्जायतेसतुकालतः॥व्यथोत्कटस्तथानाभेरधःपार्श्वेस्तनेतथा॥रक्तमाडीप्रदोषेणजायतेफलहीनता॥मासेकेनभु
वेद्यस्याःक्षतस्मान्नद्वयंतथा॥नेत्रेहस्तेभवेज्ज्वालायोनौचैवविशेषतः॥ नानासंयुक्तरक्तश्चषष्ठिनांदूषणंभवेत्॥उद्वेगो
गुरुतादेहेरक्तश्रावोभवेद्ध्रुवं॥नाभेरधोभवेच्छूलंडंकुरस्यतुबाधकः॥ससल्लाचसगर्भाचसूक्ष्मेदेहाल्परक्तता॥जल
कुमारस्यदोषेणजायतेफलहीनता॥मासेकेनभवेद्यस्याःक्षतस्मान्नद्वयंतथा॥ मलिनारक्तयोनिःस्यात्षष्ठितीदूषणंभ
वेत्॥मासत्रयंचतुर्थंवामतुहीनाभवेद्यदि॥कृशांगीकरपादिःस्याज्ज्वालागंकूरदूषणं॥सदाकृशाभवेत्तेनषडुकालं
शतस्तथा॥गुरुस्तनीस्वल्परक्ताजलकुमारदूषणं॥ ॥अथपूजनविधिः॥ त्रिकोणमध्यषट्कोणंनवकोणंमंड

लाकृतिं। यंत्राने तान् समालिख्य पूजयेन् मंत्रपूर्वकं षष्ठिमातृकाया ध्यानं॥ ॥गौरांगीं शशिशेखरां पुत्रस्तेय भुजद्वयां॥
ध्यायेत्रिजगतांधात्री सूतिकालयवासिनी ॐकारकुमारयोर्ध्यानं। शुल्कवर्णांद्विवाहुंच सूतिकागृहसंस्थितं। स्त्रीरजःपा
यितंशांतं ध्यायेत्रिभुवनेश्वरं। षोडशैरुपचारैस्तु पूजयेत्रिदिनावधि। सुवर्णारूप्यताम्रादिपट्टवस्त्रादिभूषणैः। अष्टोत्तर
शतं मंत्रं सहस्रं वापि भैरव। एवं पूजादिकं कृत्वा वलिं दद्याद्विचक्षणः॥ वलिन्तु त्रिविधं दद्यात् खभूजलचरं तथा। वलिं दत्वा प्रयत्ने
न भक्षयेद्दोषधं शुचि। तारं मायां तथा लक्ष्मीं ह्रूं फट् स्वाहांतिको मनुः॥ जपेदष्टोत्तरशतं रक्तमाडीविधिं विदुः॥ तारं कामवी
ज युग्मं फट् स्वाहांतो मनुर्मतः॥ मंत्रोयं षष्ठिकादेव्याः पुत्रसिद्धिप्रदायकः॥ अं क्रीं वा विमला वीजयुग्मं वज्रयोगिनी मनुः
स्वाहांतोयं महामंत्रो ओंकारस्य तु वै जपेत्। तारं स्फूलायवेज्रतिहस्ताय तदनंतरं। स्वाहांतोयं मनुर्देवि जलकुमारस्य निश्चितं॥
स्नानकाले समुत्पन्ने देयमौषधमुत्तमं। रक्तकार्पासमूलं च नागदानां तथैव च॥ पिङ्गलायाश्च मूलं च मरीचेन समन्वितं। देयं
दिनत्रयं यावद्दष्टु विस्पा वराङ्गना॥ स्नानोपरि च दातव्यो मार्जकाः कीटकत्तसं॥ एकविंशति दिनं यावदुग्धेन सह मेथिकां॥
मेथीलोत्तकमेकं च खंडं च तोलकद्वयं॥ घृततोलकमेकं च पिवेदुग्धसमन्वितं॥ मृतवत्सा मृतगर्भाकाकवंध्या तथैव च॥ पुत्र
हीनाश्चवंध्याश्च यासां तो वपुःकीर्तिता॥ संहरेत्सर्वरोगाणां मेथीभक्षणमुत्तमं॥ अश्वगंधा या वर्व्या लोमूलं लक्षणामूलकं॥ भक्षये

स्रात्रा गोदुग्धपिष्ट्वा पुनः पुनः ॥ अवश्यं संततिस्तस्याः पुंहीना गर्भधारिणी ॥ अथ बालकसंस्कारे मंत्रमाह ॥ ॥ अथातः
संप्रवक्ष्यामि वाग्वत्याश्चमनुत्तमं । वाग्बीजं प्रथमो मंत्रो नारदोस्य मतो मुनिः ॥ छंदोनुष्टुप् देवता तु वाग्वती परिकीर्त्तिता ॥ बी
जपूर्वैर्द्धर्षड्दीर्घैः षडंगविधिरीरितः ॥ श्वेतांबरां श्वेतवर्णां श्वेतगंधानुलेपनां ॥ सुधाकुंभश्च पद्मश्च वीणापुस्तकमेव च ॥ क
रैर्द्दधंतीमीनस्थां मुक्ताभरणभूषितां ॥ एवं ध्यात्वा कर्णिकायां यजेद्देवीं षडस्रके ॥ रुद्रधारां मणिमतीं फल्गुं विषमतीं तथा
प्रभावतीं भानुमतीं भूधरनु दिगीश्वरान् ॥ लक्षत्रयं जपेन्मंत्रं पंचलक्षैस्तथा हुनेत् ॥ तर्प्पणादि ततः कृत्वा सिद्धमंत्रः ॥
प्रजायते ॥ सद्यो जातस्य वीरस्य जिह्वायां बीजमालिखेत् ॥ मधुना स्वर्णलेखन्या सोष्टवर्षैः कविर्भवेत् ॥ वाग्मत्यां वाथ गंगा
यां पुरश्चर्यां करोति यः ॥ द्वितीयस्य प्रतिग्राही भिक्षाशी वाथ मौनवान् ॥ ब्रह्मचारी भूमिशायी श्वेतांबरधरः शुचिः ॥ वाक्सि
द्धिं लभते वश्यं दाता भोक्ता त्वयाचकः ॥ ॥ रमात्रया वाग्बीजानि वदेत्रङें तां च वाग्मतीं ॥ नमो मम मेति च पदं धारेणा च तता
धियां ॥ वाचमद्भुतां प्रदेहि स्वाहांतस्त्वन्नवर्णकः ॥ प्रस्मादिकं तथा पूजा पुरश्चर्या च पूर्ववत् ॥ स्वलजिह्वस्य हि वाचं लिखितं
जलसादलेव वाकल्केन मंत्रं तु लिखितं भानुवासरे ॥ हविष्यमन्नं भुंजीत मौनी लवणवर्जितं ॥ सप्तभिर्भानुवारैस्तु साक्षात्स्या
द्धिषणोपमः ॥ अयुतं ग्रंथबोधाय ब्रह्मचारी जितेंद्रियः ॥ रवौ नु मायो वै मंत्रं लिखेत्स्वर्णशलाकया ॥ तदेव पायसं भुक्त्वा ध्यात्वा दे

वीत्वपेन्निशि स्वेष्टतमर्थंश्रृणुयात्स्वान्तर्वीजंस्वयंस्मरेत्॥ ॥अथश्रुतिधरत्वादिमंत्रमाह॥अथातःसंप्रवक्ष्यामिमुख्यवा
गीश्वरीमनुं॥ॐवाचस्पतेऽमृतप्लुवःप्लुॐवचसंवदेत्॥द्वादशार्णोमंत्रउक्तोमुनिःकश्यपकीर्तितः॥मुख्यवागीश्वरीदेवी
विराट्छंदःप्रकीर्तितं॥ह्वंशक्तिर्वाक्वाबीजंस्याहृद्गुवाचस्पतेइति॥अमृतेतिशिरःप्रोक्तंप्लुवःशिखाप्लुवर्मच॥वाचस्पतेऽमृ
तेतिनेत्रमस्त्रंप्लुवप्लुःच॥ध्यानपूजादिकंप्राग्वत्प्रयोगःकथ्यतेधुना॥संवत्सरंहविष्याशीसहस्रंप्रत्यहंजपेत्॥जपांतेदशवा
रेवजप्तेनोदकंपिबेत्॥तेनलोकोत्तरामेधाजायतेनात्रसंशयः॥जपेन्नोमन्त्रपकाशीतिपितलक्षंमनुंत्विमं॥साऽयंकोल
समिद्भिस्तुऊनेदष्टसहस्रकं॥भूतंभव्यंवर्त्तमानंसर्वंजानातिसाधकः॥कपिलाज्यप्लुतंब्राह्मीरसंप्रातस्तुयःपिबेत्॥तुल्लु
केकंमंविलेवदशवारंसमाचरेत्॥धारयेद्वेदशास्त्रादिप्रोक्तंवोक्तंववारकं॥सकृच्छ्रुतंतुयत्नेननचविस्मरतिकचित्॥ ॥
अथसंपत्प्रदमंत्रमाह॥कामशक्रूपदारूढरतिविंदुसमन्वितं॥वाग्भवंबीजमुच्चार्यपरांसादमुद्धरेत्॥अनुलोमविलोमे
नप्रोक्तासंपत्सरस्वती॥षडक्षरीमहाविद्यासर्वविद्योत्तमोत्तमा॥दीनानांतुदरिद्राणांगताधिकारिणांतथा॥संपत्सरस्वतीवि
द्यामहासंपत्तिदायिनी॥कण्वोऋषिर्महेशानिगायत्रंछंदईरितं॥संपत्सरस्वतीदेवीदेवतापरिकीर्तिता॥ऐंबीजंक्लींतथाशक्ति
र्होःकीलकमीरितं॥संपत्यर्थेमहेशानिविनियोगःप्रकीर्तितः॥षडक्षरैर्णदेवेशिषडंगंन्याससमाचरेत्॥व्यापकंनवधाकृत्वाः

ध्यायेद्देवी मनोहरां॥ अनेककोटिमातंगतुरगरथशक्तिभिः॥ सेवितामरणाकाणं वदे संपत्सरस्वत्रीं [redacted]
इति ध्यात्वा महेशानि त्रिकोणं वक्रमालिखेत्॥ षट्कोणं च ततो लेख्यं वृत्ताष्टदलभूषितं॥ भूउरेणासमाउक्तं यंत्रं संपत्समनो
मनं॥ संपत्सरस्वती देवि त्रिकोणोपरि पूजयेत्॥ दलेष्टमातृका पूजा भैरवेणसमन्विताः॥ चतुरस्त्रे लोकपातदस्त्राणि च तद्ब
हि॥ एवं मावरणान्यज्जपेल्लक्षत्रयं शिवे॥ दशांशेन महेशानि पालाशकुसुमैर्हुनेत्॥ उरश्चरणसंपन्नो उसौ गार्हेन वास्य
था॥ लक्षमेकं जपेन्मंत्रं दशांशं पायसैर्हुनेत्॥ अश्वसाहस्त्रसंयुक्तो राजा भवति भूतले॥ षट्सहस्त्रं जपेन्नित्यं दशांशं कम
लैर्हुनेत्॥ मातंगरथवृंदाव धनधान्यसमाहितः॥ तस्यगेहे महालक्ष्मी मंडलाज्ञायते शिवे॥ सहस्त्रं प्रजपेन्नित्यं संश्रनलेशालि
तंडुले॥ मंडलान्नात्र संदेहो भूपतित्वमवाप्नुयात्॥ विल्वमूले जपेन्मंत्री नित्यं दशसहस्त्रकं॥ सहस्त्रं जुहुयान्नित्यं संग्रनेलेशा
लितंडुले॥ मंडलान्नात्र संदेहो भूपतित्वमवाप्नुयात्॥ विल्वमूले जपेन्मंत्री नित्यं दशसहस्त्रकं॥ मासाद्धोन्मकला लक्ष्मी प्राप्नो
ति साधकः परां॥ हुनेद्विल्वसमिद्भिर्यो स्तन्मूले षोत्तरं शतं॥ तद्गेहे महदैश्वर्यं त्रिभिर्मासैर्भवेदपि॥ दशवारं स्पृशे स्त्रंज
प्त्वा भुंक्ते नरो यदि तद्गेहेन्नसमृद्धिस्यादक्षयं नात्र संशयः॥ नदीतीरे जपेन्मंत्रं मैकाग्रमनसा सुधीः॥ दशांशं गोघृतं हुत्वा व
शीकुर्याज्जगत्त्रयं॥ घृतेन जुहुयान्नित्यं वत्र सहस्त्रमदान्॥ स्वाणिमादिगुणोश्वर्यं मासमात्राप्नोति साधकः॥ ॥

अथरोगशांतिमंत्रमाह॥ अथलोकोपकाराय वक्ष्ये ध्यानजपादिकं। स्वस्य रोगादिके जाते शांतिर्येनाभिजायते॥ स्थित्वा स्वास
ने ध्यायेद्गुरुं वंदनपूर्वकं॥ मस्तकस्थितसंपूर्णचंद्रमंडलमध्यगं॥ श्रीप्रासादपरावीजं षोडशस्वरसंयुतं॥ मुक्तास्फटिककर्पूर
कुंदेंदुधवलं शुभं॥ सर्वेंदुवीजसंजातसुधास्नापितविग्रहं॥ आत्मानं भावयेदेवं परस्यात्मानमेव वा॥ श्रीप्रासादपरामंत्रम
ष्टोत्तरसहस्रकं तरुणोल्लाससहितो मंडलं तु जपेद्यदि॥ अपमृत्युमहारोगजरामरणजं भयं। ग्रहापस्मारवेतालभूतोन्मा
दादिसंभवं। जरादिव्याधिरहितः पुत्रपौत्रादिसंयुतः॥ जीवेद्वर्षशतं साग्रं पूजितः सर्वमानवैः। ज्वरोन्मादादिरोगेषु जपेच्छिर
सि चिंतयेत्॥ शूले वाते तु रोगे ग्रंथौ तत्स्थाने विचिंतयेत्॥ पूर्ववर्त्ती महारोगे सर्वांगव्यापिनीं स्मरेत्। तत्क्षणाच्छांतिमायांति सर्वरो
गा न संशयः॥ दशेंद्रिये यो ध्यायेत्तत्तदिंद्रियसौष्ठवं। सदा संचिंतयेन्मूर्ध्नि स भवेदजरामरः॥ ॥अथातः संप्रवक्ष्यामि मन्तुर
त्नः परं मनुं। तारप्रासादवीजं च व्योमव्यापिनं द्विठः॥ एकादशारी मंत्रोऽयं न्यासध्यानार्चनादिकं॥ प्रसादमंत्रवत्ज्ञेयं मर्धलक्ष
पुरस्कृतिः॥ दशांशं जुहुयादाज्यैस्तर्पणादि न तच्चरेत्॥ सिद्धमंत्रेणौषधं तु दत्वाभिमंत्रितं॥ पृथक्त्वगुणतामेति निर्वीर्यम
पि नान्यथा॥ अथवानेन संजप्तं पदेकादशधारकं॥ रोगिणां चौषधं दत्तं तत्तत्सर्वगुणं भवेत्॥ प्रातःकाले तु तुकोदकमेकादशाव
पि॥ मंत्रयित्वा पिवेन्नित्यं प्रत्यहं द्वादशाब्दकं। वलीपलितनिर्मुक्तो जीवेद्वर्षशतं युवा॥ त्रिवर्षाद्यमहारोगाः कुष्ठाद्या यांति संक्षये। ज्वरा

मेकादशाहेनोगहन्त्रान्नतोमृतुः॥ ॥अथशीतलायामंत्रमाह॥ अथवक्ष्येमहेशास्यवस्त्रप्रक्षालिकातुया॥ शीतलेत्विवषिख्या
तामस्त्यादिपिटेश्वरी॥ तारोमायारमाशीतलायैहृत्वन्तमोक्षरः॥ उपमन्युर्मुनिश्छंदोवृहतीशीतलासुरी॥ षड्दीर्घयुक्तयालक्ष्म
वीजाभ्यांस्यात्षडंगकं॥ ध्यायेत्वशीतलोदेवीरासभस्थांदिगंवरां॥ मार्ज्जनीसूर्प्पहस्ताचरक्तपुष्पाहिमार्चितां॥ तैलादिमलसंयुक्त
वस्त्रपोटलिशीर्षकां॥ त्रिकोणांतर्यजेद्देवींकोऽवांचमस्तुरिकां॥ सराधिकांचकोरोणुभूजैरत्वष्टभैरवान्॥ अयुतंप्रजपेन्मंत्रीपा
यसेनदशांशतः॥ होमंकृत्वातर्पणादिमंत्रसिद्धिःप्रजायते॥ नाभिमात्रेजलेस्थित्वायःसहस्रंजपेन्मनुं॥ तेनसंमार्जितास्त्रिर्वाः
स्फोटानस्यंतितत्क्षणात्॥ साधितोयेनमंत्रोयंतस्यवंशेनशीतला॥ तेनाभिमंत्रितंभस्मयद्गेहेतत्रसानहि॥ ॥अथविषहरमं
त्रः॥ अथवक्ष्येगरहरंवह्निमंत्रंचमत्कृतं॥ खःखस्याक्षरोमंत्रोमुनिरत्रिःप्रकीर्तितः॥ पंक्तिश्छंदोदेवताग्निःखोवीजंशक्तिकामु
खं षड्दीर्घस्वरयुक्तेनखकारेणांगकल्पनं॥ ध्यानार्चनादिकंसर्वस्याद्वैश्वानरमंत्रवत्॥ जपोद्वादशसाहस्रंतद्दशांशंघृतेर्हुनेत्
तर्पणादिततःकृत्वाप्रयोगंतुसमाचरेत्॥ स्वस्यवामेकरतलेध्यायेत्पंचदलेस्थितं॥ पद्मंतत्कर्णिकायांतुसविसर्गंखकारंसा
नुस्वारंखकारंचध्यायेत्पञ्चदलेषुच॥ सुधामयंचतज्ज्वालापश्चाद्धस्तंविभावयेत्॥ संपूर्णांवामृतमयंविषयुक्तंस्पृशन्जपेत्॥
अष्टोत्तरशतंसर्वंविषभयंविनाशयेत्॥ विषदंष्ट्र भूतानिसर्प्पवृश्चिकवेदनाः॥ ज्वालीजीर्णविसर्प्पवभ्रूलंदण्डादिसंभवं॥ नेत्ररो

गादिकंपीडांसर्वांगस्थांहरेदपि ॥ ॥अथकृत्याशांतिमंत्रमाह ॥ अथातःसंप्रवक्ष्यामिपरकृत्यनिवारिणी ॥ देवीप्रत्यंगिरानामसर्वाप
त्रिविघातिनी ॥ ॐअंकंवंतथारंतंपंह्रंभांफंसमुच्चरेत् ॥ फंमडक्लाफंतथाखंस्वाहांतःषोडशाक्षरः ॥ मुनिर्विधाताछंदोऽष्टिर्देवताःप
रूपकीर्तिताः ॥ महावायुमरापृथ्वीमहाकाशस्तथैवच ॥ महासमुद्रनामाख्यमहापर्वतएवच ॥ महाब्धिमध्येतिऊंबीजंह्रींशक्तिःपरिकी
र्तिता ॥ लज्जयानुषडंगानिषडुदीर्घान्वितयाचरेत् ॥ मंत्रदेवांस्ततोमंत्रीध्यायेत्सुस्थिरमानसः ॥ नानारत्नार्चिराक्रांतंवृक्षांभःप्रव
लैर्युतं ॥ व्याघ्रादिपशुभिर्व्याप्तंसानुशृंगंगिरिंस्मरेत् ॥ मत्स्यकूर्मादिबीजाढ्यंनवरत्नसमन्वितं ॥ घनच्छायांसकल्लोलमकूपारंविचिंत
येत् ॥ ज्वालावलीसमाक्रांतंजगत्त्रितयमद्भुतं ॥ पीतवर्णंमहावह्निंसंस्मरेत्क्षुद्रशांतये ॥ त्वरासमुत्थैरतौघैपमलिनंलुठ्ठमंदिवांय
वनंसंस्मरेद्विश्वजीवनंप्राणरूपतः ॥ नदीपर्वतवृक्षादिकलिताग्रामसंकुला ॥ आधारभूताजगतोध्येयापृथ्वीहमंत्रिणा ॥ सूर्या
दिग्रहनक्षत्रकालचक्रसमन्वितं ॥ निर्मलंगगनंध्यायेत्सात्त्विनामाश्रयप्रदं ॥ एवंषड्देवताध्यात्वासहस्राणितुषोडश ॥ जपेन्मंत्रंदशां
शेनषड्द्रव्यैर्होममाचरेत् ॥ व्रीहयस्तंडुलाश्चाज्यंसर्षपाश्वरवस्तिलाः ॥ एतेऊत्वायथाभागंपीठेपूर्वोदितेयजेत् ॥ अंगाष्टकृपाल
वज्राद्यैस्त्वंशिक्षितोऽसवेस्मतु ॥ शत्रुपद्रवमापन्नोयुंज्यात्मंत्रषट्येमतुं ॥ अकारंपर्वताकारंधावंतंशत्रुसंमुखं ॥ पतनोन्मुखमस्यंप्राच्यां
दिशिविचिंतयेत् ॥ ककारंक्षुब्धकल्लोलंप्लावितारिवलभूतलं ॥ समुद्ररूपिणंभीमंप्रतीच्यांदिशिसंस्मरेत् ॥ तुरीयपंचमाद्यर्णौपृथ्वी

गगनरूपिणो॥शत्रुवर्गं वधमानो श्चिंतयेन्नियतात्मवान्॥ तदग्निसंवर्णयुगं राज्ञो निश्वासपद्धति॥ निरुधानं स्मरेन्मंत्री विरुधाडि
उमाकुलं॥मायादिवर्णत्रितयं शत्रोर्मंत्रेश्च नीमुखं॥ प्रत्येकं तु निरुंधानश्चिंतयेत्साधकोत्तमः॥ वर्मसंक्षोभितं त्वसृग्रिपोराधारदेश
तः॥ उत्थाप्य वह्निं तद्देहं प्रदहन्तमनुस्मरेत्॥ एवं वर्णान्स्मरन्मंत्री जपेद्वर्णीसहस्रकं॥ मंडलत्रितयाद्वर्वाग्नाशयत्येव विद्विषं॥ एवं यः
कुरुते कर्म प्राणायामजपादिभिः॥ संक्षोधयित्वा स्वात्मानं स्वरक्षायै हरिं स्मरेत्॥ ॥अथ प्रत्यंगिरामालामंत्रसिद्धिः प्रकी
र्तितः॥ ॐ ओं नमः कृष्णवाससे शाते विश्वसहस्रहिं॥सिनि सहस्रवदने महाबले पराजिते॥ प्रत्यंगिरे परसैन्यपरकर्म्मपरं वदेत्:
विध्वंसिनि परं मंत्रो मादिनी तितनो भवेत्॥ सर्वभूतेति दमनि सर्वदेवान्वदेत्ततः॥ बंधयुग्मं सर्वविद्यां छिंधि क्षोभय द्वयं॥ परयं
त्रानि तिवदेत्स्फोटय च्छित्तयं ततः॥ सर्वशृंखलात्रोटय त्रोटयेज्ज्वलन्वोच्चरेत्॥ ज्वालाजिह्वे करालेति वदने प्रत्युच्चरेत् ऽगिरिं ॐ न
मः इत्येषः सप्तदशनवर्षवान्॥ ब्रह्मानुष्टुप्मुनिः छंदो देवी प्रत्यंगिरा मता॥ बीजं ह्रीं तारमाये कृत्यानाशे नियोजनं॥ षडंगानां
विधिश्चात्र षड्दीर्घाचितमायया॥ सिंहारूढातिकृष्णांगी ज्वालावक्त्रा भयंकरा॥ शूलखड्गकरा वस्त्रे दधती नूतने भजे॥ अयुतं प्र
जपेन्मंत्रं सहस्रं तिलराजिकाः॥ कृत्वापि सम्यगुमंत्रं प्रयोगे शतं जपेत्॥ ग्रहस्तादिकादिष्टं सिद्धेमंत्रं जपं न्नले॥ विनाशयेत्स्व
रक्षंतं यंत्रमंत्रादिसाधनं॥ ॥अथ ग्रहमानकालंतमाह॥ अथातः संप्रवक्ष्यामि ग्रहमानप्रसाधनं॥ ग्रहमानरितु ष्टायां किं

ढि

ग्रहेईरिते रिवा। ग्रहमातरिहृष्टायां तु ग्रहैः किं प्रयोजनं॥ मंगला पिंगला धन्या भ्रामरी भद्रिका तथा। उल्का सिद्धा शंकठा च विक
टा गर्भपालिका॥ रोइनक्षत्रतश्चाष्टा जन्माधिपस्ये क्रमाद्दशाः॥ फलंनॉनामानुरूपं स्यादेकोपचयतोऽस्या॥ पिंगलासूर्य्यप्र
नतीमहाधिव्याधिकारिका॥ तुष्टा वै छत्रवर्गस्य हृष्टा कुर्याश्च साधकं॥ कुंबीजं तु समुच्चार्य्य पिंगले वैरिवारिणि॥ प्रसीद फ
डिति प्रोक्तस्तयोऽग्निशक्तिवर्णकः॥ दीर्घषष्ठयुजा पूर्ववीजेन च षडंगकं॥ पिंगवर्णां पिंगकेशां पिंगनेत्रां धनुःशरान्॥ ह
स्ताभ्यां दधतीं पमपुगलंतां भजाम्यहं॥ ॥ अथ पूजाविधिं वक्ष्ये सर्वासामेव तंत्रतः॥ जपापुष्पाणि शस्तानि धूपो गुग्गु
लसंभवः॥ घृतप्रदीपमधुराणि नैवेद्याः पायसादयः अलंकारास्तथा रक्तास्तथा वस्त्राणि चंदनं॥ स्वर्णालंकरणैश्चापि सद्वैर्वरूचं
पकैः॥ तर्पयेत्परमेशानी तन्मंत्रैः सहस्रधा सुवर्णपत्रैर्निः छित्रे हस्तायामे मनोरमे॥ कृत्वा यंत्रं यथोक्तं तु योगिनीं तत्र पूज
येत्॥ तन्मंत्रवरं जप्त्वा विघ्नशांत्यै सहस्रशः मध्याह्नेन पुजायेत त्रिविधोत्पातवारणं॥ ततश्च कुंडं विधिवत्कृत्वा च चतुरस्रकं
अथवा स्थंडिले शुद्धे सुलिप्ते गोमयांबुभिः चतुर्हस्तप्रमाणेन योजयेत्स्थिरमानसः॥ योगीन्यग्निं तु संस्थाप्य कृत्वा पूर्वादिताः
क्रियाः॥ अन्यासां दशवारं तु विहिताया सहस्रधा॥ विल्वपत्रैस्तत्फलैश्च कमलैर्नागकेशरैः॥ जुहुयात्पायसान्नेन न तथैव कु
लवस्तुना॥ सहस्रमयुतं वापि लक्षं वा कामनाक्रमात्॥ ॥ अथातः संप्रवक्ष्यामि मध्ये देवीं प्रपूजयेत्॥ इच्छान्तानां क्रियां

शक्तिं त्रिषुकोणेषु पूजयेत्॥ मन्मथाख्यं च तदधः पंचकोणेषु पूजयेत्॥ षडंगं पूजयेत्पश्चाद् दलपत्रेषु योगिनीः॥ ततो वै भूपुरे लोके
पालानस्त्राणि पूजयेत्॥ पूजाप्रकारो होमश्च सर्वासामयमेव हि॥ विशेषः पुनरत्रास्ति शत्रोश्छेदाभिचारकैः॥ खड्गचर्मधरामुग्रां
ध्यायेत्षड्भुजधारिणीं॥ गरुडासनमासीनां वैरिनिग्रहकारिकां॥ लक्षमेकं प्रजप्यादौ जपेल्लक्षं हि तर्पयेत्॥ सर्वशत्रुविनाशः स्या
दुःखं नाप्नोति कुत्रचित्॥ ॥ अथातः संप्रवक्ष्यामि वृद्धमातुश्च साधनं॥ मायाद्यो वह्निजायांतो मंगले मंगलालये॥ एकादशाक्षरो
मंत्रो मंगलायाः प्रकीर्त्तितः॥ कृत्वा येन षडंगानि दीर्घैश्च पूजां तथा॥ ध्यायेद्देवीं त्रिनयनामुद्यदादित्यसंनिभां॥ दरस्मेरमुखांभोजां सिंदू
रसुंदराधरां॥ पद्मद्वयधनुर्बाणान् दधतीं भुजपल्लवैः॥ गुंजन्मंजुमंजीरकांचीगुणविराजितां॥ एवं ध्यात्वा महेशानीं पूर्ववत्परिपूजयेत्
ततो लक्षमनुं जप्त्वा तारमायापुरःसरं॥ योगिनीक्षेत्रवटुकगणाधिपबलिं हरेत्॥ सर्वासामेवश्जांते मंगले च प्रसीदति॥ योगिन्यास्तु
प्रसादार्थं वर्णलक्षं जपेन्मनुं॥ दूर्योगिन्यास्तु फलार्थं जपेत्तत्संख्यकायुतं॥ अष्टप्रतिवद्धस्य शुभायास्तु फलस्य च॥ षाडश्ये प्रजपेत्ता
वत्सहस्रं प्रत्यहं जपं॥ प्रकर्त्तव्यो वर्णशतं यावत्तुष्टा तु योगिनी॥ तुष्टाया वर्णश्लोकं रोगिणं चाभिमंत्रयेत्॥ वर्णतुल्येन मंत्रेणतायस्याः
सेवापरो भवेत्॥ तस्यापीडानिवृत्तिः स्याद्वर्णाभ्यांतर्गतैर्दिनैः॥ एवं विधिर्नवानां तु विज्ञेयः सुरसत्तमाः॥ योगिनीतुल्यफलदा वाममा
र्गे च दक्षिणे॥ ॥ अथातः संप्रवक्ष्यामि भ्रामर्या मोक्षमानसां॥ ह्रीं भ्रामरि पदं प्रोक्त्वा जयतां मे अधीश्वरि॥ भ्रामय ह्रूं षोडशाः

रौमंत्रोस्याः परिकीर्त्तितः ॥पिंगलावत्सर्वमस्याः ।सिद्धयं शर्करान्दशा मंत्रयित्वा नया मार्गे दशदिक्षु च संत्यजेत् ॥प्रातस्ततो व्रजेमा
र्गमार्गस्थाः सर्वे एव हि ॥सर्वे मोहं समायांति व्याघ्राः सर्पाश्च तस्कराः ॥स्तुल्कि नोउष्ट भयाश्च नित्यमेवं समाचरेत् ॥उपानत्कमले
यस्य लिखित्वा नामचाव्रजेत् ॥योजनैकं जपेन्मंत्रं सप्तमेव वसुंधरां ॥ ॥अथातः संप्रवक्ष्यामि भडिकांबुधमातरं ॥हूं वीजं तोय
मयोगाज्जातमादौ समुच्चरेत् ॥भडिके मे मम भड्डं देहीति च पदं पुनः ॥वदेच्च परमज्ञानिनाज्ञायद्धिमयं ततः ॥स्वाहांतो जिनवर्णीयं
भडिकाया मनुर्मतः ॥षड्दीर्घयुक्तवीजेन षडंगं विधिरीरितः ॥मंगलावक्रुभानां स्याध्यानं दुःफलदायिनां ॥पिंगलावत्स शुद्
ध्यं जपाद्यं प्रोक्तवर्त्मना ॥ ॥अथातः संप्रवक्ष्यामि धन्याख्यां गुह्यमातरं ॥श्रीधनदे समुच्चार्य धन्ये स्वाहाष्ट वर्णकः ॥ षड्दीर्घाः
घाद्यवीजेन षडंगविधिरीरितः ॥नास्ति धन्यासमा काचिदिह लोके फलप्रदा ॥पुरश्चर्यात्रयं कृत्वा प्राग्जन्मार्जितपातकं ॥संस्मं
भ्य धन्यादेवते धन्यात्वं साधकायतु ॥रहस्पतीश्वरात्पश्चात्कामाद्धन्यां विलोकयेत् ॥पुरश्चर्यानत्र कृत्वा वंशो धन्यः प्रजायते ॥
अथातः संप्रवक्ष्यामि सिद्धांशुक्रस्य मातरं ॥ह्रीं सिद्धे मे सर्वमानसमुक्तासाधनद्वयं ॥हृदयांतो मंत्रवर्णाः सिद्धाया मनुरीरितः
वीजैनैव षडंगानि जपाद्यं प्रोक्तवच्चरेत् ॥नास्ति सिद्धोपासकानां कर्मसिद्धिस्तुऊत्रचित् ॥उपासकाये सिद्धायाये नाम्नाय नजा
यते ॥नदाम्नायगदेवानां पाकेस्याः सर्वमेव हि ॥षट्कर्मसिद्ध्यन्ते तस्य मनोतरा धनं विना ॥ ॥अथातः संप्रवक्ष्यामि चोल्कां मे

दस्य मातरं॥ ॐ मम रोगं नाशय भंजयैकादशाक्षरी॥ सर्वरोगापहो मंत्रो मार्जनात्सप्तघस्रतः॥ उल्कामंत्रो यस्य सिद्धो नगरास्त
स्य मंदिरे॥ शीतलायां महामार्यां महिषं लक्षणान्वितं॥ उल्कापीस्येत पुत्सृज्य नगरे वा मयेत्सुनः॥ नानावाद्यैः परिवृतं वस्त्रादिभि
रलंकृतं॥ उत्सृजेत्तं यथाशा यासुपद्रवशमो भवेत्॥ ॥अथातः संप्रवक्ष्यामि सेकटांगङ्गमातरं॥ क्रीं सेकरे वरोगं मे परमं नाशय
द्रयं॥ षोडशार्णोस्तु मंत्रोयं सर्वदुःखापनोदनः॥ कारागृहे जपेल्लक्षं बंधमोक्षः प्रजायते॥ वीरेश्वरं तु दक्ष काश्यां सेकटा यत्र संस्थि
ता॥ तत्र षोडशलक्षाणि जप्त्वा होमस्तु दूर्वया॥ तस्य सिद्धो भवेन्मंत्रस्तन्मुखाद्यदि निःसरेत्॥ अमुकस्यामुकं कष्टं गतं तन्नष्टमेव हि॥
अथातः संप्रवक्ष्यामि विकटांकेतुमातरं॥ तारो नमो भगवति विकटे वीरपालिके॥ प्रसीद युगलं मंत्र प्रकृत्यर्णाः प्रकीर्तिताः॥ काश्यां वी
रेश्वरो सन्नापश्चिमे विकटा स्थिता॥ तत्र मंत्रमिमं जप्त्वा यहन्तस्ताश्च वालुकाः॥ उदरं वापि वंध्याया प्रसवेत्पास्तथा शिरः॥ यात्रादि
भिस्पृष्टबालान्तथा मातृविवर्जितान्॥ साधकस्य करे पृष्टानीरोगास्थिरजीविनः॥ ॥अथ सर्वशांतिकृन्मंत्रमाह॥ क्रीं हूं क्रीं
ॐ फडित्यष्टकास्वाहातः सप्तवर्णकः॥ न्यासादिकं दक्षिणा- विशेषाच्छांतिकारकः॥ ॥अथ वेतालसाधनमाह॥ भैरव उवाच
वेतालादि महासिद्धिः कथं भवति चंडिके॥ तन्मे कथय देवेशि यदि स्नेहोस्ति मां प्रति॥ ॥देव्युवाच॥ निम्बवृक्षोद्भवं काष्ठं श्मशा
नसाधकोत्तमः॥ भौमवारे मध्यरात्रे शवासन परांकिते॥ ततिलाज्याष्टलक्षांतैर्जपेन्महिषमर्दिनी॥ तत्सहस्रं हुनेद्धस्तं तत्रैव

पितृकानने॥ काष्ठमुद्धृत्य तेनैव दंडुपादुक विद्धितं॥ कृत्वा दुर्गाष्टमीरात्रौ श्मशाने निःक्षिपेत्ततः॥ एतद्दंडो महाभाग योगि
नीहृदयप्रिया॥ मम हस्तस्थितो नाथ ममाज्ञां परिपालय॥ एवमामंत्र्य वेतालं यत्र यत्र प्रगच्छते॥ ततं चूर्णी विधायाथ क्षालो
दयाति कौलिकं॥ गछ गछ महाभागे पादुके वरवर्णिनि॥ मत्पादस्पर्शमात्रेण घ्रां घ्रीं घ्रूं शतयोजनं॥ ॥अथ खङ्गसाधनं
अष्टलोहं समालोड्य पंचाशदंगुलाकृतिं॥ खङ्गं कृत्वा तत्र यंत्रं लिखित्वा प्रजपेन्मनुं॥ तस्य हस्ते ततो हुत्वा महाशक्कलेवरे
खनित्वा जीवंवृक्षाग्रे वध्याभुक्तं विभावयेत्॥ कुलाष्टम्यामर्द्धरात्रे विनामध्ये समाहितः॥ नतिपूर्वं समामंत्र्य हुनेत्पित्तवनेन त
त्वा मधुरत्रयसंयुक्तं बिल्वपत्रेण संयुतं॥ घोरदंष्ट्रे महाकालि करवालस्वरूपिणि॥ क्रां क्रीं क्रूं कुरु कल्याणि विपक्षे छेदवि
स्तरं॥ एवमामंत्र्य खङ्गं तु यस्य दिक्षु प्रक्षिपेन्नरः॥ छित्वा छित्वा पुनश्छित्वा गछ्याहवते पुनः॥ ॥अथ संग्रामविजयमंत्र
तारो दुर्गेद्वयं प्राणरक्षिणी स्वाग्निगेहिनी॥ दशाक्षरो मनुः प्रोक्तो भजतामिष्टसिद्धिदं॥ नारदर्षि विराट्छंदो जयदुर्गा च देवता
तारायै बीजं च मंत्रस्य परैः सर्वैर्णासमंता॥ जातियुक्तैरंगानि क्लिप्तिः काम्यकर्मणि प्रोच्यते॥ दुर्गा च हृदयं प्रोक्तं दुर्गे शिरई रितं
दुर्गायैस्याच्छिखा वर्म भूतराक्षिणी कीर्तिता॥ तारादि दुर्गे ध्वितयं रक्षिण्यक्षिप्रकीर्तितं॥ तारादि युगरं दुर्गे रक्षिण्यस्त्रमुदीरितं
मेघश्यामां ग्लोकिरीटां त्रिनेत्रां सिंघवाहिनीं॥ चक्रं दरं खङ्गशूलो भुजाग्रे दधती भजे॥ रणेपीठे यजेद्देवी मुक्तमार्गेण मंत्रवित्

प्रजपेत्पंचलक्षंवतद्दशांशंहुनेत्घृतैः॥ तर्प्पणादिततःकुर्यात्ततःसिद्धोभवेन्मनुः॥ ततःसिद्धमनुर्मंत्रीप्रयोगानाचरेत्सुधीः॥
इमंमनुंजपेद्भूयःप्रविशेच्छत्रुसंगरं॥ अशेषेणरिपुंहन्यान्नात्रकार्याविचारणा॥ विहारेव्यवहारेचैजप्तोविजयदोभवेत्॥ अनया
विद्ययारक्षापताकाध्वजदुंदुभिः॥ शुंडाशंखादिकंसर्वंयानेसेनांचसैन्यकं॥ संजप्तंतच्चसंग्रामेसम्यग्विजयकृद्भवेत्॥ अथाण्णा
प्रोच्यतेभेदोपघाघारिस्थलेयतेतत्॥ अणोवाजायतेतारान्नमःप्रोक्तापूर्ववत्॥ द्वादशार्णोभवेन्मंत्रःसंग्रामविजयप्रदः॥ ॥
अथगतराज्यप्रदंमंत्रमाह॥ क्रींक्रींक्रींहूंससुखार्थ्यंहूंलज्ञाठयमुद्धरेत्॥ दक्षिणेकालिकेस्वाहानिविवर्णःप्रकीर्त्तितः मंत्ररा
जोयमाख्यातःपूर्ववत्स्यादुपासना॥ विशेषाद्गतराज्यानामयंराज्यप्रदोभवेत्॥ ॥अथातःसंप्रवक्ष्यामिइन्द्राणींनष्टराज्यदां
रंइंद्राण्यैनमइतिमंत्रःप्रोक्तःषडक्षरः॥ गुरुर्ऋषिर्निष्वगायत्रीछंदोदेवींद्रवल्लभा॥ इन्बीजंशक्तिरिन्द्राणीनमःकीलकमुच्यते॥ वज्रप
शवराभीतिहस्ताश्यामावरांवरा॥ चतुर्दंतगमाकल्पछायासंस्थाहिरण्मभा॥ कोणषट्केघांगपूजातद्वास्येष्टदलेयजेत्॥ वगलां
छिन्नमस्तांचतारांदक्षिणकालिकां॥ धूमावतीभद्रकालीमहाकालीप्रतिक्रियां॥ तत्रन्मंत्रैस्तुतद्वास्येलोकेशानायुधानपि॥ ल
क्षषट्कंजपेन्मंत्रंमालतीकुसुमैर्हुनेत्॥ त्रिमध्वक्तैस्तावदेवराज्यार्थंराजवृक्षजैः॥ ॥अथांजनसाधनं॥ अथवाकृष्णमार्जार
मेकघातेनघातयेत्॥ कुजेचतुष्पथेरात्रौनिखनेन्मंत्रितंततः॥ तत्रमासंसमारोप्ययावत्पत्रंप्रजायते॥ तावत्कुर्याद्धविष्यान्नंप्रतिरात्रं

जपेत्सुधीः॥ अष्टोत्तरसहस्रं तु एकाकी दीथवर्जितः॥ उत्पन्नं पत्रमालोक्य छित्वा निश्छिद्रमाहरेत्॥ तत्र भुक्त्वा हविष्यान्नं तद्दिने तत्रि
नीतये॥ तमानीय मुहूर्त्तं गंक्षालयन्मंत्रमुच्चरेत्॥ इति स्रोतो मुखं वत्स यदस्थि पुनि गच्छति॥ तदानीं च यजेत्तत्र कालिकां घोरनिस्वनां॥ अ
भिमंत्र्य सहस्रं तु कालीमंत्रं समंततः॥ सिद्धांजनो भवेन्मंत्री नात्र कार्या विचारणा॥ वंदनागुरुकस्तूरीमिश्रणं चास्थिघर्षणं॥ कृत्वा
तिलकमादाय सर्वं जयति साधकः॥ कुलमीनं कुलान्नं च कुलमद्यं कुलेश्वर॥ कुलस्थाने समानीय कुलद्रव्यं प्रयत्नतः॥ अष्टोत्त
रसहस्रं तु जप्त्वा भूमितलस्थितः॥ भूमौ फट्कारमात्रेण विवरं तत्र जायते॥ शतयोजनदूरे वा यत्र साध्यस्थितिर्भवेत्॥ तत्रैव गम
नं तस्य भूतलांतः प्रसर्पणः॥ एवं विवरमध्ये वा गवाक्षकुहरेपि च॥ कायसंकोचमासाद्य गच्छेत्स विकलो नरः॥ दुर्गामंत्रं विना वत्स
कालीमंत्रं तथैव च॥ सिद्धयः कुलनाथेश जायंते न कथंचन॥ यथा काली तथा दुर्गा यथा दुर्गा तथोन्मुखी॥ यथा तारा तथा नी
ला॥ यथा नीला तथोन्मुखी॥ दुर्गायाः कालिकायाश्च ध्यानं समभिहोदितं॥ ॥अथांजनसिद्धिः॥ नेत्ररम्योवेरिकास्तुर्वेदाप्नः
र्णो मनुर्मतः॥ नेत्ररम्यं अंजनं च देहि युग्मं निधिं वदेत्॥ दशैयक्षितयं प्रोच्य फट्त्वं पदमुच्चरेत्॥ उरीकृतयुगं पंचस्वाहेति कथितो मनुः
परश्चरणमेतस्य अयुतत्रितयं भवेत्॥ घृताक्तगुग्गुरैर्होमो देवतां साधयेत्ततः॥ कानने करवीराणां रात्रौ वैशाखमासि तु॥ चतुर्द
र्णां जपे देवी नेत्रे रम्यं शतत्रयं॥ भौमस्तु वासरः प्रोक्तो ह्यथवा शुक्रवासरः॥ घृताक्तगुग्गुरैर्होमं ततः कुर्याच्छतत्रयं॥ ददाति मंत्रि

रीतस्मैस्वांजनंनेत्रबोधकं॥ निधिभूमिगतंवस्तुदूरदेशगतंतथा॥ अवलोकयंतीमंत्रीसमस्यो भवतिभूपति॥ ॥अथातःसंप्रवक्ष्या
मिकर्णमातंगिकामनुं॥ वाग्भवंहृदयंचाथश्रीमातंगिपदंवदेत्॥ अमोघेमत्यवादीनिममकर्णेपदंततः॥ अवतरवदद्वंधासत्यंक
थयद्युग्मकं॥ एंह्सैंह्स्त्रीचमातंगेपनमस्त्वस्वार्णकोमनुः॥ अंगानिवाग्भवेनात्रपूजापूंचकृताकृतं॥ लक्षंजपःपायसाज्यैःहोमः
सिद्धोभवेन्मनुः॥ कर्णेनुकथयेदेविपृच्छकस्यशुभाशुभं॥ ॥अथजातिस्मरणमंत्रमाह॥ योगिनीकोटराक्षस्यवेटीस्यान्निधिपू
र्वकाः॥ विधिपूर्वकेसमुच्चार्यवावर्त्तनखेरेतथा॥ फ्रोंस्त्रींस्वाहेतित्रिथ्यर्णोमंत्रोस्याध्यानमुच्यते॥ स्वच्छतोयैश्चसंपूर्णंवामेधत्तेक
मंडलुं॥ स्वर्णकुंडलदीप्ताव्यगंडांतांविधिपूर्वकां॥ जपेल्लक्षमितमंत्रंनदीतीरेमनोरमे॥ होमयेत्त्रिमधुरैःप्रयोगंततआचरेत्
कृष्णातीरेमहातीर्थेथवापंचनदेशुभे॥ माघमासेद्वितीयायांकृष्णपक्षेनिशांतरे॥ कृत्वातयाकुम्भलंतुनिक्षिपेत्तज्जलांतरे॥
कृत्वासायंतनंकर्मकुम्भलंपूजयेत्ततः॥ तत्रदेवींस्मरेन्मंत्रीकुम्भलान्तर्विशेद्ध्रुवं॥ तत्रवस्त्रासनोयोगीशांतवाधामुपेक्ष्यहि॥
जपेन्मंत्रसहस्रंतुदेवताविधिपूर्वकं॥ पंचवक्त्रांत्रिनेत्रांश्चपञ्चदशभुजांशिवां॥ ततःसादेवतातस्मैददातिचकमण्डलुं॥ जलपू
र्णंततस्तस्यजलेनासेचयेद्धियं॥ सनरस्तत्क्षणाद्देवसप्तजन्मसमुद्भवां॥ जातिंवदतितत्कालंतत्तत्कर्मकरोतिच॥ ॥
अथजलोत्पत्तिकारकगंगामंत्रमाह॥ अथातःसंप्रवक्ष्यामितामसावाघनागतं॥ वदिर्येजनकर्त्तारःसिद्धास्तुयेत्प्रभावतः॥ त्ता

रोनमोभगवतिवाग्भवंवहिलिठयं॥भिलिठयंवगंगेमांपायवह्वितयवदेत्॥स्वाहांतस्तारकावर्णोमनुःपापप्रणाशनः॥ईश्वरोस्य
मुनिःछंदोसितंगंगाचदेवता॥रामवेदांगवत्यंगनेत्रार्णैरंगकल्पनं॥रक्तांवरांरक्तवर्णांश्मूलकंभवतभयान्॥करैःसंदध
तीस्मेरांकच्छपस्थांसुरादिभिः॥तद्रूपाभिःसपापस्यनाशायसुनिषेवितां॥कार्तिकायांयजेदेवींषडस्रेष्टगपूजनं॥ततोष्टस्रे
तुधवलांयमुनांगंडकीमपि॥सरयूंतमसांवापिगंडकीवाग्मतीमपि॥कौशिकींचसमभ्यर्च्यतदाख्येष्टदलेयजेत्॥सुराब्धि
मासवाब्धिंचदुग्धसिंधुमथेक्षवं॥दधिसिंधुंवाज्यसिंधुंमधुसिंधुमिमांसमदिराभवं॥धातुसिंधुंरत्नसिंधुंमिरासिंधुंवसोभवां
माक्षीसिंधुंक्षालसिंधुंसुधायाःसम्भिदुद्भवां॥दिगीश्वरान्भूपुरेवपूजितेवंसरिद्वरा॥श्रलीभाद्राममार्गेचकृतंपापंविनाशयेत्
वर्णालक्षंजपेद्धोमःपद्मैःप्रोक्तोदशांशतः॥एवंसिद्धमनुर्मंत्रीमरूदातिकनिर्जलेदेशेगत्वाजलार्थंतुपुरश्चर्यांसमालभेत्
होमादिसर्वनिर्वर्त्यगंगामावाहयेन्नतः॥तत्रकूपादिकंकृत्वाभवेत्तदमृतोपमं॥कल्यस्नापितयागाढंसमस्तगदनाशनम्॥
रयमादिमसप्तार्णोत्पन्नेत्कातुनरवोक्षरी॥प्राग्वत्सुन्यादिकंवारावेदत्रित्रित्रिवाकुभिः॥मंत्रार्णैःस्युःषडंगानिपुरश्चर्यांतुल
क्षकं॥होमद्रव्यादिकंप्राग्वत्सिद्धमंत्रःसमाचरेत्॥प्रयोगांज्जलमध्येतुस्थित्वाजप्यात्युतंमनुः॥अहादवर्षाकालेपिवृष्टिर्भवति
भूयसी॥अयुतंत्वमनुंजप्त्वामहत्स्वंजरजेऊनेत्॥संपाताज्यंपिवेद्यास्त्रीगोर्वाक्षीरनिधिर्भवेत्॥अनेनमंत्रितंतोयंवर्षमेकं

पिवेत्तया॥ तस्याः पुत्राः प्रजायंते भीष्मतुल्यपराक्रमाः॥ एतन्मंत्रजपासक्तैः पादतीर्थं क्षिपेद्दृद्रि। मूत्ताविघ्नस्य तत्कालं मुक्तो भवति नान्यथा॥ तारो हिलि मिलि ठंठं गंगे देवि नमो मनुः॥ तिथिवर्णोस्य मुन्यादि पूजा पूर्ववदीरिता॥ त्रिदिग्व्याक्षिकृतावर्णैः षडंगविधिरीरितः॥ एतस्य भजनाज्जंतो मातीर्थे मरणं भवेत्॥ तारो लज्जा रमा हार्दं ततो भगवती पदं॥ संबुध्यंतं गंगदपि तेन मा ऊं तथा स्वकं अष्टादशार्णो मंत्रो यं मुन्याद्यं पूर्ववन्मतं॥ जपादिना सिद्धमंत्रप्रयोगान्नाचरेदपि॥ पुत्रजीवफलैर्होमात्सुत्राप्तिस्सुताद्भवेत्॥ गुडूच्या रोगनाशः स्यात्पयःपद्मादिहोमतः॥ लक्ष्मीप्राप्तिः श्रीफलैश्च सर्षपैरभिचारकं॥ जातिप्रसूनैर्वश्यं स्याज्जपापुष्पैर्जयो भवेत्॥ अथ वृष्टिकारकमंत्रमाह॥ कंकालो नाम वेतस्यैव दीतत्ता धनं ध्रुवं॥ कंकाली जलदेवीति जल पूरय पूरय धं धं सप्तदशार्णोयं जपेद्वर्णसहस्रकं॥ अवृष्टिकाले रात्रौ च रेवानद्यां जले जपेत्॥ कंठमात्रे युतस्त्वेकं ध्यायन्देवीं समाहितः कंकालीं वारुणीं पाशं बिभ्रतीं जलरूपिणीं॥ विद्युद्धनस्वरूपाभां घोरगर्जनभीषणां॥ प्रभाते वृष्टिरायाति सा हि पंचदिनावधि अथान्यत्संप्रवक्ष्यामि सर्वमंत्रोत्तमोत्तमं॥ ऐं ह्रीं श्रीं श्रां समुच्चार्य ह्रौं क्लैं क्लीं ह्रीं रमां वदेत्॥ श्रीमातंगेश्वरि सर्वकांकर्ष्यस्त्रिगेक्षिनी॥ त्रयोविंशाक्षरो मंत्रो नानामंत्रप्रसाधकः॥ निवृद्गायत्रिका छंदो दक्षिणामूर्तिको मुनिः॥ मातंगी देवता प्रोक्ता श्रीं ह्रीं क्लीं बीजकैर्भवेत्॥ द्विरुक्तैश्च षडंगस्याद्विधिः पूजाजपादिकं॥ अष्टनवत्यर्णमंत्रसमं कार्यं तथाखिलं॥ लक्षत्रयं जपेन्मंत्रं मधुरत्त्रय

लोलितैः॥ मधुपुष्पै होमः स्यात्मितयापायसेन च॥ हुनेत्कदल्याश्च फले मंत्रसिद्धिः प्रजायते॥ समस्तमंत्रदानादौ सिद्धिः स्यात्साधको
त्तमः॥ अथ देवतावेशमंत्रमाह॥ अथातः संप्रवक्ष्यामि कौमार्या विधिमुत्तमं॥ क्लौं कौमार्यै नमरिति षडर्णो मंत्र ईरितः॥ मुनिर्ब्रह्मा
व गायत्री छंदः कौमारिका भवेत्॥ देवता कौमिदंवीजं कौमार्यै शक्तिरुच्यते॥ मंत्रवर्णैः षडंगानि हृदि ध्यायेच्च देवतां॥ शान्त्यक्षस्त्रव
राभीतिकरां वंधूकसंनिभां॥ मयूरध्वजिनीं रक्तवस्त्रामोडुंवरस्थितां॥ हरित्कंचुकिकां रम्यां नानालंकारभूषितां॥ आदावंगानिचा
भ्यर्च्य पंचकोणे यजेत्ततः॥ अहल्यां द्रोपदीं सीतां तारां मंदोदरीमपि॥ ब्राह्म्यादिकानष्टस्लोरक्षती साधुधामिनि॥ मुख्या पूजा
भवेदस्याः कुमार्यामेव नान्यतः॥ कुमार्य्यभावेऽन्यदेशे पूजयेत्तु समीरिता॥ लक्षषट्कं जपः प्रोक्तः पंचखाद्यैस्तथा हुनेत्॥ मधु
त्रयसंयुक्तैः सिद्धमंत्रस्तदा भवेत्॥ तर्प्पणं मार्जनं कृत्वा कुमारीणां च भोजनं॥ अथ मोर्दनकं वक्ष्ये देवाविर्भावकारणं॥ पाकक्रि
यां प्रकर्त्तव्यं चतुर्भक्ष्यसमन्वितां॥ भार्यया साधकेन्द्रस्य पातिव्रत्यादियुक्तया॥ अप्रसूतास्त्रियः पंच आहूयेत्सकुमारिका॥ अलं
कृताः पवित्रास्ता एकपंक्त्या प्रवेशयेत्॥ तदादौ विघ्नप्रस्थानमंते तु वटुकस्य च॥ तासं पूज्य महत्पात्रं पवित्रं तत्र चानयेत्॥ स्वस्वद्वि
गुणामानेन मध्वाज्यसमिता दधि॥ दुग्धं च निःक्षिपेत्तत्र नैवेद्यं तत्र निःक्षिपेत्॥ कुमारिकाया हस्तेन मंथयेयुस्त्रियश्च ताः॥ मंथ
येयुस्त्रियस्तत्र देवावेशः प्रजायते॥ दैवावेशे जायमाने सुगंधो वाति मारुतः॥ सर्वं मनोगतं वक्ति देवतासुप्रसीदति॥ सिध्यंति

सर्वकार्याणि मोटकानां शतेन वा। नरेवैर्भवेद्दिवा कुसुमं वा सद्भिः श्रुतास्तथा॥ अशीत्यागतराज्यास्त्रिविंशत्यालभ्यते धनं। अष्टोत्त
रशतेनापि साधकेन तु मेलयेत्॥ कौमारिका चेष्टदेवं कुमार्या ईरितो विधिः॥ ॥अथ मुक्त्युपायमाह॥ देव्युवाच॥ क्वचिद्दक्षं क्वचिद्वा
मं क्वचित्सौरं च शांभवं। ऊर्ध्वाम्नायं क्वचिद्दक्षमुत्तरं पश्चिमं क्वचित्। अधश्चाम्नायकं चापि गाणापत्यं च वैष्णवं। पारसीकं क्वचिद्बौद्धं पाखं
डं च क्वचित्क्वचित्। क्वचिन्निर्द्दैवतं मार्गं वेदांतं वैदिकं क्वचित्। दीपधर्मान्खंडधर्मान् कुलधर्मान्क्वचित्क्वचित्। देशधर्मान्कालधर्मान्ज्ञा
तिधर्मान्क्वचित्क्वचित्। तन्नत्वकूरोस्तोषि क्वचिन्निन्दसि तं पुनः॥ तंत्रोत्तममिदं तंत्रं प्रसन्नश्चेत्सुरोपरि। तदातत्वं मम ब्रूहि मे संदे
हान्मुनीन्कुरु॥ ॥श्रीशिव उवाच॥ अहो कालस्य माहात्म्यं तंत्रे तंत्रे त्वया पुनः॥ पृच्छ्यते तन्नदाधिक्यं साहंकारं ब्रवीमि तत्। वेले
यं सात्विकोऽकाचिज्ज्ञाता कालस्य यत्त्वया। उपकाराय सर्वेषां पृष्टं तत्त्वं ब्रवीमि तत्॥ यथा वेदे तथा लोके यथा कालं प्रजायते॥ य
था ब्रह्मांडगोलोयं लिख्यते यत्र मध्यतः। सत्येन त्वत्र च पश्यत्वं पतितं कियदंतरं॥ तथा नरेण कालेन वेदेन तरशास्त्रतः। अंतरं पश्य
देवेशि शृणु तत्वं सनातनं॥ यथा चानहतः शब्दो नरेक्षण्यः प्रवर्त्तते॥ सनित्योपि पतेत्कर्मे न कदापि सुमूर्षतः। महापुरुषकालस्य
तथा वेदध्वनिः स्मृतः॥ कले ईश सहस्राणि यदा वर्षाणि यांति च॥ वेदो नारायणः साक्षात्कालाचयवजंतुभिः। न श्रूयते तदो दे
विज्ञेयः कालः समागतः॥ वाग्जृंभाक्षुतपर्दादिज्ञा वाक्योत्पन्निनस्वराः॥ वेदभिन्नानि शास्त्राणि तथा जानंतु देवताः॥ यस्य शास्त्रस्य

लोकेस्मिन्प्रवासे यावदस्ति हि तावत्तन्मार्गिणां सोऽलं वेदमार्गे प्रकुंठितः। तस्मात्तन्मार्गकर्त्तारः शिष्यास्तन्मंत्रदायिनः। ताना
नयंति स्वमार्गे यतस्तावत्सुखं भवेत्॥ नृणां ज्ञानं यथा षड्भिरिंद्रियैः परिजायते॥ तथा षडंगैर्वेदार्थज्ञानं भवतीति निश्चितं॥ कर्मे
न्द्रियाणि च तथा नृणां पंच मितानि तु॥ तद्वत्कालमहेशस्य पंचाम्नाया मयेरिताः॥ ऊर्द्ध्वाम्नायसमुद्दिष्टं वाचिकं कर्म तस्य तत्
तत्र प्रमाणं वेदाः स्युस्तदंशाः स्मृतयस्तथा॥ तदंगानि पुराणानि गायत्र्याद्याश्च देवताः॥ ब्रह्मबीजं तथा सेत्रं संस्कारं ब्रह्मसंभ
वाग्ब्राह्मणावरणां ब्रह्मविद्याभिर्ब्राह्मणो भवेत्॥ यस्मात्कपावयं यस्य वा स्वमर्थोनुधावति॥ एकस्मिन् लक्षणे हीने वाग
र्थमनुधावति॥ द्विहीने लक्षणे देवि स्याद्वारा ब्राह्मणो भवेत्॥ लक्षणत्रयहीनोयस्तंत्रमार्गेणासिध्यति॥ चतुर्लक्ष
णहीनानां मार्गाः स्युः कौलिकादयः॥ एतल्लक्षणाभिन्नेन यथादेशं यथाकुलं॥ यथाजाति यथाकालं कर्त्तव्यो धर्मसं
ग्रहः॥ मिथ्यासंभाषणं स्तेयं सर्वमार्गेषु गर्हितं॥ यत्किंचिज्ज्ञानमयत्कर्म न जपो न तपः क्रिया॥ जीवन्मुक्तः स सत्यवक्ता
सर्वसत्वेषु तिष्ठितं॥ अहिंसा परमो धर्मः सर्ववाक्कायकर्मभिः॥ दृढोयस्य न चाचारो न जातिः सोपि मुक्तवत्॥ परम
त्तायत्र तन्नु विश्वावयस्य वेतसि॥ स पुष्कलोपि ज्ञानी हि जीवन्मुक्तो न संशयः॥ षडिंद्रियज्ञानवतां सृष्टिर्भवति मैथुनात्
त्यक्तं तन्मनसा येन जीवन्मुक्तः स कोपि हि॥ देवाः पूजनमिच्छंति तस्माद्देवाः प्रतिग्रहान्॥ भुक्तवद्योपतिग्राही जीवन्मुक्तः

सएवहि।शौचंप्रकुर्वतोनित्यंविस्पष्टाशुद्धिः कलेवरे॥देहाभिमानोगलितोजीवन्मुक्तःसएवहि॥यथेच्छालाभसंतुष्टः स्तो
तिनोनवनिंदति।नसुखस्तुखेनहृष्टदुःखेकर्मनाशात्प्रमुच्यते॥हित्वाविषयसेवांयस्तपस्तपतिनिर्जने॥यत्फलंकाम
येत्किंचिज्जीवन्मुक्तःसएवहि॥यावद्देहस्यनिर्वाहस्तावत्कालंपरिक्षिपेत्॥वेदस्याभ्यासतःसर्वयोनयेत्सतुमोक्षमा
न्॥कोहंकिंरूपतेकर्त्ताकोस्ययातिकवेत्तसि॥इतिसंभावयंनित्यंमहाकालेलयंव्रजेत्॥एतेतुसुगमोपायानात्र
विघ्नंस्थिरंभवेत्॥कामक्रोधाभिमंतत्रंमहामायाविमोहितं॥दुर्विज्ञेयादुर्निवारामहाकालस्यगेहिनी॥तद्दंशाए
धनात्सानुप्रसन्नावेद्धिपुंवति॥सुबुद्धिभिःप्रियेःपुत्रैर्यथामाताप्रतार्यते॥तथाप्रतार्यतेचेयंजीवन्मुक्तःसजायते
कृतंवंधार्थमनयाखानपानंचमैथुनं॥तेनैवचेदियंवध्वास्वयंमुक्तस्तदाभवेत्॥वामिकैःकौलिकैस्तस्मादज्ञातैश्चः
गुरुंविना॥समस्तैरथवाज्ञातैर्वध्यतेयेनचेतनैः॥वंध्येयंवंधनैःस्वस्यत्रोटयेद्वंधनानिच॥भावयेच्चमहाकालंजी
वन्मुक्तस्तदाभवेत्॥वंधमोक्षप्रकारास्तुतंत्रेसंकलितामया॥येज्ञातागुरुमार्गेणतैर्वद्धेयंसुदुस्तरा॥सुमुक्तान्मान
वोभूत्वाज्ञानीचेन्मोक्षमाप्नुयात्॥चतुराशीतिलक्षेषुशरीरेषुशरीरिणां॥नमानुष्यंविनान्यत्रतत्त्वज्ञानंतुलभ्यते॥
अत्रजन्मसहस्राणांसहस्रैरपिपार्वति॥कदाचिल्लभ्यतेजंतुमानुष्यंपुण्यसंचयात्॥सोपानभूतंमोक्षस्यमानुष्यं

रव मातृकाको अन्तिम पत्र

प्राप्य दुर्ल्लभं। यस्तारयति नात्मानं तस्मात्पापतरोत्र कं॥ नरः प्राप्योत्तमंजन्मलब्ध्वाचेन्द्रियसौष्टवं।नवेत्यात्महितंयस्तु
सभवेद्ब्रह्मघातकः॥ विनादेहेनकस्यापिपुरुषार्थोनविद्यते॥तस्माद्देहंधनंराज्यंपुण्यकर्म्मनियोजयेत्॥रक्ष
रक्षयेत्सर्वदात्मानं मात्मासर्वस्य भाजनं॥ रक्षणेजत्नमातिष्ठेज्जीवंभद्राणिपश्यति॥पुनर्ग्रामंपुनःक्षेत्रंपुनर्वित्तं
पुनर्गृहं।पुनःशुभाशुभंकर्म्मनशरीरंपुनःपुनः॥शरीरलक्षणायासः सततंक्रियतेजनैः॥यावत्तिष्ठतिदेहोयंता
वत्तत्वंसमभ्यसेत्॥ब्रह्माविष्णुमहेशादिदेवताभूतजातयः॥नाशमेवानुधावंतितस्मात्तत्वंसमभ्यसेत्॥याव
न्नजायतेदुःखंयावन्नायातिचापदः॥ यावन्नेन्द्रियवैकल्यंतावत्तत्वंसमभ्यसेत्॥ ॥तंत्राणियानिस
कलानिनतानिमर्त्यैः संस्थैवयानिनपुनः प्रकटानितानि। देशान्तरेकतिकतीहनसर्वमस्ति।ग्रंथेत्वपूर्णव
वनेकिमुदूषणंमे॥ ॥एकस्याः पदपद्मपूजनविधेर्निःशेषतोनिर्णये शंभुः पंचमुखोप्यनेककवपु
र्मृत्युंजयोनक्षमः॥ दिग्विद्याक्रमनिर्णयोवितततयाग्रंथेप्रवृत्तोस्मियत्तद्यांवल्पतरंकृतंबुधवरैःक्षंतव्यमे

तद्भुवम्॥ ॥इति नवमिसिंहकृते श्रीनेत्रचिंतामणौ मातृकावर्णध्यानादिदशविद्यादिनानामंत्रभेदमुक्त्युपायनिर्णयो
नाम चत्वारिंशत्तमः प्रकाशः॥ ४० ॥समाप्तश्चायं ग्रंथः॥ ॥शुभमस्तु सर्वजगताम्॥ ॥शुभम्॥

ला.सं — ३७५
हा.सं — ४

॥तंत्रचिंतामणिसमाप्तपत्र॥